वैयाकरण सर्वस्वं
पत्र सं० १६० (अपूर्ण)
१६०

वैयाकरण सर्वस्वम्
पत्राणि १६० (अपूर्ण)
१६०

द्वितीयाह्निके व्याख्यातानि १४ ।१। वृद्धिरादैच् संज्ञाप्रदेशाः ६ १ ८८ ७ २ १ कौ सु से आपैऔप्ते वृद्धिसंज्ञाः स्युः
आद्यः शैक्षिकः औपगवः संज्ञाधिकारसंज्ञीसंप्रत्ययार्थः १ संज्ञासंज्ञ्यसंदेहश्च २ प्रत्येकं गुणवृद्धिसंज्ञे भवतः ३ आका
रस्य परकरणं भेदकत्वात्स्वरस्य ४ अस्ति प्रयोजनमेतत् किं तर्हीति भेदकत्वाद्गुणस्येति वक्तव्यम् इति भाष्यम् २ अदेङ्गुणः
संज्ञाप्रदेशाः ६ १ ८७ ७ ३ ८३ कौ सु से अअएओ गुणसंज्ञाः स्युः । अर्ति रति ओवति ३ इको गुणवृद्धी परिभा
षासूत्रमिदम् प्रदेशाः ६ १ ८७ कौ सु प स्वशब्देन यत्र गुणवृद्धी विधीयेते तत्रेक इति षष्ठ्यन्तं पदमुपतिष्ठते तरति मार्ष्टि
------ मृजेरजादौ किति वा वृद्धिः १ इति भाष्ये वृद्धिः परिमृजन्ति परिमार्जन्ति कौ ति सु इति श्रीपाणिनिसूत्राणि भाष्ये प्रथमा
ध्याये प्रथमपादे तृतीयाह्निके गतानि ४ न धातुलोप आर्धधातुके कौ० ति० यङ् लुङ् न धात्वंशलोपनिमित्ते आर्धधातु
के परे इको ये गुणवृद्धी प्राप्नुतस्ते न भवतः लोलुवः पोपुवः मरीमृजः यङ् यक क्य वलोपे प्रतिषेधः १ यङ् वे भिदिता यक
कुषमिता क्य समिधिता वलोपे जीरदानुः ५ क्ङिति च कौ ति ग्गाक्कित्ङि निमित्ते च लक्षणे गुणवृद्धी न स्तः गित्
जिष्णुः कित भित्त्वः ङित चितः मृष्टः मृष्टवान् क्ङिति प्रतिषेधे तन्निमित्तग्रहणम् ६ दीधीवेवीटाम् कौ ति । आदी
धीवेव्योरिटश्च गुणवृद्धी न स्तः आदीध्यनम् आदीध्यकः आवेव्यनम् आवेव्यकः इट् भविता दीधीवेव्योश्छन्दोविषयत्वा
त् प्रतिषेध इति भाष्यम् ७ हलोऽनन्तराः संयोगः संज्ञाप्रदेशाः ६ १ ३ ८ २ २२ कौ । सु से स्वरैरव्यवहिता हलः संयोगसं
ज्ञाः स्युः कुक्कुट संयोगसंज्ञा योः सहवचने यथा स्यात् १ स्वराऽनन्तर्हितवचनम् २ ८ मुखनासिकावचनोऽनुनासिकः
संज्ञाप्रदेशाः १ ३ २ ८ ३ २ कौ सु से मुखसहितनासिकयोच्चार्यमाणोऽनुनासिकः स्यात् रामः संस्कर्ता ॥ नासि
कावचन इतीयमस्यमानेषमानुस्वाराणामेव स्यात् इति भाष्यम् ९ ओत् कौ सु सं ओदन्तो निपातः प्रगृह्यः स्या
त् अहो ईशाः आहो इति उताहो इति ओतश्च प्रतिषेधः १ अनदः अदः समभवत् अदोऽभवत् गोणमुख्ययोः संख्ये

सू॰ पा॰
२

कार्यसंप्रत्ययः १ परिभाषेयम् १६ मम्बुद्धौ शाकल्यस्येतावनार्षे कौ स्फ ग्र संबुद्धिनिमित्तकस्यौकारो वा प्रगृह्यश्चास्मा
द्वैदिके इतौ परे विष्णोइति विष्णोविति विष्णाइति ९ तुल्यास्यप्रयत्नं सवर्णम् संज्ञाप्रदेशाः ६ । १ । १० । १ । ८ । ४ । ५८
कौस्त संताल्वादिस्थानमाभ्यन्तरप्रयत्नश्चयस्येयेनतुल्यं तद्धर्णेद्वयं मिथः सवर्णं स्यात् दण्डानयनम् स्थानप्रयत्नवि
वेकः वर्णाः तद्द्रुकाः स्थानानि अकुहविसर्जनीयानां कण्ठः ७ यथा कण्ठः इचुयशानां तालु ८ यथा तालु ऋटुरषाणां मूर्धा
ष ८ यथा मूर्धा ऌतुलसानां दन्ताः ८ यथा दन्ताः उपूपध्मानीयानामोष्ठौ ९ यथा ओष्ठौ २ अनयोः कण्ठतालु ओष्ठौ २
अनयोः कण्ठोष्ठमव १ अस्य दन्तोष्ठम् वर्णाः तद्दकाः आभ्यन्तरप्रयत्नाः २५ यथा स्पृष्टम् कखगघङचछ
जझञटठडढणतथदधनपफबभम यरलव ४ यथा ईषत्स्पृष्टम् अइउऋऌएऐओऔ शषसह १२
यथा विवृतम् अ १ प्रयोगेस्य संवृतम् १ कार्येस्य विवृतमेव इतिसवर्णसंज्ञोपयुक्ताः स्थानप्रयत्नाः वर्णाः
तद्दकाः स्थानानि तद्दकाः बाह्यप्रयत्नाः ११ खफछठथचटत कपायातयमाः क २६ यथा विवारः खशति
जिह्वामूलीयौ २ एतयोः जिह्वामूले पफ इत्युपध्मानीयौ २ एतयोः ओष्ठौ जमङणनमनुस्वारः यमाः २९
यथा नासिकाच इति विसर्गः १ अस्य आश्रयस्थानानि वर्गेष्वाद्यानां चतुर्णां पञ्चमे परे मध्ये यमानाम पूर्वसदृशो वर्णः
प्रातिशाख्ये प्रसिद्धः २४ वर्णाः तद्दकाः बाह्यप्रयत्नाः ११ खफछठथचटत कपायातयमाः क २९ यथा विवारश्वा
साघोषाः योविसर्गः शषसाः हयवरलजमङणनझभघढधजबगड ४० यथा संवारनादघोषाः उदात्तसमाः
स्वरा नुस्वाराः कचटतपगजडदबघङ जणनमाः स्वबमाः ३० यथा अल्पप्राणाः यरलवाः स्वराः खछठथफप
नछथ भयतयमाः शषसहा अनुस्वारविसर्गाः कः २८ यथा महाप्राणाः याः अइउऋऌएओऐऔ ९ यथा उदात्तानु
दात्तस्वरिताः इत्यान्तरतमसंज्ञानोपयुक्ताः स्थानप्रयत्नाः आन्तरतम्यविचारे सवर्णसंज्ञोपयुक्तस्थानप्रयत्ना अपि ग्राह्याः २

इति स्थानप्रयत्नविवेकः तस्यतस्येतिनवक्तव्यम् १ तस्यावचनेवचनप्रामाण्यात्तस्येतिनवक्तव्यम् इतिभाष्यम् लृका
रस्यलृपरत्वम् १ इतिभाष्यकारेष्टिः नवल्कारः ऋकारऌकारयोः सवर्णविधिः २ होतॢकारः ऋकारऌकारयोः
सवर्णसंज्ञावक्तव्या १ इतिकाशिका ऋऌवर्णयोर्मिथः सावर्ण्यंवाच्यम् १ कौ सु से ९ नाज्झलौ कौ सु से ॥
आकारसहितोऽच् हल्च मिथः सवर्णौ न स्तः दधिहरति दधिशीतलम् दधिषष्ठम् दधिसांद्रं भाष्येतिदं सूत्रं प्रत्याख्या
तम् इति समस्तसूत्राणि भाष्ये प्रथमाध्याये प्रथमपादे चतुर्थाह्निके व्याख्यातानि ७ ११ ईदूदेद्द्विवचनं प्रगृह्यम् संज्ञाप्र
देशः ८ १।११।कौ।सु।अ। ईदूदेदन्तं द्विवचनं प्रगृह्यसंज्ञं स्यात् हरीएतौ विष्णूइमौ गङ्गेअमू पचेतेइमौ ॥ मणी
वादीनां प्रतिषेधो वक्तव्यः १ इतिकाशिका मणीव ओदसीव दम्पतीव जम्पतीव इतिगणः भाष्यादौ तु नास्त्ययं प्र
देशः संज्ञापरिभाषम् १ परिभाषेयम् १२ अदसो मात् कौ।सु।अ।अदः मात्परमीदूतौ प्रगृह्यसंज्ञौ स्तः
अमीअत्र अमूअत्र मात्किम् अमुकेऽत्र ॥ मात्प्रगृह्यसंज्ञायां तस्मासिद्धत्वादयावेकादेशप्रतिषेधः १ शे।कौ।सु।अ।
अयेशप्रगृह्यः स्यात् अस्मे इन्द्राबृहस्पती युष्मे इती त्वे क स्मात्र भवति काशेकुशे वंशे इति शे येवं तु ग्रहणात् इतिभाष्यम् १४
निपात एकाजनाङ् कौ।सु।अ।अङ्वर्जं एकोऽज्निपातः प्रगृह्यसंज्ञः स्यात् अअपेहि इइन्द्रः उउमेशः आ एवं नु मन्यसे
आ एवं किल तत् अनाङिति किम् ईषदुष्णम् ओष्णम् ईषदर्थे क्रियायोगे मर्यादाभिविधौ च यः एतमातं ङितं विद्याद्वा
क्यस्मरणयोरङितं १ भाष्यकारिकेयम् २० ओतः।कौ।सु।अ। ओतः प्रगृह्यसंज्ञावास्यादिनो।उइति।विति ९ ऊँ।
कौ।सु।अ।उञः ऊँ आदेशो वास्यादितो उ इति।विति।ऊँ इति दीर्घोऽनुनासिकः प्रगृह्यसंज्ञकश्च ऊँ इति इतिभाष्यम् ९९
ईदूतौ च सप्तम्यर्थे।कौ।सु।अ।सप्तम्यर्थे मात्रवने मान मा ईदूदन्तं प्रगृह्यसंज्ञं स्यात्। सोमो गौरी अधिश्रितः। तनू इति अ
धीकि।वाच्यः ईदूतौ सप्तमी त्येव लुप्तेऽर्थग्रहणाद्भवेत् पूर्वस्य चेत्सवर्णोऽसौ सावाडाम्भावः प्रसज्यते २ वचनाद्यत्र दी

सू॰ प॰
३
3

र्थं तेन त्रापि समरसी यदि नापकं स्यात् तदन्तं नैमावा पूर्वे यदस्यमत् २। २० दाधाघ्वदाप् संज्ञाप्रदेशाः ८।४।१८। ७।४।
४६। कौ। नि। म्दादारूपा धारूपाश्च यातवो घुसंज्ञाः स्युः दाप्दैपौ विना उदाञ्दाणदोदेङ् डुधाञ् धेट् इत्येते गृहीताः तत्र
दाप्दैप्नवदीङ् प्रणिददाति प्रणिदाता। प्रणियाति। प्रणिद्यते। प्रणिदधाति। प्रणियच्छति। अदाविति किं। दातं ब
र्हिः। अवदातं मुखं। घुसंज्ञायां प्रकृतिग्रहणं शिदर्थम् घुसंज्ञायां प्रकृतिग्रहणं शिद्विकृतार्थम् २ समानशाब्दप्रति
षेधः। २। दीङः प्रतिषेधः स्थाध्वोरित्वे ४ सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः एकदेशविकारे हि नित्यत्वं नोपपद्यते १
कार्तिकेयम् गामादाग्रहणेष्वविशेषः १ यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते २ मान्तवेयकृतमनेजन्तत्वम् ३ परि
भाषा इमाः ॥ २१ आद्यन्तवदेकस्मिन् अतिदेशोऽयम्। कौ। स्य। ह। पे। असहायेऽप्यादिवदन्तवच्च कार्यं स्यात् आभ्याम्
एभिः तत्र व्यपदेशिवद्वचनम् १ अपूर्वानुत्तरलक्षणत्वादाद्यन्तयोः सिद्धमेकस्मिन् २ गोनर्दीयस्त्वाह। सत्यमेतत्
सति तस्मिन्निति इति भाष्यम् व्यपदेशिवदेकस्मिन् १ परिभाषेयम् २२ तरप्तमपौ घः संज्ञाप्रदेशाः। ८।३। १०। ८।३।
४२॥ कौ। स्य। न। प्रागि तरप्तमपौ घसंज्ञौ स्तः कुमारितरा कुमारितमा घसंज्ञायां नदीतरे प्रतिषेधः ॥ २३
बहुगणवतुडति संख्या संज्ञाप्रदेशाः ५।१।२२। ५। ४।४२। कौ। स्य। अ। पे। बहुगणवतुडत्यन्ताः संख्या संज्ञाः स्युः बहुकः
गणशः तावत्कृत्वः कतिधा संख्यासंज्ञायां संख्याग्रहणं संख्यासंप्रत्ययार्थं १ अध्यर्धग्रहणं च समासकन्विध्यर्थम् अ
ध्यर्धशूर्पम् अध्यर्धकम् अर्धपूर्वपदश्च पूरणप्रत्ययान्तः ३ अर्धपञ्चमशूर्पम् अर्धपञ्चमकम् अधिकग्रहणं
चालुकि समासे उत्तरपदवृद्ध्यर्थम् ४ अधिकषाष्टिकः। अधिकसाप्ततिकः कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययः १
न्यायोऽयम् उभयगतिरिह भवति १ परिभाषेयम् ॥ २४ ष्णान्ता षट् संज्ञाप्रदेशाः। ७। १। २२। ७। १। ५५। कौ।
स्य। ह। पे॥ षान्ता नान्ता च संख्या षट्संज्ञा स्यात् षट् षष्ठो पञ्च। पञ्चानाम् षट्संज्ञायामुपदेशग्रहणं कर्तव्यं १ २

२५ डति च। कौ। अ ग्रे डत्यन्ता संख्यावत्संज्ञा स्यात् कति कतीनो इदं डतिग्रहणं हि किं क्रियते संख्यासंज्ञायां षट्संज्ञायां च
प्रकरणे शक्यमकर्तुम् इति भाष्यम् २६ क्तक्तवतू निष्ठा संज्ञाप्रदेशाः २।२।३६।८।१।२२। कौ। क्त। एतौ निष्ठानौ निष्ठासंज्ञौ
स्तः कृतः लूनः कृतवान् लूनवान् निष्ठासंज्ञायां समानशब्दप्रतिषेधः १ इति षोडश सूत्राणि भाष्ये प्रथमाध्याये प्रथमा
चरणे एवमाह्निके गतान्यानि २५। २७ सर्वादीनि सर्वनामानि संज्ञाप्रदेशाः ५ ३ २ ७ १ १४ कौ। स। अ। ग्रे। स। गस
र्वादीनि शब्दरूपाणि सर्वनामसंज्ञानि स्युः सर्वे। सर्वै। सर्वस्मै। सर्वस्मात्। सर्वस्मिन् सर्वेषाम् तदन्तस्याप्ययं संज्ञा
देहे चेति ज्ञापकात्। परम सर्वे त्र सर्वे विश्व। उभ। उभय। उतम। इतर। अन्य। अन्यतर। त्वत्। त्व। नेति केचित्। नेम। सम। सिम
पूर्व परावर दक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायां। स्वमज्ञातिधनाख्यायां। अन्तरं बहिर्योगोपसंव्यानयोः त्यद्। तद्।
यद्। एतद्। अदस्। इदम्। एक। द्वि। युष्मद्। अस्मद्। भवत्। किम्। इति सर्वादिः उभशब्दो नित्यं द्विवचनान्तः। तस्येह पाठस्तु
उभकौ विनाकजर्थः त्वत् इति द्वावप्यदन्तावितिपदे एक उदात्तो द्वितीयोऽनुदात्तः उतरडतमौ प्रत्ययौ ततस्तदन्ता ग्राह्याः। स
मः सर्वपर्यायः। तुल्यपर्यायस्तु न। यथासंख्यमनुदेशः समानामिति निर्देशात् संज्ञोपसर्जनप्रतिषेधः १ सर्वो नाम कश्चित्
सैस्सर्वाय देहि अतिसर्वाय देहि ॥ बहुव्रीहौ तद्गुणसंविज्ञानमपि १ बाधकान्येव निपातनानि २ परिभाषेयम् २८
विभाषा दिक्समासे बहुव्रीहौ। कौ। स। अ। स्त्री दिगुपदिष्टे बहुव्रीहिसमासे सर्वादीनि वा सर्वनामसंज्ञानि स्युः उत्तरपूर्वस्यै उ
त्तरपूर्वायै दिग्ग्रहणं किमर्थं न बहुव्रीहावितिप्रतिषेधे वक्ष्यामि तत्र तज्ज्ञापयत्येक विभाषा क्रप्रतिषेधयति इति भाष्यम् २९
न बहुव्रीहौ। कौ स अ ग्रे स ग बहुव्रीहिसमासे सर्वनामसंज्ञा न स्यात् प्रियविश्वाय त्वकपितृकः प्रतिषेधेऽकतस्य
र्वैस्याप्युपसंख्यानम् १ अकच्स्वरौ तु कर्तव्यौ प्रत्यङ्गं मुक्तसंशयौ त्वकत्पितृको मकत्पितृक इत्येव भवितव्यमिति इति भा
ष्ये सूत्रे प्रत्याख्यानम् २' तृतीयासमासे। कौ। स। अ। ग्रे। ग। गस्य सर्वनामसंज्ञा न स्यात् मासपूर्वाय। मासेन पूर्वा

सू॰ प॰
८

य नादर्थ्यानाव्ययम् तृतीयासमासार्थो निपदानि तृतीयासमासः इति भाष्यम् ३१ द्वन्द्वे च कौ। सू। अ। ३। स। ग
उक्ता संज्ञा न वर्णाश्रमेतराणाम् ३२ विभाषा जसि। कौ। सू। अ। ३। स। ग। जसाधारे कार्ये द्वन्द्वे उक्ता संज्ञा वा। वर्णा
श्रमेतरे। वर्णाश्रमेतराः जसः कार्यं प्रति विभाषा। अकच्तु न भवति। इति भाष्यम् ३३ प्रथमचरमतयाल्पार्धक
तिपयनेमाश्च। कौ। सू। अ। ३। स। ग। एते जसः कार्यं प्रत्युक्तसंज्ञा वा स्युः प्रथमे प्रथमाः चरमे चरमाः द्वितये द्वि
तयाः अल्पे अल्पाः अर्धे। अर्धाः कतिपये कतिपयाः नेमे नेमाः ३४ पूर्वपरावरदक्षिणोत्तरापराधराणि व्यव
स्थायामसंज्ञायाम् कौ। सू। अ। ३। स। गणपाठात्सर्वत्र प्राप्ता संज्ञा जसि वा स्यात्। पूर्वे। पूर्वाः। इत्यादि। व्यवस्था
यां किम्। दक्षिणा गाथकाः ३५ स्वमज्ञातिधनाख्यायाम् कौ। सू। अ ३ स ग आत्मात्मीयवाचिनः स्वशब्दस्य
प्राप्ता संज्ञा जसि वा। स्वे। स्वाः। अज्ञातिधनाख्यायां किम् स्वाः ज्ञातयोऽर्था वा ३६ अन्तरं बहिर्योगोपसंव्यानयोः
कौ। सू। अ ३ स ग बाह्ये परिधानीये चार्थे अन्तरशब्दस्य प्राप्ता संज्ञा जसि वा अन्तरे अन्तराः अपुरीति वक्तव्यम् १
इह मा भूत् अन्तरायां पुरि गणसूत्रे पत्रद्वार्तिके ह्येते यमिति कैयटः विभाषाप्रकरणे तीयस्य ङित्सूपसंख्यानम् २
द्वितीयस्मै। द्वितीयाय। तृतीयस्मै। तृतीयाय ३७ स्वरादिनिपातमव्ययम् संज्ञाप्रदेशः २।४।८२।३।४।५९।
कौ। सू। अ। व्य। स्वरादयो निपाताश्चाव्ययसंज्ञाः स्युः। स्वर्। अन्तर्। प्रातर्। एते अन्तोदात्ताः पुनर् सनुतर्। उच्चैस् नी
चैस्। शनैस्। ऋधक्। आरात्। अन्तिकात्। ऋते। युगपत्। पृथक्। एते आद्युदात्ताः। ह्यस्। श्वस्। दिवा। रात्रौ। सायम्
चिरम्। मनाक्। ईषत्। शश्वत्। जोषम् तूष्णीम्। बहिस्। अवस्। समया। निकषा। स्वयम्। नक्तम्। नञ्। मृषा। हे
तौ। हे। है। अद्धा। इद्धा। सामि। एते अन्तोदात्ताः वत्। बत। सनत् सनात्। तिरस्। एते आद्युदात्ताः। अन्तरा। अयम
न्तोदात्तः अन्तरेण। मक्। ज्योक्। योक्। नक्। शम्। सना। सहसा। श्रद्धा। अलम्। स्वधा। वषट्। विना। नाना। स्वस्ति ८

अन्तर्। अस्ति। उपांशु। क्षमा। विहायसा। दोषा। मृषा। दिष्ट्या। वृथा। मिथ्या। क्त्वातोसुन्कसुनः। कृन्माकारसंध्यक्षरान्तो १
व्ययीभावश्च। पुरा। मिथो। मिथस्। प्रायस्। मुहुस्। प्रवाहुकम्। प्रवाहिका। आर्यहलम्। अभीक्ष्णम्। साकम्। सार्धम्। स
त्रम्। समम्। नमस्। हिरुक्। तसिलादयस्तद्धिताएधाच्पर्यन्ताः। शस्तसी। कृत्वसुच्। सुच्। आस्थालौ। च्व्यर्थाश्च। अथ
अम्। प्रताम्। प्रशान्। प्रतान्। आकृतिगणोऽयम् तेनान्येऽपि तथाहि। माङ्। श्रम्। कामम्। प्रकामम्। भूयस्। परम्
साक्षात्। साचि। सत्यम्। मंक्षु। संवत्। अवश्यम्। सपदि। प्रादुस्। आविस्। अनिशम्। नित्यं। नित्यदा। सदा। अजस्रम्
सन्ततम्। उषा। २० ओम्। भूर्। भुवर्। झटिति। तरसा। सुष्ठु। कु। अञ्जसा। अमिथु। विथक्। भाजक्। अन्वक्। चिराय। चि
रम्। चिररात्राय। चिरस्य। चिरेण। चिरात्। अस्तम्। आनुषक्। आनुषक्। आनुषट्। अम्नस्। अम्नर्। स्थाने। वरम्। दुष्ठु।
बलात्। शु। अर्वाक्। शुदि। वदि। इत्यादि। निपातास्त्वग्रेवक्ष्यन्ते १८ तद्धितश्चासर्वविभक्तिः। कौ। यस्मात्सर्वा विभ
क्तिर्नोत्पद्यते स तद्धितान्तो ऽव्ययसंज्ञः स्यात्। ततः। यतः। तत्र। यत्र। यदा। सर्वदा। तसिलादयः प्राक्पाशपः। शस्प्रभृतयः
प्राक्समासान्तेभ्यः। अमन्ताम् कृत्वोऽर्थाः। तसिवती। नानाञौ। इति परिगणनं भाष्ये असर्वविभक्तावविभक्तिनिमित्तस्यो
पसंख्यानम् १ त्रलादीनाञ्चोपसंख्यानम् २ अलिङ्गमसंख्यमिति वा ३ एकवचनमुत्सर्गतः करिष्यते इति भाष्यम्
एवं गतेऽलक्षणमपि तत्स्वमेव सामान्यस्य कार्ये ग्रहणं तत्र। ततः परे वाऽभिमतो न काव्योऽव्ययः कृदग्रहणेन योगाः १ का
रिके यमसदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु। वचनेषु च सर्वेषु यन्न व्येति तदव्ययम् १ श्रुतिरियं स्वयमाभाष्ये तथ्य
पपरनेनास्थिता १९ कृन्मेजन्तः कौ। स्मा। उवा। २१ मकारान्तः ऐ औ एतदन्तं यत्कृत् तदन्तं शब्दस्वरूपमव्ययसंज्ञं
स्यात्। स्मारे। स्मारम्। भोक्तुं पवते। जीवसे। पिवध्यै। कृन्मेजन्तस्याः निर्गौरीकार प्रकृतिः १ अनन्त प्रकृतिरिति
वा। २। कुम्भकारेभ्यः सन्निपातलक्षणो विधिरनिमित्तं तद्विघातकस्य १ परिभाषेयम् ४ क्त्वातोसुन्कसुनः।

कौ सू । अव्ययं । एतदन्तमव्ययसंज्ञं स्यात् कृत्वा । उदेतोः । विसृपः । सरलतार्थत्वेन नेदं व्याख्यातम् ४१ अव्ययीभावश्च
सूः ५ कौ सू अव्ययमव्ययीभावसमासोऽव्ययसंज्ञः स्यात् उपाग्नि अधिहरि प्रयोजनं लुङ्मुखस्वरोपचाराः । लुक उपाग्नि
मुखस्वरः उपाग्निमुखः उपचारः उपपयःकारः इति भाष्यम् अत्र मुखस्वरोपचारौ निवर्तमानौ प्रयोजनम् शाका
र्थोऽधूम इतिवत् ४२ शि सर्वनामस्थानम् संज्ञाप्रदेशः ६।४।८।७।१।८९। कौ । सू । अ । नशि इत्येतत्सर्वनाम
स्थानसंज्ञं स्यात् कुण्डानि सन्ति । कुण्डानि पश्य अनन्तरस्य विधिर्वा प्रतिषेधो वा १ न्यायोऽयम् ४३ सुडनपुंस
कस्य कौ सू आद्ये सुडिति प्रत्याहारः सुवौजसमौट् एते सर्वनामस्थानसंज्ञाः स्युर्नपुंसकस्य न राजा राजा
नौ । राजानः । राजानम् । राजानौ । अनपुंसकस्येति किम् । सामनी । असमर्थसमासश्चायं द्रष्टव्यः । अनपुंसकस्येति
नो हि नञो नपुंसकेन सामर्थ्यम् । केन तर्हि । भवतिना । न भवति नपुंसकस्येति इति भाष्यम् ४४ न वेति विभाषा
संज्ञाप्रदेशः ।६।१।३। कौ । सू । सेनेति प्रतिषेधो वेति विकल्पः एतदुभयं विभाषासंज्ञं स्यात् शुशाव शिश्वाय । शु
शुवतुः । शिश्वियतुः । न वेति विभाषायामर्थसंज्ञाकरणम् १ न तर्हि वक्तव्यम् न वक्तव्यम् इति करणे यथानिर्देशा
र्थः इति भाष्यम् । समानशब्दप्रतिषेधः २ सिद्धं तु सर्वस्यानेन बाधितत्वात् इति भाष्यं प्राप्तविभाषाप्यनेन तत्सं
ज्ञायाउपयोगः ताभिः पक्षे निवृत्तिरेव क्रियते पक्षे प्रवृत्तिः स्थितैव । अप्राप्तविभाषास्वपि न ताभिः पक्षे कार्यस्य प्र
वृत्तिः क्रियते । पक्षान्तरे तत्प्रवृत्तिः स्थितैव न तस्मादुभयत्र विभाषार्थैवैषा संज्ञा । तत्र नित्यप्राप्तिर्नेत्यनेन प्रतिषिद्धा
यस्माद्वेत्यनेन पक्षे भवतीति प्राप्तेऽप्राप्ते च विकल्पसिद्धिः फलमित्यर्थमाह कैयटः इत्यष्टाविंशतिसूत्राणि भा
ष्ये प्रथमाध्याये प्रथमपादे षष्ठाह्निके गतार्थानि २८ इग्यणः संप्रसारणम् संज्ञाप्रदेशः ।६।१।१३।६।१।३२ कौ
सू । इग्यः । यवरलानां स्थाने क्रमेण जायमाना भाविनो वा इउऋऌ एते संप्रसारणसंज्ञाः स्युः । यज । इष्टम् । वप् । उप्तम् ।

ग्रह। गृहीतम् ४६ आद्यन्तौ टकितौ परिभाषासूत्रमिदम् प्रदेशाः ७।१।५२।८।३।२८। कौ। सा। पा। टिकितौ यस्यो
क्तौ तस्य क्रमादाद्यन्तावयवौ स्तः भविता भीषयते टकितो राद्यन्तविधाने प्रत्ययप्रतिषेधः १ सिद्धन्तु षष्ठ्यधिकारे व
चनात् इति भाष्यम् ४७ मिदचोऽन्त्यात्परः परिभाषासूत्रम् प्रदेशाः ७।१।५९। कौ। सा। पा। अच इति निर्द्धा
रणे षष्ठी। अचां मध्ये योऽन्त्यस्तस्मात्परो यस्य विहितस्तस्यान्त्यावयवो मित्स्यात् स्थानेयोगित्वस्य प्रत्ययपरत्वस्य चा
पवादः रुणद्धि। मन्थति। यशांसि। अन्त्यात्पूर्वो मस्जेरनुषङ्गसंयोगादिलोपार्थं १ अंश मग्रवान्। मङ्क्ता मङ्क्तुम्
मङ्क्तव्यम् भर्जिमर्चोश्च २ येन नाप्राप्ते विधिरारभ्यते स तस्य बाधको भवति १ न्यायोऽयम् ४८ एच इग्घ्रस्वादेशे।
परिभाषाप्रदेशाः १।२।४७। कौ। सा। अ। नपुंसके प्रोषधोऽस्थाने ह्रस्वे कर्तव्ये एचः इगेव स्यात् नान्यः। रै। अतिरि।
नौ। अतिनु। गो। उपगु। ४९ षष्ठी स्थानेयोगा परिभाषासूत्रमिदम्। प्रदेशाः ६।४।३६। कौ। सा। पा। इह शास्त्रे अनियतसं
बन्धा विशेषा षष्ठी स्थानेयोगा बोध्या स्थानञ्च प्रसङ्गः जहि भविता इत्यादि निर्दिश्यमानस्यादेशा भवन्ति १ परिभाषेयं ५
स्थानेऽन्तरतमः परिभाषासूत्रमिदम्। प्रदेशाः ६।१।८७। कौ। सा। पा। प्रसङ्गे सति श्रूयमाणो यः सदृशतमः स ए
वादेशः स्यात् सादृश्यञ्च स्थानार्थगुणप्रमाणाख्यैस्तेन स्थानतः दण्डाग्रम् अर्थतः। वतः। गुणतः। पाकः प्र
माणतः अमुष्मै अमूभ्याम् यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः १ परिभाषेयम् ५० उरण्रपरः कौ।
सा। अ। ऋवर्णस्य स्थाने जायमानोऽण् रेफपरः स्यात् कर्ता किरति द्वैमातुरः आदेशो रपर इति चेत्तनी विधिविधिषु अप्र
तिषेधः १। उदात्तादिषु च २ एकादेशस्योपसंख्यानम् ३ अवयवग्रहणात्सिद्धमिति चेदान्तप्रतिषेधः ४। ५१ अलोऽ
न्त्यस्य। परिभाषासूत्रम्। प्रदेशाः। ७।२।१०२। कौ। सा। पा। षष्ठीनिर्दिष्ट आदेशोऽन्त्यस्यालः स्यात् पञ्चगोणिः
दशगोणिः ५२ ङिच्च। परिभाषाप्रदेशाः ७।१।९२। कौ। सा। पा। ५३। ङिच्च। परिभाषाप्रदेशाः। ७।१।९३। कौ। सा।

षाङिदनेकाल्ख्यादेशोऽन्त्यस्य भवति। सख्या। होता पोता। नातङोङि त्करणस्य गुणवृद्धिप्रतिषेधार्थत्वात् परत्वात् सर्वादे
सू.प. शो भवति। जीवतात्। भवतात्। ५४। आदेः परस्य। परिभाषाप्रदेशाः।८।४।६।। कौ। सू। प। परस्य विधीयमानका
६ र्यं परस्यादेर्भवति क्वचपरस्यकार्यम्। यत्र पञ्चमीनिर्देशः। उस्थानम्। उत्तम्भनम्॥ ५५॥ अनेकाल्शित्सर्व
6 स्य परिभाषाप्रदेशाः।६।४।३६। कौ। सू। प॥ अनेकालादेशः शिच्च सर्वस्य षष्ठीनिर्दिष्टस्य भवति। जहि। कृणु। अ
निनाऽनुबन्धकृतमनेकाल्त्वे १ परिभाषेयम्। इत्येकादशसूत्राणि भाष्ये प्रथमाध्याये प्रथमाध्याये प्रथमपादे स
प्तमाह्निके व्याख्यातानि ११ ५६ स्थानिवदादेशोऽनल्विधौ अतिदेशोऽयम्। कौ। सू। अ। आदेशः स्थानिवत्स्यात्
भवति। स्थानिनिमित्तमिव यद्भवति तदादेशकृतेऽपि भवति स्थानिसंबन्धिवर्णाश्रितेकार्येन स्थानिवत्। रामाय यादेशस्य
स्थानिवत्वेन सुः वा सुपि चेति दीर्घः एवन्यायात्यादेशेष्वपि। अनल्विधौ किं। प्रश्नाय। अत्रेडागमो न। आदेशपा
ल्विधिप्रतिषेधे कुरुवधपिबां गुणवृद्धिप्रतिषेधः १। आदेशिन्यादेशे इति चेन्नाभिहृत्कृदतिदिष्टत्वप संख्यानम् २ एक
देशविकृतस्योपसंख्यानम्।३। सिद्धत्वषष्ठीनिर्दिष्टस्य स्थानिवद्वचनात् ४ तस्य दोषस्तयादेशेऽङ्गभयप्रतिषेधः ५।अ
भयेदेवमनुष्याः जात्याख्यायां वचनातिदेशे स्थानिवद्भावप्रतिषेधः ६ ङ्याब्ग्रहणेऽदीर्घ आदेशान स्थानिवत् ७
ङ्याब्ग्रहणेऽदीर्घ आदेशान स्थानिवत्।७। आहिभुवोरीट्प्रतिषेधः ८ वध्यादेशे वृद्धितत्वयोः प्रतिषेधो वक्तव्यः ५
वृद्धिर्यिभ्य १०। आकारान्तान्नुक्षुकप्रतिषेधः ११। लोडादेशे शाभावजभावयित्वहिलोपेत्वप्रतिषेधः।१२। त्र्यादे
शे स्वत्वप्रतिषेधः १३ आम्विधौ च स्वत्वप्रतिषेधः १४। सरेवसादेशे।१५। गोःपूर्वणित्वात्वस्वरेषु।१६। करोतिपिब
तोः प्रतिषेधः सामान्यातिदेशे विशेषानतिदेशः ७ परिभाषेयम् ५७ अचः परस्मिन्पूर्वविधौ। कौ। सू।
अअल्विध्यर्थमिदम् परनिमित्तोऽजादेशः स्थानिवत्स्यात् स्थानिभूतादचः पूर्वत्वेन दृष्टस्य विधौ कर्तव्ये। अत्रस्था ६

निनिमित्तं यद्भवति तदादेशेऽपि भवति स्थानिनि निमित्तं यन्न भवति तदादेशेऽपि न भवतीति भावः भावयोरुभयोरत्यतिदेशो ल-
क्षानयोगात् यथा। मृद्या। पटयति। लघयति। अवः किम्। आगत्य। अधिगत्य। परस्मिन्निति किं। युवजानिः। पूर्वविधावि-
ति किम्। नैधेयः। अपरविधाविति वक्तव्यम् १। य्वोः स्थानिवद्भावाद्यावौ प्राप्नुतस्तयोः प्रतिषेधो वक्तव्यम् ३ तन्नादेश-
लक्षणप्रतिषेधः ४। अजादेशः परनिमित्तकः पूर्वस्य विधिं प्रत्यसिद्धो भवतीति वक्तव्यम् ५ असिद्धवचनात्सिद्धमि-
ति चेदुत्सर्गलक्षणानामनुदेशः ६। अनन्तरस्येति चेत्कोऽ ननुदानतद्धिगुस्वरगतिनिघातेषूपसंख्यानम् ७ पूर्वमात्रस्ये-
ति चेद्यथाह्रस्वत्वम् ८। गुरुसंज्ञा च ९। एकादेशस्योपसंख्यानम् १०। हलचोरादेशः स्थानिवदिति चेद्दिंशानेस्तिलोपषा-
कादेशः ११। स्थूलादीनां यणादिलोपे कृतेऽवादेशः १२। अस्थानिवत्वे यङ्लोपे गुणवृद्ध्योः प्रतिषेधः १३। द्विर्वचनाद-
यस्य प्रतिषेधे १४। क्सलोपे लुग्वचनम् १५। हेतवेतम् १६। ग्रहणेषु स्थानिवदिति चेज्जग्ध्यादिष्वादेशप्रतिषेधः १७।
यणादेशेषु लोपेनाऽनुनासिकान्तानां प्रतिषेधः १८ रायाव प्रतिषेधश्च १९। दीर्घे यलोपस्य प्रतिषेधः २०। अतो दीर्घे यलो-
पवचनम् २१ नित्यः परयणादेशः परस्मात्सोऽयमवस्थया युगपत्सम्भवो नास्ति बहिरङ्गेण सिध्यति॥ भाष्यकारिकेयम्
५८ न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु। कौ। सू। अ। पदस्यान्तावयवे द्विर्वचनादौ कर्तव्ये
ऽपरनिमित्तोऽजादेशः स्थानिवन्न स्यात्॥ पदान्तविधौ। कानि सन्ति। कौ स्तः। अत्र स्तेरल्लोपस्य स्थानिवत्त्वनिषेधे य-
णः। द्विर्वचने। सुद्ध्युपास्यः। अत्र द्वित्वे यणो न स्थानिवत्त्वम्। वरे। यायावरः। यातेर्यङ्लुगन्ताद्वरच्। अल्लोपयलोपौ। आलो-
पे कृतेऽपि अल्लोपो न स्थानिवत् वलोपे यातिः यातेर्यङ्लुगन्तात्क्तिच्। अल्लोपयलोपौ तस्य स्थानिवत्त्वादातो लोपः
स्वाल्लोपो न स्थानिवत्। स्वरे। चिकीर्षकः करोतेः सन्नन्तात् ण्वुल्। अतो लोपः। स च लितीति स्वरे न स्थानिवत्। स-
वर्णानुस्वारयोः। शिण्ढि। शिंषन्ति। अत्र श्नसोरल्लोपो न स्थानिवत्। दीर्घे। प्रतिदीव्नः। अल्लोपो न स्थानिवत्। जश्चि। रिथ

ग्रदेः क्ङिति छन्दसि च स्यादेशेऽउपधालोपः। सवर्णशेत्तन स्थानिवत् चरि जक्षतः उपधालोपो न स्थानिवत् स्वरदीर्घ-

सू॰प॰ यलोपेषु लोपाजादेशो न स्थानिवत् १ यज्ञ्वारत्नाः। दशारत्नाः। कियौः। गिर्यौः। वाय्वोः। अध्वर्योः। क्विलुगुपधा-

७ त्वचङ्परनिर्ह्रासकुत्वेषूपसंख्यानम् २ क्वि। कौलमेन स्थानिवत्। देवतेदेयः कौविधेयमतेन स्थानिवत् लवः

7 माचष्टे लवयति। ततः क्विप्। टिलोपणिलोपौ। लौः। यौः। स्थानिवद्भावाणिलोपस्यानस्यात् लक्। पञ्चभिः।

पटीभिः क्रीतः पञ्चपटुः। दशपटुः। पञ्चेन्द्राण्यो देवता अस्य पञ्चेन्द्रः। दशेन्द्रः उपधात्वे। पारिखीयः। उपधात्वनिमि-

त्तकप्रत्ययविधावेव। नेह। पटयति। चङ्परनिर्ह्रासे। अवीवदद्वीणां परिवादकेन। कुत्वे। अर्चयतेरर्कः। मर्चयतेर्म-

र्कः पूर्वत्रासिद्धे न स्थानिवत्। ३। कौ। स। अ। ३। पक्त। पक्थ। पक्थम्। आदितः। तस्य दोषः संयोगादिलोपलत्व-

णत्वेषु ४। कौ। स। अ। ३। संयोगादिलोपे काक्यर्थम् लत्वे माषवपनी ५९ द्विर्वचनेऽचि कौ ति स्था

द्वित्वनिमित्तेऽचि परेऽच आदेशो न स्याद्द्वित्वे कर्तव्ये द्वित्वे कृते तु भवति पपतुः पपुः तस्थतुः तस्थुः जग्मतुः ज-

ग्मुः आटिटत् आशिशत् चक्रतुः चक्रुः आल्लोपोपधालोपणिलोपयणादेशा द्वित्वे कर्तव्ये निषिद्धाः कृते द्वित्वे प्रव-

र्तन्ते अजादेशः स्थानिवद्भवति रूपातिदेशोऽयम् इति काशिका। न च ग्लाऽः प्रतिषेधः १। द्विर्वचननिमित्तेऽचि स्थाः

निवदिति वक्तव्योऽस्थानिवद्वचनम् २ न वक्तव्यः ओः पुयण्ज्यपरे जववने ज्ञापकं णौ स्थानिवद्भावस्य इति भाष्यम् कार्यमन-

भवन् हि कार्यी निमित्ततया नाश्रीयते १ परिभाषेयमत्र भाष्ये ध्वनिता इति यतः सूत्राणां भाष्ये प्रथमाध्याये प्रथम

पादेऽष्टमाह्निके व्याख्यातानि ४ ६०। अदर्शनं लोपः। संज्ञाप्रदेशाः। ६।४।१५८। ८।२।२३। कौ। स। अ। प्रसक्तस्या-

दर्शनं लोपसंज्ञं स्यात् गोधेरः पचेरन् जिलियलोपः प्रसक्तादर्शनं लोपसंज्ञं भवतीति वक्तव्यम् १ नेह इह सं-

तिष्ठते माभूत् ६१ प्रत्ययस्य लुक्श्लुलुपः संज्ञाप्रदेशाः १।२।४९। ६।१।१०। ४।२।८१। कौ। स। अ। ३। लुक् ७

श्लुलुप्शब्दैः कृते प्रत्ययस्यादर्शने क्रमाल्लुक्श्लुलुप्संज्ञाः स्यात् दधि जुहोति वरणा ६२ प्रत्ययलोपे प्रत्ययलक्ष
णम् कौ सु अ शे प्रत्यये लुप्तेऽपि प्रत्ययाश्रितं कार्यं भवति अग्निचित् अहन् सुमिदोऽर्लुप्तयोरपि तदाश्रयापदसं
ज्ञा भवति स्थानिवत्सूत्रेण सिद्धो नियमार्थमिदम् प्रत्ययलक्षणमेव भवति न शब्दलक्षणम् तेन सुदृषद्ब्राह्मण
इत्यादौ अत्वसन्तस्येति शब्दलक्षणो दीर्घो न लक्ष्युपसंख्यानम् १। प्रत्ययग्रहणं किमर्थम् कृत्स्नलोपे प्रत्ययलक्ष
णं यथा स्यात् एकदेशलोपे माभूत् आघ्नीय संज्ञोय सर्वस्मिन्नपि योगे प्रत्ययग्रहणस्यैतत्प्रयोजनमुक्तं अन्यतर
त्वक्कमकतेम् अथ द्वितीयप्रत्ययग्रहणं किमर्थम् प्रत्ययलक्षणं यथा स्याद्वर्णलक्षणं माभूदिति भगवेहितेगोहि
तेगोहितम् इति भाष्यम् वर्णाश्रये नास्ति प्रत्ययलक्षणम् १ परिभाषेयम् ६३ न लुमताङ्गस्य। कौ। सु। अ। शे। ल
क्श्लुलुप्तेलुमन्तः एतेन लुप्ते प्रत्यये यदङ्गं तस्याङ्गमनाङ्गं वा प्रत्ययलक्षणं कार्यं न स्यात् गर्गाः मृष्टः जुहुतः।
यज्ञशायोर्लुमता लुप्तयोरङ्गस्य वृद्धिगुणौ न लुमति प्रतिषेधे एकपदस्वरस्योपसंख्यानम् १ सर्वामन्त्रितसिज्लुक्स्वर
वर्जम् २। अहोरविधौ लुमता लुप्ते प्रत्ययलक्षणेन ३ उत्तरपदत्वे चापदादिविधौ लुमता लुप्ते प्रत्ययलक्षणेन ४ कौ
सु। हु। न परमवाच परमवाचे अपदादिविधाविति किमर्थम् दधिसेचौ दधिसेपा अत्रषत्वनिषेधे कर्तव्ये पदत्वम
स्तिकृतेन नवडुव्पूर्वस्य पदादिविधावेव न पदान्तविधौ ५ बहुसेवौ बहुसेवः इन्द्रोऽन्त्यस्य लुमता लुप्ते प्रत्ययल
क्षणं न ६ वाक्कसत्कृत्ववम् निषेधाश्च बलीयांसः १ परिभाषेयम् ६४ अचोऽन्त्यादि टि संज्ञाप्रदेशाः। ७।१।८८।
कौ। सु। अ॥ अचां मध्येऽन्त्योयोऽच् तदादिशब्दरूपं टिसंज्ञं भवति पचते पचेते भाष्ये तु नेदं व्याख्यातम् ६५ अलोऽ
न्त्यात्पूर्व उपधा संज्ञाप्रदेशाः ६।४।७।७।३।८८। कौ। सु। अ। शे। अन्त्याद्वर्णात्पूर्वो वर्ण उपधासंज्ञः स्यात् भिद। भेत्ता
बुध। बोद्धा। उपधासंज्ञायामल्ग्रहणमन्यानिर्देशार्थं त्सेचातप्रतिषेधः।। १। नानर्थकेऽलोऽन्त्यविधिरनभ्यासविकारे

सू.प.
८
8

१ परिभाषेयम् ६६ तस्मिन्निति निर्दिष्टे पूर्वस्य परिभाषाप्रदेशः ।१।१।६७। कौ। सू। प। सप्तम्यर्थे निर्देशे पूर्वस्यैव का
र्यं भवति न परस्य नापि व्यवहितस्य दध्यत्र सप्तम्यर्थे निर्देशे पूर्वस्यैव कार्यं भवति न परस्य नापि व्यवहितस्य दध्यत्र उ
भयनिर्देशे पञ्चमीनिर्देशो बलीयान् १ परिभाषेयम् ६७ तस्मादित्युत्तरस्य परिभाषाप्रदेशः ।१।१।६८। कौ। सू।
प। पञ्चम्यर्थे निर्दिष्टे परस्यैव कार्यं स्यात् न पूर्वस्य नापि व्यवहितस्य उत्थानम् ओदनं पचति ६८ स्वं रूपं शब्दस्या
शब्दसंज्ञा। संज्ञाप्रदेशः ।१।१।६९। कौ। सू। सं। इह शास्त्रे शब्दस्य स्वं रूपं बोध्यं नोपम् न बाह्योऽर्थः ...करण
शास्त्रे या संज्ञा तां वर्जयित्वा राज्ञः स्वशुर्यः आग्नेयः महीपालादिभ्यो न यत्। अङ्गादिभ्यश्च न ... शब्द
संज्ञेति किम्। उपसर्गे घोः कि इत्यादौ स्वरूपग्रहणं माभूत् सित्तद्विशेषाणां वृक्षाद्यर्थम् १ लक्षन्यग्रोधौ ॥ पित्पर्या
यवचनस्य च स्वाद्यर्थम् २ ज्ञातद्विशेषाणां स्वरूपस्य च। स्वेभ्यः। स्वपोषं पुष्यति। रैपोषं। धनपोषं। विश्वपोषं
अश्वपोषं। गोपोषं। जित्पर्यायवचनस्यैव राजाद्यर्थम् ३ सभा राजा। इनसभम्। ईश्वरसभम्। तस्य तद्विशेषाणां च न
भवति। राजसभा। पुष्यमित्रसभा। झित्तस्य च तद्विशेषाणां च मत्स्याद्यर्थम् ४ कित्निर्देशः कर्तव्यः ततो वक्तव्यं तस्य
च तद्विशेषाणां च ग्रहणं भवतीति। किं प्रयोजनम्। मत्स्याद्यर्थम्। पक्षिमत्स्यमृगान्। मात्स्यिकः। शाफरिकः। शा
कुलिकः। पर्यायस्य न। अजिह्मान् हन्ति। अनिमिषान् हन्ति। इति भाष्यम्। अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम् १
परिभाषेष्टिः। मैनिकः अर्थवद्ग्रहणे नानर्थकस्य ग्रहणम् १ परिभाषेयम् ६९ अणुदित्सवर्णस्य चाप्रत्ययः। संज्ञा
प्रदेशः ।१।१।६९। कौ। सू। सं। अण् उदिच्च सवर्णस्य संज्ञा स्यात्। स्वस्य च रूपस्य। प्रत्ययस्तु न। अत्रैवाण् परेण णका
रेण। उकारोत्याअइउऋ इति प्रत्येकमष्टादशानां संज्ञाः ऋ इति त्रिंशतः संज्ञा। ऌकारोऽपि त्रिंशतः संज्ञा एचो ऐ औ इति
प्रत्येकं द्वादशानां संज्ञाः एदैतोरोदौतोश्च न परस्परं सावर्ण्यम् ऐऔजिति सूत्रारम्भसामर्थ्यात्। तेनैव स्वन्तविंशतेः संज्ञा ८

न। अननुनासिकाः ननुनासिकभेदेन यवला द्विधा तेनाऽननुनासिकास्ते द्वयोर्द्वयोः संज्ञा कुचुटुतुपुपत्ते उदितः। गा
ङ्गेयः। शुङ्क्तो भवति। गोपी। अप्रत्ययः किम् सनाशंसभिक्ष उः दिहृक्षुः दीर्घो न भवति अप्रत्ययादेशटित्किन्मित इति व
क्तव्यम् १ भाव्यमानेन सवर्णानां ग्रहणं न १ परिभाषेयम् ७०। तपरस्तत्कालस्य। संज्ञाप्रदेशः। ८।३।९। कौ। स्व। सं। तः
परो यस्मात्स तात्परश्च वर्णः स्वसमकालस्य संज्ञा स्यात् उकारीत्याद्यत इत उत इत्यादयः षण्णां षण्णां संज्ञा ऋत् इति द्वादशानां
संज्ञा। वृद्धैः तत्कालस्येति किम्। खट्वाभिः। द्रुताया न परकरणे मध्यमाविलम्बितयोरुपसंख्यानं कालभेदात् १ मध्यमा
यां द्रुतविलम्बितयोः २ विलम्बितायां द्रुतमध्यमयोः ३ ध्वनिः स्फोटश्च शब्दानां ध्वनिस्तु खलु लक्ष्यते। अल्पो महांश्च केषां
चिदुभयं तत्स्वभावतः १ कारिकेयम् ७१। आदिरन्त्येन सहेता। संज्ञाप्रदेशः। ८।१।७८। कौ। स्व। सं। अन्त्येनेत्से
त्केन सहोच्चार्यमाण आदिर्मध्यपतितानां संज्ञा स्यात् स्वस्य रूपस्य। अण्। अच्। हल्। तिङ्। इत्यादि। अन्त्येनेति किम्। सु
डिति टाट्कारेण मा भूत् तन्मध्यानां चेति वक्तव्यम् १। ७२। येन विधिस्तदन्तस्य। संज्ञाप्रदेशः। ३। १। ९७। कौ। स्व। सं। वि
शेषणं तदन्तस्य संज्ञा स्यात्। स्वस्य च रूपस्य। चेयम्। जेयम्। समासप्रत्ययविधौ प्रतिषेधः १ द्वितीया श्रितादिभिः सम
स्याते कष्टश्रितः। नेह। कष्टं परमश्रितः। नडादिभ्यः फक्। नाडायनः। नेह। सौत्रनाडिः। उगिद्वर्णग्रहणवर्जम् २ उगि
तश्च। भवती। अतिभवती। अतश्च। दाक्षिः। प्लाक्षि अकच्प्रत्ययः सर्वनामाव्ययधातुविधावुपसंख्यानम्।३। तदन्तान्तस्ये
ति वक्तव्यम्।४। प्रयोजनं सर्वनामाव्ययसंज्ञायाम्।५। परमसर्वे। परमोच्चैः। उपपदविधौ भयाढ्यादिग्रहणं प्रयोजनम्।६।
अभयंकरः। स्वाढ्यंकरणम् दितिग्रहणं च प्रयोजनम्।७। रणाग्रणग्रहणं च प्रयोजनम्।८। अजकरेणः। तस्यैव
ति वक्तव्यम् ९। रेणः। यत्राङ्गकार्ये तस्यैव तस्य सर्वस्य शेषस्य चेति। इति भाष्यम्। रथसीताहलेभ्यो यद्विधौ
प्रयोजनम् १०। परमरथ्यः। परमसीत्यम्। परमहल्या स्वसर्वाद्देदिकच्छेद्भ्यो जनपदस्य प्रयोजनम् ११। कौ। स्व। त।

सू.प. २ ७

शै। सपाञ्चालकः। अर्द्धपाञ्चालकः सर्वपाञ्चालकः। अतोर्वृद्धिर्यावयवानां प्रयोजनम् ९२ कौ। सु। त। शै। सर्वशार
दम् इत्युभयोसंख्यायाः प्रयोजनम् ९३ द्वैषाष्टिकम् पदाङ्गाधिकारे तस्य च तदुत्तरपदस्य च ९४ यत्नमप्यपतितन्तुग्रहणे
नदृश्यते १ व्यपदेशिवद्भावोऽप्रातिपदिकेन।२। पदाङ्गाधिकारे तस्य च तदन्तस्य च ३ प्रत्ययग्रहणे वाऽपञ्चम्याः ४। अनि
नस्मन्ग्रहणान्यर्थवता चाऽनर्थकेन च तदन्तविधिं प्रयोजयन्ति ५ यस्मिन्विधिस्तदादावल्ग्रहणे ।६। परिभाषा इमाः।
ऋलेवाऽनर्थकेन तदन्तविधिर्नोऽनर्थकेन ७। वर्णग्रहणेऽर्थवद्ग्रहणपरिभाषा न प्रवर्तते तन्मूलिकेयम् ७३ वृद्धि
र्यस्याचामादिस्तद्वृद्धम् संज्ञाप्रदेशाः ।४।१।१५७। ४।२।११४। कौ। सु। त। शै। यस्य समुदायस्याऽचां मध्ये आदिर्वृद्धिसंज्ञकस्त
त्संज्ञं स्यात्। शालीयः। मालीयः। व्यञ्जनस्याविद्यमानवद्भावो वक्तव्यः।१। वा नामधेयस्य।२। देवदत्तीयाः। दैवदत्ताः। गोत्रोत्त
रपदस्य च।३। कम्बलचारायणीयाः। ओदनपाणिनीयाः। वृद्धाम्भीयाः॥ गोत्रान्ताद्वाऽसमस्तवत्।४। प्रत्ययो भव
तीत्यर्थः पैङ्गलकाण्वाः किंतु नरचत्र्यायः अत्समस्तवदिति च न्यायः इति भाष्यम् जिह्वाकात्यहरितकात्यवर्जम् ५ जै
ह्वकाताः हारितकाताः ७४ त्यदादीनि च कौ। सु। त। शै। सर्वादिगणपठितानि त्यदादीनि वृद्धसंज्ञानि स्युः। तदीयः।
यदीयः। इत्यादि ७५ एङ् प्राचां देशे। कौ। सु। त। शै। एङ् यस्याचामादिस्तद्वृद्धसंज्ञं स्यात् तच्चेत्प्राग्देशानाम एणीपचनी
याः। गोनर्दीयाः भोजकटीयाः। इत्यादि एङ् किम्। आहिच्छत्रम्। प्राचां किम्। देवदत्तो नाम वाहीकग्रामः तत्र भवो दे
वदत्तः देशे किम्। गोमत्यामभवा मत्स्या गोमताः। एङ् प्राचां देशे शैषिकेष्विति वक्तव्यम् १। प्रागुदञ्चौ विभजते हंसः क्षी
रोदके यथा विदुषां शब्दसिद्ध्यर्थं सा नः पातु सरस्वती॥१॥ काशिकाकारिकेयम् ॥ इति षोडश सूत्राणि भाष्ये प्रथमाध्याये
प्रथमपादे नवमाह्निके व्याख्यातानि ९६ इति सूत्रपाठे प्रथमाध्यायस्य प्रथमः पादः १ गाङ्कुटादिभ्योऽञ्णिन्ङित् अतिदे
शोऽयम्। कौ। सि। अ। भ्याङ्ग्देशात्कुटकौटिल्ये इत्यारभ्य कुङ् शब्दे इत्यन्ताः ये कुटादयस्तेभ्यः अपरे ञिणितः प्रत्ययाः ङि ८

इत्यत्र: गाङ्। अध्यगीष्ट। अध्यगीषाताम्। अध्यगीषत। कुटादिभ्यः। कुटिता। कुटितुम्। कुटितव्यम्। पुटिता। पुटि
तुम्। इत्यादि। अञ्णिदितिकिम्। उत्कोटयति। उत्कोटः। भवतीति वेशप्रतिषेधः ।१। सर्वत्रसमत्वादात्मनेपदप्रतिषेधः २
ज्ञापकंकिञ्चित्प्रतिषेधश्च ३ वकारादिट्। अवेः कुटादित्वमनसीतिवक्तव्यम् ।१। इतिकाशिका उरिति विना अनसीतिकिम्
उद्व्यचाः अवेः कुटादित्वमनसि १ कौ। ति। त। अनसीतिपर्युदासेनाऽस्यकृन्मात्रविषयत्वेवाच्यम् २ विजइट्। कौ।
ति। त। ओविजी अस्मात्परइडादिप्रत्ययोङिद्वत्स्यात्। उद्विजितुम् ३ विभाषोर्णोः। अप्राप्तविभाषेयम्। षेपम्। कौ। ति
अ। ऊर्णुञ्। अस्मात्परइडादिप्रत्ययोवाङिद्वत्स्यात्। ऊर्णुविता। ऊर्णविता ४ सार्वधातुकमपित्। कौ। ति। श्वा। पिद्भिन्ना
धात्वधिकारोक्तास्तिङः शितश्चप्रत्ययाङिद्वत्स्युः कुरुतः। कुर्वन्ति। चिनुतः। चिन्वन्ति सार्वधातुकेकिम्। कर्ता। अपित्किम्
चिनोति। अपित्ङिदितिचेत्क्वचिदेकादेशप्रतिषेधश्चादिवत्वात् १ नपित्ङिदितिचेडुत्वमेकादेशप्रतिषेधः २प्राप्नोतीतिशेषः
असंयोगाल्लिट्कित् अतिदेशोऽयम्। कौ। ति स्वा। असंयोगात्परोऽपिल्लिट्प्रत्ययः किद्वत्स्यात्। बिभिदतुः। बिभिदुः बि
च्छिदुः। ईजतुः। ईजुः। असंयोगात्किम्। सस्रंसे। अपित्किम्। बिभेदिथ ऋदुपधेभ्योलिटः कित्वंगुणात्पूर्वविप्रतिषे
धेन ।१। कौ। ति। धा। ववृते। ववृधे ६। इन्धिभवतिभ्यां च। कौ। वे। प्र। अ। आभ्यांपरोऽपिलिट्कित्स्यात्। जिइन्धे। समी
धेदस्युहन्तमम्। पुत्रईधे अथर्वणः। भू। बभूवतुः। इन्धेः संयोगार्थग्रहणम् भवतेः पिदर्थम् इन्धेश्छन्दोविषयत्वाद्भु
वोवुकोनित्यत्वात्ताभ्यांलिटः किद्वचनानर्थक्यम् इतिभाष्यम् श्रन्थिग्रन्थिदम्भिस्वञ्जीनामितिवक्तव्यम् ।१। इयमिष्टि
रितिकाशिका ४ श्रन्थ। श्रेथतुः। श्रेथुः ग्रन्थ। ग्रेथतुः ग्रेथुः। दम्भ। देभतुः। देभुः। षञ्ज। सस्वजे। श्रन्थिग्रन्थिदम्भिस्व
ञ्जीने। टितः कित्वंवा ।१। इतिव्याकरणान्तरम्। कौ। ति। श्वा। श्रेथतुः। शश्रन्थतुः। इत्यादि। देभतुः सस्वजे इतिभाष्योदाहर
णादेकदेशानुमत्याऽस्याइष्टिराङ्गीयते ७ मृडमृदगुधकुषक्लिशवदवसः क्त्वा। कौ। क। उ। सन्वापवादः मृड मृडित्वा। मृद

सू॰प॰ १० 10

मृदित्वा। गुध। गुधित्वा। कुष। कुषित्वा। क्लिशू। क्लिश। क्लिशित्वा। वद। उदित्वा। वस। उषित्वा ८ रुदविदमुषग्रहिस्वपिप्र
च्छः संश्च। कौ।ति। सन्मुपौधातुभ्यः सन्क्त्वा च कितौ स्तः रुदिर्। रुदित्वा। रुरुदिषति। विद ज्ञाने। विदित्वा। विविदिषति। मु
ष। मुषित्वा। मुमुषिषति। ग्रह। गृहीत्वा। जिघृक्षति। ञिष्वप्। सुप्त्वा। सुषुप्सति। प्रच्छ। पृष्ट्वा। पिपृच्छिषति ९। इको झल्
कौ।ति। स। इगन्ताज्झलादिः सन् कित्स्यात्। चिचीषति। तुष्टूषति। चिकीर्षति। जिहीर्षति। इकः किम्। तितांसति। झ
ल् किम्। शिशयिषते। असति किति दीर्घे षत्वाद्गुणो बाधेत। तीर्षतीत्यादौ णिलोपवत् इकः कित्त्वं गुणो मा भूद्दीर्घारम्भा
त्कृते भवेत् अनर्थकन्तु ह्रस्वार्थं दीर्घाणान्तु प्रसज्यते १ सामर्थ्याद्धि पुनर्भाव्यमृदित्त्वं दीर्घसंश्रयम्। दीर्घाणां नाकृते दीर्घे
णिलोपस्तु प्रयोजनम् २ कारिके इमे। यद्येवं बहुलक्षणप्रहतिः १ परिभाषेयम् ९ हलन्ताच्च। कौ।ति। स। इक्समीपा
द्धलः परो झलादिः सन् कित्स्यात्। बिभित्सति। बुभुत्सते। इकः किम्। पिपक्षति। झल् किम्। विवर्धिषते। दम्भेर्हल्ग्रह
णस्य जातिवाचकत्वात्सिद्धम्। धिप्सति। इति भाष्यम् ११ लिङ्सिचावात्मनेपदेषु। कौ।ति। स्वा। इक्समीपाद्धलः प
रौ झलादी लिङ्सिचौ कितौ स्त आत्मनेपदेषु परेषु। भित्सीष्ट। अभित्त। अबुद्ध। इकः किम्। यक्षीष्ट। अयष्ट। आत्मनेपदेषु
किम्। अस्राक्षीत्। हलः किम्। चेषीष्ट। अचेष्ट १२ उश्च। कौ।ति। स्वा। ऋवर्णान्तात्परौ झलादी। तौ लिङ्सिचौ कितौ
स्त आत्मनेपदेषु परेषु। कृषीष्ट। हृषीष्ट। अकृत। अहृत। झल् किम्। वरिषीष्ट। आत्मनेपदेषु किम्। अकार्षीत्। १३। वा ग
मः। कौ।ति। आगम धातोः परौ झलादी लिङ्सिचौ वा कितौ स्त आत्मनेपरेषु। संगसीष्ट। संगंसीष्ट। समगत। समगं
स्त ॥ १४ हनः सिच्। कौ।ति। आ। हनधातोः परः सिच् कित्स्यात्। आहत। आहसातां। आहसत। सिज्ग्रहणं लिङ्नि
वृत्त्यर्थम् १५ यमो गन्धने। कौ।ति। आ। गन्धने सूचनम्। तत्रवर्तमानाद्यमधातोः परः सिच् कित्स्यादात्मनेपदेषु परेषु य
म। उदायत। उदायसाताम्। उदायसत। १६। विभाषोपयमने। कौ।ति। आ। उपयमने विवाहः। तत्रवर्तमानाद्यमधातोः १०

परः सिच्वा कित्स्यादात्मनेपदेषु परेषु। उपायत कन्याम्। उपायंस्त ः १८। स्थाघ्वोरिच्च। कौ। ति। स्थाघ्वोरन यो विदादेशः स्यात् सि
च कित्स्यादात्मनेपदेषु परेषु। स्था। उपास्थित। उपास्थिषाताम्। उपास्थिषाताम्। उपास्थिषत। ह्रस्वांतकस्य। अदित। अधित
इत्वकस्य तकारे तेन दीर्घो माभूत् हतेऽपि सः। अनन्तरे लंतेनाभूत् लुतस्य विषये स्तरमः १। कारिकेयम् १९ न क्त्वा सेट्। कौ। क्त्व
उ। सेट् क्त्वा कित्र स्यात्। देविता। सेविता। स्रविता। वर्तिता। सेडिति किम्। कृत्वा। क्त्वा किम्। विशृहीतिः। विकुवितिः। न सेडि
ति कृतेऽकित्वे निष्ठायामवधारणात्। ज्ञापकात्र पदे रोला यो ऽसनिकलग्रहणे विडः १। इत्वे कित्वे संनियोगेन रेणात्वं समयोव
ति। वस्तव्यं कित्रितीदेशात्रिगृह्णातिः प्रयोजनम् २। कारिके इमे ॥ १९ निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः। कौ। क्त। एभ्यः से
ट् निष्ठा कित्र स्यात्। शीङ्। शयितः। शयितवान्। ञिष्विदा। प्रस्वेदितः। प्रस्वेदितवान्। ञिमिदा। प्रमेदितः। प्रमेदितवान्।
ञिक्ष्विदा। प्रक्ष्वेदितः। प्रक्ष्वेदितवान्। ञिधृषा। प्रधर्षितः। प्रधर्षितवान्। सेट् किम्। ञिष्विदा। स्विन्नः। स्विन्नवान्। शीङो
नवन्यनिर्देशाद्यङ्लुकि हन्तर्यः। शेशयितः। शेशयितवान् ॥ २० मृषस्तितिक्षायाम्। कौ। क्त। मृष धातोः सेण्निष्ठा कित्र
स्यात्तितिक्षायाम्। मृष। मर्षितः। मर्षितवान्। तितिक्षायां किम्। अपमृषितं वाक्यम् २१। उदुपधाद्भावादिकर्मणोरन्यतरस्याम्
कौ। क्त। उदुपधाद्धातोर्भावेऽद्यादिकर्मणि च वर्तमानः सेण्निष्ठा पर वा कित्र स्यात्। द्युतितमनेन। प्रद्युतितः। प्रद्योतितः। उदु
पधात् किम्। लिखितमनेन। भावादिकर्मणोः किम्। रुचितं कार्षापणम्। सेट् किम्। प्रभक्त ओदनः। शब्विकरणेभ्य एवेष्यते। इ
ति भाष्यम् ॥ २२ पूङः क्त्वा च। कौ। क्त। पूङ् धातोः परौ निष्ठाक्त्वा प्रत्ययौ सेटौ कितौ न स्तः। पूङ्। पवितः पवितवान्। क्त्वा
ग्रहणमुत्तरार्थम्। न क्त्वा सेडिति सिद्धेः २३ नोपधात्थफान्ताद्वा। कौ। क्त। उ। निष्ठेति निवृत्तम्। नकारोपधात्थकारान्तात्
परः सेट् क्त्वा प्रत्ययः कि। द्वा न स्यात्। ग्रथित्वा। ग्रन्थित्वा। गुफित्वा। गुम्फित्वा। नोपधात् किम्। रेफित्वा। थफान्तात् किम्। सं
सित्वा २४। वञ्चिलुञ्च्यृतश्च। कौ। क्त। उ। एभ्यः सेट् क्त्वा वा कित्र स्यात्। वञ्चु। वचित्वा। वञ्चित्वा। लुञ्चु। लुचित्वा। लुञ्चि

सू॰प॰ ११

त्वा। क्षरत इति सेटो व्येधानः क्षरितिना। त्सरितिना। सेड्डिम्। वक्ता। २५। तृषिमृषिकृशेः काश्यपस्य। कौ। कृ। ३। एभ्यः सेट् क्त्वा किद्वा स्यात्
जितृष। तृषित्वा। तर्षित्वा। मृष। मृषित्वा। मर्षित्वा। कृश। कृशित्वा। कर्शित्वा। काश्यपग्रहणं पूजार्थं। येनेव हि विकल्पते २६। रलोव्यु
पधाद्धलादेः संश्च। कौ। ति। स। ३। ४। २। ३। वो। वीउपधेयस्य सव्युपधः। उकारोपधादिकारोपधाच्च धातो रलन्ताद्धलादेः परौ क्त्वास
नौ सेटौ वा कितौ स्तः। द्युतित्वा। द्योतित्वा। दियुतिषति दियोतिषते। रलः किम्। देवित्वा। व्युपधात्किम्। वर्तित्वा। हलादेः किं
एषित्वा। सेड्डिम्। मल्ला २७ ऊकालोऽज्झ्रस्वदीर्घप्लुतः। संज्ञाप्रदेशाः। ६।१।१२६।१।७५।८।२।८२। कौ। स। से। उ ऊ ऊ३
त्येवं कालोऽच्क्रमेण ह्रस्वदीर्घप्लुतसंज्ञः स्यात्। उकालो ह्रस्वः। दधि। मधु। ऊकालो दीर्घः। गौरी। कुमारी। ऊ३कालः प्लुतः।
देवदत्ता ३ कालग्रहणं परिमाणार्थम्। दीर्घप्लुतयोर्ह्रस्वसंज्ञा माभूत्। प्रलूय। ह्रस्वस्य पिति कृति तुगिति तुङ्। अज्ग्रहणं
संयोगिसमुदायनिवृत्त्यर्थं। प्रतक्ष्य २८ प्रवश्च्य। परिभाषाप्रदेशाः। ७।४।५४।७।४।२५।८।२।८२। कौ। स। प। ह्रस्वदी
र्घप्लुतशब्दैर्यत्राज्विधीयते तत्राच इति षष्ठ्यन्तं पदमुपतिष्ठते। श्रतिरि। चीयते। देवदत्ता ३ अचः किम्। प्रच्छिवोऽ३त्। त
कारस्य माभूत्। ह्रस्वादिविधिरलोन्त्यस्येति चेद्विप्रक्षिप्तमादि प्रभृति हनिगमिदीर्घेषु ग्रहणे कर्तव्यम् ११ प्रवश्चेत्रुण्डे सव
ह्रस्वाकृत्स्नावैधात्वकनामिदीर्घेषु नन्यप्रतिषेधो वक्तव्यः २ स्वसंज्ञया विधानेन प्रथमः। ३। २९। उच्चैरुदात्तः संज्ञाप्रदेशाः
६।१।१५९।८।२।५। कौ। स। से। भागसहितताल्वादिस्थानेषूर्ध्वभागे निष्पन्नोऽज्उदात्तसंज्ञः स्यात्। वे। कै। ग। नीचैरनु
दात्तः। संज्ञाप्रदेशाः। ६।१।१५८। कौ। स। संभागसहितेषु ताल्वादिस्थानेष्वधोभागे निष्पन्नोऽज् अनुदात्तसंज्ञः स्यात्। त्व। स
म। सीम। समानप्रक्रमे इति वक्तव्यम्। १।३१। समाहारः स्वरितः। संज्ञाप्रदेशाः। ६।२।८५।८।२।६। कौ। स। से। उदात्तत्वानु
दात्तत्वधर्मद्वयसहितो योऽच् स स्वरितसंज्ञः स्यात्। क्व। कन्या। ३२। तस्यादित उदात्तमर्धह्रस्वम्। कौ। स। से। स्वरितस्यादौ
याऽर्धमात्रा सोदात्ता ततो वा याः। परिशिष्टाऽनुदात्ता। क। अत्रादितोऽर्धमात्रोदात्ताऽवशिष्टाऽर्धमात्राऽनुदात्ता। कन्या। अत्रादितोऽ ११

ई३ मात्रोदात्तः । वशिष्ठस्याई३ कमात्रा ऽनुदात्ता । माणवका ३ । अत्रादितो ई३ मात्रोदात्ता ऽ वशिष्ठे स्याई३ द्विमात्रेत्यनुदात्ते । इयम् अ
इ उ ऋ ऌ एषां वर्णानां प्रत्येकमष्टादश भेदा भवन्ति । तथाहि । ह्रस्वोदात्तः १ ह्रस्वोऽनुदात्तः २ ह्रस्वस्वरितः ३ दीर्घोदात्तः ४ दीर्घो
ऽनुदात्तः ५ दीर्घस्वरितः ६ प्लुतोदात्तः ७ प्लुतोऽनुदात्तः ८ प्लुतस्वरितः ९ अननुनासिकानुनासिकभेदेनाष्टादश । १८ । ऌव
र्णस्य द्वादश १२ तस्य दीर्घाभावात् । एचोऽप्येषामपि प्रत्येकं द्वादश १२ तेषां ह्रस्वाऽभावात् । तस्मादित्यादि नवसूत्राणि पूर्वा
माध्याये उदात्तादनुदात्तस्य स्वरित इति सूत्रस्याग्रे कर्तव्यानीति भाष्ये स्पष्टम् ३३ एकश्रुति दूरात्संबुद्धौ । कौ । स्व । सा । दूरात्संबो
धने वाक्यमेकश्रुति भवति उदात्ताऽनुदात्तस्वरितानामविभागेनोच्चारणमेकश्रुतिः । आगच्छ भो माणवक देवदत्ता ३ । दूरा
दिति किम् । आगच्छ भो माणवक देवदत्त ३४ । यज्ञकर्मण्यजपन्यूङ्खसामसु । कौ । स्व । सा । वेदे मन्त्राः स्वरेण पठ्यन्ते तेषां
यज्ञक्रियायामेकश्रुतिर्भवति । जपन्यूङ्खसामसु न भवति । अग्निर्मूर्द्धा दिवः ककुत्पतिः इत्यादि अजपेषु किम् । ममाग्ने वर्चो
विहवेष्वस्तु । जप उपांशुप्रयोगः अन्यूङ्खेषु किम् । न्यूङ्खाः षोडश ओकाराः तत्र केचिदुदात्ताः केचिदनुदात्ताः । ओम् । इत्यादि
असामसु किम् । ए ३ विश्वं समत्रिणं दह ३ सामानि वाक्यविशेषस्य गीतय उच्यन्ते एष्वेकश्रुतिर्न भवति इत्यादि त्रीणि सू
त्राणि भाष्येन न व्याख्यातानि । ३५ । उच्चैस्तरां वा वषट्कारः । कौ । स्व । सा । यज्ञकर्मणि वौषट् शब्द उदात्ततरो वा स्यादेकश्रुतिर्वा
वा । वषट् शब्देनात्र वौषट् शब्दो लक्ष्यते । वौ ३ षट् । पक्षे एकश्रुतिः । वौषट् ३६ । विभाषा छन्दसि । कौ । स्व । सा । छन्दसि विभा
षा एकश्रुतिः स्यात् । पक्षे त्रैस्वर्यम् । अग्न आयाहि वीतये । अग्न आयाहि वीतये । इत्यादि ३७ न सुब्रह्मण्यायां स्वरितस्य तूदा
त्तः । कौ । स्व । सा । सुब्रह्मण्या नाम निगदः । तत्र यज्ञकर्मणीति विभाषा छन्दसीति वैकश्रुतिर्न स्यात् । स्वरितस्य तूदात्ता
देशः स्यात् । सुब्रह्मण्योम् । इन्द्रागच्छ । हरिव आगच्छ । इत्यादि । असावित्यन्तः । १ । तस्मिन्नेव निगदे प्रथमान्तस्यान्त उदात्तः
स्यात् गार्ग्यो यजते । अमुष्येत्यन्तः २ षष्ठ्यन्तस्यापि प्राग्वत् । दाक्षेः पिता यजते । स्यान्तस्योपोत्तमं च । ३ । वा दन्तः । तेन द्वाव

दात्तौ। गार्ग्यस्यपितायजते। अन्त्यस्यसमीपमुपोत्तमम् वानामधेयस्य।४१। स्यान्तस्यनामधेयस्योपोत्तममुदात्तंवास्यात्
स्तु.प. देव दत्तस्यपितायजते ३८ देवब्रह्मणोरनुदात्तः।कौ।स्व।स्ता। अनयोःस्वरितस्याऽनुदात्तःस्यात्सुब्रह्मण्यायाम्।देवा
२५ ब्रह्माण्यायाम्।देवाब्रह्माणआगच्छत ३९ स्वरितात्संहितायामनुदात्तानाम्।कौ।स्व।स्ता।स्वरितात्परेषामनुदात्तानां
12 मेकश्रुतिःस्यात्संहिताविषये। इमंमेगङ्गेयमुनेसरस्वति ४० उदात्तस्वरितपरस्यसन्नतरः।कौ।स्व।स्ता।उदात्तपरस्यस्व
रितपरस्यचाऽनुदात्ततरआदेशःस्यात्।सरस्वतिशुतुद्रि।अध्यापकक्रियामिष्यसि। भाष्येतुनेदंव्याख्यातम् ४१ अपृक्तएकाल्
प्रत्ययः।संज्ञाप्रदेशाः।६।१।६८।७।३।९१। कौ।स।आपृ।एकवर्णःप्रत्ययोऽपृक्तसंज्ञःस्यात्। राजा।घृतस्पृक्
एकाल्किम्।दर्विः।जागृविः।प्रत्ययःकिम्।सुराः।अपृक्तसंज्ञायांहल्ग्रहणंस्वादिलोपेहलोऽग्रहणम् १ अणिञो
र्लुगर्थमल्ग्रहणंकर्तव्यम् २ अल्ग्रहणेक्रियमाणेएकग्रहणंकरोतितज्ज्ञापयत्याचार्यः।अन्यत्रवर्णग्रहणेजातिग्र
हणंभवतीति।किमेतस्यज्ञापनेप्रयोजनम्।दम्भेर्हल्ग्रहणंजातिपरमित्युक्तंतदुपपन्नंभवति। इतिभाष्यम् ४२ तत्पुरुषःस
मानाधिकरणःकर्मधारयः। संज्ञाप्रदेशाः २।२।३८।६।२।४६। कौ।स।स।ता।एकधर्मिबोधकपदस्तत्पुरुषसमासःकर्मधार
यसंज्ञःस्यात्। परमराज्यम्। कृष्णनवमी तत्पुरुषःकिम्। पाचिकाभार्यः तत्पुरुषःसमानाधिकरणपदःकर्मधार
यइतिवक्तव्यम्।१। ४३। प्रथमानिर्दिष्टंसमासउपसर्जनम्। संज्ञाप्रदेशाः।१।२।४८।२।२।३०। कौ।स।स।आसमासशास्त्रे
यत्प्रथमान्तपदवाच्यंतदुपसर्जनसंज्ञंस्यात् द्वितीयाश्रितेत्यादिसमासविधायकशास्त्रेप्रथमान्तपदंद्वितीयाइत्यादितद्वाच्ये
द्वितीयान्तादितदुपसर्जनसंज्ञंस्यात्। कृष्णश्रितः।शङ्कुलाखण्डः।यूपदारु।वृकभयम्।राजपुरुषः अक्षशौण्डः।समा
सविधानेप्रथमानिर्दिष्टमुपसर्जनसंज्ञंभवतीतिवक्तव्यम् १ यस्यविधौयत्प्रथमानिर्दिष्टंतत्प्रतितदुपसर्जनसंज्ञंभवतीति
वक्तव्यम्।२।षष्ठ्यन्तयोःसमासेऽर्थाऽभेदात्प्रधानस्याऽपूर्वनिपातः।इतिभाष्यम् एकविभक्तौस्वरस्वत्वापित्तेराज्ञःकुमा १२

ष्यौ इति परिनिष्ठितविभक्त्यासमासे कुमार्योऽपि पूर्वनिपाताऽपत्तिशङ्का। अर्थाऽभेदात्. अर्थस्य प्रधानस्याऽभेदात्सम
स्यमानराजपदार्थनिरूपितमेवन्याऽभावात्। अस्य षष्ठ्यन्तस्य प्रथमानिर्दिष्टत्वाभावान्न पूर्वनिपात इति समाधानम्। ष
ष्ठीत्यादिसूत्रेऽपि येन सुबन्तेन समासस्तदर्थनिरूपितसम्बन्धाद्यर्थैकमेव षष्ठ्यन्ते गृह्यते। तदेव वचनत्र प्रथमानिर्दिष्टमि
ति तात्पर्यम्। ४४। एकविभक्ति चाऽपूर्वनिपाते। कौ। सा। सा। अ। विग्रहे यन्नियतविभक्तिकं तदुपसर्जनं स्यान्न तु तस्य पूर्व
निपातः। पञ्चगुः। प्रामजीविकः। आपन्नजीविकः। अलंकुमारिः। निष्कौशाम्बिः। एकविभक्त्याव षष्ठ्यन्तवचनम्॥ कौ
सा। सा। त। अर्द्धं पिप्पल्या अर्द्धपिप्पली इह मा भूत्। अत्र समासघटकपदान्तराऽपेक्षया नियतविभक्तिकत्वमिति प्राञ्चः
समासाऽपेक्षयेति नव्याः। युक्तं चैतत्। विग्रहरित्यादावनेनोपसर्जनत्वमाश्रित्याऽनेकग्रहणस्य भाष्ये प्रत्याख्यातत्वात्
अत एव समभाष्येः सिद्धः अन्यथा सहराष्ट्रस्याव्ययत्वाद्विभक्तिमात्राभावेन लक्ष्याऽनुगतेरेवान्वाख्यानेन वाऽनियतवि
भक्तित्वाभावात्तदपेक्षानिपतदपेक्षानियतविभक्तित्वस्य भार्यपेक्षत्वाऽभावेनोपसर्जनत्वस्याऽनापत्तिः इति ४४ सूत्रा
णि भाष्ये १।२।१। गतार्थानि। ४५। अर्थवत्। धातुरप्रत्ययः प्रातिपदिकम्। संज्ञाप्रदेशाः ।१।२।४३।४।२।१। कौ। सा। अ
धातुप्रत्ययान्तवर्जमर्थवच्छब्दस्वरूपं प्रातिपदिकसंज्ञं स्यात्। डित्थः। डवित्थः। अर्थवदिति किम्। वनम्। अत्र नान्त
समुदायस्य प्रातिपदिकत्वेन नलोपः स्यात्। अधातुः किम्। अहन्। अप्रत्ययः किम्। हरिषु। करोषि। अत्र सुपिसिपोः प्राति
पदिकत्वेन तदन्तस्यौत्सर्गिकैकवचने सति पदत्वे सात्पदाद्योरिति षत्वनिषेधः स्यात्। अप्रत्ययान्त इति किम्। काण्डे। अत्र ह्र क्रमेः
स्वो नपुंसक इति ह्रस्वः स्यात्। वाक्यस्य प्रातिपदिकसंज्ञायाः प्रातिपदिकसंज्ञायाः प्रतिषेधो वक्तव्यः॥ सति हि प्रतिषे
धो वक्तव्यः। न वक्तव्यः। अर्थवत्समुदायानां समासग्रहणं नियमार्थं भविष्यति। समास एवाऽर्थवतां समुदायानां प्रा
तिपदिकसंज्ञा भवति नान्य इति। इति भाष्यम्। प्रकृतिप्रत्ययसमुदायस्य प्रातिपदिकसंज्ञा वक्तव्या २ निपातस्याऽन

र्थेकस्यप्रातिपदिकसंज्ञावक्तव्या।३। अप्रत्ययइतिवेतिवेकादेशेप्रतिषेधः।४। नप्रत्ययइतिवेहूडे॰कादेशेप्रतिषेधः ५
सू॰प॰ अत्रस्यादितिशेषः। सह्लोपेवप्रत्ययलक्षणेनात्।९। ःःः।४६। कृत्तद्धितसमासाश्च। कौ। स। प्र। ३। कृत्तद्धितान्तौ समा
१३ सास्चप्रातिपदिकसंज्ञाः स्युः।। लिट्।। लिङ्।। रामः।। वटः।। हलः। औपगवः। दाक्षिः। राजपुरुषः। चित्रगुः। अर्थवदिति
13 निषेधेप्राप्तेकृद्ग्रहणम्। अप्रत्ययइतिनिषेधेप्राप्तेतद्धितग्रहणम्। समासग्रहणन्तुनियमार्थम्। तेनाऽर्थवतोवा
क्यस्यनप्रातिपदिकत्वम्। राज्ञःपुरुषः।४७। ह्रस्वोनपुंसकेप्रातिपदिकस्य। कौ। स। प्र। न। नपुंसकलिङ्गेऽर्थेव
र्तमानस्याऽजन्तस्यप्रातिपदिकस्यह्रस्वः स्यात्। अतिरि अतिनु। प्रातिपदिकग्रहणंसत्प्रधानप्रातिपदिकपरि
ग्रहार्थम्। तेनेहनभवति। काण्डे। कुड्ये। अव्ययप्रतिषेधः।१। ४८। गोस्त्रियोरुपसर्जनस्य। कौ। स। स। प्र। उपस
र्जनेयोगोशब्दः स्त्रीप्रत्ययान्तंचयदुपसर्जनंतदन्तस्यप्रातिपदिकस्यह्रस्वः। स्यात्। चित्रगुः। शुक्लगुः। अतिखट्वः
निष्कौशाम्बिः। उपसर्जनस्यकिम्। राजकुमारी। स्त्रीशब्देईकारःस्वरितत्वेनस्त्रीप्रत्ययस्यैवग्रहणम्। नतुस्त्रीलिङ्ग
शब्दमात्रस्य। तेनेहन। अतिलक्ष्मीः। अतिश्रीः। कथमतिराजकुमारिरिति। स्त्रीप्रत्ययेनतदादिनियमप्रतिषेधस्यव
द्यमानत्वात्। यजेकादेशादीर्घत्वेषुप्रतिषेधः।१। गोटाङ्ग्रहणंकृन्निवृत्त्यर्थम्।२। ईयसोबहुव्रीहौपुंवद्वचनम्।३।
बहुश्रेयसी। विद्यमानश्रेयसी। रूपाऽतिदेशोऽयम्। तेनाचह्रस्वात्। ईयसोबहुव्रीहेर्नेतिवाच्यम्।१। कौ। स। सा। व
पूर्वपदस्यचप्रतिषेधोगोसमासनिवृत्त्यर्थम्।४। कपिच।५। द्वन्द्वेच।६।४९। लुक्तद्धितलुकि। कौ। स। त। षो। त
द्धितलुकिसतिस्त्रीप्रत्ययस्योपसर्जनस्यलुक्स्यात्। पञ्चेन्द्राण्योदेवताऽस्यपञ्चेन्द्रः।। दशेन्द्रः।। पञ्चशष्कुलः।। आ
मलकम्। तद्धितग्रहणंकिम्। गार्गीकुलम्। उपसर्जनस्येत्यनुवर्ततेनेह। अवन्ती। कुन्ती। कुरुः। तद्धितलुकावन्त्या
दीनांप्रतिषेधः।१। इदमिहव्यपदेश्यसदावाद्योनव्यपदिशानि। किम्। उपसर्जनस्येतिवर्तते। नवजातिरुपसर्जनम्। १३

इति भाष्यम्। अवन्तीत्यत्र वा ऽपत्यलक्षणा जातिः स्त्रीत्वयुक्तायां प्राधान्येना ऽभिधीयत इत्यर्थः इति कैय्यटः। ५०। इद्गोण्याः
कौ। सू। त। प्रा। गोणीशब्दस्य इकारादेशः स्यात् तद्धितलुकि पूर्वसूत्रा ऽपवादः पञ्चगोणिः। दशगोणिः इति दिनियोगवि
भागः। पञ्चसूचिः। दशसूचिः। इद्गोण्यानेनैव क्रमेहृस्वतो हि विधीयते। इति वा च वचनेनाव न्मात्रा घ्यैवाकृते भवेत् १। गो
ण्या इत्वं प्रकरणात् तस्त्वाय थेमथापि वा साहं कारिकेयं भाष्ये। ५१। लुपि युक्तवद्व्यक्तिवचने। कौ। सू। त। वा। लुवर्थे प्रकृ
त्यर्थवल्लिङ्गसंख्ये स्तः पञ्चालाः क्षत्रियाः। तेषां निवासो जनपदः पञ्चालाः। अङ्गाः। मगधाः। अत्र प्रकृत्यर्थे क्षत्रिये पुं
स्त्वबहुत्वे तेन लुवर्थे ऽपि भवतः व्यक्तिवचने किम्। शिरीषाणामदूरभवो ग्रामः शिरीषास्तस्य वने शिरीषवने। अत्र वनस्याति
देशाऽतिदेशो विभाषौषधीति णत्वं स्यात् लिङ्गातिदेशफलन्तु कटुबदर्या अदूरभवो ग्रामः कटुबदरीति॥ समासे उत्तर
पदस्य बहुवचनस्य लुपः १। मथुरापञ्चालाः समासे उत्तरपदस्यैवेति नियमार्थमिदम् तेनेह न पञ्चालमथुरे इति
प्रागपि हेतेर्युक्ते हते वा पीहयावतातुक्रमम्। वक्तव्यकामचारः प्राग्हेतौ लिङ्गसंख्ययो १ कारिकेयम् ५२। विशेषणानां चा
जातेः। कौ। सू। त। वा। लुवर्थविशेषणानामपि प्रकृतिवल्लिङ्गसंख्ये स्तः। जातिवर्जे पितो॥ पञ्चाला रमणीयाः। गोदौ र
मणीयौ अजातेरिति किम्। पञ्चाला जनपदः। गोदौ ग्रामः हरीतक्यादिषु व्यक्तिः १ हरीतक्यादिषु लिङ्गमेव प्रकृतिवत्
खलतिकस्य पर्वतस्या ऽदूरभवानि खलतिके वनानि मनुष्यलुपि प्रतिषेधः ३ मनुष्यलक्षणे लुवर्थो विशेषणानां
प्रकृतिवल्लिङ्गसंख्ये न स्तः लुवन्तस्य तु भवति वञ्चाः अभिरूपाः। वञ्चिका दर्शनीयाः ५३ तदशिष्यं संज्ञाप्रमाणत्वात्
कौ। सू। त। वा। ननु लुपि युक्तवदिति सूत्रमशिष्यं त्वकर्तव्यम्। कुतः। संज्ञानां लोकव्यवहाराणामेवत्र प्रमाणत्वात् प्र
तिपादकत्वात्। ननु तद्देशगामस्त्वया पाश्चात्यर्थः यथा द्रागादिशब्दैः ग्रामस्य पुंस्त्वविशिष्टस्यैव स्त्रीरूपार्थस्यैवाधस्तथा
पञ्चालादिशब्दैरपि ग्रामस्त्रीय प्रकृत्यर्थगतलिङ्गसंख्याविशिष्टस्यैव स्यार्थस्यैवाबोधो भविष्यतीति युक्तवद्भावो न कार्य्यो

सू॰ प॰ १४
13

इति समुदायार्थः ।५४। लुब्योगाप्रख्यानात् ॥ कौ। सू। त। वा। जनपदे लुबित्यादि सूत्रमशिष्यम् । कुतः । योगो ऽव
यवार्थस्तस्याप्रख्यानादप्रतीतेः पञ्चालादिशब्दादेशविशेषस्य संज्ञापकानिवासादिष्वर्थेषु प्रत्यया नैवोत्पद्यन्ते इति अ
र्थे लुब्विधानमिति समुदायार्थः इत्यादि सूत्रद्वयं भाष्ये न व्याख्यातम् ।:::।५५। योगप्रमाणे च तदभावे ऽदर्शनं स्या
त् ॥ कौ। सू। त। वा। यदि हि क्षत्रियवाचकः पञ्चालादिशब्दो देशे योगस्य ऽवयवार्थस्य प्रमाणं बोधकः स्यात् तर्हि तदभावे
क्षत्रियसंबन्धाभावे क्षत्रियसंबन्धोऽभावे देशरूपे ऽर्थे पञ्चालादिशब्दस्यादर्शनमप्रयोगः स्यादित्यर्थः नन्वसंप्रति
क्षत्रियसंबन्धाऽभावेपि भूतपूर्वं क्षत्रियसंबन्धमादाय प्रयोगो भविष्यति । मैवम् । गौणत्वापत्तेः । न चायं गौणः ।
पदान्तरमन्तरेणापि प्रतीतेः । तस्माद्देशेष्वपि पञ्चालादिशब्दो रूढ्यैव बोधकः ।५६। प्रधानप्रत्ययार्थवचनमर्थ
स्यान्यप्रमाणत्वात् ॥ कौ। सू। त। वा। प्रधानोपसर्जने प्रधानार्थं सह ब्रूतः । इति च पूर्वाचार्यैः परिभाषितं वचनम
शिष्यं न कर्तव्यम् । कुतः । अर्थस्य अन्यप्रमाणत्वात् लोकतः सिद्धेः ।५७। कालोपसर्जने च तुल्यम् ॥ कौ। सू। त। वा। अतीताया
रात्रेरन्त्ययामेनागामिरात्रेराद्ययामेन च सहितो दिवसो ऽद्यतनः कालः । अपरे तु पुनः । अतीतरात्रेरन्त्ययामद्वयेनागामि
रात्रेराद्ययामद्वयेन सहितो दिवसो ऽद्यतनः कालः । अप्रधानमुपसर्जनमित्यादि च पूर्वाचार्यैः परिभाषितं तदप्यशिष्य
समानम् । कुतः अर्थस्य लोकतः सिद्धेः :::।५८। जात्याख्यायामेकस्मिन् बहुवचनमन्यतरस्याम् ॥ कौ। सू। सा। त। जा
तिप्रतिपादनेयं कोपि जातिरूपो ऽर्थो बहुवद्वा स्यात् ब्राह्मणः पूज्यः । ब्राह्मणाः पूज्याः । जातिग्रहणे किम् । देवदत्तः
पूज्यः । आख्यायामिति किम् । काश्यपप्रतिकृतिः काश्यपः । एकस्मिन्निति किम् । व्रीहियवौ । संख्याप्रयोगे प्रतिषेधः ।
।१। एको व्रीहिः संपन्नः सुभिक्षं करोति । अस्मदो नामयुवप्रत्ययपोश्च २ अस्मदो नामप्रत्ययप्रयोगेन ।२। इत्येके । अस्मदः सवि
शेषणस्य प्रयोगेन ।३। इत्यपरे । अहं पटुर्ब्रवीमि ।:::।५९। अस्मदो द्वयोश्च ॥ कौ। सू। सा। त। अस्मदर्थ एकत्वे द्वित्वे च बहुवद्वा स्या १४

न्। अहं ब्रवीमि। वयं ब्रूमः। आवां ब्रूवः। वयं ब्रूमः। सविशेषणस्य प्रतिषेधो वक्तव्यः ।१। इति काशिका। अहं देवदत्तो ब्रवीमि
अहं पटुर्ब्रवीमि। सविशेषणस्य प्रतिषेधो वैकल्को। सा। सा। त। युष्मदि गुरावेकेषाम् २ इति च काशिका। त्वं मे गुरुः। यूयं मे गुरवः ६०
फल्गुनीप्रोष्ठपदानां च नक्षत्रे। कौ। सा। सा। त। द्वित्वे बहुत्वकार्यं वा स्यात्। पूर्वे फल्गुन्यौ। पूर्वाः फल्गुन्यः। पूर्वे प्रोष्ठपदे। पूर्वा
व प्रोष्ठपदाः। नक्षत्रे किम्। फल्गुन्यौ माणविके। ⁝⁝⁝।६१। छन्दसि पुनर्वस्वोरेकवचनम्। कौ। वै। अ। अवेदे पुनर्वसुशब्दस्य
द्वित्वे एकत्वकार्यं वा स्यान्नक्षत्रे। पुनर्वसुर्नक्षत्रम् पुनर्वसू नक्षत्रम्। पुनर्वसू वा। नक्षत्रे किम्। पुनर्वसू माणवकौ। ६२। वि
शाखयोश्च कौ। वै। अ। अ। वेदे विशाखाशब्दस्य द्वित्वे एकत्वकार्यं वा स्यान्नक्षत्रे। विशाखा नक्षत्रम्। विशाखे वा ६३
तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यम्। कौ। सा। सा। त। तिष्यपुनर्वसुशब्दयोर्नक्षत्रविषयकद्व
न्द्वे किम्। तिष्यपुनर्वसवो माणवकाः। बहुवचनस्य किम्। उदेतौ तिष्यपुनर्वसू। सर्वो द्वन्द्वो विभाषैकवद्भवति।१। परिभा
षेयम्। एतत्सूत्रवर्जं जात्याख्यायामित्यादीन्यतिदेशसूत्राणि भाष्यप्रत्याख्यातानि इति १९ सूत्राणि भाष्ये।१।२।२। आख्या
तानि। ⁝⁝⁝।६४। सरूपाणामेकशेष एकविभक्तौ। कौ। सा। अ। पु। विभक्तौ यानि समानस्वरूपाणि तेषामेकः शिष्यते
अन्ये लुप्यन्ते। रामश्च रामश्च रामौ। रामश्च रामश्च रामौ। रामश्च रामश्च रामश्च रामाः सरूपाणां किम्। प्लक्षन्यग्रोधौ। रूप
ग्रहणं किम्। अर्थभेदेऽपि यथा स्यात्। अक्षाः। एकेति किम्। द्विवक्तोः शेषो मा भूत् शेषः किम्। आदेशो मा भूत् एकवि
भक्ताविति किम्। पयः पयो जरयति एकविभक्तावविभक्तावितिवेत्यभावाद्विभक्तेः।१। पृथक्त्वैर्षामिति वेदेकशेषः पृथ
ग्विभक्त्युपलब्धिस्तदाश्रयत्वात् २ समासः इति चेत्स्वरसमासान्तेषु दोषः ३ अर्थाश्रये चैकशेषवचनम् ४ लिङ्गसमासे
लिङ्गसमासवचनम् ५ लिङ्गविधिः प्रतिषेधश्च ६ असमासे वचनलोपः।७। द्विवचनबहुवचनविधिः ८ द्वन्द्वप्रतिषेधश्च ५
एकविभक्त्यन्तानामिति तु पृथग्विभक्तिप्रतिषेधार्थम् १० प्रातिपदिकानामेकशेषे मातृमात्रोः प्रतिषेधः।११। द्व

रितहरिणश्येतश्येनरोहितरोहिणानां स्त्रियामुपसंख्यानम् ॥ सर्वेत्रापत्यादिषूपसंख्यानम् ॥ समानार्थानामेक
शेषो भवतीति वक्तव्यम् ॥ ७४ ॥ नानार्थानामपि सरूपाणाम् १ एकार्थानामपि विरूपाणाम् ॥ वक्रदण्डश्च कुटिल
दण्डश्च वक्रदण्डौ। कुटिलदण्डाविति वा। विरूपाणामपि समानार्थानाम् । कौ। सू। सा। प। स्वरभिन्नानां यस्योत्तरः
स्वरविधिः ६७ ग्रस्तौ। मीमांसकौ। प्रथममध्यमोत्तमानामेकशेषः सरूपत्वात् ६८। इह कस्मान्न भवति एकश्च ए
कश्च द्वौ च द्वौ चेति। संख्यायाश्चार्थाः संप्रत्ययादसार्थत्वाच्चानेकशेषः इति भाष्यम् एकैकेनोपयन्तु भारं शक्नोति यत्न
प्यन्तत्र। एकैकः कर्ता स्यात्सर्वे वा स्युः कथं पुनः क्रमम् ॥ कारणमुपमने वैश्योपच्छन्ति वान्तरेण नतुल्यम्। तस्मात्प्र
त्यक्षमेकैककर्तारः समेयेदाप्त २ कारिके इमे भाष्ये नैतत्सूत्रे प्रत्याख्यातम् ॥ ६५ ॥ वृद्धो यूना तल्लक्षणश्चेदेव वि
शेषः कौ। सू। सा। प। यूना सह वृद्धस्योक्तौ वृद्धः शिष्यते युवा लक्ष्यते। गोत्रयुवप्रत्ययनिमित्तकमेव यदि वैरूप्यं भव
ति गोत्रस्य वृद्ध इति संज्ञा। गार्ग्यश्च गार्ग्यायणश्च गार्ग्यौ। वात्स्यौ वृद्धः रूपं भवति। गोत्रस्य वृद्ध इति संज्ञा। गार्ग्यश्च
गार्ग्यायणश्च गार्ग्यौ। वात्स्यौ। वृद्धः किम्। गर्गगार्ग्यायणौ। यूना किम्। गर्गगार्ग्यौ। तल्लक्षणः किम्। गार्ग्यवात्स्या
यनौ। एवेति किम्। भागवित्तिभागवित्तिकौ अत्र कुत्सासौवीरत्वं च भागवित्तिकस्याऽपरो विशेषः ६६ स्त्री पुंवच्च।
कौ। सू। सा। प। यूना सहोक्तौ वृद्धा स्त्री शिष्यते युवा लुप्यते। तदर्थश्च पुंवत्। गोत्रयुवप्रत्ययनिमित्तकमेव यदि वैरूप्यं
भवति गार्गी च गार्ग्यायणश्च गार्ग्यौ। कवात्स्यौ। दाक्षी च दाक्षायणश्च दाक्षी ६७ ॥ पुमान् स्त्रिया कौ। सू। सा। प।
स्त्रिया सहोक्तौ पुमान् शिष्यते स्त्री लुप्यते स्त्रीपुंस्त्वनिमित्तक एव विशेषश्चेत्। ब्राह्मणश्च ब्राह्मणी च ब्राह्मणौ। कु
क्कुटश्च कुक्कुटौ तल्लक्षणः किम्। कुक्कुटमयूर्यौ एवेति किम् इन्द्रेन्द्राण्यौ अत्र पुंयोगकृतोऽपीन्द्राण्या विशेष :
पुमानिति किम्। प्राक्कृषाखौ प्रागित्ययमलिङ्गम् प्रधानाऽप्रधानयोः प्रधाने कार्यसंप्रत्ययः १ परिभाषेयं १५

६८ भ्रातृपुत्रौ स्वसृदुहितृभ्याम्। कौ। स्व। स। प॥ याभ्यां क्रमेण सहोक्तौ भ्रातृपुत्रौ शिष्येते भ्राता च स्वसा च भ्रातरौ पुत्र
श्च दुहिता च पुत्रौ ६९ नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम् कौ। स्व। स। प। अनपुंसकेन सहोक्तौ नपुंसकं शि·
ष्यते। तदर्थस्य वा एकवत् तल्लक्षण एव विशेषश्चेत् शुक्लः पटः शुक्ला शाटी शुक्लं वस्त्रं तदिदं शुक्लम् तानीमानि शु
क्लानि अनपुंसकेनेति किम् शुक्लश्च शुक्लश्च शुक्लानि ७० पिता मात्रा कौ स्व स प मात्रा सहोक्तौ पिता वा शिष्यते
माता च पिता च पितरौ ७१ श्वशुरः श्वश्र्वा कौ स्व स प श्वश्र्वा सहोक्तौ श्वशुरो वा शिष्यते श्वश्रूश्च श्वशुरश्च श्वशुरौ श्वश्रू
श्वशुरौ ७२ त्यदादीनि सर्वैर्नित्यम् कौ स्व स प सर्वैः सहोक्तौ त्यदादीनि नित्यं शिष्यन्ते स च देवदत्तश्च तौ। यो
त्यदादीनां मिथो यद्यत्परं तच्छिष्यते। शब्दपरविप्रतिषेधात् स च यश्च यौ त्यदादितः शेषे पुंनपुंसकतो लिङ्गवचनानि २
सा च देवदत्तश्च तौ तच्च देवदत्ता च यज्ञदत्ता च तानि। पुंनपुंसकयोस्तु परत्वान्नपुंसकं शिष्यते तच्च देवदत्तश्च ते अद्वन्द्व
तत्पुरुषविशेषणानाम्॥२॥ कुक्कुटमयूर्याविमे मयूरीकुक्कुटाविमौ तच्च सा च अर्द्धपिप्पल्यौ ते सामान्यविशेषवा
चिनोर्द्वन्द्वो न भवतीति वक्तव्यम् १ एकशेषोपि दृश्यते इति भाष्यम् स च यश्च तौ ७३ ग्राम्यपशुसंघेष्वतरुणेषु स्त्री
कौ। स्व। स। प ग्राम्यपशुविशेषसमवायेषु स्त्री शिष्यते पुमान् स्त्रियेत्यस्यापवादः गाव इमाः ग्राम्येति किम्। रु
रव इमे। पशुग्रहणे किम्। ब्राह्मणा इमे संघेषु किम्। एतौ गावौ अतरुणेषु किम्। वत्सा इमे अनेकशफेष्विति
वक्तव्यम् १ इह मा भूत्। अश्वा इमे। गर्दभा इमे। इति ए सूत्राणि भाष्ये १।२।३। व्याख्यातानि इति सूत्रपाठे प्रथमा
ध्यायस्य द्वितीयः पादः १। भूवादयो धातवः संज्ञाप्रदेशः १।१।४९। कौ। स्व। सं। क्रियावाचका भ्वादयो धातुसंज्ञाः स्युः
भू। भवति एधते स्पर्द्धे स्पर्द्धते इत्यादि दशगणीपठिता उदाहरणम् क्रियावाचकाः किम्। विकल्पार्थे वा शब्द
स्य मा भूत्। भ्वादयः किम् आणवयति इत्यादि प्राकृतशब्दानां मा भूत् पाठेन धातुसंज्ञायां समानशब्दप्रतिषेधः १

परिमाणग्रहणं च २ क्रियावचन उपसर्गप्रत्ययप्रतिषेधः ३ अस्तिभवतिविद्यतीनां चाधातुत्वम् ४ भाववचने चातो
सू.प. तदर्थप्रत्ययप्रतिषेधः ५ प्रथमभावग्रहणं च ६ यदि पुनर्भाववचनो धातुरित्येवं लक्षणं क्रियते। कथं पुनर्ज्ञायते
१६ भाववचनाः पचादय इति। यदेषां भवतिना सामानाधिकरण्यम्। भवति पचति भवति पठति भवत्यपाक्षीदिति
16 कान्तदीपवाचोयुक्तिः पचैषा वाचोयुक्तिः। पचादयः क्रिया भवतिक्रियायाः कर्त्र्यो भवन्ति। यद्यपि तावदत्रैतच्छ
क्यते वक्तुं यत्रान्या चान्या च क्रिया। यत्र त्वेकैव क्रिया तत्र कथं भवेदपि भवेत्स्यादपि स्यादिति अत्राप्यन्यत्वमस्ति।
कुः। कालभेदात्साधनभेदाच्च इति भाष्यम्। ननु अस्मद्योक्ते तिङाभिहितो भावः क्रियया सममवायं न गच्छति। नहि भवति
पचति पठतीति। तत्कथं तेनेन तद्विरुध्यते। अत्राहुः। कर्मकर्तृभावेन क्रियाख्यातवाच्या क्रियया सैव ध्यात एव भवति पचति
पचति पश्य मृगो धावतीति। करणादिभावेन तत्र न संबध्यते तथा प्रयोगादर्शनात्। इति कैयटः। २। उपदेशेऽजनुना
सिक इत्। संज्ञाप्रदेशाः। १।३।२। कौ। सू। से। धातुप्रातिपदिकप्रत्ययनिपातागमादेशेष्वनुनासिकोऽजित्संज्ञः स्यात्। एध।
भवम्। स्पा। कुक्कु। टुक्रु। नहू। तृ इत्यादिषु उपदेशपरम्परयाऽकारादयोऽनुनासिकाः ॥ एधते। इत्यादि। उपदेश इत्यु
न्नराद्येम् अनुनासिकः किम्। सममीवहुवचने माभूत्। अचः किम्। मनि नोमकारस्य माभूत्। उपदेशेऽजनु
नासिक इति वक्तव्यम्। १। ३। हलन्त्यम्। संज्ञाप्रदेशाः। १।२। ३। कौ। सू। से। हल् च हल् च हलौ। हलोरन्त्यमिति स
मन्वसामान्यषष्ठीसमासः। हलन्त्यस्य स्यान्त्यो उपदेशे हल् इत् स्यात्। द्वितीयेऽर्थे ग्राहोः ष्टिरइतिवत् षष्ठी
एवं सति नाऽन्योऽन्याश्रयदोषः हल्। अण्। अच्। हश्। तिङ्। इत्यादि अन्त्ये किम्। वावालः अवसितान्यो हलि नेत्सं
ज्ञो भवतीति वक्तव्यम्। १। के पुनरवसिताः धातुप्रातिपदिकप्रत्ययनिपातागमादेशाः। इति भाष्यम्। लकारस्येति वक्त
व्यम् २ प्रातिपदिकप्रतिषेधोऽकृत्तद्धितान्तानाम्। ३। ४। न विभक्तौ तुस्माः। कौ। सू। अ। ३। विभक्तिस्थास्तवर्गसकारम १६

कारादित्येते तकानस्युः। समात्। सर्वस्मिन्। रामाः। पचथः अपचतम् अपचतम्। विभक्तौ किम्। चेयम्। अहंयुः। इदमस्याम्
रित्युकारोच्चारणसामर्थ्यादनित्योऽयम्। तेन कुर्वन्ति सिद्धम् विभक्तौ न वर्गप्रतिषेधोऽतद्धिते ।।५।। आदिर्ञिटुडवः। संज्ञाप्रदे
शः। १।३।५ १८।३।३।८६।३।३।८८। कौ। ति। स्वा। उपदेशे धातोराद्या ञिटुडव एते इत्संज्ञाः स्युः। ञिइन्धी। इद्धः टुओश्वि। श्वयथुः।
डुपचष्। पक्त्रिमम् उपदेशे किम्। ञिकारीयति आदिः किम्। कण्डूयति। भाष्ये तनेदं व्याख्यातम्। ६। षः प्रत्ययस्य संज्ञा
प्रदेशः। ४।१।४१।। कौ। स्वा। स्वा। प्रत्ययस्यादिः षकार इत्स्यात्। गार्ग्यायणी। नर्तकी। प्रत्ययस्येति किम्। षडिकः। आदिः किं
अविषः। महिषः। भाष्ये तनेदं व्याख्यातम् ७ चुटू संज्ञाप्रदेशः।१।३।९। कौ। स्वा। अ। उ। प्रत्ययाद्यौ चवर्गटवर्गौ इतौ स्तः। रामाः
कौञ्जायनः अजा। सीमा। सीम्न्। योगविभागोऽस्याः नित्यत्वज्ञापनार्थः। नेह। विषाचणः अवदीटः इत्यादि। चुञ्चुप्च
णपोश्चकारस्य प्रतिषेधो वक्तव्यः १ पकारो वा चुञ्चुप्चणपो। इति भाष्यम्। सबलमनिर्दिष्टः। इदउपसंख्यानम् २ कौ
ति। स्वा। च्युतिर। अच्युतन् अच्युतत् अचोतीत् इति तोवेत्यङ्ग ८ लशक्वतद्धिते संज्ञाप्रदेशः।।१।३।९। कौ स्व अ पु
तद्धितभिन्नप्रत्ययाद्यालकारकवर्गा इतः स्युः भवति गोदः भाष्ये तनेदं व्याख्यातम् ९ तस्यलोपः। कौ। स। अ। तस्येत्
त्वकस्य लोपः स्यात् रामः गार्ग्यः इद्धः गार्ग्यायणी रामाः भवति इत्यत्र ऽन्तहितैवसिद्धे तस्यग्रहणं सर्वलोपार्थम्।
तेन जिङनामलो ऽनन्त्य परिभाषया ऽन्त्यलोपो न इतो लोपे णलङ्क्षानिषिद्धाम्पसंख्यानमित्यतिषेधात् १ तत्र तस्मानो प्रतिषे
धः २ अनेकान्ता अनुबन्धाः १ एकान्ता अनुबन्धाः २ परिभाषेइमे किं पुनरत्र न्याय्यम् एकान्ता इत्येव न्याय्यम् इति भाष्ये १०
यथासंख्यमनुदेशः समानाम् परिभाषाप्रदेशः ४।३।१।४। कौ। स। अ। तुल्यसंख्यानां वाक्यार्थबोधकालिकः सम्बन्धो
यथाक्रमं भवति प्रथमस्य प्रथमेन। द्वितीयस्य द्वितीयेनेत्यादि तौदेयः। सालातुरीयः। वार्मतेयः। कौचवार्यः एङः पूर्वत्रे
प्रतिषेधः।१। अत्र शाङ्क्वतः संख्यासाम्येवेत्यस्मै पदानां णलित्यादिषुदोषः। अर्थतश्चेत्स्यतासो लृट् लुठोरित्यादिषु दोषः अत्रा

सू॰प॰ इभाष्यकारः यथासंख्यमनुदेशः समानां स्वरितेनेति १९ स्वरितेनाधिकारः परिभाषाप्रदेशः ४।१।२।३। ११।१ कौ। सू।
१७ रा। स्वरितः शब्दनिष्ठो धर्मविशेषः। तेन चिह्नेनाधिकारो विज्ञेयः। यावन्तिथेः लत्वं वक्ष्यते तावन्तो योगा नाधिकारोऽनु
17 वर्तत इति वक्तव्यम्।१। भूयसि प्रागग्रत इति वक्तव्यम् २। इति ११। सूत्राणि भाष्ये ११।२।१। व्याख्यातानि। १२। अनुदात्तङित
आत्मनेपदम् कौ ति स्वा तिप्तस्झीत्यादिना वक्ष्यमाणेन सर्वेभ्यो धातुभ्य आत्मनेपदे च सिद्धे नियमार्थमिदम्। अनुदात्तेतो
ये धातवस्तेभ्य एव उपदेशे ये ङितस्तदन्तेभ्य एवात्मनेपदं स्यात्। नान्येभ्यः। एध। एधते। स्पर्ध। स्पर्धते। षूङ्। सूते।
शीङ्। शेते। यङ्। बोभूयते विकरणेभ्यः प्रतिषेधो वक्तव्यः १। विकरणेभ्यो नियमो बलीयान्।१। परिभाषयम्। १३।
भावकर्मणोः॥ कौ॥ ति। स्वा। लः कर्मणि चेत्यादिना विहितस्य लस्य भावकर्मणोरेवात्मनेपदं स्यात् भावे भूयते भवता
भवद्भ्यां भवद्भिः भूयते त्वया मयान्यैश्च अत्र धातुवाच्या क्रिया भावार्थकलकारेणानूद्यते। ततश्च युष्मदस्मदोस्तिङ्वा
च्यकारकवाचित्वाभावान्न मध्यमोत्तमौ। किन्तु प्रथमपुरुष एव तत्रापि धातुवाच्यक्रियाया अद्रव्यरूपत्वेन द्वित्वबहुत्वाऽप्र
तीतेर्न द्विवचनबहुवचने किन्त्वेकवचनमेव तस्यौत्सर्गिकत्वेन संख्याऽनपेक्षत्वात्। कर्तुरनुक्तत्वात्तृतीया कर्मणि
क्रियते कटः क्रियेते कटौ। क्रियन्ते कटाः। त्वया मयान्यैश्च क्रियसे त्वम् क्रियसे त्वम् क्रियेथे युवाम्। क्रियध्वे यूयं
ईश्वरेण क्रियेऽहम् क्रियावहे आवाम् क्रियामहे वयम्। क्रियामहे वयम्। ईश्वरेण कर्मण उक्तत्वात्प्रथमा कर्तु
रनुक्तत्वात्तृतीया भाषितपुंस्कत्वाद्द्वन्द्वे व्याख्यातम् १४। कर्तरि कर्मव्यतिहारे कौ ति स्वा क्रियाविनिमये द्योत्ये कर्तर्या
त्मनेपदं स्यात् व्यतिलुनीते अन्यस्य योग्यं लवनं करोतीत्यर्थः कर्मव्यतिहारे किम्। लुनाति। कर्तृग्रहणं शेषा
कर्तरीत्यत्रानुवृत्त्यर्थम् क्रियाव्यतिहार इति वक्तव्यम् १।१५॥ न गतिहिंसार्थेभ्यः। कौ। ति। स्वा। एभ्यः क्रियाविनि
मये आत्मनेपदं न स्यात्। गत्यर्थेभ्यः। व्यतिगच्छन्ति। हिंसार्थेभ्यः। व्यतिहिंसन्ति। व्यतिघ्नन्ति। हसादीनामुपसंख्यानं १ १७

व्यतिहसन्ति व्यतिजल्पन्ति। व्यतिपठन्ति। हवहोरप्रतिषेधः २ हन्त्या। संप्रहारन्ते राजानः हरतेप्रतिषेधः १। कौ। ति
श्रा। नवहिंगत्यर्थः इतिभाष्यम् १६ इतरेतरान्योन्योपपदाच्च। कौ। ति। श्रा। इतरेतर। अन्योन्या। इत्येतदुपपदाद्धातोः
क्रियाविनिमये आत्मनेपदं न स्यात् इतरेतरस्य व्यतिलुनन्ति अन्योन्यस्य व्यतिलुनन्ति परस्परोपपदाच्चेति वक्तव्यम् १
परस्परस्य व्यतिलुनन्ति १७। नेर्विशः कौ ति श्रा। नेः परस्माद्विश इत्येतस्मादात्मनेपदं स्यात् शेषात्कर्तरीत्यस्याऽपवा
दः निविशते निविशेते। निविशन्ते। यदागमा इति परिभाषयाऽत्रापि। न्यविशत। अर्थवद्ग्रहणपरिभाषया नेह। म
धुनि विशन्ति। भाष्ये तु नेदं व्याख्यातम् १८ परिव्यवेभ्यः क्रियः। कौ। ति। श्रा अकर्त्रभिप्रायार्थमिदम्। परि। वि। अव। ए
भ्यः परस्मात् डुक्रीञ् इत्येतस्मादात्मनेपदं स्यात् परिक्रीणीते। विक्रीणीते अवक्रीणीते परस्परसाहचर्याद् उपसर्गा
स्यैव ग्रहणम्। नेह। बहु विक्रीणाति वनम् भाष्ये तु नेदं व्याख्यातम् १९ विपराभ्यां जेः। कौ। ति। श्रा। शेषात्कर्तरीत्यस्या
उपवादः वि परा इत्येताभ्यां परस्माज्जि जये इत्यस्माद्धातोरात्मनेपदं स्यात्॥ विजयते पराजयते साहचर्यादुपसर्गावे
व गृह्येते। तेनेह न। बहु विजयति वनम् पराजयति सेना उपसर्गग्रहणं कर्तव्यम् १। सहचरिताः सहचरितयोः सह
चरितयोः सहचरितस्यैव ग्रहणम् १ परिभाषेयम् २० आङो दोऽनास्यविहरणे कौ ति श्रा अकर्त्रभिप्रायार्थमि
दम् आङ्पूर्वान् मुखविकासनादन्यत्रार्थे वर्तमानात् डुदाञ् इत्येतस्मादात्मनेपदं स्यात् विद्यामादत्ते अनास्ये
ति किम् मुखं व्याददाति आङो दोऽव्यसनक्रियस्य १ स्वाङ्गकर्मकाच्च २ नेह। व्याददते पिपीलिकाः पतङ्गस्य
मुखम् आस्यविहरणसमानक्रियायामपि प्रतिषेधो वक्तव्यः १। इति काशिका पराङ्गकर्मकान्न निषेधः। १। कौ
ति। श्रा। २१। क्रीडोऽनुसंपरिभ्यश्च कौ ति श्रा अनु। सं। परि। इत्येतेभ्यः परस्मात् क्रीडृ इत्येतस्मादात्मनेपदं स्यात्
चकारादाङ्पूर्वादपि अनुक्रीडते। संक्रीडते। परिक्रीडते आक्रीडते उपसर्गग्रहणं कर्तव्यम् १। समोऽकूजे

सू॰प॰ १८ ने २। नेह। संक्रीडति चक्रम् आङ्गमेः क्षमायाम् ३ गम्लृ। आगमयस्व तावत् क्षमस्वेत्यर्थः शिक्षेर्जिज्ञासायाम् ४ शिक्ष
विद्यासशीलते किरतेर्हर्षजीविकाकुलायकरणेषु ५ अपास्किरते वृषभो हृष्टः अपस्किरते कुक्कुटो भक्ष्यार्थी अपस्कि
रते श्वाश्रयार्थी हर्षेत्यादि किम्। अपकिरति कुसुमम् हरतेर्गतताच्छील्ये ६। गतप्रकारः। ताच्छील्यं नियतत
त्स्वभावता हृञ् पैतृकमश्वा अनुहरन्ते। मातृकं गावः ताच्छील्ये किम्। मातरमनुहरति आङि नुप्रच्छ्योः ७। आङ्
नुते। प्रच्छ। आपृच्छते आशिषि नाथः ८। कौ। ति। भा। सर्पिषो नाथते। शप उपालम्भने ९ देवदत्ताय शपते २२। सम
वप्रविभ्यः स्थः। कौ। ति। आ। सं। अव। प्र। वि। इत्येतेभ्यः परस्मात् ष्ठा इत्येतस्मादात्मनेपदं स्यात्। संतिष्ठते। अवतिष्ठते। प्रतिष्ठ
ते। वितिष्ठते। आङः प्रतिज्ञायाम् १। शब्दं नित्यमातिष्ठते नित्यत्वेन प्रतिजानीत इत्यर्थः २३ प्रकाशनस्थेयाख्ययोश्च। कौ। ति
आ। स्वाऽभिप्रायाविष्करणे विवादपदनिर्णेतरि वा ऽर्थे ष्ठा इत्येतस्मादात्मनेपदं स्यात् तिष्ठते कन्या छात्राय तिष्ठते
कर्णादिषु भाष्येतन्नेदं व्याख्यातम् २४ उदोऽनूर्ध्वकर्मणि। कौ। ति। आ। उत्पूर्वात् ष्ठा इत्येतस्मादनूर्ध्वक्रियायां वर्त्तमाना
दात्मनेपदं स्यात्। मुक्तावुत्तिष्ठते गेहे उत्तिष्ठते अनूर्ध्वेति किम्। पीठादुत्तिष्ठति ईहायामिति वक्तव्यम् १ नेह। ग्रामाच्छ
तमुत्तिष्ठति २५ उपान्मन्त्रकरणे। कौ। ति। आ। मन्त्रकरणे वर्त्तमानादुपपूर्वात्तिष्ठते त्मनेपदं स्यात्। ऐन्द्र्या गार्ह
पत्यमुपतिष्ठते। मन्त्रकरणे किम्। पतिमुपतिष्ठति यौवनेन उपाद्देवपूजासंगतकरणमित्रकरणपथिष्विति वक्तव्यम् १। आ
दित्यमुपतिष्ठते। गङ्गा यमुनामुपतिष्ठते। उपश्लिष्यतीत्यर्थः रथिकानुपतिष्ठते। मित्रीकरोतीत्यर्थः पन्थाः स्रुघ्नमुपति
ष्ठते वा लिप्सायामिति वक्तव्यम् २ भिक्षुकः प्रभुमुपतिष्ठते। उपतिष्ठति वा। लाभेच्छया गच्छतीत्यर्थः २६ अकर्मका
च्च। कौ। ति। आ। उपात्तिष्ठतेरकर्म्मकादात्मनेपदं स्यात् भोजनकाले उपतिष्ठते संनिहितो भवतीत्यर्थः अकर्मकात्कि
म् राजानमुपतिष्ठति। भाष्येतन्नेदं व्याख्यातम् २७ उद्विभ्यां तपः। कौ। ति। आ। उत्। वि। इत्येतत्पूर्वात्तप इत्येतस्मादकर्मका १८

18

दात्मनेपदं स्यात् उत्तपते वितपते। दीप्यते इत्यर्थः स्वाङ्गकर्मकाच्च । उत्तपते पाणिम् वितपते पाणिम् अकर्मकादेव
नेह। सुवर्णमुत्तपति। मैत्रस्य पाणिमुत्तपति। संतापयतीत्यर्थः २८ आङो यमहनः। कौ। ति। आ। आङः पराभ्यां यमहन इत्ये
ताभ्यामकर्मकाभ्यामात्मनेपदं स्यात्। आयच्छते। आहते। अकर्मकाभ्यां किम्। आयच्छति कूपाद्रज्जुम्। आहन्ति वृषभम्
स्वाङ्गकर्मकाच्च ।। आयच्छते पाणिम् आहते शिरः। नेह। परस्य शिर आहन्ति २९ समो गम्यृच्छिभ्याम्। कौ। ति। आ। सम्
पराभ्यामकर्मकाभ्यां गम्नृच्छ इत्येताभ्यामात्मनेपदं स्यात् संगच्छते। ऋच्छेरनादेशस्य ग्रहणम्। समृच्छिष्यते
अकर्मकाभ्यां किम्। ग्रामं संगच्छति समो गमादिषु विदिप्रच्छिस्वरतीनामुपसंख्यानम् ।। विद ज्ञाने इत्येव गृह्यते। पर
स्मैपदिभिः साहचर्यात्। विद। संविते। संविदाते। प्रच्छ। संपृच्छते स्व। संस्वरते अर्तिश्रुदृशिभ्यश्च २ अर। मा समरन्त। समा
ते इति स्यादेः न्हेहात्यादेस्त। मा समरन्त इति अर्तीति द्वयोर्ऋयत्योर्ग्रहणम् अद्विपौनःसहेत्वादेरेवेति वदन्ते। श्रु। संशृणुते
दृश। संपश्यते अकर्मकादित्येव। नेह। वेदं संशृणोति।। उपसर्गादस्यत्यूह्योर्वा ३१ अस। व्यतिरस्यति। निरस्यते। ऊह। समू
हति। समूहते। अत्राकर्मकादिति न संबध्यते।। ३०।। निसमुपविभ्यो ह्वः। कौ। ति। आ।। अकर्मकादिति निवृत्तम्। नि। सं
उप वि इत्येतेभ्यः परस्मात् ह्वेञ् इत्येतस्मादात्मनेपदं स्यात्। निह्वयते। उपह्वयते विह्वयते अकर्त्रभिप्रायार्थमिदम्।। आध्या
न इत्यादि सूत्रद्वयं शाकटायनेन व्याख्यातम् ३१ स्पर्धायामाङः।। कौ। ति। आ। स्पर्धाविषये आङ्परस्मात् ह्वेञ् इत्येतस्मादात्मनेपदं स्या
त्। शत्रुमाह्वयते स्पर्धायां किम् पुत्रमाह्वयति ३२ गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञः
कौ। ति। आ। अकर्त्रभिप्रायार्थमिदम्। एष्वर्थेषु कृञ् इत्येतस्मादात्मनेपदं स्यात्।। गन्धने प्राणवियोगानुकूलसूचनम्
उत्कुरुते। अवक्षेपणं भर्त्सनम्। श्येनो वर्तिकामुदाकुरुते सेवने सेवा हरिमुपकुरुते। साहसिक्यं सहसा प्रवर्तनम्। परदा
रान्प्रकुरुते प्रतियत्नो गुणाधानम्। एधोदकस्योपस्कुरुते। प्रकथने प्रकर्षेण प्रतिपादनम्। गाथाः प्रकुरुते। उपयो

सू.प.
१५
19

गोपमीदिफलकोविनियोगः शतंप्रकुरुते एषुकिम् कटंकरोति २३ अधेःप्रसहने कौ।ति।आ। प्रसहनेदमा। अभि
भवश्च।तत्रवर्तमानादधिपूर्वात्करोतेरात्मनेपदंस्यात्॥ शत्रुमधिकुरुते। शत्रुमधिकुरुते। दमतेऽभिभवतीतिवार्थः
२४ वेः शब्दकर्मणः।कौ।ति।आ। शब्दकर्मकाद्विपूर्वात्करोतेरात्मनेपदंस्यात्।विकुरुतेस्वरान्॥शब्दकर्मणः
किम्।चित्तंविकरोतिकामः २५ अकर्मकाच्च कौ।ति।आ। विपूर्वात्करोतेरकर्मकादात्मनेपदंस्यात् विकुर्वते
सैन्धवाः।वलान्तीत्यर्थः २६ सम्माननोत्सञ्जनाचार्यकरणज्ञानभृतिविगणनव्ययेषुनियः।कौ।ति।आ। एष्वर्थेषुर
न्यतमस्मादात्मनेपदंस्यादेष्वर्थेषुगम्यमानेषु शास्त्रेनयते शास्त्रेसिद्धान्तेशिष्येभ्यः प्रापयति।तेनवाशिष्यसम्मा
ननेफलितम्॥उत्सञ्जने।दण्डमुन्नयते।उत्क्षिपतीत्यर्थः।माणवकमुपनयते। आत्मानमाचार्यीकुर्वन्माणवकं
स्वसमीपंप्रापयतीत्यर्थः। ज्ञाने। तत्त्वेनयते।निश्चिनोतीत्यर्थः भृतिर्वेतनम्।कर्मकरानुपनयते।वेतनदानेनस्वस
मीपंप्रापयतीत्यर्थः विगणनमृणादिनिर्यातनम्।करंविनयते।राजदेयंभागंपरिशोधयतीत्यर्थः व्ययोधर्मादिषुविनि
योगः।शतंविनयते।धर्मार्थंशतंविनियुङ्क्त इत्यर्थः एषुकिम्।अजांग्रामंनयति २७ कर्तृस्थेचाशरीरेकर्मणि कौ।ति
आ।स्वरितञितइत्येवसिद्धेनियमार्थमिदम्।णीञ्इत्येतस्यकर्तृस्थेकर्मणियदात्मनेपदंस्यात्तच्छरीराऽवयवभिन्नेएव
स्यात्।क्रोधंविनयते।हरीकरोतीत्यर्थः कर्तृस्थेकिम्।परस्यक्रोधंविनयति अशरीरेकिम्।गडुंविनयति कर्मणि
किम्।बुद्ध्याविनयति २८ वृत्तिसर्गतायनेषुक्रमः।कौ।ति।आ।शेषात्कर्तरीत्यस्याऽपवादः एष्वर्थेषुक्रमइत्येत
स्मादात्मनेपदंस्यात्॥वृत्तिरप्रतिबन्धः।शास्त्रेक्रमतेबुद्धिः।नप्रतिहन्यतइत्यर्थः सर्गउत्साहः।व्याकरणाध्ययना
यक्रमते।उत्सहतइत्यर्थः।तायनेस्फीतता।अस्मिन्क्रमन्तेशास्त्राणि।स्फीतानिभवन्तीत्यर्थः।एषुकिम्। अपक्रा
मति २९।उपपराभ्याम्।कौ।ति।आ।पूर्वेणसिद्धेनियमार्थमिदम्।वृत्त्यादिष्वर्थेषुआभ्यामेवक्रमेरात्मनेपदंस्यात्।न

१५

त्पसर्गान्तरम्ब्रवीत्। उपक्रमते। पराक्रमते। उपपराभ्यां किम्। संक्रामति वृत्त्यादिषु किम्। उपक्रामति ४० आङ उद्गमने। कौ
ति। आ। आङ्ः पूर्वात्क्रमेरुद्गमनेऽर्थे वर्त्तमानादात्मनेपदं स्यात् आक्रमते सूर्यः उद्गमने किम् आक्रामति हदः कुतपम्
ज्योतिरुद्गमन इति वक्तव्यम्।। नेह। आक्रामति धूमो हर्म्यतलम् ४१ वेः पादविहरणे कौ। ति। आ विपूर्वात्क्रमेरात्मनेपदं
स्यात्पादविक्षेपेऽर्थे साधु विक्रमते वाजी पादविहरणे किम्। विक्रामति सन्धिः। द्विधा भवतीत्यर्थः ४२ प्रोपाभ्यां समर्था-
भ्याम् कौ। ति। आ। प्रा उप।। इत्येताभ्यां तुल्यार्थाभ्यां परस्मात्क्रमेरात्मनेपदं स्यात्। प्रक्रमते। उपक्रमते भोक्तुम्। आर
म्भोऽर्थेऽनयोस्तुल्यार्थता समर्थाभ्यां किम्। प्रक्रामति। गच्छतीत्यर्थः। उपक्रामति। आगच्छतीत्यर्थः ४३ अनु
पसर्गाद्वा। कौ। ति। आ।। अप्राप्तविभाषेयम्। अनुपसर्गात्क्रमेरात्मनेपदं वा स्यात् क्रमते। क्रामति। वज्जपसर्गात्किं
संक्रामति ४४ अपह्नवे ज्ञः कौ ति आ शेषात्कर्त्तरीत्यस्यापवादः अपलापेऽर्थे वर्त्तमानाज्जानातेरात्मनेपदं स्यात्
ज्ञा शतमपजानीते अपलपतीत्यर्थः ४५ अकर्मकाच्च कौ। ति आ अकर्म्मकाज्जानातेरात्मनेपदं स्यात् मधुनो जानी
ते। मधुनोपायेन प्रवर्त्तत इत्यर्थः अकर्मकात्किम्। पुत्रं जानाति ४६ संप्रतिभ्यामनाध्याने।। कौ। ति। आ। सकर्म्मका-
र्थमिदम्। सं। प्रति। इत्येवं पूर्वाज्जानातेरनाध्याने वर्त्तमानादात्मनेपदं स्यात् शतं संजानीते। शतं प्रतिजानीते। अनाध्या
ने किम्। आध्यानमुत्कण्ठापूर्वकं स्मरणं तत्र मा भूत्। मातरं संजानाति अनाध्याने इति योगो विभज्यते। तत्सामर्थ्या
दकर्म्मकाच्चेत्यस्यापि निषेधः। मातुः संजानाति ४७ भासनोपसंभाषाज्ञानयत्नविमत्युपमन्त्रणेषु वदः। कौ। ति
आ। शेषात्कर्त्तरीत्यस्यापवादः वद इत्येतस्माद्धातोरात्मनेपदं स्याद्भासनादिष्वर्थेषु। भासने दीप्तिः। शास्त्रे वदते।
भासमानो ब्रवीतीत्यर्थः उपसम्भाषा उपसान्त्वनम्। कर्म्मकरानुपवदते। उपसान्त्वयतीत्यर्थः ज्ञाने सम्यगवबोधः
शास्त्रे वदते सम्यगवबोधपूर्वकं वदतीत्यर्थः यत्न उत्साहः क्षेत्रे वदते। तद्विषयकमुत्साहमाविष्करोतीत्यर्थः विम

तिर्ज्ञानमतिः । दैवज्ञा विवदन्ते । विमतिपतिता भिन्ने विमान्त इत्यर्थः । उपमन्त्रणे रहस्युपच्छन्दनम् । किं विद्वदति ४८ व्यक्त
वाचां समुच्चारणे कौ ति आ मनुष्यादीनां सह उच्चारणे वद इत्येतस्माद्धातोरात्मनेपदं स्यात् सम्प्रवदन्ते ब्राह्मणाः । व्यक्त
वाचां किम् सम्प्रवदन्ति खगाः समुच्चारणे किम् ब्राह्मणो वदति ४९ अनोरकर्म्मकात् कौ ति आ व्यक्तवाग्विषयाद
नुपूर्वकादकर्म्मकात् वद इत्येतस्माद्धातोरात्मनेपदं स्यात् अनुवदते कठः कलापस्य अनुः सादृश्ये यथा कलापो ऽधी
यानो वदति तथा कठ इत्यर्थः अकर्म्मकात् किम् उक्तमनुवदति व्यक्तवाचां किम् अनुवदति वीणा ५० विभाषा विप्रलापे
कौ ति आ सामविभाषेयम् विरोधोक्तिरूपे व्यक्तवाचां समुच्चारणे वद इत्येतस्माद्धातोरात्मनेपदं वा स्यात् विप्रवदन्ते मौह
र्त्ताः विप्रवदन्ति मौहूर्त्ताः परस्परप्रतिषेधेन विरुद्धं वदन्तीत्यर्थः विप्रलापे किम् । सम्प्रवदन्ते ब्राह्मणाः व्यक्तवा
चां किम् सम्प्रवदन्ति शकुनयः समुच्चारणे किम् क्रमेण मौहूर्त्ता मौहूर्त्तेन सं प्रवदन्ति ५१ अवाद्ग्रः कौ ति आ शेषा
त्कर्त्तरीत्यस्यापवादः अवपूर्वात् गृ निगरणे इत्येतस्माद्धातोरात्मनेपदं स्यात् अवगिरते अवगिरेते अवगिरन्ते अवादिति कि
म् गिरति गिरतेरिति वक्तव्यम् १ गृणातिस्त्ववपूर्वो न प्रयुज्यत एव इति भाष्यम् ५२ समः प्रतिज्ञाने कौ ति आ संपू
र्वात् गृ निगरणे इत्येतस्मात् प्रतिज्ञाने वर्त्तमानादात्मनेपदं स्यात् प्रतिज्ञानमभ्युपगमः शब्दं नित्यं संगिरते नित्यशब्दं संगिरते
प्रतिज्ञाने किम् । संगिरति ग्रासम् ५३ उदश्चरः सकर्म्मकात् कौ ति आ शेषात्कर्त्तरीत्यस्यापवादः उत्पूर्वात् चर इत्येत
स्मात् सकर्म्मकादात्मनेपदं स्यात् धर्ममुच्चरते गुरुवचनमुच्चरते उल्लङ्घ्य गच्छतीत्यर्थः सकर्म्मकात् किम् बाष्पमुच्चर
ति ५४ समस्तृतीयायुक्तात् कौ ति आ तृतीयान्तार्थेन युक्तात् संपूर्वात् चर इत्येतस्माद्धातोरात्मनेपदं स्यात् अश्वेन संचर
ते रथेन संचरते तृतीयायुक्तात् किम् उभौ लोकौ संचरति ५५ दाणश्च सा चेच्चतुर्थ्यर्थे कौ ति आ तृतीयान्तार्थेन युक्
तात् संपूर्वात् दाण इत्येतस्मादात्मनेपदं स्यात् सा तृतीया यदि चतुर्थ्यर्थे भवति दास्या संयच्छते कामुकः दासीं ददाति

न्यर्थः चतुर्थ्यर्थे किम् पाणिना संप्रयच्छति समः प्रशब्देन व्यवधानेऽप्यात्मनेपदम्भवति समइति षष्ठी न पञ्चमी अ
शिष्टव्यवहारे दाणः प्रयोगे चतुर्थ्यर्थे तृतीया १ कौ सु का कथं तामसत्तीया चतुर्थ्यर्थे स्यात् एवन्तर्ह्यशिष्टव्यवहारेऽनेन तृतीया
च विधीयते आत्मनेपदञ्च । इति भा ५६ उपाद्यमः स्वकरणे कौ ति अ शेषात्कर्तरीत्यस्यापवादः उपपूर्वात् यमइत्येतस्मादा
त्मनेपदं स्यात् पाणिग्रहणविशिष्टस्वीकारे भार्यामुपयच्छते स्वकरणे किम् परस्य भार्यामुपयच्छति ५७ ज्ञाश्रुस्मृदृशां
सनः कौ ति आ ज्ञा श्रु स्मृ दृश इत्येतेषां सन्नन्तानामात्मनेपदं स्यात् धर्मं जिज्ञासते गुरुं शुश्रूषते नष्टं सुस्मूर्षते नृपं दिदृ
क्षते ५८ नाऽनोर्ज्ञः कौ ति आ ज्ञा इत्येतस्मात् अनुपूर्वात् सन्नन्तादात्मनेपदं न स्यात् पुत्रमनुजिज्ञासति अनोः किम् धर्मं
जिज्ञासते पूर्वसूत्रस्यैवायं निषेधः अनन्तरस्येति न्यायात् तेनेह न सर्पिषोऽनुजिज्ञासते पूर्ववत्सनइत्यात्मनेपदम् अ
नोर्ज्ञः प्रतिषेधे सकर्मकवचनम् ।१।५९ प्रत्याङ्भ्यां श्रुवः कौ ति अ प्रति आङ् इत्येवंपूर्वात् श्रु इत्येतस्मात् सन्नन्तादात्मने
पदं न स्यात् प्रतिशुश्रूषति आशुश्रूषति भाष्ये तन्नेदं व्याख्यातम् ६० शदेः शितः कौ ति स्वा शद्लृ इत्येतस्माच्छिद्भाविन आत्मने
पदं स्यात् शीयते शीयेते शीयन्ते शित किम् अशात्स्यत् शदेर्लेडादीनामात्मनेपदं भवतीति वक्तव्यम् । उपसर्गपूर्वं नियमे
इष्टवायुपसंख्यानम् २ कृताऽकृतप्रसङ्गि नित्यं तद्विपरीतमनित्यम् १ शब्दान्तरस्य प्राप्नुवन्विधिरनित्यः २ शब्दान्तरा
त्प्राप्नुवतः शब्दान्तरे प्राप्नुवतश्चानित्यत्वम् ३ लक्षणान्तरेण प्राप्नुवन्विधिरनित्यः ४ क्वचित्कृताऽकृतप्रासङ्गिकमात्रेणापि
नित्यता ५ यस्य च लक्षणान्तरेण निमित्तं विहन्यते न तदनित्यम् ६ यस्य च लक्षणान्तरेण निमित्तं विहन्यते तदप्यनित्य
म् ७ स्वरभिन्नस्य च प्राप्नुवन्विधिरनित्यः ।८। परिभाषाइमाः ६१ म्रियतेर्लुङ्लिङोः लिङोश्च कौ । ति । तङ्ङित्वादात्मनेप
दे सिद्धे नियमार्थमिदम् मृङ् इत्येतस्मात् लुङ्लिङोः शिद्भाविन आत्मनेपदं स्यात् । नाऽन्यत्र अमृत । मृषीष्ट । म्रियन्ते । नि
यमः किमर्थः मरिष्यति अमरिष्यत् भाष्ये तन्नेदं व्याख्यातम् ६२ पूर्ववत्सनः कौ । ति । अ । सनः पूर्वो यो धातुरात्मनेपदीति

नतल्लेसन्नन्तादप्यात्मनेपदं स्यात्। आस्ते। शेते। सन्नन्तादपि तद्देवनिमित्ते। आसिसिषते। शिशयिषते निविविक्षते आ-
सू.प. विक्रंसते। गुपरित्यादि षट्सु अनुदात्तेन सामर्थ्यात् सन्नन्तादनुदात्तङित इत्यनेनैवात्मनेपदं भवति जुगुप्सिषते मीमांसिष-
२१ ते कुञ्जादिषु लिङ्गस्य प्रतिषेधः १। प्रत्ययग्रहणं णिपर्थ्यम् २ तत्रेहेतुमाश्रित्य प्रतिषेधः ३ ९२ आम्प्रत्ययवत्कृञोऽ-
21 नुप्रयोगस्य कौ ति भ्वा प्रकर्त्रभिप्रायार्थमिदम् आम् प्रत्ययो यस्मात् स आम्प्रत्ययः आम्प्रकृतिरिति यावत्। तेन तत्स्य
मनुप्रयुज्यमानात् कृञ इत्येतस्मादात्मनेपदं स्यात् ईहांचक्रे अत्र ऋकारेणैव पूर्ववदित्यनुवर्तते वाक्यभेदेन नियमः पूर्ववद्
वात्मनेपदं भवति न तु तद्विपरीतम् तेन कर्तृगामिन्यपि क्रियाफले उन्मांचकारेत्यादौ नात्मनेपदम् ९४ प्रोपाभ्यां
युजेरयज्ञपात्रेषु कौ ति ध्वा प्रकर्त्रभिप्रायार्थमिदम्। प्र उप इत्येवं पूर्वाद्युजेरात्मनेपदं स्यात्। युजिर्। प्रयुङ्क्ते उप
युङ्क्ते अयज्ञपात्रेषु किम्। द्वन्द्वं यज्ञपात्राणि प्रयुनक्ति स्वराद्युपसृष्टादिति वक्तव्यम् १ उद्युङ्क्ते अनुयुङ्क्ते स्वराद्यन्तोप
सृष्टादिति वक्तव्यम् २ अनुयुङ्क्ते प्रयुङ्क्ते। विनियुङ्क्ते ९५ समः क्ष्णुवः कौ। ति। आ। सम्पूर्वात् क्ष्णु इत्येतस्मादात्मनेपदं
स्यात् संक्ष्णुते शस्त्रं। संक्ष्णुवाते। संक्ष्णुवते ९६ भुजोऽनवने कौ ति आ भुज इत्येतस्मादात्मनेपदं स्यात् रक्षणाभि
न्नेऽर्थे भुङ्क्ते भुञ्जाते भुञ्जते अनवने किम्। महीं भुनक्ति अनवन इति निषेधेन रुधादिपठितस्यैव ग्रहणम्। न तु
भुजो इत्येतस्य अनवन कौटिल्ययोरिति वक्तव्यम् १ ९७ णेरणौ यत्कर्म णौ चेत् स कर्ताऽनाध्याने कौ ति आ णि
च इत्येवमस्मिहेतुकर्त्रभिप्रायार्थमिदम् ण्यन्तादात्मनेपदं स्यात् अणौ यत्कर्म णौ यदि तदेव कर्म भवति अन्यत्कर्म
न भवति। स एव कर्म णौ यदि कर्ता भवति आध्याने तु न भवति आरोहन्ति हस्तिनं हस्तिपकाः आरोहयते हस्ती स्वयमेव
पश्यन्ति भृत्या राजानम् दर्शयति भृत्यान् राजानम् दर्शयते भृत्यान् राजा स्वयमेव णेरिति किम् आरोहयमाणो ह-
स्ती साध्वारोहति अणाविति किम् गणयति गणं गोपालः गणयति गणः स्वयमेव कर्मग्रहणं किम्। लुनाति २१

दात्रेण लावयति दात्रं स्वयमेव अणौ यत्कर्म्म णौ चेदिति किम् हस्तिनमारोहन्ति मनुष्याः हस्ती स्थलमारोहयति म
नुष्यान् सकर्म्मकादिति किम् आरोहयन्ति हस्तिनं हस्तिपकाः अनाध्याने किम् स्मरति वनगुल्मं कोकिलाः स्मरयति
कोकिलं वनगुल्मः स्वयमेव कर्म्मस्थभावकेषु कर्म्मस्थक्रियकेषु वा यातेषु कर्म्मणा तुल्यक्रियः इति कर्म्मवद्भावे
नात्मनेपदं भवति णेरणौ इति सूत्रेण कर्तृस्थक्रियकार्थं कर्तृस्थभावकार्थं वा कृतम् ऐरात्मनेपदविधानेऽन्य
न्तस्य कर्म्मणा स्तत्रोपलब्धिः १ आत्मनेपदस्य च प्रतिषेधो वक्तव्यः २ आत्मनः कर्म्मत्वे प्रतिषेधो वक्तव्यः ३। ६८। भीः
स्म्योर्हेतुभये कौ ति णि अकर्त्रभिप्रायार्थोयमारम्भः। ञिभी। ष्मिङ्। इत्येताभ्यां एयन्ताभ्यामात्मनेपदं स्यात् लका
रवाच्यकर्तृहेतुकौ यदि भयस्मयौ भवतः। भयग्रहणे विस्मयस्याप्युपलक्षणम् मुण्डो भीषयते जटिलो भीषयते
मुण्डो विस्मापयते जटिलो विस्मापयते हेतुभये किम्। कुञ्चिकयैनं भाययति रूपेण विस्माययति इत्यादि सूत्र
वत् स्वयं भाष्ये तु न व्याख्यातम् ६९ गृधिवञ्च्योः प्रलम्भने कौ। ति। आ। अकर्त्रभिप्रायार्थमिदम् गृधु। वञ्चु। इत्ये
ताभ्यां एयन्ताभ्यामात्मनेपदं स्यान्मिथ्याफलाख्याने। माणवकं गर्द्धयते। माणवकं वञ्चयते प्रलम्भने किम्। श्वानं
गर्द्धयति अभिकाङ्क्षामस्योत्पादयतीत्यर्थः। अहिं वञ्चयति परिहरतीत्यर्थः ७०। लियः सम्माननशालीनीकर
णयोश्च। कौ। ति। णि। अकर्त्रभिप्रायार्थमिदं लीङ्। ली। इत्येताभ्यां एयन्ताभ्यामात्मनेपदं स्यात् पूजने अभिभवने च
वार्थे। वशाह्वास्य प्रलम्भने च। जटाभिर्लापयते। पूजामधिगच्छतीत्यर्थः। श्येनो वर्त्तिकामुल्लापयते अभिभवतीत्य
र्थः वालमुल्लापयते। वञ्चयतीत्यर्थः। संमाननेत्यादि किम् वालमुल्लापयति ७१ मिथ्योपपदात्कृञोऽभ्यासे। कौ
ति। आ। अकर्त्रभिप्रायार्थमिदम्। डुकृञ्। इत्येतस्मात् एयन्तात् मिथ्या इत्येतदुपपदादात्मनेपदं स्यात् योनः पुनः ऽ
र्थे पदं मिथ्याकारयते। स्वरादिदुष्टमसकृदुच्चारयतीत्यर्थः मिथ्योपपदादिति किम्। पदं सुष्ठु कारयति कृञः

सू॰ प॰ किम्। परं मिथ्यावाचयति अभ्यासे किम्। सकृत्पदं मिथ्याकारयति ७२ स्वरितञितः कर्त्रभिप्राये क्रियाफले कौ
२२ ति। भ्वा। णेरिति निवृत्तम्। शेषात्कर्तरीति परस्मैपदे प्राप्ते। स्वरितेतो धातोर्ञितश्च धातोरात्मनेपदं स्यात्कर्तृगामि-
नि प्रधाने क्रियाफले सति यजमानो यजते देवदत्तः पचते। ञितः। सुनुते। कुरुते। स्वर्गादि क्रियाफलमिह कर्तारमभि
प्रैति कर्त्रभिप्राये किम्। यजन्ति याजकाः। पचन्ति पाचकाः। कुर्वन्ति कर्मकराः। यद्यपि दक्षिणा वेतनञ्च कर्तुः फ
लमिहास्ति तथापि न तत्प्रधानं फलं तदर्थं क्रियारम्भाऽभावात् ७३ अपाद्वदः। कौ। ति। आ। वद। इत्येतस्मादपपू
र्वादात्मनेपदं स्यात्कर्तृगामिनि क्रियाफले अपवदते धनकामोऽन्यायम्। कर्त्रभिप्राये किम्। अपवदति। इत्यादिप
ञ्चसूत्राणि भाष्येन व्याख्यातानि ७४ णिचश्च कौ। ति। वु। णिजन्तादात्मनेपदं स्यात्कर्तृगामिनि क्रियाफले। कारयते
परगामिनि क्रियाफले शेषात्कर्तरीति परस्मैपदम्। कारयति कटं परस्य ७५ समुदाङ्भ्यो यमोऽग्रन्थे। कौ। ति। आ।
सम्। उद्। आङ्। इत्येतत्पूर्वात् यमः इत्येतस्मादात्मनेपदं स्यात्कर्तृगामिनि क्रियाफले ग्रन्थविषयश्चेत्प्रयोगो न भवति।
व्रीहीन्संयच्छते भारमुद्यच्छते। वासमायच्छते अग्रन्थे किम्। उद्यच्छति वेदम्। ज्ञानमुद्यमं करोतीत्यर्थः ७६ अ
नुपसर्गाज्ज्ञः। कौ। ति। आ। ज्ञा। इत्येतस्मादनुपसर्गादात्मनेपदं स्यात्कर्तृगामिनि क्रियाफले गां जानीते अनुपस
र्गात्किम्। स्वर्गं लोकं न प्रजानाति मूढः ७७ विभाषोपपदेन प्रतीयमाने। कौ। ति। आ। स्वरितञित इत्यादिपञ्चभिः
सूत्रैर्यदात्मनेपदं विहितं तत्समीपोच्चारितेन पदेन क्रियाफलस्य कर्तृगामित्वे द्योतिते वा स्यात्। स्वं यज्ञं यजति
यजते वा। स्वं कटं करोति कुरुते वा। स्वं पुत्रमपवदति। अपवदते वा। स्वं यज्ञं कारयति। कारयते वा। स्वं व्रीहिं संय-
च्छति। संयच्छते वा। स्वां गां जानाति। जानीते वा ७८ शेषात्कर्तरि परस्मैपदम् कौ ति भ्वा पूर्वप्रकरणेनात्मने
पदनियमः कृतः न परस्मैपदनियमस्तत्सर्वतः प्राप्नोतीति नियमार्थमिदम्। आत्मनेपदनिमित्तरहितेभ्यो धातु २२

ण्यन्तकर्त्तरि परस्मैपदं स्यात्। नान्येभ्यो यातम्यः भवति पति कर्त्तरि किम्। पच्यते ओदनः स्वयमेव। कर्त्तरि कर्म्म
व्यतिहारे इत्यतः कर्त्तृग्रहणमनुवर्त्तते। तेन कर्त्तैव यः कर्त्ता तत्र परस्मैपदं भवति न तु कर्म्मकर्त्तरि शेषवचनेऽपूर्वमप्यावेद
र्थं प्रतिषेध्यः १ शेषवचने सममप्यावेत्यकृतेः प्रतिषेधः २ शेषात् कर्त्तरि इति वृत्तम्। ३। ७९। अनुपराभ्यां कृञः। कौ। ति। प।
कर्त्तृगामिनि क्रियाफले गन्धनादिष्वेव परस्मैपदार्थमिदम्। अनु। परा। इत्येवं पूर्वात् कृञ इत्येतस्मात् परस्मैपदं स्यात् अ
नुकरोति। कर्त्तरीत्येव भावकर्म्मणोर्मा भूत्। द्वितीयकर्त्तृग्रहणाऽनुवर्त्ततेनेह। अनुक्रियते स्वयमेव तत्रात्मनेपदप्रति
षेधोऽप्रतिषिद्धत्वात् १ आत्मनेपदनियमे वा प्रतिषेधः ८० अभिप्रत्यतिभ्यः क्षिपः कौ। ति। प। क्षिप प्रेरणे स्वरितेत्। ततः
कर्त्रभिप्राये परस्मैपदार्थमिदम् अभि। प्रति। अति। इत्येवं पूर्वात् क्षिपः परस्मैपदं स्यात् अभिक्षिपति प्रतिक्षिपति
अतिक्षिपति। इत्येवं पूर्वात् क्षिपः परस्मैपदं स्यात् अभिक्षिपति प्रतिक्षिपते अतिक्षिपति अभिप्रत्यतिभ्यः किम् आ
क्षिपते। द्वितीयमपि कर्त्तृग्रहणमनुवर्त्तते। तेनेह न। अभिक्षिप्यते स्वयमेव इत्यादि सूत्रषट्कं भाष्येऽनव्याख्यातम् ८१
प्राद्वहः। कौ। ति। वह प्रापणे स्वरितेत्। तत्र कर्त्तृगामिनि क्रियाफले परस्मैपदार्थमिदम् प्रपूर्वाद्वहतेः परस्मैपदे
स्यात्। प्रवहति। प्रवहतः। प्रवहन्ति। प्रात् किम्। आवहते ८२। परेर्मृषः। कौ। ति। प। मृष तितिक्षायां स्वरितेत्। ततः प
रस्मैपदार्थमिदम्। परिपूर्वान्मृष्यतेः परस्मैपदं स्यात्। परिमृष्यति। परेः किं। आमृष्यते। वहतिमपि केचिदत्राऽनुव
र्त्तयन्ति। परिवहति ८३ व्याङ्परिभ्यो रमः। कौ। ति। प। रमु। अनुदात्तेत्। तत आत्मनेपदमेव प्राप्तं परस्मैपदार्थमि
दम्। वि। आङ्। परि। इत्येवं पूर्वाद् रमतेः परस्मैपदं स्यात्। विरमति। आरमति। परिरमति व्याङ्परिभ्यः किम्। अभिरम
ते ८४। उपाच्च। कौ। ति। प। उपपूर्वाद् रमः इत्येतस्मात् परस्मैपदं स्यात्। देवदत्तमुपरमति। उपरमयतीत्यर्थः। अन्तर्भावित
ण्यर्थोऽत्र रमिः। योगविभाग उत्तरार्थः। उत्तरत्र उपादित्येव सम्बध्यो यथा स्यात् ८५ विभाषाऽकर्म्मकात्। कौ। ति। प

सू.प.
२३
23

पूर्वेणनित्ये प्राप्तेविकल्पोऽयम्। उपपूर्वाद्रमइत्येतस्मादकर्म्मकादात्मनेपदं स्यात्। यावद्भुक्तमुपरमति। उपरमते वा।
निवर्ततइत्यर्थः ८६ बुधयुधनशजनेङ्प्रुद्रुस्रुभ्योणेः। कौ।ति।प।णिचश्चेति कर्त्रगे फले आत्मनेपदे प्राप्ते परस्मैप
दार्थमिदम्। बुध।युध।णश।जन।इङ्।प्रु।द्रु।स्रु।इत्येतेभ्यो ण्यन्तेभ्यः परस्मैपदं स्यात्। बोधयति पद्मम्। योधयति का
ष्ठानि। नाशयति दुःखम्। जनयति सुखम्। अध्यापयति शास्त्रम्। प्रावयति। प्रापयतीत्यर्थः। द्रावयति। विलापयती
त्यर्थः। स्रावयति। स्यन्दयतीत्यर्थः॥ ये ऽत्राऽकर्म्मकास्तेषामणावकर्म्मकाच्चित्तवत्कर्तृकादित्यात्मनेपदे सिद्धे ऽ
चित्तवत्कर्तृकार्थमत्रसूत्रे ग्रहणम्॥ चलनार्थान्निगरणचलनार्थेभ्य इत्येव सिद्धे ऽचलने ऽर्थेप्यात्मनेपदार्थमिह
ग्रहणम् ८७ निगरणचलनार्थेभ्यश्च। कौ।ति।प।णिचश्चेत्यस्यापवादः भक्षणार्थेभ्यः कम्पनार्थेभ्यश्च ण्यन्तेभ्यो धा
तुभ्यः परस्मैपदं स्यात्। आशयति। भोजयति। भोजयति। चलयति। कम्पयति अदेः प्रतिषेधो वक्तव्यः १ इति काशिका
अदेः प्रतिषेधः १ कौ।ति।प। आदयते देवदत्तेन। अकर्त्रभिप्रायेप्येघात्कनेरीति परस्मैपदं भवत्येव। आदयत्यन्नं देवदत्तेन। भा
ष्ये तु नेदं सूत्रं व्याख्यातम् ८८ अणावकर्म्मकाच्चित्तवत्कर्तृकात्। कौ।ति।प।णिचश्चेत्यस्यापवादः अणौ यो धातुरकर्म्म
कश्चित्तवत्कर्तृकश्च तस्मात् ण्यन्तात्परस्मैपदं स्यात् आसयति देवदत्तम्। शाययति देवदत्तम्। अणाविति किम्। आरोह
यमाणो प्रेरयति आरोहयते अकर्म्मकात् किम्। कटं कुर्वाणं प्रेरयति कारयते। चित्तवत्कर्तृकात् किम्। शुष्यन्ति व्रीहयः
शोषयति व्रीहीनातपः अणावकर्म्मकादिति। चुरादिणिचो ण्यन्तात्परस्मैपदवचनम् ५ सिद्धं तत्तस्मिन् णाविति वचना
त्।२।८९। न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः। कौ।ति।प।पा।दमि। आङ्यम। आङ्यस। परिमुह। रुचि
नृति। वद। वस। इत्येतेभ्यो ण्यन्तेभ्यः परस्मैपदं न स्यात्। पा। पाययते। दम। दमयते। आङ्पूर्वो यम। आयामयते। यमो
ऽपरिवेषणे इति मित्त्वज्ञानिषेधः आङ्पूर्वो यस। आयासयते। परिपूर्वो मुह। परिपूर्वो मुह। परिमोहयते। रुचा। रो २३

वर्पते। वृती। नर्तयते। वद। वादयते। वस। वासयते। अत्र पिबतिर्निगरणार्थः। नृतिश्चलनार्थोऽपि। अन्ये वितर्कतेरेका
अकर्मकाः। तत्र पूर्वसूत्रेण प्राप्तस्य परस्मैपदस्य निषेधोऽनन्तरेणाशोषादिभ्यः। पादिषु पेटद्धप्रसेत्व्यानम् १ यापयते शिशु
मेकं समीची ९। वाक्यषः कौ ति आ काव्ययमयानान्नाद्यातेः परस्मैपदं वा स्यात्। लोहितायते इत्यादिसूत्रद्वयं भाष्येऽनन्व
याख्यानम् ९१ द्युद्भ्यो लुङि। कौ। ति। भ्वा अनुदात्तेतो नात्रिज्ञामेऽपि विकल्पः। वडवचनादा वर्यलाभः। बुतदीमोद्दता। द
म्यकृप्य इत्यन्ते भ्यो धातुभ्यो लुङः परस्मैपदं वा स्यात्। अद्युतत् अद्योतिष्ट अलुठत् अलोठिष्ट लुङीति किम्। द्योत
ते ९२ वृद्भ्यः स्यसनोः कौ। ति। भ्वा। वृतु। वृधु। शृधु। स्यन्दू। कृपू इत्येतेभ्यः स्यसनोर्विषये परस्मैपदं वा स्यात्। वर्त्स्यति। व
र्त्स्यति। अवर्त्स्यत्। वर्तिष्यमत। विवृत्सति। विवर्तिषते ९३ लुटि च कृपः। कौ। ति। भ्वा।। लुटि स्यसनोश्च विषये कृप
इत्येतस्मात्परस्मैपदं वा स्यात्। कल्प्ता। कल्प्तारौ। कल्प्तासि। कल्पितासे कल्प्स्यति। कल्पिष्यते। अकल्प्स्यत्।
अकल्पिष्यत। विकृप्सति। विकल्पिषते इति ९२ सूत्राणि भाष्ये ।।१।३।। व्याख्यातानि। इति सूत्रपाठे प्रथमाध्यायस्य तृ
तीयः पादः १। आ कडारादेका संज्ञा। कौ। सं। अ। १। इत आरभ्य कडाराः कर्मधारये इति सूत्रव्याप्त्या तासां संज्ञानां मध्ये कल्पप
के वदज्ञेया। का पुनरसौ। या परा ऽनवकाशा च।। अततत्त्वत्। अवस्वत्। अवरहसे लघुसंज्ञा प्रमात्ता बाधित्वा परत्वाद्
योगे गुरुसंज्ञैव भवति। तेन सन्वद्भावो न अन्यत्र संज्ञासमावेशात्प्रियमार्थे वचनम् १ गुणवचनेव २ अर्थेवदलह
स्वरूपं गुणवच नसंज्ञे स्यात्। मार्दवम्। मृदुता। मृद्वी। चकारः प्रातिपदिकसंज्ञासमावेशार्थः समासकृततद्धि
ताव्ययसर्वनामाः सर्वलिङ्गा जातिः। ३। इत्येताः संज्ञा गुणवचनसंज्ञाया बाधिकाः स्युः। अत्र प्रातिपदिकमित्यर
स्यानुवर्तनात्तया समावेशः समास। चित्रगुतम्। कृत्। कारकतम् तद्धित। औपगवतम्। तद्धितः श्रूयमाण एव
तेन शुक्लादीनामपि गुणवचनतम्। अव्यय। उच्चैस्तम्। सर्वनाम। सर्वतम् असर्वलिङ्गा जातिः। वृषलीतम्

गुणवचनसंज्ञायाः समासादिसंज्ञाभिर्बाधात्प्रसञ्जन। अन्योदाहरणे पुंवद्भावश्च न। संख्या ४ प्रातिपदिकमित्यनुवर्तते
स्तृ·प· तेनतयासमावेशः। बहुत्वम् ५ च ५ प्रातिपदिकमितिवर्तते कायुनडसंज्ञा पञ्चत्वम् एकइत्यादिनिवेशिनीसंज्ञा ८८
२४ प्रातिपदिकमित्येव। डित्थम् एवंचात्रयणात्समासादिसंज्ञारहितत्वेफलितम् २। विप्रतिषेधेपरंकार्यम् कौ। स्व
29 स्वासमवलयोर्विरोधेपरंकार्यंस्यात्। स्वपिवेत्यस्यावकाशः हलाभ्याम्। बहुवचनेभ्रल्येदित्यस्यावकाशः हलेषु
इहोभयंप्राप्तोनिहलेभ्यः परमेतंभवतिविप्रतिषेध अङ्गाधिकारेपूर्वमितिवक्तव्यम् १। अन्तरङ्गंवलीयोभव
तीतिवक्तव्यम् २ तस्यदोषः। पूर्वपदोत्तरपदयोर्हस्वराद्वेकादेशात् ३ लोपयणायवायावेकादेशेभ्योलग्वलीया
नितिवक्तव्यम् ४ पूर्वपरनित्याऽन्तरङ्गाऽपवादानामुत्तरोत्तरंवलीयः १ सकृद्गतौविप्रतिषेधेयद्बाधितंबाधितमे
व २। पुनःप्रसङ्गविज्ञानात्सिद्धम् ३ पूर्वोत्तरपदनिमित्तकार्यात्पूर्वमन्तरङ्गोऽप्येकादेशान ४ परिभाषाइमाः
इति २ सूत्रेभाष्ये १।४।२।याख्याने।३। यूस्त्र्याख्यौनदी। संज्ञाप्रदेशः। ७।१।८०।७।३।१।७।कौ।स्व।अ।पु।ई।ऊ।
इत्येतदन्तौनित्यस्त्रीलिङ्गौनदीसंज्ञौस्तः। कुमारी। गौरी। ब्रह्मबन्धूः। यवागूः पूकिम्। मात्रे। स्याख्यौकिम्। ग्रामण्यः
खलप्वः। आख्याग्रहणंकिम्। ग्रामण्येस्त्रियै। यदान्तरंविनास्त्रियांवर्तमानत्वंनित्यस्त्रीत्वम्। इतिहृतिकारादयः लिङ्गा
न्तराऽनभीधायकत्वम्। इतिकेप्यदः प्रथमलिङ्गग्रहणञ्च १ इत्रेः प्राक्नित्यस्त्रीलिङ्गस्यपश्चादर्थान्तरलिङ्गान्तरवा
चकत्वेऽपिनदीत्वंवक्तव्यमित्यर्थः वहुश्रेयसैराते। कुमार्यैब्राह्मणायहस्वपुत्रुस्थानेप्रहृतौवस्त्रीवचने २। हस्वयङु
वङुस्थानानामर्थान्तरसंक्रान्तौसत्यांस्त्रीवचनेषवनदीसंज्ञाभवति। नालिङ्गान्तरवचनेनिह अतिशकटयब्राह्म
णाय। यतिधेनवेब्राह्मणाय अतिश्रियेब्राह्मणाय। अतिभ्रुवेब्राह्मणाय हस्वेयुवुस्थानेप्रवृत्तौस्त्रीवचने १ इत्यपरे
४ नेयङुवङुस्थानावस्त्री। कौ। स्व।अ।स्त्री।इयङुवङोः स्थितिर्ययोस्तावीदूतौइत्येतौनदीसंज्ञौनस्तः। स्त्रीशाहंवजो यि २४

त्वा हे स्त्रीः। हे भ्रूः। अस्त्रीति किम्। हे स्त्रि इत्यादिसूत्रपञ्चकं भाष्येऽनन्याख्यातम्। ५। वामि। कौ। स। अ। स्त्री। इयङुवङोः स्थिति
र्ययोस्तौ दिसूत्रपञ्चकं भाष्येऽनन्याख्यातम् ई ऊ इत्येतौ वा आमि नदीसंज्ञौ न स्तः। श्रियाम्। श्रीणाम्। भ्रुवाम्। भ्रूणाम्। अस्त्री
त्येव। स्त्रीणाम्। ६। ङिति ह्रस्वश्च। कौ। स। अ। स्त्री इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिङ्गौ ईदूतौ इयो
तौ ह्रस्वौ च इउ इत्येतौ स्त्रियां ङिति परे वा नदीसंज्ञौ स्तः। कृत्यै। कृतये। धेन्वै। धेन्वै। धेनवे। श्रियै। श्रिये। भ्रुवै। भ्रुवे। अस्त्रीत्येव
स्त्रियै स्त्रियाः किम्। अग्नये। ७। शेषो घ्यसखि संज्ञाप्रदेशः। १।४।७। कौ। स। अ। घु। इउ इत्येतौ ह्रस्वौ घिसंज्ञौ स्तः। सखिश
ब्दं वर्जयित्वा। अग्नये। कृतये। वायवे। धेनवे। असखीति किम्। सख्या। ८। पतिः समास एव। कौ। स। अ। घु। नियमार्थमिदम्। प
तिशब्दः समास एव घिसंज्ञः स्यात्। भूपतिना। भूपतये। समास इति किम्। पत्या। पत्ये। एवकारो विपरीतनियमवारणार्थः
ष्टमुष्टिना ९ षष्ठीयुक्तश्छन्दसि वा। कौ। वै। अ। प्र। षष्ठ्यन्तेन युक्तः पतिशब्दो वेदे घिसंज्ञो वा स्यात्। कुलग्वानोपतये
नमः। षष्ठीति किम्। मया पत्या जरदष्टिर्यथासः। १०। ह्रस्वं लघु। संज्ञाप्रदेशः। १।४।१०। कौ। स। सं। ह्रस्वमक्षरं लघुसंज्ञं
स्यात्। भिदू। भेत्ता। इत्यादिसूत्रत्रयं भाष्येऽनन्याख्यातम्। ११। संयोगे गुरु। संज्ञाप्रदेशः। १।४।११। कौ। स। सं। संयोगपरे
ह्रस्वमक्षरं गुरुसंज्ञं स्यात्। देवदत्तः। शिक्षा। १२। दीर्घं च। कौ। स। सं। दीर्घमक्षरं गुरुसंज्ञं स्यात्। ईहाञ्चक्रे। ऊहाञ्चक्रे। १३। य
स्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम्। संज्ञाप्रदेशः। १।४।१३। कौ। स। अ। घु। यस्मात्प्रत्ययो विधीयते तदादि शब्दस्वरूपं तत्
प्रत्यये परेऽङ्गसंज्ञं स्यात्। कर्ता। करिष्यति। यस्मादिति संहितनिर्देशार्थम्। तदादीति समन्वयात्। प्रत्ययग्रहणं किम्।
स्त्र्यविशात्। नेर्विश इत्युपसर्गाद्विधिरात्मने। तदादेरङ्गसंज्ञा स्यात्। विधिरिति किम्। स्त्री इयती तदादीति स्यादि तु मर्ये
करिष्याव कुण्डानि। प्रत्यये किम्। स्त्र्यर्थम्। मितनः सङ्गतस्योपसंख्यानम् १। तदा घाङ्गं भवतीति वक्तव्यम् २ प्रत्य
यग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणम्। त्यपाः प्रत्यययोः प्रत्ययस्यैव ग्रहणम् २। परिभाषेद्वमे ॥ १९

सुप्तिङन्तं पदम् संज्ञाप्रदेशः ८।१।१६। कौ। स्वा। सं। सुबन्तं तिङन्तं च शब्दस्वरूपं पदसंज्ञं स्यात्। ब्राह्मणाः पठन्ति। सं
ज्ञाविधौ प्रत्ययग्रहणे तदन्तग्रहणं नास्ति २ परिभाषेयम्।१५। नः क्ये। कौ। ति। ना। नियमार्थमिदम् क्यच्। क्यष्। क्य
ङ्। इत्येतेषु नान्तमेव पदसंज्ञं स्यात्। क्यच्। राजीयति। क्यष्। वर्म्मायते। क्यङ्। राजायते। न इति किम्। स्रुच्यति। वाच्यति
१६। सिति च। कौ। सन। चा। यचि भमित्यस्यापवादः। सिति प्रत्यये पूर्वं पदसंज्ञं स्यात्। भवदीयः। ऊर्णायुः। माध्यन्तेनेदं
व्याख्यातम्॥ ॥ १७। स्वादिष्वसर्वनामस्थाने। कौ। स्वा। अ। ३। कप्रत्ययावधिषु स्वादिषु सर्वनामस्थानवर्जितेषु पूर्वं पदसं
ज्ञं स्यात्। राजभ्याम्। राजभिः। राजता। राजतरः। असर्वनामस्थाने किम्। राजानौ। राजानः। भवदङ्घ्रौ पारयदङ्घ्रः पद
संज्ञावक्तव्या। १। भवदङ्घ्रः। पारयदङ्घ्रः तसौ मत्वर्थे इति भत्वेन १८। यचि भम्। संज्ञाप्रदेशः।६।४।१२९। कौ। स्वा। अ। ३।
यकारादिष्वजादिषु च स्वादिष्वसर्वनामस्थानवर्जितेषु परेषु पूर्वं भसंज्ञं स्यात्। गार्ग्यः। सू.पा० वात्स्यः। दाक्षिः भसंज्ञाया
मुत्तरपदलोपे षषः प्रतिषेधः १ नभोऽङ्गिरोमनुषां वत्युपसंख्यानम् २ कौ। वै। अ। प्रा। नभ इव नभस्वत्। अङ्गिरा इव अ
ङ्गिरस्वत्। मनुरिव मनुष्वत्। वृषण्वस्वश्वयोः ३। कौ। वै। अ। प्रा। वृषण्वसुः। वृषणश्वः। १९। तसौ मत्वर्थे। कौ। वै। अ
प्रा। तान्तसान्तौ मत्वर्थे प्रत्यये परे भसंज्ञौ भवतः। उदश्विन्मान घोषः विद्युत्वान्मेघः। यशस्वी। पयस्वी। तसौ किम्। त
त्ववान्। २०। अयस्मयादीनि च्छन्दसि। कौ। वै। अ। प्रा। अयस्मय इत्यादीनि शब्दस्वरूपाणि वेदे भसंज्ञानि स्युः अयस्म
ये वर्म्म। उभयसंज्ञान्यपीति वक्तव्यम् १ अयो मये वर्म्म २१ बहुषु बहुवचनम्। कौ। स्वा। अपुंस्सपंचम्यो उभयसंज्ञान्य
पीति वक्तव्यम्। १। अयो मये वर्म्म २१। ङ्याप्प्रातिपदिकात्स्वादयः। लस्य तिबादयः सामान्येन विहिताः तत्र बह्वर्थे
षु वाच्येषु बहुवचनमेव भवति। ब्राह्मणाः। पठन्ति। सुपां कर्मादयोऽप्यर्थाः संख्या चैव तथा तिङाम्। प्रसिद्धो नियम
स्तत्र नियमः प्रकृतेषु वा ।१। कारिकेयम्।२२। द्व्येकयोर्द्विवचनैकवचने। कौ। स्वा। अ। ३। द्वित्वैकत्वयोर्द्विवच २५

नैकवच्चनेक्कमेणभवतः। ब्राह्मणौ। पचतः। ब्राह्मणाः। पचन्ति। भाष्येतन्नेदंव्याख्यातम्। इति २० सूत्राणिभाष्ये।।१।४।२। व्या
ख्यातानि २१। कारके। संज्ञाप्रदेशः। १।४।२३। कौ। सू। का। अधिकारोऽयम्। इतऊर्ध्वंयदनुक्रमिष्यामः कारकइत्येवंतद्वेदित
व्यम्। ग्रामादायाति। इत्यादि साधकंनिर्वर्तकंकारकसंज्ञंभवतीतिवक्तव्यम् ।।२४। ध्रुवमपायेऽपादानम्। संज्ञाप्रदेशः।१।
४।२४। कौ। सू। का। विश्लेषेऽवधिभूतंकारकमसंज्ञंस्यात्। अपादानसंज्ञंस्यात्। ग्रामादायाति। पर्वतात्पतितः। जुगुप्साविरामप्रमा
दार्थानामुपसंख्यानम्।।१। धर्माज्जुगुप्सते। पापाद्विरमति। धर्मात्प्रमाद्यति २५ भीत्रार्थानांभयहेतुः। कौ। सू। का। भयार्था
नांत्राणार्थानांचधातूनांप्रयोगेभयहेतुःकारकमपादानंस्यात्। चोराद्बिभेति। चोरात्त्रायते। चोराद्बिभेति। भयहेतुःकिम्। अ
रण्येबिभेति। २६। पराजेरसोढः। कौ। सू। का। पराघूर्वस्यजयतेःप्रयोगेऽसह्योयोऽर्थस्तत्कारकमपादानंस्यात्। अध्ययनात्प
राजयते असोढःकिम्। शत्रून्पराजयते। २७। वारणार्थानामीप्सितः। कौ। सू। का। वारणार्थानांधातूनांप्रयोगेइष्टोयोऽर्थ
स्तत्कारकमपादानंस्यात्। यवेभ्योगांवारयति ईप्सितःकिम्। यवेभ्योगांवारयतिक्षेत्रे। २८। अन्तर्धौयेनादर्शनमिच्छति।।
कौ। सू। का। व्यवधानेसतिस्वात्मकर्मकदर्शनाऽभावेयत्कर्तृकमिच्छतितत्कारकमपादानंस्यात्। उपाध्यायादन्तर्द्धत्ते।
मातुर्निलीयते। अन्तर्धौकिम्। चोरान्नदिदृक्षते इच्छतिग्रहणंकिम्। अदर्शनेच्छायांसत्यपिदर्शनेयथास्या
त्। २९। आख्यातोपयोगे। कौ। सू। का। नियमपूर्वकविद्याग्रहणेवक्तातत्कारकमपादानंस्यात्। उपाध्यायादधीते।।उप
योगेकिम्। नटस्यशृणोति। ३०। जनिकर्तुःप्रकृतिः। कौ। सू। का। भवनेभूःउत्पत्तिः। तत्कर्तुर्यत्प्रकाशस्थानंतत्कारकम
पादानंस्यात्। हिमवतोगङ्गाप्रभवति। प्रथमेतदुपलभ्यतइत्यर्थः ३२ कर्मणायमभिप्रैतिससंप्रदानम्। संज्ञाप्रदेशः।१।४।
३२। कौ। सू। का। ददातिकर्मणाकरणभूतेनकर्तायमभिप्रैतितत्कारकसंज्ञकंस्यात्संप्रदानसंज्ञंस्यात्। विप्रायगांददाति।।
क्रियाग्रहणमपिकर्तव्यम्।।१। पत्येशेते। क्रिययायमभिप्रैतिससंप्रदानम्।२। कौ। सू। का। कर्मणःकरणसंज्ञावक्तव्या।

सू॰ प॰ २९

संप्रदानस्य कर्मसंज्ञा ३२। पशुना रुद्रं यजते। पशुं रुद्राय ददातीत्यर्थः ३३ रुच्यर्थानां प्रीयमाणः। कौ। सू। का। अन्यक
र्तृकोऽभिलाषो रुचिः। रुच्यर्थानां धातूनां प्रयोगे प्रीयमाणो योऽर्थस्तत्कारकं सम्प्रदानं स्यात्। देवदत्ताय रोचते मोदकः।
देवदत्ताय स्वदतेऽपूपः। देवदत्तस्याभिलाषस्य मोदकः कर्ता। प्रीयमाणः किम्। देवदत्ताय रोचते मोदकः पथि। अत्र
पथो मा भूत्। इत्यादि सूत्रवर्तनरूपं भाष्येनेन व्याख्यातम्। ३४। श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः कौ। सू। का। श्लाघ। ह्नुङ्।
स्था। शप। इत्येतेषां प्रयोगे बोधयितुमिष्टो योऽर्थस्तत्कारकं सम्प्रदानं स्यात्। देवदत्ताय श्लाघते। देवदत्ताय ह्नुते। देवदत्ताय
तिष्ठते। देवदत्ताय शपते। ज्ञीप्स्यमानः किम्। देवदत्ते श्लाघते ३५ धारेरुत्तमर्णः। कौ। सू। का। धारयतेः प्रयोगे यत्स्वा
मी कारकं तत्सम्प्रदानसंज्ञं स्यात् देवदत्ताय शतं धारयति उत्तमर्णः किम्। देवदत्ताय शतं धारयति ग्रामे ३६ स्पृहेरीप्सितः
कौ। सू। का। स्पृह ईप्सायां चुरादावदन्तः तस्य प्रयोगे इष्टः कारकं संप्रदानं स्यात्। पुष्पेभ्यः स्पृहयति ईप्सितः किम्। पुष्पे
भ्यो वने स्पृहयति ३७ क्रुधद्रुहेर्ष्यासूयार्थानां यं प्रति कोपः कौ। सू। का। कोपोऽमर्षः द्रोहोऽपकारः ईर्ष्याऽक्षमा
असूया गुणेषु दोषाविष्करणम् क्रोधाद्यर्थानां प्रयोगे यं प्रति कोपस्तत्कारकं सम्प्रदानं स्यात् द्रोहादयोऽपि कोपप्रभवा एव
गृह्यन्ते अतो विशेषणं सामान्येन यं प्रति कोप इति देवदत्ताय क्रुध्यति देवदत्ताय द्रुह्यति देवदत्तायासूयति यं
प्रति कोपः किम्। भार्यामीर्ष्यति मैनामन्यो द्राक्षीदिति ३८ क्रुधद्रुहोरुपसृष्टयोः कर्म कौ सू का सोपसर्गयोः क्रु
धद्रुहोरेतयोः प्रयोगे यं प्रति कोपस्तत्कारकं कर्मसंज्ञं स्यात् देवदत्तमभिक्रुध्यति। देवदत्तमभिद्रुह्यति। उपसृष्टयोः कि
म् देवदत्ताय क्रुध्यति यज्ञदत्ताय द्रुह्यति इत्यादि सूत्रवर्तनरूपं भाष्येनेन व्याख्यातम् ३९ राधीक्ष्योर्यस्य विप्रश्नः कौ सू
का राध ईक्ष इत्येतयोः प्रयोगे यत्संबन्धि शुभाशुभं पृच्छ्यते तत्कारकं सम्प्रदानं स्यात् पर्यालोचयतीत्यर्थः ४० प्रत्याङ्भ्यां
श्रुवः पूर्वस्य कर्ता कौ सू का प्रति आङ् इत्येवंपूर्वस्य शृणोतेः प्रयोगे पूर्वस्य प्रवर्तनरूपव्यापारस्य कर्तृ कारकं २९

सम्प्रदानसंज्ञं स्यात् विप्राय गां प्रतिशृणोति विप्राय गामाशृणोति विप्रेण मह्यं देहीति प्रवर्तितः प्रतिजानीत इत्यर्थः ४।
अनुप्रतिगृणश्च कौ स का अनु प्रति इत्येवंपूर्वस्य गृणातेः प्रयोगे पूर्वस्य प्रवर्तनरूपव्यापारस्य कर्तृ कारकं संप्रदानं
संज्ञं स्यात्। होत्रेऽनुगृणाति होता प्रथमं शंसति तमध्वर्युः प्रोत्साहयतीत्यर्थः ४२ साधकतमं करणम् संज्ञाप्रदेशः २
३। १८।२।३।५।। कौ। स। का। क्रियासिद्धौ यत्प्रकृष्टोपकारकं तत्कारकं करणसंज्ञं स्यात् दात्रेण लुनाति तमग्रहणं किं
गंगायां घोषः ४३ दिवः कर्म च कौ। स। का। दिवु। इत्येतस्य यत्साधकतमं कारकं तत्कर्मसंज्ञं स्यात्। चात्करणसंज्ञं
अक्षान्दीव्यति अक्षैर्दीव्यति। इत्यादिस्तत्र पक्षद्वयं भाष्ये तत्र व्याख्यातम् ४४ परिक्रयणे संप्रदानमन्यतरस्यात् कौ
स। का। नियतकालं भृत्यास्वीकारणं परिक्रयणम् तस्मिन् साधकतमं कारकं संप्रदानसंज्ञं वा स्यात्। पक्षे करणसंज्ञा
शताय परिक्रीतः। शतेन परिक्रीतः ४५। आधारोऽधिकरणम्। संज्ञाप्रदेशः।२।३।३६।१।२।३।६८। कौ। स। का। क्रि
याधारभूतयोः कर्तृकर्मणोर्य आधारस्तत्कारकमधिकरणसंज्ञं स्यात्। कटे आस्ते विप्रः। कटे शेते विप्रः। स्थाल्यां त
ण्डुलं पचति। मोक्षे इच्छास्ति। तिलेषु तैलम् ४६ अधिशीङ्स्थासां कर्म कौ। स। का। शीङ्। स्था। आस। इत्येते
षामधिपूर्वाणामाधारः कारकं कर्मसंज्ञं स्यात् ग्राममधिशेते। ग्राममधितिष्ठति ग्राममध्यास्ते ४७ अभिनिविशश्च
कौ। स। का। अभिनि। इत्येतत्समुदायपूर्वस्य विश इत्येतस्याधारः कारकं कर्मसंज्ञं स्यात् ग्राममभिनिविशते परिक्रयणे
संप्रदानमन्यतरस्यामित्यतो मण्डूकप्लुत्याऽन्यतरस्यां ग्रहणानुवृत्तेः क्वचिन्न। पापेऽभिनिवेशः ४८ उपान्वध्याङ्वसः कौ
स। का। उप अनु अधि आङ् इत्येवं पूर्वस्य वसतेराधारः कर्मसंज्ञः स्यात् ग्राममुपवसति ग्राममनुवसति ग्राममधिवस
ति। ग्राममावसति वसेरशनार्थस्य प्रतिषेधः १ ग्रामे उपवसति। न भुङ्क्ते इत्यर्थः अभक्ष्यार्थस्य न १ कौ स का ४९ कर्तुरीप्सि
ततमं कर्म संज्ञाप्रदेशः २।३।२।२।३।१२। कौ। स। का कर्तुः क्रियया आप्तुमिष्टतमं यत्कारकं तत्कर्मसंज्ञं स्यात्। ओद

सू.प. २८

नेपचतिदेवदत्तः । कटं करोति । कर्तुः किम् । माषेष्वश्वं बध्नाति । कर्मणा ईप्सिततमाधानकर्तुः ईप्सिततमं किम् । पयसौदनं
भुङ्क्ते । तमग्रहणं किम् । अग्नेर्माणवकं वारयति । अत्रा॰ नवकाशत्वान्माणवकस्यापि वारणाद्योनामीप्सितपादामतेस्यात् ॥
कर्म्मेत्यनुवर्तमाने पुनः कर्मग्रहणमाधारनिवृत्त्यर्थम् । आधारा॰ नवृत्तौ गेहं प्रविशतीत्यत्रैव स्यात् । तत्रौदनं पच
तीत्यत्र ५० तथायुक्तं चानीप्सितम् कौ सू का ईप्सिततमवत्क्रियया युक्तमनीप्सितमपि कारकं कर्मसंज्ञं स्या
त् विषं भक्षयति चौरान् पश्यति । ग्रामं गच्छन् वृक्षमूलमुपसर्पति ५१ अकथितं च कौ सू का अपादानादिविशे
षकथाभिरविवक्षितं कारकं कर्मसंज्ञं स्यात् गां दोग्धि पयः पौरवं गां याचते अवरुणद्धि गां व्रजम् । माणवकं पन्था
नं पृच्छति । पौरवं गां भिक्षते । वृक्षमवचिनोति फलानि माणवकं धर्मं ब्रूते । माणवकं धर्ममनुशास्ति । कालभावा॰
ध्वगन्तव्याश्च कर्मणो यातेनोकर्मसंज्ञा भवन्तीति वक्तव्यम् १ कालश्चात्र लोके कालत्वादिना प्रसिद्धो मासादिरेव
मासमास्ते ॥ भावः क्रिया । गोदोहमास्ते । गन्तव्यत्वेन लोके प्रसिद्धः क्रोशयोजनादिर्नियतपरिमाणो॰ ध्वा क्रोशमास्ते
देशश्चा॰ कर्मणोकर्मसंज्ञो भवतीति वक्तव्यम् २ देशश्चात्र कुरुपञ्चालादिः संज्ञाविशेषएव । कुरूनास्ते पञ्चाला
न्स्वपिति अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योध्वा च कर्मसंज्ञक इति वाच्यम् ॥ कौ । सू । का । दुहियाच्
रुधिप्रच्छिभिक्षिचिञामुपयोगनिमित्तमपूर्वविधौ । ब्रुविशासिगुणेन च यत्सचते तदकीर्तितमाचरितं कवि
ना १ । कथितेलादयश्चेत्स्युः षष्ठीं कुर्यात्तदा गुणे अकारकं ह्यकथितत्वात्कारकं चेत्तु नाऽकथा ॥ कारकं चेद्विजा
नीयाद्यां यां मन्येत सा भवेत् साईकारिके यं भाष्येऽकस्य कथितेऽभिहिते त्वविधिस्त्वमतिर्गुणकर्मणि लादिविधिः
सपरे ध्रुवचेष्टितयुक्तिषु चाप्यगुणे तदनल्पमतेर्वचनं स्मरत २ प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणाम् । अप्र
धाने दुहादीनां ण्यन्ते कर्तुश्च कर्मणः ॥ ३ सूपरस्य नीवह्योर्हरतेश्चा॰ पिगत्यर्थानां तथैव च । द्विकर्मकेषु ग्रहणं २७

27

सिद्धं वाच्यमकर्मणः ३ अनकर्मेति वेदद्रुपालुनादीनामविधिर्भवेत्। कालभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणाम् ४
विपरीतन्तु यत्कर्म तत्कल्पं कवयो विदुः यस्मिंस्तु कर्मण्युपजायतेऽन्यस्तदर्थे योगापि वयत्र षष्ठी। तत्कर्मकल्पमिति
वकर्मिणो क्रोधानोर्दिहतिद्वैरत्वम्बनोऽस्ति ५ पतेनकर्मसंज्ञासर्वासिद्धाभवत्यकथितेन तत्रेप्सितस्य किं स्यात्प्रयोज
नेकर्मसंज्ञायाः ६ यत्तु कथितेगुरुस्नादीप्सितं तुक्तेवतस्य सिद्ध्यर्थम्। ईप्सितमेव तु यत्स्यात्तस्य भविष्यत्यकथितेन ७
कारिकाइमाः अथेह कथं भवितव्येनोताऽस्मस्य सूत्रमिति। अहोस्वित्त्रेता ऽस्मस्य सूत्रमिति। अहोस्वित्त्रेता ऽस्मस्य
सूत्रस्येति। उभयथा गोणिकाऽत्र इति भाष्यकृतः ५२ गतिबुद्धिप्रत्यवसानार्थशब्दकर्माऽकर्मकाणामणिकर्ता
सणौ कौ सू का एषामण्यन्ते। यः कर्त्ता सणयन्ते कर्मसंज्ञः स्यात् गत्यर्थः गच्छति ग्रामं देवदत्तः गमयति ग्रामं दे
वदत्तम् बुध्यर्थ बुध्यते धर्मं देवदत्तः बोधयति धर्मं देवदत्तम्। भक्षणार्थ। भुङ्क्ते ओदनं माणवकः भोजयत्योदनं
माणवकम्। शब्दकर्म अधीते वेदं माणवकः। अध्यापयति वेदं माणवकम्। अकर्मक। शेते कुमारः। शाययति कु
मारं गोपी एषामिति किम्। पचत्योदनं देवदत्तः पाचयत्योदनं देवदत्तेन यज्ञदत्तः अण्यन्ते इति किम्। गमयति देवदत्तं
यज्ञदत्तः तमपरः प्रेरयति गमयति देवदत्तेन यज्ञदत्तेन विष्णुमित्रः शब्दक्रियाणामिति चेत् ह्वयत्यादीनां प्रतिषेधः १
हेज्। कदि। शब्दाय पतेह्वयत्यादयः शृणोत्यादीनां चोपसंख्यानम् २ शृणोति विजानाति उपलभते पतेशृणोत्याद
यः शब्दकर्मण इति चेत् जल्पतिप्रभृतीनामुपसंख्यानम् ३ कौ। सू। का। जल्पयति देवदत्तम्। विलपयति देवदत्तं
भाषयति देवदत्तम् दृशेः सर्वत्र ४ पश्यति रूपतर्कः कार्षापणम्। दर्शयति रूपतर्कं कार्षापणम्। दृशेश्च २ कौ
सू का अदिखादिनीवहीनां प्रतिषेधः ५ आदयते देवदत्तेन खादयति देवदत्तेन नाययति देवदत्तेन वाहयति भारं दे
वदत्तेन। आदिखाद्योर्न २। कौ। सू। का। नीवह्योर्न। ३। कौ। सू। का। सर्वमेव प्रत्यवसानकार्यमदेर्न भवतीति वक्तव्यम् ८

परस्मैपदमपि इदमेकमिष्यते कौ॰ ऽपिकरणे च ध्रौव्यगतिप्रत्यवसानार्थेभ्यः इदमेषां जग्धम् इति भाष्यकृतः वहेरनियन्तृ
सू॰प॰ कर्तृकस्य ७ इह प्रतिषेधो माभूत् ॥ वाहयति बलीवर्दान् यवान् नियन्तृकर्तृकस्य वहेर्निषेधः ७। कौ॰। सू॰। का॰। भक्षे
२८ रहिंसार्थस्य ८ भक्षयति पिण्डीं देवदत्तः भक्षयति पिण्डीं देवदत्तेन अहिंसार्थस्येति किम् भक्षयन्ति यवान् बलीवर्दाः भक्ष
यति बलीवर्दान् यवान् भक्षेरहिंसार्थस्य न ५ कौ॰। सू॰। का॰। शब्दायतेर्न ६ कौ॰। सू॰। का॰। शब्दाययति देवदत्तेन अकर्मकग्र
हणे कालकर्मणामुपसंख्यानम् ९ कालकर्मकाणामकर्मकवद्भवतीति वक्तव्यम् १० तत्र हि वक्तव्यम् नवक्तव्यम् अ
कर्मकाणामित्युच्यते नच केचिदपि कालाद्यभिरकर्मकाः नपवेविताल्पामःकृविधेःकर्मकाइति इति भाष्यम्
क्वचित्। इत्थमेवकर्मणामसत्त्वकर्मकाइत्यर्थः इति कैय्यटः ५२ हृक्रोरन्यतरस्याम्। कौ॰। सू॰। का॰। हृञ् डुकृञ् इत्येत
योरण्यन्तयोःकर्ता सणौवाकर्मसंज्ञःस्यात् हरतिभारं देवदत्तः हारयतिभारं देवदत्तेनवा। करोतिकटं देवदत्तः का
रयतिकटं देवदत्तं देवदत्तेनवा अभिवादिदृशोरात्मनेपदे उपसंख्यानम् ११ अभिवदति गुरुं देवदत्तः अभिवादयते गुरुं दे
वदत्तं देवदत्तेनवा पश्यति गुरुं दर्शयते गुरुं देवदत्तं देवदत्तेनवा अभिवादिदृशोरात्मनेपदे वेति वाच्यम् १। कौ॰। सू॰। का॰। ५४
स्वतन्त्रः कर्त्ता संज्ञाप्रदेशाः ३।१।६८।२।३।६५। कौ॰। सू॰। का॰। क्रियासिद्धौ स्वातन्त्र्येण विवक्षितोयस्तत्कारकं कर्तृसंज्ञं स्यात् देवदत्तः
पचति स्थालीपचति देवदत्तेन पच्यते तण्डुलः। स्वतन्त्रस्य कर्तृसंज्ञायां हेतुमत्युपसंख्यानम् स्वतन्त्रत्वात्॥। ५५। तत्प्रयोजको
हेतुश्च। संज्ञाप्रदेशाः।३।१।२६। कौ॰। ति॰। णि॰। कर्तुः प्रेरको हेतुसंज्ञः स्यात्कर्तृसंज्ञश्च। करोति देवदत्तः। कुर्वन्तं प्रेरयति कार
यति देवदत्तं यज्ञदत्तः भाष्येत्वनेनैवाख्यानम्। इति ३१ सूत्राणि भाष्ये १।४।३। व्याख्यानानि ५६। प्राग्रीश्वरान्निपाताः। संज्ञा
प्रदेशाः।१।१।३०। कौ॰। सू॰। से॰। अधिरीश्वरे इति वक्ष्यति ततः प्राक् प्रादयः निपाताः अत्यधिकारो वेदितव्यः। चा॰। वा॰। ह॰। प्राग्रहणं निपाता
दिसंज्ञासमावेशार्थम्। रेफोच्चारणमीश्वरेतोसन् समन्नादित्यवधिमो विज्ञायीति। ५७। चादयोऽसत्त्वे। कौ॰। सू॰। से॰। अद्रव्या २८

र्थाश्चादयोनिपातसंज्ञाःस्युः। च। वा। ह। निपातत्वादव्ययत्वम्। अव्ययत्वाद्विभक्तिलुक्। असत्वेकिम्। पशुः पुरुषः। चा। वा। ह। अह। एव
एवम्। नूनम्। शश्वत्। युगपत्। भूयस्। सूपत्। कूपत्। कुवित्। नेत्। चेत्। चण्। कच्चित्। यत्र। तत्र। नह। हन्त। माकिम्। माकीम्।
माकिर्। नकिम्। नकीम्। आकीम्। माङ्। नञ्। तावत्। यावत्। त्वा। त्वै। द्वै। रै। श्रौषट्। वौषट्। वैषट्। स्वाहा। स्वधा। ओम्।
तथाहि। खलु। किल। अथ। सुष्ठु। स्म। अ। इ। उ। ऋ। ऌ। ए। ऐ। ओ। औ। दह। उञ्। उकञ्। वेलायाम्। मात्रायाम्। यथा। यत्।
तत्। किम्। पुरा। वधा। धिक्। हाहा। हहे। पाट्। प्याट्। आहो। उताहो। हो। अहो। नो। अथो। ननु। मन्ये। मिथ्या। असि। ब्रूहि। तु
नु। इति। इव। वत्। वात्। वन। वत। सम्। वशम्। शीकम्। दिकम्। सनुकम्। छंवट्। शङ्के। शुकम्। खे। सनात्। सनुतर्। न
हिकम्। सत्यम्। ऋतम्। इद्धा। अद्धा। नोचेत्। नचेत्। नहि। जातु। कथम्। कुतः। कुत्र। अव। अनु। हा। हे। है। आहोस्वित्। शम्
कम्। खम्। दिष्ट्या। पशु। वट्। सह। अनुषट्। अनुषक्। अङ्ग। फट्। ताजक्। अये। अरे। चाटु। कुम्। खुम्। घुम्। अम्। ईम्। सी
म्। सिम्। सि। वै। उपसर्गविभक्तिस्वरप्रतिरूपकाश्चनिपाताः। आकृतिगणोऽयम्। उपसर्गप्रतिरूपकः। अवदत्तम्। विभक्तिप्रतिरू
पकः। अस्तिक्षीरा। स्वरप्रतिरूपकाः। अ। ई। उ। महच्छब्दस्योपसंख्यानम्॥ अच्छब्दस्येवोपसंख्यानम्। २। इदंवातिकद्वयमनुपस
र्गः क्रियायोगेइत्येतत्सूत्रविषयकंभाष्यकृतात्वेवोक्तम् ५८ प्रादयः। कौ। सू। सं। असत्त्वार्थकाः प्रादयोनिपातसंज्ञाः स्युः।
प्र। परा। असत्त्वेइत्येव। पराः सेनाः। प्र। परा। अप। सम्। अनु। अव। निस्। निर्। दुस्। दुर्। वि। आङ्। नि। अधि। अपि। अति। सु। उद्।
अभि। प्रति। परि। उप। एतेप्रादयः भाष्यतत्रेदंव्याख्यातम् ५९ उपसर्गाः क्रियायोगे। संज्ञाप्रदेशाः। ३। ३। ५२। ८। ३। ६५। कौ।
सू। सं। प्रादयः क्रियायोगेउपसर्गेउपसर्गसंज्ञाःस्युः प्रणयति परिणयति क्रियायोगेकिम्। प्रगतोनायकोऽस्माद्देशात्प्र
नायकः। भाष्यतत्रेदंव्याख्यातम् ६० गतिश्च संज्ञाप्रदेशाः। २। २। १८। कौ। सू। सं। प्रादयः प्राद्विपाताः सन्तउपसंज्ञका
गतिसंज्ञकाश्चस्युः। प्रकृत्य। प्रकृतम्। योगविभागउत्तरार्थः। उत्तरत्रगतिसंज्ञैवयथास्यात्। उपसर्गसंज्ञामाभूत्। चका

सू.प.
२६

ऽस्त्युपसर्गसंज्ञासमावेशार्थः । प्रतिप्रणेतम् । कारिकाशब्दस्योपसंख्यानम् १ । कौ । सू । सा । त । कारिकाकृत्य । पुनश्चनसौश्च
न्दसि २ । कौ । वे । अ । प्र । पुनरुत्स्युतं वासो देयम् । गतिर्गताविति निपात इत्यस्यनो हितः गतिरनन्तर इति स्वरः गत्युपसर्गसं
ज्ञाः क्रियायोगे यत् । क्रियाग्रहणं स्तप्रतीति वचनम् ३ सुदुरोः प्रतिषेधो नुम्विधितत्वषत्वणत्वेषु ४ दुरः षत्वणत्वयोरुपस
र्गत्वप्रतिषेधो वक्तव्यः । १ । कौ । ति । म्वा । डुः स्थितिः दुर्नयः । ६१ । ऊर्यादिच्विडाचश्च । कौ । सू । सा । त । ऊर्यादयः शब्दाश्च्विप्रत्यया
न्ताडाच्प्रत्ययान्ताश्च क्रियायोगे गतिसंज्ञाः स्युः । ऊरीकृत्य । शुक्लीकृत्य । डाच् । पटपटाकृत्य । ऊरी । उररी । तन्थी । ताली
आताली । वेताली । धूली । धूसी । शकला । संशकला । ध्वंसकला । भ्रंसकला । गुलगुधा । सजूः । फल । फली । विक्ली । आ
लोष्टी । केवासी । पर्याली । शेवाली । वर्षाली । अत्युमशा वश्मसा मस्मसा । मसमसा श्रौषट् । वौषट् । वषट् । स्वाहा । व
न्धा । प्रादुस् । श्रत् । आविस् । एते ऊर्यादयः कृभ्वस्तियोगे इति वक्तव्यम् १ । ६२ अनुकरणं चानितिपरम् । कौ । सू । सा ।
त । इतिशब्दपरकं यन्न भवति तदनुकरणं गतिसंज्ञं स्यात् खाट्कृत्य । अनितिपरं किम् । खाडिति कृत्वा निरष्ठीवत् ६३ आदरा
नादरयोः सदसती कौ । सू । सा । त । सत् । असत् । इत्येतौ गतिसंज्ञौ स्तः क्रमेण आदरानादरयोरर्थयोः सत्कृत्य असत्कृ
त्य आदरेत्यादि किम् । सत्कृत्वा काण्डं गतः ६४ भूषणेऽलम् । कौ । सू । सा । त । भूषणेऽर्थे ऽलंशब्दः सगतिसंज्ञः स्यात् अ
लंकृत्य भूषणे किम् अलंकृत्वौदनं गतः भाष्ये तु नेदं व्याख्यातम् ६५ अन्तरपरिग्रहे किम् । अन्तर्हत्वा गतः हतं परिगृह्य
गत इत्यर्थः अन्तःशब्दस्याङ्किविधिसमासणत्वेषूपसंख्यानम् । १ । अन्तःशब्दस्याङ्किविधिणत्वेषूपसर्गत्वं वाच्यम् । १
कौ । ति । म्वा । अन्तर्द्धा । अन्तर्हो । किविधि । अन्तर्द्धिः णत्व अन्तर्णयति ६६ कणेमनसी श्रद्धाप्रतीघाते कौ । सू । सा । त । कणे
मनस् । इत्येतौ गतिसंज्ञौ स्तः श्रद्धाप्रतीघाते । यथा । कणेहत्य मनोहत्य पयः पिबति कणेशब्दः सप्तमीप्रतिरूपको नि
पातोऽभिलाषातिशये वर्त्तते । मनःशब्दोऽप्यत्रैव श्रद्धाप्रतीघाते किम् कणे हत्वा गतः इत्यादि सूत्राष्टकं भाष्ये न व्याख्या २६

नम् ६७ पुरोऽव्ययम् कौ। सू। सा। त। पुरस्। इत्येतदव्ययं गतिसंज्ञं स्यात् पुरस्कृत्य अव्ययं किम्। पुरः कृत्वा काष्ठं गतः ६८ अस्तं
च कौ। सू। सा। त। अस्तम् इत्येतन्मान्तमव्ययं गतिसंज्ञं स्यात् अस्तंगत्य ६९ अच्छगत्यर्थवदेषु। कौ। सू। सा। त। अच्छगत्यर्थवदेषु
कौ इत्येतदव्ययं गतिसंज्ञं स्यात् गत्यर्थधातुयोगे वदधातुयोगे सति अच्छगत्य। अभिमुखं गत्वेत्यर्थः अच्छोद्य अभिमुखमुक्त्वे
त्यर्थः अव्ययं किम् जलमच्छं गच्छति ७० अदोऽनुपदेशे कौ। सू। सा। त। अदस्। इत्येतत् गतिसंज्ञं स्यात् परं प्रति अनुपदे
शे अदः कृत्य अनुपदेशे किम् अदः कृत्वा काष्ठं गतः। अनुपदेशे किम्। अदः कृत्वा काष्ठं गतः परं प्रत्युपदेशोऽयम् ७१। तिरो
ऽन्तर्धौ कौ। सू। सा। त। तिरस् इत्यव्ययं शब्दोऽन्तर्धाने गतिसंज्ञः स्यात् तिरोभूय अन्तर्धौ किम्। तिरोभूत्वा तिष्ठति ७२ विभा
षा कृञि कौ। सू। सा। त। प्राप्तविभाषेयम्। तिरस् इत्येतत् कृञ्योगे वा गतिसंज्ञं स्यात् तिरस्कृत्य तिरःकृत्य तिरस्कृत्वा ति
रःकृत्वा अन्तर्धौ विनैव। नेह। तिरः कृत्वा काष्ठं तिष्ठति ७३ उपाजेऽन्वाजे। तिरःकृत्य। तिरस्कृत्वा तिरःकृत्वा अन्तर्धौ विनैव
नेह तिरः कृत्वा काष्ठं तिष्ठति न्वाजे कौ सू स त एतौ कृञ्योगे वा गतिसंज्ञौ स्तः उपाजेकृत्य उपाजेकृत्वा अन्वाजेकृ
त्य अन्वाजेकृत्वा दुर्बलस्य बलमाधायेत्यर्थः ७४ साक्षात्प्रभृतीनि च कौ। सू। सा। त। साक्षात्। इत्येवमादीनि शब्दस्वरू
पाणि कृञ्योगे वा गतिसंज्ञानि स्युः साक्षात्कृत्य साक्षात्कृत्वा लवणीकृत्य लवणीकृत्वा मान्तत्वं निपातनात् साक्षा
त्। मिथ्या। चिन्ता। भद्रा। रोचने आस्था। अमा अद्धा प्राजर्या प्राजरुहा वीजर्या वीजरुहा संसर्या अर्थे लवणम्
उष्णम् शीतम् उदकम् आर्द्रम् अग्नौ वशे विकसने प्रसहने प्रतपने प्रादुस् नमस् आकृतिगणोऽयम् साक्षात्प्र
भृतिषु च्व्यर्थवचनम् १। च्व्यर्थे इति वक्तव्यम् १ कौ सू स त मकारान्तत्वं गतिसंज्ञासंनियुक्तम् २ तत्र अनन्तप्रतिषेधः
३। ७५ अनत्याधान उरसिमनसी कौ। सू। सा। त। उरस्। मनस्। इत्येतौ कृञ्योगे वा गतिसंज्ञौ स्तः अनत्याधानमुपश्लेषस्त
त्र उरसिकृत्य उरसिकृत्वा स्वीकृत्येत्यर्थः मनसिकृत्य मनसिकृत्वा निश्चित्येत्यर्थः इत्यादिसूत्रपञ्चकं माध्यन्तेन व्या

सू। प।
३०

ख्यानम् ७६ मध्येपदेनिवचनेच कौ स स त एते शब्दा अनत्याधाने ऽर्थे कृञ्योगे वा गतिसंज्ञाः स्युः मध्येकृत्य मध्ये
कृत्वा पदेकृत्य पदेकृत्वा निवचनेकृत्य वाचंनियम्येत्यर्थः अनत्याधाने किम् हस्तिनः पदेकृत्वा शिरः शेते ७७
नित्यं हस्ते पाणावुपयमने कौ स। स। त। हस्ते। पाणौ इत्येतौ कृञ्योगे नित्यं गतिसंज्ञौ भवतो विवाहे हस्तेकृत्य पा
णौकृत्य दारकर्म्मकृत्वेत्यर्थः उपयमने किम् हस्ते कृत्वा कार्षापणं गतः ७८ प्राध्वं बन्धने कौ स स त प्राध्वम्
इत्येतदव्ययं बन्धनहेतुके आनुकूल्ये वर्त्तमाने कृञ्योगे नित्यं गतिसंज्ञं स्यात्। प्राध्वंकृत्य। बन्धनेनानुकूल्यं कृत्वा गत
७९ जीविकोपनिषदावौपम्ये कौ। स। स। त। जीविका उपनिषत् इत्येतौ सादृश्ये वर्त्तमानौ कृञ्योगे नित्यं गति
संज्ञौ भवतः जीविकामिव कृत्वा जीविकाकृत्य उपनिषत्कृत्य औपम्ये किम् जीविकां कृत्वा ८० ते प्राग्धातोः कौ
ति भ्वा गत्युपसर्गसंज्ञका धातोः प्रागेव प्रयोक्तव्याः प्रभवति प्राग्धातुवचनं प्रयोगनियमार्थमिति चेदनुकरणस्येति षे
धो ऽनिष्टशब्दनिवृत्त्यर्थः १ छन्दसि परव्यवहितवचनंच २ उभयोरनर्थकं वचनमनिष्टाऽदर्शनात् ३ उपसर्जनसंनिपाते
तु पूर्वपरत्ववचनमस्पार्थम् ४ ८१ छन्दसि परेऽपि कौ वै स स गत्युपसर्गसंज्ञका वेदे परे प्रयोक्तव्याः अपि शाद्धान्त्वेऽपि
हन्ति निमुष्टिना निहन्ति मुष्टिना इत्यादि सूत्रद्वयं भाष्ये तत्पृथग् व्याख्यातम् ८२ व्यवहिताश्च कौ वै स स गत्यु
पसर्गसंज्ञका वेदे व्यवहिता अपि प्रयुज्यन्ते आमन्द्रैरिन्द्र हरिभिर्याहि आयाहीत्यन्वयः ८३ कर्म्मप्रवचनीयाः सं
ज्ञाप्रदेशः। २।३।८। कौ। स। का। गत्युपसर्गसंज्ञाऽपवादः संज्ञाधिकारोयम् लः परस्मैपदमित्यतः प्राक् इतऊर्ध्वं
यानतुक्रमिष्यामस्ते कर्म्मप्रवचनीयसंज्ञका वेदितव्याः अनुहरिम् ८४ अनुर्लक्षणे। कौ। स। का। अनु इत्येष
कर्म्मप्रवचनीयसंज्ञः स्यात् लक्षणे द्योत्ये शाकल्यस्य संहितामनुप्रावर्षत् हेतुभूत संहिता ज्ञानोपलक्षितं वर्ष
णमित्यर्थः लक्षणे इत्यनूद्यमाने मादिनाऽनोः कर्म्मप्रवचनीयत्वे सिद्धे पुनः संज्ञाविधानसामर्थ्यात्परामपि हेतुतृती

३।

योवाधिनाद्वितीयैवभवति वेरपिकर्म्मप्रवचनीयसंज्ञावक्तव्या १८५। तृतीयार्थे कौ स्त्र का साहित्येद्योत्येऽनुशब्दउक्तसंज्ञः स्या
त् पर्वतमन्ववसिता सेना पर्वतेन सह संबद्धेत्यर्थः इत्यादिसूत्रवृत्तिरूपं भाष्येतन्नयाख्यातम् ८६ हीने कौ स्त्र का अपकृष्टे द्यो
त्येऽनुशब्दउक्तसंज्ञः स्यात् अनुहरिं सुराः हरेर्हीना इत्यर्थः ८७ उपोऽधिके च कौ स्त्र का उपशब्दस्तथैव शब्दोऽधिके हीने च द्योत्ये
कर्म्मप्रवचनीयसंज्ञः स्यात् उपनिष्के कार्षापणम् उपशाकटायनं वैयाकरणाः ८८ अपपरी वर्जने कौ स्त्र का अप प
रि इत्येतौ वर्जने द्योत्ये कर्म्मप्रवचनीयसंज्ञौ भवतः अपत्रिगर्तेभ्यो वृष्टो देवः परित्रिगर्तेभ्यो वृष्टो देवः वर्जने किम् परिषिञ्च
ति कर्म्मप्रवचनीयसंज्ञया उपसर्गसंज्ञा वाध्येत उपसर्गसंज्ञावाधे उपसर्गात्सुनोतीति षत्वं न स्यात् ८९ आङ्मर्य्यादावचने कौ
स्त्र का आङितिषष्ठशब्दोऽवधौ कर्म्मप्रवचनीयसंज्ञः स्यात् वचनग्रहणादभिविधिरपि गृह्यते आपाटलिपुत्राद्वृष्टो देवः
आमथुरायाः मर्य्यादावचने किम् ईषदर्थे ओमाम्लम् आङ्मर्य्यादाऽभिविध्योरितिवक्तव्यम् १९० लक्षणेत्थंभूता
ख्यानभागवीप्सासु प्रतिपर्य्यनवः कौ स्त्र का लक्षणादिष्वर्थेषु विषयभूतेषु प्रति परि अनु इत्येते कर्म्मप्रवचनीयसंज्ञा
स्युः लक्षणे वृक्षं प्रति विद्योतते विद्युत् वृक्षं परि वृक्षमनु इत्थंभूताख्याने साधुर्देवदत्तो मातरं प्रति मातरं परि मातरमनु
भागे यदत्र मां प्रति स्यात् मां परि स्यात् मामनु स्यात् अनुपसर्गत्वात्षत्वं न वीप्सायाम् वृक्षं वृक्षं प्रति सिञ्चति अप्रसि
ञ्चति लक्षणादिषु किम् ओदनं परिषिञ्चति अत्र परिशब्दयोगे पञ्चम्यपाङ्परिभिरिति पञ्चमी तन्न भवति अपशब्दस्या
हचर्य्येण वर्ज्जनार्थस्यैव परिशब्दस्य तत्र ग्रहणात् ९१ अभिरभागे कौ स्त्र का भागवर्जितेषु लक्षणादिषु अभिशब्दः कर्म्म
प्रवचनीयसंज्ञः स्यात् लक्षणे वृक्षमभिद्योतते इत्थंभूताख्याने साधुर्देवदत्तो मातरमभि वीप्सायां वृक्षं वृक्षमभिसिञ्च
ति अभागे किम् यदत्र ममाऽभिष्यात्तद्दीयताम् मम भागः स्यादित्यर्थः भाष्ये तु नेदं व्याख्यातम् ९२ प्रतिः प्रतिनिधिप्रति
दानयोः कौ स्त्र का मुख्यसदृशः प्रतिनिधिः दत्तस्य निर्यातनं प्रतिदानम् एतयोर्विषये प्रतिशब्दः कर्म्मप्रवचनीयसंज्ञः

सू.प.
३१

स्यात् प्रद्युम्नः कृष्णात्प्रति तिलेभ्यः प्रतियच्छति माषान् भाष्येऽत्र नेदं व्याख्यातम् ९२ अधिपरी अनर्थकौ कौ। सू।
का अधि परि इत्येतौ विशेषार्थस्याद्योतकौ कर्मप्रवचनीयसंज्ञौ भवतः कुतोऽध्यागच्छति कुतः पर्यागच्छति ग
तिसंज्ञाया बाधाद्गतिर्गताविति निघातो न ९३ सुः पूजायाम् कौ। सू। का। सु इत्येषः कर्मप्रवचनीयसंज्ञः स्यात् पूजाया
मर्थे सुसिक्तम् सुस्तुतम् अनुपसर्गत्वान्न षत्वम् पूजायां किम् सुषिक्तं किन्तवात्र भाष्येऽत्र नेदं व्याख्यातम् ९४
अतिरतिक्रमणे च कौ। सू। का। अतिशब्दोऽतिक्रमणे पूजायां च कर्मप्रवचनीयसंज्ञः स्यात् निष्पन्नेऽपि वस्तुनि क्रि
याप्रवृत्तिरतिक्रमणम् अतिक्रमेव भवता पूजायाम् अतिस्तुतम् भाष्येऽत्र नेदं व्याख्यातम् ९५ अपिः पदार्थसंभा
वनाऽन्ववसर्गगर्हासमुच्चयेषु कौ सू का अपिशब्दः कर्मप्रवचनीयसंज्ञः स्यात् एष्वर्थेषु द्योत्येषु अप्रयुज्यमान
पदान्तरस्यार्थः पदार्थः सर्पिषोऽपि स्यात्। सर्पिषो बिन्दुरपि स्यादित्यर्थः अत्र बिन्दुरूपकर्तृद्योतकोऽपिशब्दः
शक्त्युत्कर्षप्रकाशनायात्युक्तिः संभवनम् अपिस्तुयाद्राजानम् कामचारोऽनुज्ञा अन्ववसर्गः अपिस्तुहि निन्दा गर्हा
अपिसिञ्चेत्पलाण्डुं धिग्देवदत्तम् समुच्चये अपिस्तुहि अपिसिञ्च स्तुतिसिञ्चनेऽवकुरु इत्यर्थः उपसर्गसंज्ञाबाधात्ष
त्वेन ९६ अधिरीश्वरे कौ सू का अधिशब्दः कर्मप्रवचनीयसंज्ञः स्यात् स्वस्वामिसम्बन्धे द्योत्ये कर्मप्रवचनीयविभ
क्तिः सप्तमी कदाचित्स्वामिनो भवति कदाचित्स्वात् अधिब्रह्मदत्ते पञ्चालाः अधिपञ्चालेषु ब्रह्मदत्तः यस्य चेश्वरवच
नमिति कर्तृनिर्देशाद्वचनात्सिद्धम् १ अधिः संप्रति कर्मप्रवचनीयसंज्ञो भवतीति वक्तव्यम् २ ९७ विभाषा कृञि
कौ सू का डुकृञ् इत्येतस्य योगेऽधिशब्दः कर्मप्रवचनीयसंज्ञो वा स्यात् यदत्र मामधिकरिष्यति गतिसंज्ञाबाधात्
तिङ्ङि चोदात्तवतीति निघातो न भवति भाष्येऽत्र नेदं व्याख्यातम् ९८ लः परस्मैपदम् संज्ञाप्रदेशः ।१।३।७८। कौ ति स्या
ल्लकारस्यादेशास्ते परस्मैपदसंज्ञाः स्युः तिप् तस् झि सिप् थस् थ मिप् वस् मस् इत्येते कृत्यसंयेषु ३१

शत् क्वसू इत्येतौच भवति पचन् जग्मिवान् लादेशोपरस्मैपदग्रहणेपुरुषसंज्ञावाधितत्वात् १ सिविहितौतउपरस्मैपद
ग्रहणंज्ञापकंपुरुषसंज्ञाः वाधकत्वस्य इतिभाष्यम् ९ तङानावात्मनेपदम् संज्ञाप्रदेशः १।४।१००। कौ। ति। भ्वा। एवंसं
ज्ञाऽपवादः तङ्प्रत्याहारः शानच्कानचौचआत्मनेपदसंज्ञाः स्युः। त। आताम्। झ। थास्। आथाम्। ध्वम्। इट्। वहि। महिङ्।
इत्येते। कृत्यत्यपञ्च। शानच्। कानच् इत्येतौच पचते कर्तीहनिव्रानाः भाष्येतनेदेवाख्यातम् ११ तिङः स्त्रीणि त्रीणि प्रथ
ममध्यमोत्तमाः संज्ञाप्रदेशः ।।१।४।१०१।।१।४।१०५।।१।४।१०७। कौ। ति। भ्वा। तिङ् सम्बन्धिनः परस्मैपदेषुआत्मनेपदेषुच
त्रयस्त्रिकाः क्रमात्प्रथममध्यमोत्तमसंज्ञाः स्युः। तिप्। तस्। झि। इतिप्रथमः। सिप्। थस्। थ। इतिमध्यमः। मिप्। वस्। म
स्। इत्युत्तमः। एवमात्मनेपदेष्वपि प्रथममध्यमोत्तमसंज्ञायामात्मनेपदग्रहणंसमसंख्यार्थम् १। आनुपूर्व्यवचने
च २ तत्रकर्तव्यम् संज्ञाप्रपिषडेवनिर्दिश्यन्ते कथम् एकशेषनिर्देशोऽयम् इतिभाष्यम् १२ तान्येकवचनद्विवच
नबहुवचनान्येकशः संज्ञाप्रदेशः २।२।६१।।१।२।६२।।१।२।१।५८। कौ।। ति। भ्वा लप्रथमादिसंज्ञानितिङः त्रीणित्रीणि
प्रत्येकंक्रमेणैकवचनद्विवचनबहुवचनसंज्ञानिस्युः तिप्। इत्येकवचनम् तस्। इतिद्विवचनम् झि। इतिबहुवचनम्
इत्येवमग्रेऽपि। भाष्येतनेदेवाख्यातम् १३ सुपः। कौ। स्वा। अ्रा। पु। सुपस्त्रीणित्रीणिवचनानिप्रत्येकमेकवचनद्विवचनब
हुवचनसंज्ञानिस्युः।। सु। इत्येकवचनम् औ इतिद्विवचनम् जस् इतिबहुवचनम् एवमग्रेऽपि भाष्येतनेदेवाख्या
तम् १४ विभक्तिश्च संज्ञाप्रदेशः ७।१।७३।७।२।८४। कौ। स्वा। अ्रा। पु। सुप्तिङौविभक्तिसंज्ञौभवतः युष्माभिः पच
न्तः १५ युष्मद्युपपदे समानाधिकरणे स्थानिन्यपिमध्यमः। कौ। ति। भ्वा समानाविहिततिबादीनांपुरुषनियमोऽयम्
लकारवाच्यकारकवाचिनियुष्मदिप्रयुज्यमानेऽप्रयुज्यमानेचमध्यमः पुरुषः स्यात् त्वंपचसि युवांपचथः यूयंपचथ अ
प्रयुज्यमानेऽपि पचसि पचथः पचथ अत्रलकारवाच्यः कर्तातद्वाचीयुष्मच्छब्दः १६ प्रहासेचमन्योपपदेमन्यतेरुत्त

सू॰प॰ ३२

32

मध्यकवच्च कौ। ति। भ्वा। पूर्वोत्तरसूत्रयोरपवादः परिहासे गम्यमाने लकारवाच्यकारकवाचिनि युष्मदि सति मन्यधातुरु-
पपदे यस्मात्तस्माद्धातोर्मध्यमः स्यात् तथा मन्यतेर्युष्मदि सति मन्यतेश्चोत्तमः स्यात्स चैकार्थस्य बोधकः। मध्यमोत्तमयो-
र्व्यत्यासेन प्रयोगार्थमिदं सूत्रम्। एहि मन्ये ओदनं भोक्ष्यसे भुक्तः सोऽतिथिभिः। इति त्वं मन्यसे अहमोदनं भोक्ष्ये इत्यर्थः
सत्यप्योदने परिहासाय शालकादेर्वाक्यमेतत्। एतं मन्ये ओदनं भोक्ष्येथे इति युवां मन्येथे आवामोदनं भोक्ष्यावहे इत्यर्थे ः
एत मन्ये ओदनं भोक्ष्यध्वे इति यूयं मन्यध्वे वयमोदनं भोक्ष्यामहे इत्यर्थः। उदाहरणेषु पुरुषव्यत्ययेन परिहासो व्यज्यते प्रहासे
किम्। यथार्थकथने मा भूत्। एहि मन्यसे ओदनं भोक्ष्ये भुक्तः सोऽतिथिभिः। मन्येतिरूपनानिर्देशादिह न। एहि मनुषे
रथेन यास्यामि युष्मद्युपपदे इत्याद्युक्तं तेनेह। एत भवान्मन्यते ओदनं भोक्ष्ये। भाष्ये तु नेदं व्याख्यातम् १०७ अस्मद्युत्तमः
कौ। ति। भ्वा। मध्यमपुरुषनियमोऽयम्। लकारवाच्यकारकवाचिन्यस्मद्युपपदे प्रयुज्यमानेऽप्रयुज्यमाने च उत्तमः
स्यात्। अहं पचामि आवां पचावः वयं पचामः। अप्रयुज्यमानेऽपि पचामि पचावः पचामः। युष्मदि मध्यमादस्मद्युत्तमो
विप्रतिषेधेन १।१।१०८ शेषे प्रथमः कौ। ति। भ्वा। मध्यमोत्तमयोरविषयः शेषस्तत्र प्रथमः स्यात्। स पचति तौ पचतः
ते पचन्ति। पचति पचतः पचन्ति। तत्र युष्मदस्मदन्येषु प्रथमप्रतिषेधः शेषत्वात्। अथेह कथं भवितव्यम्। अतेऽतेसे
पयते तद्भवतीति आहोस्वित्तद्भवसि मद्भवामीति तद्भवति मद्भवतीत्येव भवितव्यम्। मध्यमोत्तमौ कस्मान्न भवतः गौण-
त्वयोर्मुख्येकार्य्ये संप्रत्ययो भवति इति भाष्यम् १०९ परः सन्निकर्षः संहिता संज्ञाप्रदेशः ६।३।११४। कौ। सू। से। वर्णा-
नामतिशयितः सन्निधिः संहितासंज्ञः स्यात्। दध्यत्र। परः सन्निकर्षः संहिता चेद्द्रुतायामसंहितम्। १। तुल्यः सन्निकर्षो
वर्णानां द्रुतमध्यमविलम्बितासु वृत्तिषु। किंकृतस्तर्हि विशेषः वर्णकालभूयस्त्वम् इति भाष्यम् ११ विरामोऽवसानम्
संज्ञाप्रदेशः। ८।३।१५।८।४।५६। कौ। सू। से। वर्णानामभावोऽवसानसंज्ञः स्यात्। रामः। अभावेऽवसानसंज्ञित्वपर्य्येभाव ३२

ग्रहणं कर्तव्यम् ॥ उपरि यो विराम इति वक्तव्यम् २ विरामपरो वर्णोऽवसानसंज्ञो भवतीति वक्तव्यम् ३ वर्णान्तो वाऽवसा
नम् ४ इति ५५ सूत्राणि भाष्ये ॥१।४।४। गतार्थानि इति सूत्रपाठे प्रथमाध्यायस्य चतुर्थः पादः ॥ अथ ॥ समर्थः पद
विधिः परिभाषाप्रदेशः २।१।४।२॥२४। कौ। स। सा। अ पदसम्बन्धी यो विधिः स समर्थपदाश्रितो वेदितव्यः विशेष्यवि
शेषणभावावगाह्युपस्थितिजनकतत्त्वर्थकार्थीभावः सामर्थ्योऽहस्ते न तत्परस्पराकाङ्क्षारूपाव्यपेक्षा कष्टाश्रितः
शाङ्कुलावणः समर्थग्रहणं किम् पश्य देवदत्त कष्टं श्रितो विष्णुमित्रो गुरुकुलम् पदग्रहणं किम् तिष्ठतु दध्यशान त्वं
शाकेन अत्र वर्णविधौ परिभाषोपस्थितौ यणादेशो न स्यात् सविशेषणानां हि वृत्तिर्न वृत्तस्य वा विशेषणं न प्रयुज्यत इति वक्त
व्यम् १ अगुरुकुलपुत्रादीनामिति वक्तव्यम् २ अवश्यकस्य वित्रज्ञ समासस्यासमर्थसमासगमकस्य साधुत्वं वक्तव्यम् ३
तत्र व्यपेक्षायां सामर्थ्येन नानाकारकान्निघातयुष्मदस्मदादेशप्रतिषेधः ४। प्रव्यपेव समासप्रतिषेधः ५। आख्यातेसाव
यकारकविशेषणे वाक्यम् ६ सक्रियाविशेषणे चेति वक्तव्यम् ७ आख्यातं सविशेषणमित्येव १ ३ तत्परे एकतिङ् वाक्यं
भवतीति वक्तव्यम् ८ एकशब्दः समवायी। ब्रूहि ब्रूहि देवदत्त समानवाक्ये निघातयुष्मदस्मदादेशाः ९ समानाधिकरणे
ष्वपसंख्यानसमर्थत्वात् १० समानाधिकरणमसमर्थवद्भवति ११ प्रधानमभिहितमिति शेषः सर्पिः कालकम् यजुःपा
तकम् प्रधानमभिहितमिति किम् सर्पिर्धीयते यजुः क्रियते इमयोः सामर्थ्ये इति षत्वं भवत्येव समाख्यातेषु च १२
समासे द्वयोर्द्वयोर्द्वन्द्वेऽनेकग्रहणम् १३ समासान्तप्रतिषेधश्च १४ निमित्तस्वराङ्गमिति स्वरो बलीयानिति वक्त
व्यम् १५ सापेक्षमसमर्थं भवति १ न्यायोऽयम् भवति च प्रधानस्यापि सापेक्षस्य समासः २ इति १ सूत्रं भाष्ये २।१।१।
याख्यातम् २। सुबामन्त्रिते पराङ्गवत्स्वरे अतिदेशोऽयम्। कौ। स। सा। सुबन्तमामन्त्रिते परे पराङ्गवद्भवति स्वरे कर्तव्ये
मद्राणां राजन्। परशुना वृश्चन् आमन्त्रितस्य विधीयमानमाद्युदात्तत्वं समस्तस्य भवति सुबिति किम् पीड्ये पीड्या

मान आमन्त्रिते किम्। गेहे गार्ग्यः परग्रहणं किम् पूर्वस्य मा भूत् देवदत्त कुण्डेनाटन् अङ्गग्रहणमुभयोराद्युदात्तत्ववा
सु·प· रणाय वक्करणं किम् स्वाश्रयमपि यथा स्यात् आम् कुण्डेनाटन् आमः एकान्तरमामन्त्रितमनान्तिके इत्येकान्तर
३३ 33 ता भवति स्वरे किम् कूपे सिञ्चन्। वर्म्मन मन्। षत्वणत्वे प्रति पराङ्गवत्त्वं भवति षष्ठ्यामन्त्रितकारकवचनम् १ कौ। स्व
सा। तन्निमित्तग्रहणं वा २। आमन्त्रितनिमित्तकं सुबन्तं पराङ्गवद्भवतीत्यर्थः गोषु स्वामिन्। गोषु स्वामिन्। नेह। देवे
णाग्रे स्वापुः सेर भक्ष। सुबन्तस्य पराङ्गवद्भावे समानाधिकरणस्योपसंख्यानमनन्तरत्वात् ३ तीक्ष्णायाम् आसीच्छिन्
तीक्ष्णोन परश्वनाहश्चन् परमपिच्छन्दसि ४ आते पितम्मेहन्तोसन्नमेत पूर्वाङ्गवच्चेति वक्तव्यम् २ कौ। स्व। सा। अव्य
यप्रतिषेधश्च ५ उच्चैरधीयान अव्ययानां ३ कौ। सा। सा। अनव्ययीभावस्य ६ उपाग्न्यधीयान अव्ययीभावस्यात्विष्य
ते ४ कौ। स्व। सा। ३। प्राक्कडारात्समासः संज्ञाप्रदेशाः।१।१।३।१।८।१।१।८।२२३। कौ। सा। स। अधिकारोऽयम्। कडाराः कर्म
धारये इति सूत्रात्प्राग्यानन्वक्रमिष्यामस्ते समासस्संज्ञका वेदितव्याः अधिहरि। राजपुरुषः। स च समासो द्विधा नित्यो १
नित्यश्च। अविग्रहो नित्यसमासः। समस्यमानपदाद्विकृतविग्रहो वा इत्यर्थे वोपकं वाक्यं विग्रहः। स तयः पञ्च। कृत
द्धित। समास। एकशेष। सनाद्यन्तधातु। इत्येतद्रूपाः विग्रहस्तद्द्विधा। प्रयोगार्हः साधुर्लौकिकः हरौ इति। राज्ञः
पुरुष इति प्रयोगाऽनर्होऽसाधुरलौकिकः हरौ इति राज्ञः पुरुष इति। प्रयोगाऽनर्होऽसाधुरलौकिकः। हरि ङि अधि
राजन् ङस् पुरुष सु इति प्राग्वचने समाससंज्ञाऽनिहत्यर्थम् ११४। सह सुपा। कौ। सा। स। अ। इत ऊर्ध्वं सहे तेत्तत् समर्थेत्य
तत्पदद्वयमधिकृतं वेदितव्यम् वक्ष्यति अव्ययं विभक्त्यादि अधिहरि सहेति योगविभागार्थम् तत्र सुबामन्त्रितइत्यतो
धिकृते प्रथमान्ते सह ग्रहणमनुवर्तते सुबन्तं समर्थेन सह समाससंज्ञं स्यात् पर्यभूषत् अनुव्यचलत् यत्किंचित् इड
न्तोत्तरपदकोऽयं समासश्छन्दो नात्र विषयपर्यन्तं च। योगविभागस्येष्टसाधनत्वात् ततः सुपा सुबन्तस्य वन्तेन सह समा ३३

संज्ञं स्यात् । पूर्वभूतः । भूतपूर्वः । सुपेत्यनेनैव सर्वत्र समाससिद्धेः ऽव्ययविभक्तीत्यादिना पुनः समाससंज्ञाविधानसा
मर्थ्यादयं वैकल्पिकः । भूतपूर्वे चरड् इति निर्देशाद् भूतशब्दस्य पूर्वनिपातः । इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वञ्च १
वाससीइव । कन्येइव । इवेन समासे विभक्त्यलोपश्च १ । कौ । स । स । सू । ५ । अव्ययीभावः संज्ञाप्रदेशः २।१।५।८।२।४।१८।८२
कौ । स । स । सू । अधिकारोऽयम् । इतः ऊर्ध्वं यानन्यक्रमिष्यामस्तेऽव्ययीभावसंज्ञका वेदितव्याः वक्ष्यति अव्ययंविभक्तीत्यादि
अधिहरि ६ अव्ययं विभक्तिसमीपसमृद्धिव्यृद्ध्यर्थाभावात्ययासंप्रतिशब्दप्रादुर्भावपश्चाद्यथानुपूर्व्ययौगपद्यसादृ
श्यसंपत्तिसाकल्यान्तवचनेषु । कौ । स । स । सू । विभक्त्यर्थादिषु वर्तमानमव्ययं सुबन्तं समर्थेन सुबन्तेन सह प्राक्स
मासं संज्ञं स्यात् सोऽव्ययीभावसंज्ञं स्यात् वचनग्रहणं प्रत्येकमभिसम्बध्यते विभक्त्यर्थवचने हरौ इति अधिहरि
स्त्रियामिति अधिस्त्रि । समस्यर्थद्योतकोऽधिशब्दः । समीप । कुम्भस्य समीपम् उपकुम्भम् । उपकुम्भम् । समृद्धि
ऋद्धेराधिक्यं समृद्धिः । मद्राणां समृद्धिः । सुमद्रम् । व्यृद्धि । विगताऋद्धिर्व्यृद्धिः । शाकानां व्यृद्धिः । दुःशाकम् । अर्था
भाव । मक्षिकाणामभावः । निर्मक्षिकम् । अत्ययो ध्वंसः । अतीतानि शीतानि । अतिशीतम् । हिमस्यात्ययः । निर्हि
मम् । असंप्रति । निद्रा संप्रति न युज्यते इति । अतिनिद्रम् । शब्दप्रादुर्भाव । पाणिनिशब्दस्य प्रकाशः । इतिपाणि
नि । पश्चात् । रथस्य पश्चात् । अनुरथम् । यथा । योग्यतावीप्सापदार्थानतिवृत्तिसादृश्यानि यथार्थाः । यथार्थे यदव्य
यं तत्समस्यते । रूपस्य योग्यम् । अनुरूपम् । अर्थमर्थं प्रति । प्रत्यर्थम् । शक्तिमनतिक्रम्य यथाशक्ति । हरेः सा
दृश्यम् । सहरि । वक्ष्यमाणेन सादेशः सहशब्दस्य आनुपूर्व्ये ज्येष्ठस्यानुपूर्व्येण अनुज्येष्ठम् । ज्येष्ठानुक्रमेणेत्यर्थः
यौगपद्यमेककालता । चक्रेण युगपत् । सचक्रम् । सादृश्यं तत्स्यात् यथार्थत्वेनैव सिद्धे सादृश्यग्रहणं गुणभूतेऽ
पि सादृश्ये यथा स्यादित्येतदर्थम् । सदृशः सख्या ससखि । संपत्तिः समसमानोत्तरपदस्य योगं प्रहृतिनिमित्तम्

तृणाणांसंपत्तिः सतृणम् तृणपाणांयोग्यंतृणनमित्यर्थः साकल्यमशेषता तृणमप्यपरित्यज्य सतृणमत्ति अ
स्व.प. न्त इति परिग्रहापेक्षया समाप्तिरुच्यते अग्निग्रन्थपर्यन्तमधीते साग्नि इत्यं समाप्तिः साकल्ये अध्ययनस्य भवतीति
३८ साकल्यात्पृथगुच्यते प्रायः पूर्वपदार्थप्रधानोऽव्ययीभावः ७ यथाऽसादृश्ये कौ स स अ यथा इत्येत
34 दव्ययमसादृश्ये वर्तमानं सुपा सह समाससंज्ञं भवति सोऽव्ययीभावसंज्ञः स्यात् ये ये वृद्धाः यथावृद्धम् अभिरु
पस्य योग्यम् यथाभिरूपम् अध्यायकमनतिक्रम्य यथाध्यायकम् असादृश्ये किं यथा देवदत्तस्तथा य
ज्ञदत्तः यथार्थे यदव्ययमिति पूर्वेणैव सिद्धे इदं वचनं सादृश्यप्रतिषेधार्थम् ८ यावदवधारणे कौ स स अ या
वत् इत्येतदव्ययमवधारणे वर्तमानं सुपा सह समाससंज्ञं स्यात् सोऽव्ययीभावः अवधारणमियत्तापरिच्छेदः या
वदमत्रं ब्राह्मणानामन्त्रयस्व यावन्त्यमत्राणि संभवन्ति पञ्च षड्वा तावत आमन्त्रयस्वेत्यर्थः अवधारणे किम्
यावद्दत्तं तावद्भुक्तम् भाष्ये तन्नेदं व्याख्यातम् ९ सुप्प्रतिना मात्रार्थे। कौ। स। स। अ। मात्राबिन्दुस्तोकमल्पमित्येते प
र्यायाः सुबन्ते मात्रार्थे वर्तमानेन प्रतिना सह समाससंज्ञं स्यात् सोऽव्ययीभावः किञ्चित्सूपः। सूपप्रति शाकप्र
ति। मात्रार्थे किम्। वृक्षं प्रति विद्युत् सविता ज्ञवर्तमाने पुनः सुब्ग्रहणमव्ययनिवृत्त्यर्थम् १० अक्षशलाकासं
ख्याः परिणा कौ। स। स। अ। अक्ष। शलाका संख्यावाचक इत्येते शब्दाः परिशब्देन सह समाससंज्ञाः स्युः सोऽव्य
यीभावः पञ्चिकानामद्यूतविशेषः पञ्चभिः कपर्दैर्भवति तत्र यदा सर्वे उत्तानाः पतन्ति अवाञ्चो वा तदा पातयिता
जयति। तस्यैवान्यथापाते सति पातयिताऽन्येन जीयते अक्षेणेदं न तथा वृत्तं यथा पूर्वं जये अक्षपरि शलाकाप
रि एकपरि द्विपरि अपपर्यायोगेन अक्षादयस्तृतीयान्ताः परिणा सह समस्यन्त इति वक्तव्यम् १ अक्षशलाकयो
श्चैकवचनान्तयोरिति वक्तव्यम् २ कितवव्यवहारे इति वक्तव्यम् ३ अक्षादयस्तृतीयान्ताः पूर्वोक्तस्य यथा न तत्र। ३८

किन्तर्ह्येवं व्यवहार एव प्रकृतेऽक्षशलाकयोः १ कारिकेयम् ११ विभाषा कौ । स । स । अ । अधिकृतयोः पदम् इतऊर्ध्वं यदनु
क्रमिष्यामस्तद्विभाषा भवति अपत्रिगर्त्तं वृष्टो देवः अपत्रिगर्त्तेभ्यः १२ अपपरिबहिरञ्चवः पञ्चम्या कौ स स अ अ
प परि बहिस् अञ्चु इत्येते पञ्चम्यन्तेन सह समाससंज्ञा वा स्युः सोऽव्ययीभावः अपत्रिगर्त्तं वृष्टो देवः अपत्रि
गर्त्तेभ्यः परित्रिगर्त्तम् परित्रिगर्त्तेभ्यः बहिर्ग्रामम् बहिर्ग्रामात् अपत्रिगर्त्तं वृष्टो देवः अपत्रिगर्त्तेभ्यः परित्रि
गर्त्तम् । परित्रिगर्त्तेभ्यः । बहिर्ग्रामम् । प्राग्ग्रामम् । प्राग्ग्रामात् अत एव ज्ञापकाद्बहिःशब्दयोगे पञ्चमी १३ आङ्मर्
य्यादाऽभिविध्योः कौ । स । स । अ । तेन विना मर्य्यादा तत्सहितोऽभिविधिः एतयोरर्थयोर्वर्तमान आङ् सुपञ्चम्यन्तेन सह
वा समाससंज्ञः स्यात् सोऽव्ययीभावः आपाटलिपुत्रम् आपाटलिपुत्राद्वृष्टो देवः आकुमारम् आकुमारेभ्यो यशः
पाणिनेः मर्य्यादाऽभिविध्योरिति शक्यमकर्तुम् तयोरेव कर्मप्रवचनीयसंज्ञाविधानेनाऽन्यत्रार्थे पञ्चम्या अभा
वात् १४ । लक्षणेनाभिप्रती आभिमुख्ये कौ स स अ लक्षणं चिह्नम् तद्वाचिना सुबन्तेन सह अभिप्रती इत्येतावाभि
मुख्ये द्योतके वा समाससंज्ञौ भवतः सोऽव्ययीभावः अभ्यग्नि अग्निमभि शलभाः पतन्ति लक्षणेनेति किम् स्रुघ्नं प्र
तिगतः अभिप्रती इति किम् येनाग्निस्तेन गतः आभिमुख्ये किम् अभ्यङ्का प्रत्यङ्का गावः इत्यादि सूत्रद्वयं भाष्यमतेन
व्याख्यातम् १५ अनुर्यत्समया कौ स स अ अनुशब्दो यस्य समीपवाचीतेन लक्षणभूतेन सुबन्तेन सहा
वा समाससंज्ञः स्यात् सोऽव्ययीभावः अनुवनमशनिर्गतः वनस्य समीपे गत इत्यर्थः अनुरिति किम् । वनं समया
यत्समया किम् वृक्षं प्रति विद्योतते विद्युत् अव्ययं विभक्तिसमीपेत्येव सिद्धे पुनर्वचनं विभाषार्थम् १६ यस्य चाया
मः कौ स स अ आयामो दैर्घ्यम् अनुशब्दो यस्य दैर्घ्यवाचीतेन लक्षणवाचिना सुबन्तेन सह वा समाससंज्ञः स्या
त् सोऽव्ययीभावः अनुगङ्गं वाराणसी गङ्गायाश्चानु गङ्गादैर्घ्यसदृशदैर्घ्योपलक्षितेत्यर्थः आयाम इति किम्

वृत्त मनुविधेयततेविग्रुत १७ तिष्ठद्गुप्रभृतीनि च कौ सु स अ तिष्ठद्गु इत्यादीनि यथाद्रूपाणि निपात्यन्ते तान्य
स्.प. व्ययीभावसंज्ञानि स्युः तिष्ठन्ति गावो यस्मिन् काले स तिष्ठद्गु दोहनकाल इत्यर्थः इह शत्रादेशो निपात्यते चकारोऽ
३५ वधारणार्थः तेनैषामपरः समासेन परमं तिष्ठद्गु इति तिष्ठद्गु वहद्गु आयतीगवम् खलेयवम् खलेबुसम्
35 लूनयवम् लूयमानयवम् पूतयवम् पूयमानयवम् संहृतयवम् संह्रियमाणयवम् संहृतबुसम् संह्रि
यमाणबुसम् समभूमि समपदाति सुषमम् विषमम् दुःषमम् निःषमम् अपसमम् आयतीसमम् प्रोष्ठ
पायसमम् पुण्यसमम् प्राह्णम् प्ररथम् प्रमृगम् प्रदक्षिणम् अपरदक्षिणम् सम्प्रति असम्प्रति इच्प्रत्य
यः समासान्तः एते तिष्ठद्गुप्रभृतयः तिष्ठद्गु कालविशेषे २ खलेयवादीनि प्रथमान्तान्यन्यपदार्थे २।१८ पारेमध्ये
षष्ठ्या वा कौ।सु।स।अ।षष्ठीतत्पुरुषाऽपवादोयम् पारमध्यशब्दौ षष्ठ्यन्तेन सह वा समाससंज्ञौ भवतः सोऽव्य
यीभावः पारेगङ्गायाः पारेगङ्गम् मध्येगङ्गायाः मध्येगङ्गम् महाविभाषया सिद्धे वाग्रहणात् पक्षे षष्ठीसमासोऽपि
गङ्गापारम् गङ्गामध्यम् एकारान्तनिपातनं च २।१९। संख्या वंश्येन कौ सु स अ वंशो द्विधा विद्यया जन्मना वंश्या
श्च। तत्र भवो वंश्यः तद्वाचिना सुबन्तेन सह संख्यावाचकः समाससंज्ञो भवति सोऽव्ययीभावः द्वौ मुनी वंश्यौ द्विमुनि ।
व्याकरणस्य त्रिमुनि व्याकरणस्य यदा तु विद्यया सह तद्वतामभेदविवक्षा तदा सामानाधिकरण्यं भवति द्विमुनि व्या
करणम् त्रिमुनिव्याकरणम् त्रिमुनिव्याकरणम् भाष्ये तु नेदं व्याख्यातम् २१ नदीभिश्च कौ सु स अ नदीवाचकैः सु
बन्तैः सह संख्यावाचकः समाससंज्ञो भवति सोऽव्ययीभावः सप्तगङ्गम् द्वियमुनम् पञ्चनदम् सप्तगोदावरम्
अन्यपदार्थे प्रतिषेधः १ नदीभिः संख्यायाः समाहारेऽव्ययीभावो वक्तव्यः २ नेह एकनदी तरः २१ अन्यपदार्थे च संज्ञा
याम् कौ। सु। स। अ। संज्ञेति नित्यम्। अन्यस्य पदस्यार्थे वर्तमानं सुबन्तं नदीवाचकैः सह समाससंज्ञं स्यात् सोऽ ३५

व्ययीभावः उन्मत्तगङ्गं नामदेशः लोहितगङ्गम् तूष्णींगङ्गम् शनैर्गङ्गम् विभाषाधिकारेऽपि नित्यसमास एवाऽयम्
नहि वाक्येन संज्ञा गम्यते अन्यपदार्थे किम् कृष्णवेण्णा संज्ञायां किम् शीघ्रगङ्गो देशः भाष्येतन्नेदं व्याख्यातम् २२ तत्पु
रुषः संज्ञाप्रदेशः २।४।१९।२।४।२६। कौ सु स त संज्ञाधिकारोयम् प्राग्बहुव्रीहेः इतउर्ध्वं यानन्तु क्रमिष्यामस्तत्पुरुष
संज्ञास्ते वेदितव्याः कष्टश्रितः प्रायउत्तरपदार्थप्रधानस्तत्पुरुषः भाष्येनपृथगुद्देश्यं व्याख्यातम् २३ द्विगुश्च संज्ञाप्रदेशः २।
४।१।८।२।२९। कौ।सु।स।त।द्विगु समासोऽपि तत्पुरुषसंज्ञः स्यात् पञ्चराजी द्व्यहः पञ्चगवम् २४ द्वितीया श्रितातीतप
पतितगतात्यस्तप्राप्तापन्नैः कौ सु।स।त।द्वितीयान्तं सुबन्तं श्रितादिप्रकृतिकैः सुबन्तैः सह वा समाससंज्ञं भवति स स
मासस्तत्पुरुषसंज्ञो भवति कष्टंश्रितः दुःखमतीतः।दुःखातीतः नरकंपतितः नरकपतितः ग्रामंगतः ग्रामगतः
तरङ्गमत्यस्तः तरङ्गात्यस्तः। सुखंप्राप्तः सुखप्राप्तः सुखमापन्नः सुखापन्नः श्रितादिषु गमिगाम्यादीनामुपसं
ख्यानम् ग्रामंगमी ग्रामगमी ग्रामंगामी ग्रामगामी अन्नंबुभुक्षुः अन्नबुभुक्षुः गम्यादीनामुपसंख्यानम् १ कौ
सु।स।त २५ स्वयं क्तेन कौ सु स त स्वयमित्येतन्मात्रमव्ययं क्तप्रत्ययान्तेन सुबन्तेन समाससंज्ञं स्यात् स तत्पुरुषः स्वयं
कृतम् आत्मना कृतमित्यर्थः अत्र सूत्रे द्वितीयेति न संबध्यते स्वयमित्यस्य द्वितीयान्तत्वाऽसंभवात् ऐकपद्यमैकस्वर्य
मेकविभक्तित्वं समासाद्भवति भाष्येतन्नेदं व्याख्यातम् २६ खट्वाक्षेपे कौ सु स त खट्वाशब्दो द्वितीयान्तः क्तान्तेन सह
समाससंज्ञः स्यात् स तत्पुरुषः समासेन निन्दायां गम्यमानायाम् खट्वारूढो जाल्मः खट्वाप्लुतः उत्पथप्रस्थित इत्यर्थः
विभाषाधिकारेऽपि नित्यसमास एवायम् नहि वाक्येन निन्दा गम्यते क्षेपे किम् खट्वामारूढः २७ सामि कौ।सु
स।त।सामि इत्येतदव्ययं क्तान्तेन सह वा समाससंज्ञं भवति स तत्पुरुषः सामिकृतम् अर्द्धकृतमित्यर्थः सामिपीतम्
सामिभुक्तम् समासफलमैकपद्यमैकस्वर्यादि भाष्येतन्नेदं व्याख्यातम् २८ कालाः कौ।सु।स।त।द्वितीयान्ताः का

सू॰प॰
३८
36

लवाचिनः क्तान्तेन सुबन्तेन सुबन्तेन तु नेदं व्याख्यानम् सह वा समस्यन्ते सः स तत्पुरुषः मासे प्रमितः मासप्रमितः प्रति
पच्चन्द्रमाः मासे परिच्छेत्तुमारब्धवानित्यर्थः भाष्ये तु नेदं व्याख्यानम् २१ अत्यन्तसंयोगे च कौ सु स त क्तेनेति निवृत्ते
द्वितीयान्ताः कालवाचिनः सुबन्तेन सह समस्यन्ते सः स्युः निरन्तरसम्बन्धे स तत्पुरुषः मुहूर्तं सुखम् मुहूर्तसु-
खम् मासं कल्याणी मासकल्याणी ३ तृतीया तत्कृतार्थेन गुणवचनेन कौ सु स । त तृतीयान्तं सुबन्तं तृतीयान्तार्थे
कृतगुणवचनेन सुबन्तेन अर्थशब्देन च सह समासेन स्यात् स तत्पुरुषः शङ्कुलया खण्डम् । शङ्कुलाखण्डम् अर्थेन धा-
न्येन । धान्येनार्थः । धान्यार्थः तत्कृतेनेति किम् । अक्ष्णा काणः । गुणवचनेनेति किम् । गोभिर्वपावान् । तृतीयान्तदर्थे
कृतार्थेनेति वक्तव्यम् १ ३ । पूर्वसदृशसमोनार्थकलहनिपुणमिश्रश्लक्ष्णैः कौ । सु । स । त । एतैः सह तृतीया-
न्तं वा समस्यते स तत्पुरुषः । मासेन पूर्वः मासपूर्वः मात्रा सदृशः मातृसदृशः पित्रा समः । पितृसमः । ऊनार्थः
माषेणोनम् । माषोनम् । माषेण विकलम् माषविकलम् असिना कलहः असिकलहः । वाचा निपुणः वाङ्निपु-
णः गुडेन मिश्रः गुडमिश्रः आचारेण श्लक्ष्णः अवरस्योपसंख्यानम् १ कौ । सु । स । त । मासेनावरः मासावरः ३२ कर्तृ
करणे कृता बहुलम् कौ । सु । स । त । कर्तरि करणे च या तृतीया तदन्तं शब्दरूपं कृदन्तेन सह वा समस्यते स त
त्पुरुषः कर्तरि अहिना हतः अहिहतः करणे नखैर्भिन्नः नखभिन्नः कर्तृकरणे किम् भिक्षाभिरुषितः बहुलग्र-
हणं सर्वोपाधिव्यभिचारार्थम् । तेनेह न । दात्रेण लूनवान् परशुना छिन्नवान् इह तु भवत्येव । पादहारकः गलेचोपकः
कर्तृकारणे कृता केन ।।३३। कृत्यैरधिकार्थवचने । कौ । सु । स । त । स्तुतिनिन्दाफलकमध्यारोपितार्थवचनमधिका-
र्थवचनम् । कृत्यप्रत्ययान्तेन सहाधिकार्थवचने कर्तृकरणे समस्यते स तत्पुरुषः । कर्तरि कारकपेयानदी । श्वलेह्य :
कूपः । करणे । वातच्छेद्यानि तृणानि । पूर्वसैवायं प्रपञ्चः । अमत्रापि रक्षणत इति वक्तव्यम् १ सायनेकृता २ इति वाप ३८

दहारकार्थम् ३४ अन्नेनव्यञ्जनम् कौ सु स त संस्कारकद्रव्यवाचकं तृतीयान्तमन्नवाचिना सुबन्तेन सह वा सम
स्यते स तत्पुरुषः दध्ना उपसिक्त ओदनः दध्योदनः क्षीरौदनाः घृतौदनः हन्ताद्युपसेक क्रियायाः अन्तर्भावादन्नव्य
ञ्जनयोः सामर्थ्यम् सवनग्रामाण्यादिति वेत्रानाकारकाणां प्रतिषेधः १ समानाधिकरणाधिकारे क्तस्य तीयाश्च
पदउत्तरपदलोपश्च २ षष्ठीसमासस्य गुणक् शब्दोऽन्तः ३ उत्तरपदलोपश्चेत्यनवर्तते ३५ भक्ष्येणमिश्रीकरणम् कौ
सु स त मिश्रीकरणवाचितृतीयान्तं भक्ष्यवाचिना सुबन्तेन सह वा समस्यते स तत्पुरुषः स्वरविशेषमसम्यवहार्यं
भक्ष्यम् तस्य संस्कारकं मिश्रीकरणम् गुडेन संमिश्रा धाना गुडधानाः । हृतौ मिश्रण क्रियायाः अन्तर्भावात्सामर्थ्ये
पूर्वोत्तरपदयोः ३६ चतुर्थी तदर्थार्थबलिहितसुखरक्षितैः कौ सु स त चतुर्थ्यन्तं चतुर्थ्यन्तार्थाय यत्तद्वाचि
ना सुबन्तेन । अर्थ । बलि हित सुख रक्षित इत्येतैश्च वा समस्यते स तत्पुरुषः यूपाय दारु यूपदारु कुण्डलाय हिरण्यम्
कुण्डलहिरण्यम् तदर्थेनात्र प्रकृतिविकृतिभाव एव गृह्यते न भवति रन्धनाय स्थाली अर्थ ब्राह्मणार्थः सूपः
भूताय बलिः भूतबलिः गवे हितम् गोहितम् गवे सुखम् गोसुखम् गवे रक्षितम् गोरक्षितम् विकृतिः प्र
कृत्या १ अश्वघासादीनामुपसंख्यानम् २ अर्थेन नित्यसमासवचनम् ३ सर्वलिङ्गता च ४ अर्थेन नित्यसमासो वि
शेष्यलिङ्गता चेति वक्तव्यम् १ कौ सु स त द्विजार्थं पयः द्विजार्था यवागूः द्विजार्थः सूपः ३७ पञ्चमी भयेन कौ
सु स त । पञ्चम्यन्तं भयशब्देन सुबन्तेन सह वा समस्यते स तत्पुरुषः वृकाद्भयम् वृकभयम् भयभीतभीतिभीभि
रिति वक्तव्यम् १ कौ सु स त वृकभयम् वृकभीतः वृकभीतिः वृकभीः भयनिर्गतजुगुप्सुभिरिति वक्तव्यम् १२
अपरे वृकभयम् ग्रामनिर्गतः अधर्मजुगुप्सुः ३८ अपेतापोढमुक्तपतितापत्रस्तैरल्पशः कौ सु स त अपेत
अपोढ मुक्त पतित अपत्रस्त इत्येतैः सह अल्पपञ्चम्यन्तं वा समस्यते स तत्पुरुषः सुखादपेतः सुखापेतः

कल्पनायाअपोढः कल्पनोपोढः चक्रान्मुक्तः।चक्रमुक्तः।स्वर्गात्पतितः स्वर्गपतितः तरङ्गादपत्रस्तः अल्प
शः किम्।सर्वस्मात्पञ्चम्यन्तस्य समासः स्यात् प्रासादात्पतितः इत्यादिसूत्रद्वये भाष्ये न व्याख्यातम् ३९ स्तोकान्तिकदूरार्थ
कृच्छ्राणि क्तेन कौ स स त स्तोकार्थ अन्तिकार्थ दूरार्थाः शब्दाः पञ्चम्यन्ताः कृच्छ्रशब्दश्च क्तान्तेन सुबन्तेन सुबन्ती
न सह वा समस्यन्ते स तत्पुरुषः स्तोकान्मुक्तः अल्पान्मुक्तः अन्तिकादागत अभ्याशादागतः दूरादागतः विप्रकृष्टादा
गतः कृच्छ्रान्मुक्तः कृच्छ्राल्लब्धः पञ्चम्याः स्तोकादिभ्यः इति पञ्चम्या अलुक् ४० सप्तमी शौण्डैः कौ सु स त सप्त
म्यन्तं शौण्डादिभिः सुबन्तैः सह वा समस्यते स तत्पुरुषः अक्षेषु प्रसक्तः शौण्डः। अक्षशौण्डः शौण्ड धूर्त कितव
व्याड प्रवीण संवीत अन्तर अधि पटु पण्डित कुशल। चपल निपुण इत्येते शौण्डादयः शौण्डादिभिरिति बहुवचनं
४१ सिद्धशुष्कपक्वबन्धैश्च कौ सु स त सिद्ध शुष्क पक्व बन्ध इत्येतैः सुबन्तैः सह सह सप्तम्यन्तं वा समस्यते स त
त्पुरुषः सांकाश्ये सिद्धः सांकाश्यसिद्धः आतपे शुष्कः आतपशुष्कः। स्थाल्यां पक्वः। स्थालीपक्वः। चक्रे बन्धः। चक्रब
न्धः। भाष्ये तु न दृश्या व्याख्यातम् ४२ ध्वाङ्क्षेण क्षेपे। कौ। सु। सा। त। ध्वाङ्क्षवाचिना सुबन्तेन सह सप्तम्यन्तं निन्दायां गम्यमानायां
समस्यते स तत्पुरुषः तीर्थे ध्वाङ्क्ष इव। तीर्थध्वाङ्क्षः। तीर्थकाकः। तीर्थे वायसः अनवस्थित इत्यर्थः क्षेपे किम्। तीर्थे ध्वाङ्
क्षस्तिष्ठति ध्वाङ्क्षेणेत्यर्थग्रहणं कर्तव्यम् तीर्थकाकः ४३ कृत्यैरृणे। कौ। सु। सा। त। कृत्यप्रत्ययान्तैः सह सप्तम्यन्तमृणे ग
म्यमाने समस्यते स तत्पुरुषः। मासे देयम् मासदेयमृणम्। ऋणग्रहणं नियोगोपलक्षणार्थम्। पूर्वाह्णे गेयं साम।
तत्पुरुषे कृति बहुलमिति सप्तम्या अलुक् ऋणे किम्। मासे देया भिक्षा। कृत्यैस्त्रिभिर्योगविभागस्यायं नियमः १ नेह पूर्वा
ह्णे दातव्या भिक्षा ४४ संज्ञायाम् कौ। सु। सा। त। संज्ञाविषये सप्तम्यन्तं सुबन्तेन सह समस्यते स तत्पुरुषः। नित्यसमासोयं वा
क्यम्। न हि वाक्येन संज्ञा गम्यते अरण्येतिलकाः। वने किंशुकाः। वने बिल्वकाः। कूपे पिशाचकाः हलदन्तात्सप्तम्याः सं ३८

त्रापामित्यलुक् । इत्यादिसूत्रत्रये भाषेत नव्याख्यातम् ४५ क्तेनाहोरात्रावयवाः । कौ । सा । स । त । क्तप्रत्ययान्तेन सहदिना
वयववाचकोरात्र्यवयववाचकश्च समस्यन्ते वा समस्यते स तत्पुरुषः । पूर्वाह्णेकृतम् अपराह्णेकृतम् पूर्वरात्रेकृ
ते । पूर्वरात्रकृतम् । अपररात्रेकृतम् अपररात्रकृतम् अवयवग्रहणं किम् । दिवाकृतम् । रात्रौवृतम् ४६ तत्र । कौ । स
सा । त । तत्र इत्येतत्सप्तम्यन्तं क्तान्तेन सह वा समस्यते स तत्पुरुषः तत्रकृतम् तत्रभुक्तम् समासफलमैकपद्यादि ४७
क्षेपे । कौ । सा । स । त । निन्दायां गम्यमानायां सप्तम्यन्तं क्तान्तेन सह वा समस्यते स तत्पुरुषः अवतप्तेनकुलस्थितं तवैतच्
चापलम् अवतप्ते नकुलस्थितं तवैतदित्यर्थः उदके विशीर्णम् । प्रवाहेमूत्रितम् । भस्मनिहुतम् । निष्फलं परा क्रियते तदेदमुच्
ते ४८ पात्रेसमितादयश्च कौ । सा । स । त । पात्रेसमित । इत्येवमादयः शब्दा निपात्यन्ते । ते च तत्पुरुषसंज्ञा भवन्ति क्षेपे गम्य
माने पात्रेसमिताः । पात्रेष्वेव संगता न तु कार्यकालेऽत्रत्वं धारणे न निन्दा गम्यते उदुम्बरमशकादिषु उपमया निन्दा । मा
तरिपुरुष इत्यत्र प्रतिषेधमेव तेन पिंडीशूरादिषु निरीहतया चकारोऽवधारणार्थः तेनैषां समासान्तरं न भवति । पर
माः पात्रेसमिताः पात्रेसमिताः । पात्रेबहुलाः उदुम्बरमशकः । उदुम्बरकृमिः । कूपकच्छपः । अवटकच्छपः । कूपमण्डू
कः । कुम्भमण्डूकाः । उदपानमण्डूकः । नगरकाकः । नगरवायसः । मातरिपुरुषः । पिंडीशूरः । पितरिशूरः । पितरि
शूरः । गेहेशूरः । गेहेनर्दी । गेहेक्ष्वेडी । गेहेविजिती । गेहेव्याडः । गेहेमेही । गेहेदाही । गेहेदृप्तः । गेहेधृष्टः । गर्भेतृप्तः
आखनिकबकः गोष्ठेशूरः । गोष्ठेविजिती । गोष्ठेक्ष्वेडी । गोष्ठेपटुः । गोष्ठेपण्डितः । गोष्ठेप्रगल्भः । कर्णेटिरिटिरा ।
कर्णेचुरुचुरा आकृतिगणोऽयम् ४९ पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन कौ । सा । स । त ।
ते । पूर्वकालवाचक । एक । सर्व । जरत् । पुराण । नव । केवल । इत्येते सुबन्ताः समानाधिकरणेन सुबन्तेन सह वा सम
स्यन्ते स तत्पुरुषः पूर्वं स्नातः पश्चादनुलिप्तः । स्नातानुलिप्तः । एकाशाटी । एकशाटी । सर्वेदेवाः । सर्वदेवाः । जरन्गौः

सू॰प॰ ३८ 38

जरद्गवः। पुराणमन्नम्। पुराणान्नम्। नवमन्नम्। नवान्नम्। केवलो नैयायिकः। समानाधिकरणेनेति किम्। पक्वस्याः शाटी
इति ४८ सूत्राणि भाष्ये २।१ व्याख्यातानि ५० दिक्संख्ये संज्ञायाम् कौ। सू। सा। त। दिग्वाचिनः संख्यावाचिनश्च समाना
धिकरणेन सुबन्तेन समस्यन्ते संज्ञायां स तत्पुरुषः पूर्वेषुकामशमी। सप्तर्षयः। संज्ञायामिति किम्। उत्तरा वृक्षाः। प
ञ्च ब्राह्मणाः। भाष्ये तु नेदं व्याख्यातम् ५१ तद्धितार्थोत्तरपदसमाहारे च। कौ। सू। सा। त। तद्धितार्थविषये उत्तरप
दे परतः समाहारे च वाच्ये दिक्संख्ये समानाधिकरणेन सुपा सह वा समस्येते स तत्पुरुषः दिक् तद्धितार्थे। पूर्वस्यां
शालायां भवः। दिक्पूर्वपदादसंज्ञायामिति ञः पौर्वशालः उत्तरपदे पूर्वा शाला प्रिया यस्येति त्रिपदे बहुव्रीहौ प्रि
याशब्दे उत्तरपदे परतः पूर्वयोस्तत्पुरुषः। तेन शालाशब्दे आकार उदात्तः। पूर्वशालाप्रियः समाहारे दिग्वाचको ना
स्त्येव। संख्या तद्धितार्थे। पाञ्चनापितिः पञ्चकपालः। उत्तरपदे। पञ्चगवधनः समाहारे। पञ्चपूली। दशकुमा
री। प्रत्ययोत्तरपदयोर्द्विगुसंज्ञा भवतीति वक्तव्यम् १ द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनम् २ कौ। सू। सा। त। वाक्
दृषदप्रियः। पञ्चगवप्रियः। पञ्चगवप्रियः। उत्तरपदेन परिमाणिना द्विगोः समासवचनम् ३ द्विमासजातः। द्व्यह्नजातः
उत्तरपदेन परिमाणिना द्विगोः सिद्धये बहूनां तत्पुरुषस्योपसंख्यानम् १ कौ। सू। सा। त। सर्वत्र मत्वर्थे प्रतिषेधः ४।५२
संख्यापूर्वो द्विगुः संज्ञाप्रदेशाः।२।४।१।।६।२।१२।। कौ। सू। सा। त। पूर्वसूत्रोक्तः संख्यापूर्वस्तत्पुरुषसमासो द्विगुसंज्ञः
स्यात्। तद्धितार्थे। पञ्चकपालः। द्विगोर्लुगनपत्ये इति तद्धितस्य लुक् उत्तरपदे। पञ्चनावप्रियः। नावो द्विगोरिति टच्
समाहारे। पञ्चपूली। द्विगोरिति ङीप् ५३ कुत्सितानि कुत्सनैः। कौ। सू। सा। त। विशेषणं विशेष्येणेति प्राप्ते विशेष्य
स्य पूर्वनिपातार्थमिदम्। कुत्स्यमानवाचीनि कुत्सनवाचिभिः समानाधिकरणैः सह वा समस्यन्ते स तत्पुरुषः। वैयाकरण
खसूचिः। विस्मृतव्याकरण इत्यर्थः याज्ञिककितवः। अयाज्ययाजनात्तृष्णापर इत्यर्थः। मीमांसकदुर्दुरूढः। नास्तिक ३८

इत्यर्थः कुत्सितानीतिकिम्। नैयायिकश्चोरः। नह्यत्र नैयायिकत्वं कुत्स्यते। कुत्सनैः किम्। कुत्सितो ब्राह्मणः ५४ पापाण-
के कुत्सितैः। कौ। स। स। त। पूर्वसूत्रापवादः पाप अणक इमौ कुत्सितवचनैः सुबन्तैः सह प्राग्वत्। पापनापितः अणककु-
लालः भाष्ये तु नेदं व्याख्यातम् ५५ उपमानानि सामान्यवचनैः कौ। स। स। त। उपमीयतेऽनेनेत्युपमानम्। उपमानवाचीनि सुब-
न्तानि उपमानोपमेययोर्धर्मवाचकैः सुबन्तैः सह समस्यन्ते स तत्पुरुषः घनइव श्यामः। घनश्यामः उपमानानीति किम्। देव
दत्तः श्यामः। सामान्यवचनैः किम्। फालाइव तण्डुलाः ५६ उपमितं व्याघ्रादिभिः सामान्याप्रयोगे। कौ। स। स। त। विशेष
णं विशेष्येणेत्येव सिद्धे विशेष्यस्य पूर्वनिपातार्थमिदम्। उपमेयं सुबन्तं व्याघ्रादिभिः सुबन्तैः सह समस्यते। उपमानोपमेय
गतधर्मवाचकशब्दस्याप्रयोगे सति पुरुषो व्याघ्र इव। पुरुषव्याघ्रः सामान्याप्रयोगे किम्। पुरुषो व्याघ्र इव शूरः व्याघ्र
सिंह। ऋक्ष ऋषभ चन्दन वृक वृष वराह हस्तिन् तरु कुञ्जर रुरु पृषत् पुण्डरीक पलाश कितव आकृतिगण-
णोऽयम्। तेन मुखं पद्मम् मुखकमलम् करकिसलम् करकिसलयम् पार्थिवचन्द्रः इत्यादि ५७ विशेषणं विशेष्येण
बहुलम् कौ स स त भेदकं भेद्येन सह वा प्राग्वत् नीलमुत्पलम् नीलोत्पलम्। बहुलग्रहणात् क्वचिन्नित्यम् कृष्णस-
र्पः लोहितादिः क्वचिन्न भवत्येव रामो जामदग्न्यः अत्र सूत्रे विशेषणविशेष्यत्वं विशेषणेन शब्द्यते नतु व्यावर्तकत्वरूपम्
नीलसामान्योपक्रमेऽत्पलस्यापि व्यावर्तकत्वेन विशेषणत्वापत्तेः जातिसंज्ञयोर्गुणक्रियाभ्यां समभिव्याहारे विशेष्यत्वेव
गुणयोः क्रिययोर्गुणक्रिययोश्चानियमएव। व्याप्यव्यापकभावाऽनापन्नजात्योरप्यनियमएव व्याप्यव्यापकभावापन्नजा-
त्योर्व्यापकस्य विशेष्यत्वेव ५८ पूर्वापरप्रथमचरमजघन्यसमानमध्यमध्यमवीराश्च कौ स स त पूर्व अपर इ-
त्येवमादयः शब्दाः समानाधिकरणेन सुपा सह वा प्राग्वत् पूर्वपुरुषः अपरपुरुषः प्रथमपुरुषः चरमपुरुषः जघन्य-
पुरुषः समानपुरुषः मध्यपुरुषः मध्यमपुरुषः वीरपुरुषः पूर्वसूत्रस्यैवायं प्रपञ्चः ५९ श्रेण्यादयः सुबन्ताः कृता-

स्तृ.प.
३६

दिभिः समानाधिकरणैः । सर्वनैः सहवाप्राग्वत् श्रेण्यः श्रेण्यः कृताः । श्रेणिकृताः । पूगकृताः । श्रेणि । पूग । मुकुन्द
राशि निचय विशेष विधान पर इन्द्र देव मुण्ड भूत श्रवण वदान्य अध्यापक अभिरूपक । ब्राह्मण क्षत्रिय । विशि
ष्ट । पटु । पण्डित कुशल । चपल । निपुण । कृपण इत्येते श्रेण्यादयः कृत । मित । मत । भूत । उक्त । युक्त । समाज्ञात । समाम्ना
त । समाख्यात । सम्भावित । संसेवित । अवधारित । अवकल्पित । निराकृत । उपकृत । उपाकृत । दृष्ट । कलित । उदाहृत ।
विश्रुत । उदित । अपरेकृतादिराकृतिगणः । श्रेण्यादिषु च्व्यर्थवचनम् १ कौ । स्र । सा । त । ६० । क्ते । ननञ्विशिष्टेनानञ् । कौ ।
स्र । सा । त । क्तान्तेन नञ्विशिष्टेन समर्थेन समर्थेन सह नञ्रहितेन क्तान्तेन वा प्राग्वत् । कृतञ्च तदकृतञ्च । कृताकृतम् ।
भुक्ताभुक्तम् । अशितानशितेन जीवति । क्लिष्टाः क्लिष्टाः क्लिशितेन वर्तते । नञ्विशिष्टे समानप्रकृतिग्रहणं कर्त
व्यम् १ । इह माभूत् । सिद्धं चाभुक्तं चेति । अनजिति चप्रतिषेधो वक्तव्यः २ । नुडिडधिकेन च समासो वक्तव्यः । ३ । कृ
ताऽपकृतादीनां चोपसंख्यानम् ४ सिद्धन्त्वक्तेन विसमासाभावनञ् ५ । गतप्रत्यागतादीनां चोपसंख्यानम् ६ । अवधा
रणेनञावेन्तु इड् विशिष्टेन न प्रकल्पेत । अप्यवेदाधिक विवक्षा कार्यैत्तल्प प्रकृतिकेनेति १ कारिकेयम् ६१ सन्महत्प
रमोत्तमोत्कृष्टाः पूज्यमानैः । कौ । स्र । सा । त । सत् । महत् । परम । उत्तम । उत्कृष्ट । इत्येते पूज्यमानैः सहवाप्राग्वत् । म
हापुरुषः । स । परमपुरुषः । उत्तमपुरुषः । पूज्यमानैः किम् । उत्कृष्टो गौः । पङ्कादुद्धृत इत्यर्थः इत्यादिसूत्रषट्कं भाष्ये
तन व्याख्यातम् ६२ वृन्दारकनागकुञ्जरैः पूज्यमानम् । कौ । स्र । सा । त । वृन्दारक । नाग । कुञ्जर इत्येतैः पूज्यतैः मानं
सर्वन्तेवाप्राग्वत् गोवृन्दारकः गोनागः गोकुञ्जरः । पूज्यमाने किम् । सुषीमो नागः ६३ कतरकतमौ जातिपरि
प्रश्ने । कौ । स्र । सा । त । कतर । कतम । इत्येतौ जातिपरिप्रश्ने वर्तमानौ समर्थेन सुपा वा समस्येते । कतरः कठः । कतर
कठः । कतमकलापः । जातिपरिप्रश्ने किम् । कतरो देवदत्तः । कतमो यज्ञदत्तो भवताम् ६४ किं क्षेपे । कौ । स्र । सा । त । ३६

किम् क्षेपशब्दो निन्दायामर्थे समर्थेन सुपा सह समस्यते किंराजा यो न रक्षति। किंसखा यो ऽभिद्रुह्यति किमः क्षेप
इति किं नो निषेधः क्षेपे किम् को राजा काश्यपाम् ६५ पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रो
त्रियाध्यापकधूर्तैर्जातिः कौ। स। स। त। एतैः सह जातिवाचि समर्थं समस्यते। स्त्रीपुरुषलक्षणा पोटेत्युच्यते इभपोटा इभ
युवतिः अग्निस्तोकः उदश्वित्कतिपयकम् गृष्टिरेकवारप्रसूता गोगृष्टिः धेनुः प्रत्यग्रप्रसवा गोधेनुः। वशा वन्ध्या। गोव
शा। वेहद्गर्भघातिनी। गोवेहत्। बष्कयणी तरुणवत्सा गोबष्कयणी कठप्रवक्ता कठश्रोत्रियः कठाध्यापकः कठधूर्तः
जातिः। किम् देवदत्तः प्रवक्ता धूर्तग्रहणमकृत्स्नार्थम् ६६ प्रशंसावचनैश्च कौ। स। स। त। जातिवाचिवन्तं प्रशंसावाचकैः स
ह समस्यते। रूढिशब्दा मतल्लिकादयः प्रशंसावचना इष्यन्ते गोमतल्लिका गोमचर्चिका गोप्रकाण्डम्। गवोद्धः गोतल्ल
जः ६७ युवा खलतिपलितवलिनजरतीभिः। कौ। स। स। त। युवन्। इत्येषशब्दः खलत्यादिभिः समानाधिकरणैः समस्यते
जरतीति स्त्रीलिङ्गनिर्देशः प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणमिति परिभाषाज्ञापनार्थः। युवा खलतिः युव
खलतिः युवतिः खलती। युवखलती युवा पलितः युवपलितः युवतिः पलिता युवपलिता युवा वलिनः। युववलि
नः। युवतिर्वलिना युववलिना युवा जरन्। युवजरन् युवतिर्जरती। युवजरती ६८ कृत्यतुल्याख्या अजात्या कौ। स। स।
त। कृत्यप्रत्ययान्तास्तुल्यवाचिनश्च अजातिवाचकेन सुपा सह समस्यन्ते भोज्योष्णम् पानीयशीतम् तुल्यश्वेतः सदृशश्वे
तः। अजात्या किम् भोज्यश्चौदनः माष्येत्वनेदं व्याख्यानम् ६९ वर्णो वर्णेन। कौ। स। स। त। वर्णविशेषवाचि सुबन्तं वर्ण
वाचिना समानाधिकरणेन सुबन्तेन सह समस्यते कृष्णसारङ्गः लोहितशबलः। अवयवद्वारेण कृष्णलोहितशब्दौ स
मुदाये वर्तमानावुत्तरपदसमानाधिकरणौ भवतः वर्णेन तृतीयासमासे प्राप्तप्रतिषेधे वर्णग्रहणम् १। समानाधिक
रणे हि वर्णग्रहणम् २ हे वर्णग्रहणे कर्तव्ये स्वरविधावेव प्रतिपदोक्तस्याभावात् तस्मात्समानाधिकरण इत्येषपदो

सू॰प॰
४०

ज्यायाम् इति भाष्यम्। समानाधिकरणाधिकारे प्रधानोपसर्जनोपरेपर .... येन ३ समानाधिकरणसमासाद्बहुव्रीहिः ४
कदाचित्कर्मधारयः सर्वैधनाद्यर्थः ५ पूर्वपदातिशयस्यातिशायिकाद्बहुव्रीहिः सूक्ष्मवस्त्रतरादयर्थः ६ उत्तरपदातिशयस्या
तिशायिको बहुव्रीहिः सूक्ष्मवस्त्रतरादयर्थः ६ उत्तरपदातिशयस्यातिशायिको बहुव्रीहेर्वैहाढ्यतरादयर्थः ७ समानाधिकारे
शाकपार्थिवादीनामुपसंख्यानमुत्तरपदलोपश्च ८ शाकपार्थिवादीनां सिद्धय उत्तरपदलोपस्योपसंख्यानम् १। कौ। सा। स
त। शाकप्रियः पार्थिवः। शाकपार्थिवः। शाकपार्थिव कुतपसौश्रुत। अजातौल्वलि आकृतिगणोऽयम्। कृतापकृत। भु
क्तविमुक्त। पीतविपीत। गतप्रत्यागतः यातानुयात क्रयाक्रयिका। पुटापुटिका फलाफलिका मानोन्मानिका ७० कु
मारः श्रमणादिभिः। कौ। सा। स। त। कुमारशब्दः श्रमणादिभिः समानाधिकरणैः सह समस्यते प्रातिपदिकग्रहणे लिङ्ग
विशिष्टस्यापि ग्रहणम् कुमारी श्रमणा। कुमारश्रमणा श्रमणा। प्रव्रजिता कुलटा। गर्भिणी। तापसी दासी। बन्धा
की। अध्यापक। अभिरूपक। पटु। मृदु। पण्डित। कुशल। चपल। निपुण। एते श्रमणादयः। भाष्ये त्वनेदं व्याख्यानम् ७१
चतुष्पादो गर्भिण्या। कौ। स। स। त। चतुष्पाद्वाचिनो गर्भिणीशब्देन समानाधिकरणेन समस्यन्ते गोगर्भिणी। चतुष्पादि
ति किम्। ब्राह्मणी गर्भिणी। चतुष्पाज्जातिरिति वक्तव्यम् १ कौ। सा। स। त। नेह। स्वस्तिमतीम ७२ मयूरव्यंसकादयश्च
कौ। सा। स। त। मयूरव्यंसक। इत्येवमादयः। समुदाया निपात्यन्ते। ते तत्पुरुषसंज्ञाः स्युः। मयूरव्यंसकः। धूर्तमयूर इत्यर्थः
चकारोऽवधारणार्थः। तेनैषां समासान्तरे प्रवेशो न। परमो मयूरव्यंसकः। मयूरव्यंसक। छात्रव्यंसक। कम्बोजमुण्ड। य
वनमुण्ड। छन्दसि हस्तगृह्य। पादगृह्य। लाङ्गूलगृह्य। पुनर्दाय एहीडादयोऽन्यपदार्थे। एहीडं वर्तते। एहिवर्त
वर्तते। एहि वाणिज्या क्रिया अपेहि वाणिज्या प्रेहि वाणिज्या। एहि स्वागता। अपेहि स्वागता। एहि द्वितीया। अपेहि द्विती
प्रेहि द्वितीया एहि कटा अपेहि कटा प्रेहि कटा आहरकटा प्रेहि कर्दमा प्रोह कर्दमा। विधमचूडा उद्धरचूडा आहरवस ४०

ना आहरसेना आहरवितना कृन्तविचक्षणा उद्धरोत्सृजा उद्धरावसृजा उद्धमविधमा उत्पचनिपचा उत्पतनिपता उच्चा
वचम्। उच्चनीचम् आचोपचम् आचपराचम् नखप्रचम् निश्चप्रचम् अकिञ्चन स्नात्वाकालक पीत्वास्थिरक भुक्त्वासुहित
प्रोष्यपापीयान् उत्पत्याकला निपत्यरोहिणी निषण्णश्यामा अपेहिप्रघसा एहिविघसा इहपञ्चमी इहद्वितीया जहि
कर्म्मणा बहुलमाभीक्ष्ण्ये कर्तारं चाभिदधाति जहिजोडम् जहिस्तम्बम् उज्जहिस्तम्बम् आख्यातमाख्यातेन क्रिया
सातत्ये अश्नीतपिबता पचतभृज्जता खादतमोदता खादताचमता आहरनिवपा आवपनिष्किरा उत्पचविपचा। भि
न्द्धिलवणा कृन्धिविचक्षणा पचलवणा पचप्रकूटा आकृतिगणोऽयम् तेन अकुतोभयः कान्दिशीकः आहोपु
रुषिका अहमहमिका यदृच्छा एहिरेयाहिरा उन्मृजावमृज द्रव्यान्तरम् अवश्यकार्य्यमित्यादि इति ७२ सूत्राणि
भाष्ये २।१।२। व्याख्यातानि इति सूत्रपाठे द्वितीयाध्यायस्य प्रथमः पादः १ पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे। कौ
सू।ता। वक्ष्यमाणषष्ठीसमासापवादः पूर्व अपर अधर उत्तर इत्येते अवयविवाचिना सुबन्तेन समस्यन्ते एकत्वसंख्यावि
शिष्टश्चेदवयवी पूर्वकायस्य पूर्वकायः अपरकायः अधरकायः उत्तरकायः एकदेशिना किम् पूर्वं नाभेः कायस्य एकाधि
करणे किम् पूर्वं छात्राणामामन्त्रयस्व कथं मध्याह्न इति सर्वोऽप्यवयवोऽह्ना समस्यते संख्याविसायेति ज्ञापकात् भाष्ये तु
नेदं व्याख्यातम् २ अर्धं नपुंसकम् कौ।सू।ता। षष्ठी। समासापवादोऽयम् अर्धम् इत्येतन्नपुंसकं समप्रविभागवाचकम
वयविना सह समस्यते एकत्वसंख्याविशिष्टश्चेदवयवी अर्धं पिप्पल्याः अर्धपिप्पली नपुंसकं किम् ग्रामार्द्धः एकदे
शिनेत्येव अर्धं पशोर्देवदत्तस्य देवदत्तशब्देन समासो न भवति एकाधिकरण इत्येव अर्धं पिप्पलीनाम् ३ द्वितीयतृती
यचतुर्थतुर्याण्यन्यतरस्याम् कौ।सू।ता। द्वितीय तृतीय चतुर्थ तुर्य इत्येतान्यवयविना सह वा समस्यन्ते एकश्चे
दवयवी द्वितीयं भिक्षायाः द्वितीयभिक्षा अन्यतरस्याग्रहणसामर्थ्यान्पूरणगुणेति निषेधं बाधित्वा पक्षे षष्ठीसमासः

स्व·प·
७१
७१

माः भिक्षाद्वितीयम् तृतीयेभिक्षाया तृतीयभिक्ष भिक्षातृतीयम् चतुर्थेभिक्षायाः चतुर्थभिक्षा भिक्षाचतुर्थम् तुर्येभि
क्षायाः तुर्यभिक्षा भिक्षातुर्यम् एकदेशिनेत्येव द्वितीयेभिक्षायाभिक्षुकस्य एकाधिकरणेइत्येव द्वितीयेभिक्षायाम् ४
ग्रामापन्नेच द्वितीयया कौ स स त द्वितीयासमासे प्राप्तेवचनमिदम् ग्राम आपन्ना इत्येतेशब्दरूपे द्वितीयान्तेन समस्य
ते। ग्रामोजीविकाम् ग्रामोजीविकः आपन्नोजीविकाम् आपन्नजीविकः विधानसामर्थ्यात्तदा द्वितीयासमासोऽपि। जीवि
काग्रामः जीविकापन्नः नायमन्वाकर्षणार्थश्चकारः किन्तु ह्येतमनेन विधीयते ग्रामापन्नेद्वितीयान्तेन समस्येते अन्तंच भ
वति ग्रामापन्नयोरिति ग्रामाजीविको ग्रामजीविको आपन्नजीविकाम् आपन्नजीविका इतिभाष्यम् ५ कालाः परिमाणि
ना कौ स स त षष्ठीसमासापवादः कालवाचकाः परिच्छेद्यवाचिनासुबन्तेनसमस्यन्ते मासोजातस्य मासजातः य
हजातः कालस्ययेनसमासस्तस्याः परिमाणिनादनिर्देशः १ सिद्धन्तकालपरिमाणंयस्यसकालस्तेन २ एकवचना
न्तानामितिवक्तव्यम् ३ द्विगोश्चेतिवक्तव्यम् ४ ६ नञ् कौ स स त नञ् इत्येतदव्ययंसुपासमस्यते नब्राह्मणः अब्राह्मणः
ततल्लोपोनञ्समासः सर्वविप्रतिषिद्धेचनलोपःस्वरसिद्ध्यर्थम् १७ ईषदकृता कौ स स त ईषत् इत्येतदव्ययंकृदन्ता
भिन्नेनसुबन्तेनसमस्यते ईषत्कडारः ईषत्पिङ्गलः ईषद्विकटः ईषद्गुणवचनेनेतिवक्तव्यम् १ कौ स स त नेह ईषद्गार्ग्ये :
षष्ठी कौ। सा सा ता। षष्ठ्यन्तंसमर्थेनसुबन्तेनसहसमस्यते राज्ञः पुरुषः राजपुरुषः कृद्योगाचषष्ठीसमस्यतइतिवक्तव्यम्
कौ स स त प्रतिपदविधानाषष्ठीनसमस्यतेइतिवक्तव्यंतस्येदंबाधकम् इध्मप्रव्रश्चनः पलाशशातनः तत्स्थैश्चगुणैः २
केवलगुणवाचकैः षष्ठीसमस्यतइत्यर्थः चन्दनस्यगन्धः चन्दनगन्धः गुणिपरत्ववाचकशब्दाऽभावचनेतत्स्यात् नेह
पटस्यशौक्ल्यम् नतत्तद्विशेषणैः इ तेषांगुणानांयानिविशेषणानितद्वाचकैःसहषष्ठीनसमस्यते घृतस्यतीव्रः चन्दन
स्यमृदुः ९ याजकादिभिश्च कौ स स त तृजकाभ्यामितिनिषेधेप्राप्तेवचनम् याजकइत्यादिशब्दैःसहषष्ठीसमस्यते ५

ब्राह्मणयाजकः क्षत्रिययाजकः याजक पूजक परिचारक परिषेचक स्नापक अध्यापक उत्सादक उद्वर्तक हो
तृ भर्तृ रथगणक पत्तिगणक प्रतिवाजकादयः भाष्येऽत्र नेदं व्याख्यातम् ॥ न निर्धारणे कौ स स त निर्धारणे या षष्ठी
सा न समस्यते मनुष्याणां क्षत्रियः शूरः गवां कृष्णा बहुक्षीरा अध्वगानां धावन्तः शीघ्रतमः प्रतिपदविधाना च षष्ठी न समस्य
त इति वक्तव्यम् ॥ कौ स स त सर्पिषो ज्ञानम् मधुनो ज्ञानम् ॥ पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन कौ स
स त सर्पिषो ज्ञानम् मधुनो ज्ञानम् ॥ पूरणगुणसुहितार्थसदव्ययतव्यसमानाधिकरणेन कौ स स त पूरण
गुण सुहितार्थ सत् अव्यय तव्य समानाधिकरण इत्येतैः षष्ठी न समस्यते अर्थशब्दः प्रत्येकमभिसम्बध्यते । पूरणा
र्थे छात्राणां पञ्चमः गुणे बलाकायाः शौक्ल्यम् बटस्य शुक्लः सुहितार्थास्तृप्त्यर्थाः फलानां तृप्तः सत्संज्ञकः प्रत्य
यः ब्राह्मणस्य कुर्वन् ब्राह्मणस्य कुर्वाणः अव्यय ब्राह्मणस्य कृत्वा तव्य ब्राह्मणस्य कर्तव्यम् समानाधिकरणे राज्ञः
पाटलिपुत्रकस्य षष्ठीसमासे पूर्वनिपाताऽनियमः स्यात् विशेषणं विशेष्येणेति समासस्तु भवत्येव ॥ क्तेन च पूजा
याम् कौ स स त पूजायां विहितो यः क्तप्रत्ययस्तदन्तेन षष्ठी न समस्यते मतिबुद्धिपूजार्थेभ्यश्चेति वर्तमाने क्तः राज्ञां मतः
राज्ञां बुद्धः राज्ञां पूजितः इत्यादिसूत्रद्वये भाष्येऽत्र न व्याख्यातम् ॥ अधिकरणवाचिना च कौ स स त अधिकरणवाचि
ना क्तेन षष्ठी न समस्यते कौऽधिकरणे चध्रौव्ये सत् अव्यय तव्य समानाधिकरण इत्येतैः षष्ठी न समस्यते अर्थशब्दः
प्रत्येकमभिसम्बध्यते पूरणार्थे छात्राणां पञ्चमः गुणे बलाकायाः शौक्ल्यम् बटस्य शुक्लः सुहितार्थास्तृप्त्यर्थाः
फलानां तृप्तः सत्संज्ञकः प्रत्ययः ब्राह्मणस्य कुर्वाणः अव्यय ब्राह्मणस्य कृत्वा तव्य ब्राह्मणस्य कर्तव्यम् समाना
धिकरणे राज्ञः पाटलिपुत्रकस्य षष्ठीसमासे पूर्वनिपाताऽनियमः स्यात् विशेषणं विशेष्येणेति समासस्तु भ
वत्येव ॥ क्तेन च पूजायाम् कौ स स त पूजायां विहितो यः क्तप्रत्ययस्तदन्तेन न समस्यते मतिबुद्धिपूजार्थेभ्यश्चे

सू·प·
७२

तिवक्ष्यति राज्ञोवृद्धः राज्ञोपूजितः इत्यादिसूत्रद्वयेभाष्येत्तनयाव्याख्यातम् १२ अधिकरणवाचिनाच कौ सू स त अधि·
करणवाचिनाक्तेनषष्ठीनसमस्यते क्तोऽधिकरणेचध्रौव्यगतिप्रत्यवसानार्थेभ्यश्चेतिवक्ष्यति इदमेषामासितम् इदमे
षांगतम् इदमेषांभुक्तम् १४ कर्म्मणिच कौ सू स त कर्म्मणियाषष्ठीसानसमस्यते आश्चर्योगवांदोहोऽगोपेन क
र्म्मणीतिषष्ठीनिर्देशोऽस्वदकर्त्तरिक्तनासमासवचनम् १ तस्मादुभयप्राप्तौकर्म्मणियाषष्ठीतस्याःप्रतिषेधोवक्तव्यः २ इत्यर्थे ऽ
पेचःपठितः कर्म्मणीत्येवयाषष्ठी इतिभाष्यम् १५ तृजकाभ्यांकर्त्तरि कौ सू स त तृच अक इत्येताभ्यांयोगेकर्त्तरि
याषष्ठीसानसमस्यते भवतः शायिका तन्त्रहणमुत्तरार्थम् कर्त्तर्य्येवतृचोविधानेनतत्प्रयोगेकर्त्तृषष्ठ्याअभावा
त् इत्यादिसूत्रद्वयेभाष्येत्तनयाव्याख्यातम् १६ कर्त्तरिच कौ सू स त कर्त्तरि ८ चयौतृजकौताभ्यांसहषष्ठीनसमस्यते
तच्च अपांस्रष्टा वज्रस्यभर्त्ता पतिपर्य्यायभर्त्तृशब्दस्ययाजकादित्वात्समासोभवत्येव अक ओदनस्यपाचकः १७
नित्यंक्रीडाजीविकयोः कौ सू स त क्रीडा जीविका इत्येतयोरर्थयोर्गम्यमानयोःषष्ठी अकेननित्यंसमस्यते उद्दाल
कपुष्पभञ्जिका क्रीडाविशेषः जीविकायाम् दन्तलेखकः क्रीडाजीविकयोःकिम् ओदनस्यभोजकः १८ कुगति
प्रादयः कौ सू स त कु गति प्रादि एतेसमर्थेनसुबन्तेनसहनित्यंसमस्यन्ते कुत्सितःपुरुषः कुपुरुषः गति ऊरी
कृत्य प्रादयः दुष्पुरुषः सुपुरुषः अतिपुरुषः कर्म्मप्रवचनीयानांप्रतिषेधः १ कौ सू स त वृक्षंप्रतिविद्योतते
विद्युत् अवेतप्रतिषेधस्य २ आमन्द्रैरिन्द्रहरिभिर्याहि सिद्धन्तुकाड्सुवतिडर्गतिवचनात् ३ स्वतीपूजायाम् १ सु
राजा अतिराजा दुर्निन्दायाम् २ दुष्कुलम् आङीषदर्थे ३ आकडारः आपिङ्गलः कुःपापार्थे ४ कुब्राह्मणः कु
वृषलः कात्यायनाभिप्रायप्रदर्शनायवार्त्तिकवत्तद्दर्यसौनागानाम् प्रादयोगताद्यर्थेप्रथमया ५ कौ सू स त अ
तिक्रान्तःखट्वाम् अतिखट्वः अवादयःक्रुष्टाद्यर्थेतृतीयया ६ कौ सू स त अवक्रुष्टःकोकिलया अवकोकिलया। ७२

पर्य्यादयो ग्लानाद्यर्थे चतुर्थ्या ७ कौ सु स त परिग्लानोऽध्ययनाय पर्य्यध्ययनः निरादयः क्रान्ताद्यर्थे पञ्चम्या ८
कौ सु स त निष्क्रान्तः कौशाम्ब्या निष्कौशाम्बिः अव्ययं प्रवृद्धादिभिः ९ पुनः प्रवृद्धम् पुनर्गवम् पुनः सुखे इत्येन विभ
क्तिलोपः पूर्वपदप्रकृतिस्वरत्वञ्च १० अव्ययमव्ययेन ११ प्रप्रयत्नयतिम् उदात्तवतातिङागतिमताचाव्ययं समस्यत इति वक्तव्ये १२
अनुव्याकरोत् पत्तरियन्ति १३ उपपदमतिङ् कौ सु स त उपपदमतिङन्तं समर्थेन सह नित्यं समस्यते कुम्भकारः अति
ङ्ः किम् एधानाहारको व्रजति उपपदमतिङिति तदर्थप्रतिषेधः १ उपपदमक्रिया २ इति वा अतिङिति शक्यमवक्तुम्
कस्मान्न भवति कारको व्रजतीति सुप्सुपेति वर्तते एवन्तर्हि सिद्धे सति यदतिङिति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्य्यः अ
न्ययोर्योगयोर्निवृत्ते सुप्सुपेति इति भाष्यम् गतिकारकोपपदानां कृद्भिः समासवचनं प्राक्सुबुत्पत्तेः १ परिभाषेयम् २०
अमैवाव्ययेन कौ सु स त पूर्वेण सिद्धे नियमार्थमिदम् अमैव तत्तुल्यविधानं यदुपपदं तदेवाऽव्ययेन सह समस्यते स्वादु
ङ्कारं भुङ्क्ते अमैवेति किम् अग्रे भोजम् अग्रे भुक्त्वा अमा वाऽन्येन तत्तुल्यविधानेमेतत् तदेवेति किम् कालो भोक्तुम् २१ तृती
याप्रभृतीन्यन्यतरस्याम् कौ सु स त उभयत्र विभाषेयम् उपदंशस्तृतीयायाम् इत्येवमादीन्युपपदान्यमन्तेनाऽव्ययेन सह वा स
मस्यन्ते मूलकेनोपदंशं भुङ्क्ते उच्चैःकारमाचष्टे उच्चैःकारम् अमन्तेनेति किम् पर्य्याप्तो भोक्तुम् इत्यादिसूत्रद्वयं भाष्ये तु न व्या
ख्यातम् २२ क्त्वा च कौ सु स त अमेति निवृत्तम् क्त्वाप्रत्ययान्तेन सह तृतीयाप्रभृतीन्युपपदानि वा समस्यन्ते उच्चैःकृत्य उ
च्चैःकृत्वा तृतीयाप्रभृतीनीति किम् २३ शेषो बहुव्रीहिः संज्ञाप्रदेशाः २।२।३५।५।४।७३ कौ सु स व अधिकारोऽयम्
शेषः समासो बहुव्रीहिसंज्ञो भवति विग्रहः शेषः किम् उन्मत्तगङ्गम् यस्य त्रिकस्याऽनुक्तः समासः स शेषः कस्य चानु
क्तः प्रथमायाः इति भाष्यम् इति २३ सूत्राणि भाष्ये २।२।१ व्याख्यातानि २४ अनेकमन्यपदार्थे कौ सु स व पूर्वसूत्र
मनुवर्तते अनेकं सुबन्तं प्रथमान्तादन्यस्य पदस्यार्थे वर्तमानं वा समस्यते स बहुव्रीहिः प्राप्तमुदकं यं ग्रामम् सम्प्राप्तो

दकोग्रामः कुठोरथोयेन सकुठरथोः नड्वान् उपहृतः पशुर्यस्मै स उपहृतपशूरुद्रः उद्धृत ओदनोयस्याः सा उद्धृतौ
सू.प. दनास्थाली चित्रागावोयस्य सचित्रगुः वीरः पुरुषोयस्मिन् ग्रामे सवीरपुरुषकोग्रामः प्रथमान्तार्थेतन भवति वृष्टे
४३ देवेगतः पदग्रहणंकिम् वाक्यार्थोमाभूत् यथामेमातातथामेपितासुस्नातेमोऽइति अन्यइतिकिम् नीलोत्पलेसरः
43 अन्यपदार्थेऽपि स्वपदार्थद्वयनत्पुरुषोवहुव्रीहिर्वाधेत प्रायोऽन्यपदार्थप्रधानोवहुव्रीहिः अनेकवचनमुपसर्जनार्थम् २
नवैकविभक्तित्वात् २ वहुव्रीहिः समानाधिकरणानाम् ३ अव्ययानांच ४ उच्चैर्मुखमस्य उच्चैर्मुखः तत्पुपमानपूर्व
स्योत्तरपदलोपश्च ५ कण्ठस्थःकालोऽस्य कण्ठकालः उष्ट्रमुखमिवमुखमस्य उष्ट्रमुखः समुदायविकारषष्ठ्याश्च ६
केशसमाहारश्चूडाऽस्य केशचूडः सुवर्णविकारोऽलंकारोयस्य सुवर्णालंकारः प्रादिभ्योधातुजस्यवा ७ प्रपति
तपर्णः प्रपर्णः प्रादिभ्योधातुजस्यवाच्योवाचोत्तरपदलोपः २ कौ सु स व नञोऽस्त्यर्थानाम् ८ अविद्यमानपुत्राः
अपुत्रः नञोऽस्त्यर्थानांवाच्योवाचोत्तरपदलोपः २ कौ सु स व अर्थनियमेमत्वर्थग्रहणम् ९ कर्मवचनेनाऽप्रथमा
याः १ इत्यपरे कर्तृवचनेनापीतिवक्तव्यम् १० सर्वधिकारेऽस्तिक्षीरादिवचनम् ११ सस्तम्भजटकेशेनस्नानाजिनवाससा
समन्ताशितिरन्ध्रेणद्वयोर्हेतौनसिध्यति २ कारिकेयम् १२ संख्याययाऽव्ययासन्नादूराधिकसंख्याः संख्येये कौ सु स
व शेषइतिनिहतम् अव्यय आसन्नः अदूर अधिकासंख्या इत्येतेसंख्येयेयासे संख्यातयासमस्यन्तेसवहुव्रीहिः दशा
नांसमीपेयेसन्ते उपदशाः विंशतेरासन्नाः आसन्नविंशाः त्रिंशतोऽदूरे अदूरत्रिंशाः चत्वारिंशतोऽधिकाः अधिक
चत्वारिंशाः द्वौवात्रयोवा द्वित्राः द्विर्दश द्विर्दश द्विदशाः संख्येयेतिकिम् पञ्चब्राह्मणाः अव्ययेत्यादिकिम् ब्राह्मणा :
पञ्च संख्येयइतिकिम् अधिकाविंशतिर्गवाम् अतिर्ज्ञातेऽर्थेवहुवचनेप्रयोक्तव्यम् १ इतिकेचित् मत्वर्थेसूत्रे
स्यविधानात् १ अयमारम्भइतिभावः कवभावाऽर्थेवा २ द्वौवेत्युक्तेत्रयोवेतिगम्यतेत्रयोवेतिगम्युक्ते द्वौवेतिगम्य. ४३

ते सैषा पञ्चाप्यविद्यानावाक् तत्रयुक्तं बहुवचनम् इति भाष्यम् २६ दिङ्नामान्यन्तराले कौ सू स ब दिशन्नामानि सुबन्ता
न्यन्तराले वाच्ये समस्यन्ते स बहुव्रीहिः दक्षिणस्याः पूर्वस्याश्च दिशोरन्तरालम् दक्षिणपूर्वा पूर्वोत्तरा उत्तरपश्चि
मा नामग्रहणं रूढपरिग्रहार्थम् ऐन्द्र्याश्च कौबेर्याश्च दिशोर्यदन्तरालमिति २७ तत्रतेनेदमितिसरूपे कौ सू स ब
तत्रेति सप्तम्यन्ते सरूपे पदे तेनेति च तृतीयान्ते सरूपे पदे इदमित्येतस्मिन्नर्थे समस्येते स बहुव्रीहिः इतिशब्दो लौकिकवि
वक्षावोधनार्थः तेन कर्मव्यतिहारे युद्धे वाच्ये समासः तत्रापि सप्तम्यन्तस्य ग्रहणविषये तृतीयान्तस्य प्रहरणविषये
केशेषु केशेषु गृहीत्वा इदं युद्धं प्रवृत्तम् केशाकेशि दण्डैश्च दण्डैश्च प्रहृत्येदं युद्धं प्रवृत्तम् दण्डादण्डि इच् कर्मव्यतिहा
रे इति इतिः इच् प्रत्ययः समासान्तः तिष्ठद्गुप्रभृतिषु इच् पाठादव्ययत्वम् अन्येषामपि दृश्यते इति पूर्वपददीर्घः सरूपे किम् हले
श्च मुसलैश्च इदं युद्धं प्रवृत्तम् २८ तेन सहेति तुल्ययोगे कौ सू स ब सह इत्येतदव्ययं तुल्ययोगे वर्तमानं तृतीयान्तेन
सह समस्यते स बहुव्रीहिः पुत्रेण सह सपुत्रः आगतः सच्छात्रः तुल्ययोगे किम् सहैव दशभिः पुत्रैर्भारं वहति गर्दभी अत्र
विद्यमानवाची सहशब्दः तुल्ययोग इति प्रायिकम् तेनान्यत्रापि सकर्मकः सलोमकः सर्वनाम्नो हतिमात्रे अप्रसङ्गादवो वक्त
व्यः १ इष्टिमीष्यकृतः कौ सू स त दक्षिणोत्तरपूर्वाणाम् २९ चार्थे द्वन्द्वः संज्ञाप्रदेशः १।४।२।४।२। कौ। सू स द्व
अनेकं सुबन्तं चार्थे वर्तमानं वा समस्यते स समासो द्वन्द्वसंज्ञः स्यात् समुच्चय अन्वाचय इतरेतरयोग समाहार इत्येते
चार्थाः तत्राद्ययोर्न समासः असामर्थ्यात् इतरेतरयोगे प्लक्षश्च न्यग्रोधश्च प्लक्षन्यग्रोधौ धवश्च खदिरश्च पलाशश्च
धवखदिरपलाशाः समाहारे वाक् च त्वक् च वाक्त्वचम् शमीदृषदम् प्रायेण उभयपदार्थप्रधानो द्वन्द्वः युगपद
धिकरणवचने द्वन्द्वो भवतीति वक्तव्यम् १ तत्र पुंवद्भावप्रतिषेधः २ अधिकान्तासंख्यासंख्येयसमानाधिकरणाधिकर
णाधिकारे ऽधिकलोपश्च ३। ३० उपसर्जनं पूर्वम् कौ सू स अ मासे उपसर्जनं संज्ञकं पूर्वं प्रयोक्तव्यम् अधिहरि

कष्टश्रितः शङ्कुलाखण्डः यूपदारु वृकभयम् राजपुरुषः अक्षशौण्डः ३१ राजदन्तादिषु परम् कौ स स त राज
सू.प. दन्त इत्येवमादिषु उपसर्जनं परं प्रयोक्तव्यं दन्तानां राजा राजदन्तः राजदन्ता अग्रेवणम् लिप्तवासितम् नग्नमुषितं
४४ सिक्तसंमृष्टम् मृष्टलुञ्चितम् अवक्लिन्नपक्वम् अर्पितोप्तम् उन्नगाढम् उलूखलमुसलम् तण्डुलकिण्वम् दृष
44 दुपलम् आरग्वायनबन्धकी चित्ररथबाह्लीकम् अवन्त्यश्मकम् शूद्रार्यम् स्नातकराजानौ विष्वक्सेनार्जुनौ अ
क्षिभ्रुवम् दारगवम् शब्दार्थौ धर्मार्थौ कामार्थौ। अर्थशब्दौ अर्थधर्मौ अर्थकामौ वैकारिमतम् गोजवाजम् गोपा
लधानीपूलासम् पूलासककुरण्डम् स्थूलपूलासम् उशीरबीजम् जिज्ञास्थि सिञ्जास्थम् चित्रास्वाती भार्याप
ती दम्पती जम्पती जायापती पुत्रपती पुत्रपशू केशश्मश्रु शिरोबीजम् शिरोजानु सर्पिर्मधुनी मधुसर्पिषी।
आद्यन्तौ अन्तादी गणहस्ती हस्तिगणौ इत्यादि सूत्रद्वयं भाष्येतनव्याख्यानम् ३२ द्वन्द्वे घि कौ स स द द्वन्द्वसमासे घ्य
न्तं पूर्वं प्रयोक्तव्यम् पटुगुप्तौ हरिशिवौ अनेकप्राप्तावेकस्य नियमोऽनियमः शेषे पटुमृदुशुक्लाः पटुशुक्लमृद
वः द्वन्द्वे किम् विस्पष्टपटुः ३३ अजाद्यदन्तम् कौ स स द स्वरादिह्रस्वाकारान्तं द्वन्द्वे पूर्वं प्रयोक्तव्यम् उष्ट्रखरम् ईश
कृष्णौ बहुष्वनियमः अश्वरथेन्द्राः इन्द्राश्वरथाः तपरकरणं किम् अश्वाहयौ घषाभ्य ३४ अल्पाच्तरम् कौ स स द
स्वल्पाच्कं शब्दस्वरूपं द्वन्द्वे पूर्वं प्रयोक्तव्यम् प्लक्षन्यग्रोधम् बहुष्वनियमः शङ्खदुन्दुभिवीणाः वीणाशङ्खदुन्दुभय
अनेकप्राप्तावेकस्य नियमोऽनियमः शेषे १ कौ स स द पटुमृदुशुक्लाः पटुशुक्लमृदवः ऋतुनक्षत्राणामानु
पूर्व्येण समानाक्षराणाम् २ कौ स स द शिशिरवसन्तौ कृत्तिकारोहिण्यः अभ्यर्हितव ३ कौ स स द मातापित
रौ श्रद्धामेधे लघ्वक्षरम् ४ कौ स स द कुशकाशम् सर्वतएवाभ्यर्हितं पूर्वं निपततीति वक्तव्यम् १ इत्यपरे लघ्वक्षरा
दपि दीक्षातपसी श्रद्धातपसी वर्णानामानुपूर्व्येण ५ कौ स स द ब्राह्मणक्षत्रियविट्शूद्राः भ्रातुर्ज्यायसः ६ कौ ४४

सू स द युधिष्ठिरार्जुनौ संख्यायाअल्पीयस्याः ७ कौ सू स द एकादश द्वादश धर्मादिषूभयम् ८ कौ सू स द
अर्थधर्मौ धर्मार्थौ अर्थकामौ कामार्थौ ३५ सप्तमीविशेषणे बहुव्रीहौ कौ सू स व सप्तम्यन्तं विशेषणं च बहुव्री
हिसमासे पूर्वं प्रयोक्तव्यम् कण्ठेकालः उरसिलोमा विशेषणम् चित्रगुः शबलगुः सर्वनामसंख्ययोरुपसंख्यानम् १
कौ सू स व विश्वदेवाः विश्वयशाः द्विपुत्रः द्विभार्यः संख्यासर्वनाम्नोस्तु बहुव्रीहौ संख्यायाः पूर्वनिपातः शब्दपर
विप्रतिषेधात् द्व्यन्याय त्र्यन्याय वा प्रियस्य २ कौ सू स व प्रियगुडः गुडप्रियः सप्तम्याः पूर्वनिपाते गड्वादिभ्यः पर
वचनम् ३ गडुशिराः तद्वादिभ्यः परा सप्तमी ३ कौ सू स व ३६ निष्ठा कौ सू स व निष्ठान्तं बहुव्रीहौ पूर्वं प्रयोक्त
व्यम् कृतकटः भक्षितभिक्षः ननु च विशेषणमेवात्र निष्ठान्तम् नैष नियमः विशेष्यविशेषणभावस्य विवक्षानिबा
न्धनत्वात् जातिकालसुखादिभ्यः परा निष्ठा २ कौ सू स व शार्ङ्गजग्धी मासजाता सुखजाता दुःखजाता प्रहरणार्थे
भ्यश्च परे निष्ठासप्तम्यौ २ कौ सू स व अस्युद्यतः दण्डपाणिः इन्द्वग्रजादिषु दन्तविप्रतिषेधेन ३ ब्वभाभ्यामप्यावृत
तम् ४ ३७ वाहिताग्न्यादिषु कौ सू स व आहिताग्नि इत्येवमादिषु निष्ठान्तं वा पूर्वं प्रयोक्तव्यम् आहिताग्निः अग्न्याहितः
आहिताग्नि जातपुत्र जातदन्त जातश्मश्रु तैलपीत मद्यपीत ऊढभार्य गतार्थ आकृतिगणोऽयम् तेन। गडुकण्ठ।
अस्युद्यत दण्डपाणिप्रभृतयोऽपि भाष्येऽनेनैव व्याख्यातम् ३८ कडाराः कर्मधारये कौ सू स त कडार इत्येवमादयः
शब्दाः कर्मधारये समासे वा पूर्वं प्रयोक्तव्याः कडारजैमिनिः जैमिनिकडारः कर्मधारये किम् कडारपुरुषो ग्रामः क
डारगडुल खञ्ज खोड काण कुण्ठ खलति गौर वृद्ध भिक्षुक पिङ्गल तनु जठर बधिर मठर कुब्ज वर्बर ए
तेकारादयः कडारादय इति वक्तव्यम् १ इति ५५ सूत्राणि भाष्ये २२२ व्याख्यातानि ॥ इति सूत्रपाठे द्वितीयाध्याय
स्य द्वितीयः पादः १ अनभिहिते कौ सू का अधिकारोऽयम् इतऊर्ध्वं वक्ष्यमाणाद्वितीयाद्याविभक्तयोऽनुक्ते

कर्म्मादीवेप्या कटंकरोति ग्रामंगच्छति अनभिहितेकिम् क्रियतेकटः कर्म्मेसिलट् तिङ्कृत्तद्धितसमासैः परिसं-
सू॰प॰ ख्यानम् १ तिङ् क्रियतेकटः कृत् कृतःकटः तद्धित शौपगवः समास चित्रगुः उत्सर्गेहिप्रातिपदिकसामाना-
४५ धिकरण्यपविभक्तिवचनम् २ कृत्प्रयोगेतुपरत्वात्षष्ठीप्राप्नोतितत्प्रतिषेधार्थमनभिहिताधिकारः कर्तव्यः।कृत
45 थः कटइति सकर्थंकर्तव्यः यथेकत्वादयोविभक्त्यर्थाः अथकर्मादयोविभक्त्यर्थाः नार्थोऽनभिहिताधिकारेण इति
भाष्यम् २ कर्म्मणिद्वितीया कौ सू का ङ्याप्प्रातिपदिकात्स्वादयोवक्ष्यन्ते तेषामर्थेविशेषव्यवस्थाबोधनार्थमिदं
प्रकरणम् अम् औट् शस् इत्येतस्यत्रिकस्यद्वितीयेतिसंज्ञाप्राचाम् अनुक्तेकर्म्मणिद्वितीयास्यात् कटंकरोति
ग्रामंगच्छति समयानिकषाहायोगेषूपसंख्यानम् १ द्वितीयाविधानेऽभितः परितः समयानिकषाऽध्यधिधिग्यो-
गेषूपसंख्यानम् १ इत्येकस्य उभसर्वतसोःकार्य्याधिगुपर्य्यादिषुत्रिषु द्वितीयाम्रेडितान्तेषुततोऽन्यत्रापिदृश्यते १
इत्यपरस्य कौ सू का उभप्रकृतिकतस् उभयतोग्रामम् सर्वप्रकृतिकतस्। सर्वतोग्रामम् धिक् धिग्जाल्मम्।
आम्रेडितान्तेषुउपर्य्यादिषुत्रिषु उपर्युपरिग्रामम् अध्यधिग्रामम् अधोऽधोग्रामम् अभितः परितः समयानिकषाहा-
निकषाहाप्रतियोगेऽपि १ कौ सू का अभितोग्रामम् परितोग्रामम्।समयाग्रामम्।निकषाग्रामम् हादेवदत्तम् बुभुक्षितं
नः प्रतिभातिकिञ्चित् ३ तृतीयाबहोश्छन्दसि कौ वै अ हि टा भ्याम् भिस् इत्येतस्यतृतीयेतिसंज्ञाप्राचाम् जुहोतेरनु-
क्तेकर्म्मणितृतीयास्याद्वेदे चकाराद्द्वितीयापिभवति यवाग्वाऽग्निहोत्रंजुहोति यवागूमग्निहोत्रंजुहोति अग्निहोत्रश-
ब्देनहविरुच्यते छन्दसिकिम् यवागूंजुहोति ४ अन्तरान्तरेणयुक्ते कौ सू का द्वितीयासम्बध्यते नतृतीयाअस्वरि-
तत्वात् अन्तरा अन्तरेण इत्येताभ्यांयोगेद्वितीयास्यात् अन्तरात्वांमांचकमण्डलुः तवममचमध्येइत्यर्थः अन्तरेण
त्वांमांचकमण्डलुः मध्येइत्यर्थः अन्तरेणयत्नंनकिञ्चिल्लभ्यते यत्नंविनेत्यर्थः अन्तराअन्तरेणयुक्तानामप्रधानत्र ४५

हणं कर्तव्यम् । इह कस्मान्न भवति किन्नेवाश्रवणालेकायनानामन्तरेण गतेनेति अपरे त्वनन्तरशब्दोऽव्ययवाची
निपात एव तस्य कोऽन्यः सहायो द्वितीयो भवितुमर्हति अन्यदतो निपातात् इति भाष्यम् ५ कालाध्वनोरत्यन्तसंयो
गे कौ सू का गुणक्रियाद्रव्यैः कालाध्वनोर्निरन्तरसम्बन्धे गम्यमाने कालवाचकादध्ववाचकाच्च द्वितीया स्यात् मासं
कल्याणी मासमधीते मासं गुडधानाः। क्रोशं कुटिला नदी क्रोशमधीते क्रोशं पर्वतः अत्यन्तसंयोगे किम् मासस्य द्वि
रधीते क्रोशस्यैकदेशे पर्वतः अत्यन्तसंयोगे कर्मवद्भावार्थम् १६ अपवर्गे तृतीया कौ सू का अपवर्गः फलप्राप्तिपू
र्विका क्रियापरिसमाप्तिः तत्र कालाध्वनोरत्यन्तसंयोगे तृतीया स्यात्। मासेनानुवाकोऽधीतः। क्रोशेनानुवाकोऽधीतः
अपवर्गे किम्। मासमधीतोऽनुवाकोऽनेन न गृहीतः क्रियापवर्ग इति वक्तव्यम् ।१७। सप्तमीपञ्चम्यौ कारकमध्ये। कौ।
सू। का। ङि। ओस्। सुप्। इत्येतस्य सप्तमीति संज्ञा। ङसि। भ्याम्। भ्यस्। इत्येतस्य पञ्चमीति संज्ञा प्रावाम्। कारकयोर्मध्ये यौ
कालाध्वानौ ताभ्यां सप्तमीपञ्चम्यौ भवतः अद्य भुक्त्वा देवदत्तो द्व्यहे भोक्ता अद्य भुक्त्वा देवदत्तो द्व्यहाद्भोक्ता। कर्तृद्व्यहाद्भो
क्ता कर्तृशक्त्योर्मध्येऽयं कालः। इहस्थ इष्वासः क्रोशे लक्ष्यं विध्यति। इहस्थ इष्वासः क्रोशाल्लक्ष्यं विध्यति कर्तृकर्मकारक
योर्मध्येऽयमध्वा। यथासंख्यान्न। अस्वरितत्वात्। क्रियामध्य इति वक्तव्यम् ।१८। कर्मप्रवचनीययुक्ते द्वितीया। कौ।
सू। का। कर्मप्रवचनीयैर्योगे द्वितीया स्यात् शाकल्यस्य संहितामनुप्रावर्षत्। कर्मप्रवचनीययुक्ते प्रत्यादिभिश्च लक्ष
णादिष्वपसंख्यानम् ।१९। यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी। कौ। सू। का। कर्मप्रवचनीयैर्योगे स्वस्वामिभ्यां
पर्यायेण सप्तमी स्यात् अधिब्रह्मदत्ते पञ्चालाः अधिपञ्चालेषु ब्रह्मदत्तः ।२०। पञ्चम्यपाङ्परिभिः कौ। सू। का। अप।
आङ्। परि। इत्येतैः कर्मप्रवचनीयैर्योगे पञ्चमी स्यात्। अपत्रिगर्तेभ्यो वृष्टो देवः। आपाटलिपुत्रात्। परित्रिगर्तेभ्यः
परिशब्दो वर्जनार्थ एव गृह्यते अपशब्दसाहचर्यात्। तेन लक्षणादिषु न। वृक्षं परि विद्योतते विद्युत् इत्यादिसूत्रद्वये

सू॰प॰ ४८

५८

भाष्येतनव्याख्यातम् ११ प्रतिनिधिप्रतिदानेचयस्मात् कौ सु का मुख्यसदृशः प्रतिनिधिः दत्तस्यप्रतिनिर्यातनंप्रतिदानम्
यस्मात्प्रतिनिधिर्यतश्चप्रतिदानंतत्रकर्मप्रवचनीययुक्तेपञ्चमीस्यात् प्रद्युम्नः कृष्णात्प्रति तिलेभ्यःप्रतियच्छतिमाषान्
१२ गत्यर्थकर्मणिद्वितीयाचतुर्थ्यौचेष्टायामनध्वनि कौ सु का अध्वभिन्नेगत्यर्थानांधातूनांकर्मणिद्वितीयाचतुर्थ्यौ भवतः
चेष्टायांसत्याम् ग्रामंगच्छति गत्यर्थेतिकिम् ओदनंपचति कर्मणीतिकिम् अश्वेनगच्छति चेष्टायांकिम् मनसाम
हरिंगच्छति अनध्वनीतिकिम् अध्वानंगच्छति अध्वन्यर्थग्रहणंकर्तव्यम् १ इहमाभूत्। पथ्यानंगच्छति आस्थितप्रति
षेधश्च २ इहनिषेधोमाभूत् उत्पथेनपथेगच्छति असंप्राप्तेकर्मणिद्वितीयाचतुर्थ्यौभवतइतिवक्तव्यम् ३ इहमाभूत्
स्त्रियंगच्छति अजांनयतीति इदानीमनध्वनीतिनवक्तव्यम् असंप्राप्तेकर्मणिचतुर्थीविधानात्।षष्ठ्यः प्राप्तकर्म
त्वात् १३ चतुर्थीसंप्रदाने कौ सु का ङेः भ्याम् भ्यस् इत्येतस्यचतुर्थीतिसंज्ञाप्राचाम् संप्रदानेचतुर्थीस्यात् विप्रायगां
ददाति देवदत्तायरोचते पुष्पेभ्यःस्पृहयति चतुर्थीविधानेतादर्थ्यउपसंख्यानम् १ यूपायदारु कुण्डलायहिरण्यम्
क्लृपिसंपद्यमाने २ मूत्रायकल्पतेयवागूः उच्चारायसंपद्यतेऽन्नम् उत्पातेनज्ञाप्यमाने ३ वातायकपिलाविद्युत् तादर्थ्येचतुर्थी
वाच्या १ कौ सु का। क्लृपिसंपद्यमानेच २ कौ सु का उत्पातेनज्ञापितेच ३ कौ सु का हितयोगेच ४ कौ सु का ब्राह्म
णायहितम् १४ क्रियार्थोपपदस्यचकर्मणिस्थानिनः कौ सु का क्रियाफलकक्रियावाचकमुपपदंयस्यतस्य
तुमुनस्याप्रयुज्यमानस्यकर्मणिचतुर्थीस्यात् फलेभ्योयाति फलान्याहर्तुंयातीत्यर्थः क्रियार्थोपपदस्यकिम्
प्रविशपिण्डीम् फलेभ्योयातिशकटेन स्थानिनःकिम् फलान्याहर्तुंयाति इत्यादिसूत्रद्वयेभाष्येतनव्याख्यातम् १५
तुमर्थाच्चभाववचनात् कौ सु का तुमुनासमानार्थाद्भाववचनप्रत्ययान्ताच्चतुर्थीस्यात् भाववचनादितिकिम् कारको
व्रजति १६ नमःस्वस्तिस्वाहास्वधालंवषड्योगाच्च कौ सु का नमः स्वस्ति स्वस्तिप्रजाभ्यः स्वाहाग्नये स्वधापितृभ्यः ४८

अलं मल्लो मल्लाय वषडिन्द्राय। वषडिन्द्राय स्वस्तियोगे चतुर्थ्यौ कुशलार्थैराशिषि वा विधानादेव तिविप्रतिषेधेन १ सर्वे वि
प्रतिषेधौ ऽयम्। स्वस्तिगोभ्यो भूयात्। अलमिति पर्याप्त्यर्थे ग्रहणम्। २। कौ। सू। का। प्रभुर्मल्लो मल्लाय। शक्तो मल्लो म
ल्लाय। प्रभवति मल्लो मल्लाय ९ मन्यकर्मण्यनादरे विभाषाप्राणिषु कौ। सू। का। मन ज्ञाने। इत्येतस्य प्राणिवर्जिते
कर्म्मणि चतुर्थी वा स्यात् तिरस्कारे गम्यमाने पक्षे द्वितीया न त्वां तृणाय मन्ये न त्वां तृणं मन्ये मन्ये इति किम् न त्वां तृ
णं विनायाति श्यना निर्देशान्मनुते योगे वायं नेति तनादिपठितेनात्र शप्लवते न त्वां तृणं मन्वे अनादरे किम्। मन्ये काष्ठ
मलु त्वलम्। मन्यकर्म्मणि प्रकृष्टकुत्सितग्रहणम् १ नेह त्वां तृणं मन्ये पदे तदप्राणिष्वित्येतदनावादिष्विति वक्त
मि २ नौ काक अन्न शुक शृगाल एतेनावादयः अप्राणिष्वित्यपनीय नौ काकान्न शुक शृगालवर्ज्येष्विति वाच्यम् १
कौ। सू। का। न त्वां नावं नमन्ये न त्वां काकं मन्ये। न त्वामन्नं मन्ये न त्वां शुकं मन्ये इति ९ सूत्राणि भाष्ये २ ३। ।। व्याख्या
तानि ९ कर्तृकरणयोस्तृतीया कौ। सू। का। अनुक्ते कर्त्तरि करणे च तृतीया स्यात्। देवदत्तेन पच्यते। देवदत्तेन कृतम् कर
णे। दात्रेण लुनाति प्रकृत्यादिभ्य उपसंख्यानम् ।। कौ। सू। का। प्रकृत्यादयो दर्शनीयाः। प्रायेण याज्ञिकः प्रकृति। प्राय। गो
त्र। सम। विषम। द्विद्रोण। पञ्चक। साहस्र। एते प्रकृत्यादयः ९ सहयुक्ते ऽप्रधाने। कौ। सू। का। सहार्थैक शब्द मात्र ग्रहणे
न युक्ते ऽप्रधाने तृतीया स्यात्। पुत्रेण सहागतः पिता सहार्थक शब्द मात्र ग्रहणम्। पुत्रेण सम स्थूलः। पुत्रेण सार्द्धं य
नवान् पितुरत्र क्रियासम्बन्धः साक्षाच्छब्देनोच्यते। पुत्रस्य तु प्रतीयमान इति पुत्रस्या ऽप्राधान्यम् सहार्थ शब्द प्रयोगं वि
नापि तृतीया। वृद्धो यूना इति निर्देशात्। उपपदविभक्तेः। कारकविभक्तिर्बलीयसी १ परिभाषेयम् २। येनाङ्गविकारः
कौ। सू। का। येनाङ्गेन विकृतेनाङ्गिनो विकारो लक्ष्यते ततस्तृतीया स्यात् अक्ष्णा काणः पादेन खञ्जः। अङ्ग विकारः किं
अक्षि काणमस्य अङ्गाद्विकृतात् तद्विकारस्येदङ्गिनो वचनम् ।। तत्तर्हि वक्तव्यम्। न वक्तव्यम्। अङ्गशब्दो ऽयं समुदा

सू॰प॰ ४८

47

यशब्दाः इतिभाष्यम् अङ्गान्यस्य सन्तीत्यर्शआदित्वादच्प्रत्ययान्तोऽयाङ्गशब्दो निर्दिश्यते। न ह्यविकृतेनाङ्गेनाङ्गिनो विका
रो द्योतयितुं शक्यते इति कैय्यटः २१ इत्थंभूतलक्षणे कौ सु का केनचित्प्रकारेण प्राप्तमित्थंभूतः तस्य विहोत्तृतीयास्यात् ज
टाभिस्तापसः इत्थंभूतस्य लक्षणेन तत्स्येष प्रतिषेधः १ अपि भवान् कमण्डलुपाणिं छात्रमद्राक्षीदिति। न कथं कथम्
यत्रेत्थंभूतस्य पृथग्भूतमूलक्षणेन त्वभावितव्यम्। इतिभाष्यम्। कमण्डलुशब्दात्तृतीयाप्रीति इति कैय्यटः वस्तुतस्तु
कमण्डलुपाणिशब्दात्तृतीयापत्तिः कमण्डलुशब्दात्तृतीयोत्पत्तावपि यन्न प्रयतिततत्र्यायेन सुयोधातितिलुकि दोषा
भावात् २२ संज्ञोऽन्यतरस्यां कर्म्मणि कौ सु का ज्ञाश्ववबोधने। इत्येतस्य संशब्दस्य कर्म्मणि तृतीया वा स्यात्। यक्षेद्वि
तीया। पित्रा संजानीते पितरं संजानीते २३ हेतौ। हौ। कौ। सु। का। फलसाधनयोग्यः पदार्थो हेतुः। तत्र तृतीया स्यात्।
धनेन कुशलम् विद्यया यशः निमित्तकारणहेतुषु सर्वासां प्रायदर्शनम् १ किंनिमित्तं वसति। केन निमित्तेन। क
स्मै निमित्ताय। कस्मान्निमित्तात्। कस्य निमित्तात्। कस्य निमित्तस्य। कस्मिन्निमित्ते एवं किं कारणमित्यादि। प्रायग्रहणादसर्वना
म्नः प्रथमाद्वितीयेन भवतः निमित्तपर्य्यायप्रयोगे सर्वासां प्रायदर्शनम् कौ सु का २४ अकर्तर्य्यृणे पञ्चमी कौ सु का पूर्व
सूत्रापवादः कर्तृवर्जितं यदृणं हेतुभूतं ततः पञ्चमी स्यात् शताद्बद्धः अकर्तरीति किम् शतेन बन्धितः। शतमृणं भ
वति। प्रयोजकत्वात्कर्तृसंज्ञं च। इत्यादि स्त्रूत्रवत्त्वे भाष्ये व्याख्यातम् २५ विभाषा गुणेऽस्त्रियाम्। कौ। सु। का। स्त्री
लिङ्गभिन्ने गुणे हेतौ पञ्चमी वा स्यात्। पक्षे तृतीया। जाड्याद्बद्धः जाड्येन बद्धः गुणे किम् धनेन कुलम्। प्रज्ञया मुक्तः २६
षष्ठी हेतुप्रयोगे कौ। सु। का। हेतुशब्दस्य प्रयोगे हेतौ द्योत्ये षष्ठी स्यात्। अन्नस्य हेतोर्वसति २७। सर्वनाम्नस्तृतीया च।
कौ। सु। का। सर्वनामसंज्ञकस्य हेतुशब्दस्य प्रयोगे हेतौ द्योत्ये तृतीया स्यात्। चकारात्षष्ठी। केन हेतुना वसति। कस्य
हेतोर्वसति २८ अपादाने पञ्चमी कौ। सु। का। अपादाने पञ्चमी स्यात्। ग्रामादागच्छति। हस्तिकाद्बिभेति। अध्ययनाम ४८

राजयते यज्ञ्वामीवियानेल्यब्लोपेकर्म्मण्युपसंख्यानम् ॥ल्यबन्तस्याप्रयोगेऽयमर्थः प्रासादात्प्रेक्षते प्रासादमारुह्येत्यर्थः अपि
करणे च २ आसनात्प्रेक्षते आसने उपविश्येत्यर्थः। ल्यब्लोपे कर्म्मण्यधिकरणे च २ कौ। स्वा। का। प्रश्नाख्यानयोश्च ३। कुतो भवान्
पाटलिपुत्रात् यतश्चाध्वकालनिर्म्माणम् ४ तद्युक्तात्काले सप्तमी ५ अध्वनः प्रथमा च ६। यतश्चाध्वकालनिर्म्माणं तत्र पञ्च
मी तद्युक्तादध्वनः प्रथमासप्तम्यौ कालात्सप्तमी च वक्तव्या २ कौ स्व का वनाद्ग्रामो योजने योजनं वा। कार्त्तिक्या आग्रहायणी
मासे। तत्र हीदं वक्तव्यम्। अपादान इत्येव सिद्धम्। इति भाष्यम् २९ अन्यारादितरर्त्तेदिक्शब्दाञ्चूत्तरपदाजाहियुक्ते कौ
स्व का अन्य आरात् इतर ऋते दिक्शब्द अञ्चूत्तरपद आच् आहि इत्येतैर्युक्ते पञ्चमी स्यात् अन्य इत्यर्थकशब्दग्रहणं
इतरग्रहणं स्पष्टार्थम् अन्यो देवदत्तात्। भिन्नो देवदत्तात्। आराद्देवदत्तात् इतरो देवदत्तात् ऋते देवदत्तात् दिशि दृष्टः शब्दो दि
क्शब्दः तेन देशकालवाचिनोऽपि भवति। पूर्वो ग्रामात्। चैत्रो मैत्रात्पूर्वदेशे। चैत्रात्पूर्वः फाल्गुनः अञ्चूत्तरपद प्राग्ग्रामात्
ननु चायमपि दिक्शब्द एव। षष्ठ्यतसर्थप्रत्ययेनेति षष्ठीं वक्ष्यति तद्बाधनार्थमिदम् आच् दक्षिणा ग्रामात् आहि दक्षि
णाहि ग्रामात् ३० षष्ठ्यतसर्थप्रत्ययेन कौ स्व का ङस् ओस् आम् इत्येतस्य षष्ठीति संज्ञा प्राचाम् अतस् च् इत्येतदर्थक
प्रत्ययान्तेन योगे षष्ठी स्यात्। दक्षिणतो ग्रामस्य उपरि ग्रामस्य पुरस्ताद्ग्रामस्य अतस्ग्रहणं किमर्थम् इह माभूत् प्रा
ग्ग्रामात् अञ्चूत्तरपदस्याप्येतत्प्रयोजनमुक्तम्। तेनान्यतरस्याङ्ग्रहणमवक्तव्यम्। इति भाष्यम् ३१ एनपा द्वितीया कौ स्व का ए
नप्सूत्राऽपवादः। एनप्। इत्येतदन्तेन युक्ते द्वितीया स्यात् दक्षिणेन ग्रामम्। षष्ठ्यपीष्यते। दक्षिणेन ग्रामस्य। तदर्थयोग
विभागः कर्त्तव्यः। भाष्ये तु नेदं व्याख्यातम् ३२ पृथग्विनानानाभिस्तृतीयाऽन्यतरस्याम् कौ। स्वा। का। पृथक्। विना। ना
ना। इत्येतैर्योगे तृतीया स्यात्। द्वितीयापञ्चम्यौ च। पृथग्देवेन पृथग्देवम् पृथग्देवात् विनादेवेन विनादेवात् नानादे
वेन नानादेवेन नानादेवम् ३३ करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्त्ववचनस्य कौ स्व का स्तोक अल्प कृच्छ्र

कतिपय। इत्येतेभ्योऽसत्ववचनेभ्यः करणे तृतीयापञ्चम्यौ भवतः। स्तोकेन मुक्तः। अल्पेन मुक्तः। स्तोकान्मुक्तः। अल्पान्मुक्तः। कृ-
च्छ्रेण मुक्तः। कृच्छ्रान्मुक्तः। कतिपयेन मुक्तः। कतिपयान्मुक्तः। असत्ववचनस्येति किम्। स्तोकेन मतः। करणे किम्। क्रियाविशे-
षणे कर्म्मणि मा भूत्। स्तोकं चलति। इत्यादिसूत्रद्वयं भाष्येण न व्याख्यातम् ३४ दूरान्तिकार्थैः। षष्ठ्यन्यतरस्याम्। कौ। सू। का। दूरार्थैर-
न्तिकार्थैश्च योगे षष्ठीपञ्चम्यौ भवतः। दूरं ग्रामस्य। दूरं ग्रामात्। अन्तिकं ग्रामस्य। अन्तिकं ग्रामात्। अन्यतरस्यांग्रहणं पञ्चम्यर्थं
अन्यथा तृतीयापि स्यात् ३५ दूरान्तिकार्थेभ्यो द्वितीया च। कौ। सू। का। दूरार्थेभ्योऽन्तिकार्थेभ्यश्च द्वितीया स्यात्। चकारात्पञ्च-
मीतृतीये भवतः दूरं ग्रामस्य दूराद्ग्रामस्य। दूरेण ग्रामस्य। अन्तिकं ग्रामस्य। अन्तिकाद्ग्रामस्य। अन्तिकेन ग्रामस्य। प्रातिपदि-
कार्थमात्रे विधिरयम्। असत्ववचनस्येत्यनुवर्त्तते। तेनेह न भवति। दूरः पन्थाः। दूरान्तिकार्थेभ्यः पञ्चमीविधाने तस्मात्प-
ञ्चमीप्रतिषेधः २। तत्रापि दर्शनात्पञ्चम्याः प्रतिषेधोऽनर्थकः। इति भाष्यम् ३६ सप्तम्यधिकरणे च। कौ। सू। का। ङि। ओ-
स्। सुप्। इत्येतस्य सप्तमीति संज्ञा प्रागेवाम्। अधिकरणे सप्तमी स्यात्। चकाराद्दूरान्तिकार्थेभ्योऽपि। कटे आस्ते। दूरान्तिकार्थेभ्यः।
दूरे ग्रामस्य। अन्तिके ग्रामस्य। द्वितीयातृतीयासप्तमीपञ्चमी। इत्येताश्चतस्रो विभक्तयो दूरान्तिकार्थेभ्यो भवन्ति। क्तस्येन्विषय-
स्य कर्म्मण्युपसंख्यानम् १। कौ। सू। का। अधीती व्याकरणे। साध्वसाधुप्रयोगे च २ कौ। सू। का। साधुः कृष्णो मातरि। असाधुर्मा-
तुले। कारकार्हाणां च कारकत्वे ३ ऋद्धेषु भुञ्जानेषु दरिद्रा आसते अकारकार्हाणां चाकारकत्वे ४ वृषलेष्वासीनेषु ब्राह्मणा-
स्तरन्ति तद्विपर्यासे च ५ दरिद्रेषु भुञ्जानेषु ऋद्धा आसते। ब्राह्मणेष्वासीनेषु वृषलास्तरन्ति। अर्हाणां कर्तृत्वेऽनर्हाणामक-
र्तृत्वे तद्वैपरीत्ये च ६ कौ। सू। का। निमित्तात्कर्म्मसंयोगे ७ कौ। सू। का। निमित्तं फलम्। संयोगः संबन्धः। चर्म्मणि द्वीपिनं हन्ति
दन्तयोर्हन्ति कुञ्जरम्। केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः १। ३७। यस्य च भावेन भावलक्षणम्। कौ। सू। का। यस्य क्रि-
यया क्रियान्तरं लक्ष्यते ततो भाववतः सप्तमी स्यात्। प्रसिद्धा च क्रिया अप्रसिद्धां क्रियां लक्षयति। गोषु दुह्यमानासु गतः। दु-

ग्यास्वागतः भावेनेति किम्। यो जटालिः स भुङ्क्ते। पुनर्भावग्रहणं किम्। यो भोक्ता स देवदत्तः। भावलक्षणे सप्तमी विधा
नेऽपि भावलक्षण उपसंख्यानम् १ सिद्धन्तु भावप्रवृत्तौ। यस्य भावारम्भवचनात् २। सूत्रं तर्हि भिद्यते यथान्यासमेवास्तु। न वे
त्ववश्यं तदेव लक्षणं भवति येन पुनः प्रवर्त्स्यते। सकृदपि प्रवृत्तिमित्त्वाय कल्पते तदपि लक्षणम्। इति भाष्यम्। ३८
षष्ठी चानादरे। कौ। स। का। अनादराधिके भावलक्षणे भाववतः षष्ठी स्यात्। चकारात्सप्तमी च भवति रुदतः प्राव्राजीत्। रुद
ति प्राव्राजीत्। रुदन्तं पुत्रादिकमनादृत्य प्रव्रजित इत्यर्थः। इत्यादिसूत्रवक्तृहृदयं भाष्येण व्याख्यातम्। ३९ स्वामीश्वराधि
पतिदायादसाक्षिप्रतिभूप्रसूतैश्च। कौ। स। का। स्वामिन्। ईश्वर। अधिपति। दायाद। साक्षिन्। प्रतिभू। प्रसूत। इत्ये
तैर्योगे षष्ठीसप्तम्यौ भवतः गवां स्वामी गोषु स्वामी। गवामीश्वरः। गोष्वीश्वरः। गवामधिपतिः गोष्वधिपतिः। गवां दा
यादः गोषु दायादः। गवां साक्षी। गोषु साक्षी। गवां प्रतिभूः। गोषु प्रतिभूः। गवां प्रसूतः। गोषु प्रसूतः ४० आयुक्त
कुशलाभ्यां चासेवायाम्। कौ। स। का। आयुक्त। कुशल। इत्येताभ्यां योगे षष्ठीसप्तम्यौ भवतः तात्पर्ये गम्यमाने। आयुक्तः क
टकरणस्य। आयुक्तः कटकरणे। आयुक्तो व्यापारितः। कुशलः कटकरणस्य। कुशलः कटकरणे। कुशलो निपुणः
आसेवायामिति किम्। आयुक्तो गौः शकटे। ईषद्युक्त इत्यर्थः। अत्र सप्तम्येवाऽधिकरणे भवति ४१ यतश्च निर्धारणम्
कौ। स। का। जातिगुणक्रियासंज्ञाभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणम्। यतो भवति तस्मात् षष्ठीस
प्तम्यौ भवतः। मनुष्याणां क्षत्रियः शूरतमः। मनुष्येषु क्षत्रियः शूरतमः गवां कृष्णा बहुक्षीरा गोषु कृष्णा बहुक्षी
रा अध्वगानां धावन्तः शीघ्रतमाः अध्वगेषु धावन्तः शीघ्रतमाः। छात्राणां मैत्रः पटुः। छात्रेषु मैत्रः पटुः ४२ पञ्चमी
विभक्ते कौ स का। विभागो विभक्तम्। निर्धार्यमाणस्य भेदे यस्मान्निर्धारणं ततः पञ्चमी स्यात्। माथुराः पाटलि
पुत्रकेभ्य आढ्यतराः। इह कस्मान्न भवति। कृष्णा गवां संपन्नक्षीरतमेति। विभक्तमेव यन्नित्यं तत्र भवितव्यम्। विभक्तश्च

हणसामर्थ्यात्। इति भाष्यम् ४३ साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः कौ। सा। का। साधु। निपुण। इत्येताभ्यां योगे पूजा
सू.प. ४५ यां गम्यमानायां सप्तमी स्यात्। प्रतिशब्दप्रयोगे तु न भवति मातरि साधु मातरि निपुणः। अर्चायां किम्। साधुर्भृत्यो
राज्ञः इह पथ्यार्थकथनेन तात्पर्यम्। अप्रतेरिति किम्। साधुर्देवदत्तो मातरं प्रति अप्रत्यादिभिरिति वक्तव्यम्॥ कौ। सा।
का। साधुर्देवदत्तो मातरं परि मातरमनु प्रति परि अनु एते प्रत्यादयः ४४ प्रसितोत्सुकाभ्यां तृतीया च कौ। सा। का
प्रसित। उत्सुक। इत्येताभ्यां योगे तृतीया स्यात्। चकारात्सप्तमी। केशैः प्रसितः। केशेषु प्रसितः। केशरचनातत्परः इत्यर्थः
केशैरुत्सुकः। केशैरुत्सुकः। केशेषूत्सुकः ४५ नक्षत्रे च लुपि। कौ। सा। का। लुबन्तान्नक्षत्रशब्दादधिकरणे तृती
यासप्तम्यौ भवतः। पुष्येण पायसमश्नीयात्। पुष्ये पायसमश्नीयात्। लुबविशेषे इति अणो लुप्। नक्षत्रे किम्। प
ञ्चालेषु वसति। लुपीति किम्। मघासु ग्रहः। अधिकरणमवृत्तिः किम्। अद्य पुष्यः। इति २८ सूत्राणि भाष्ये २।३।
२। व्याख्यातानि ४६ प्रातिपदिकार्थलिङ्गपरिमाणवचनमात्रे प्रथमा। कौ। सा। का। सु। औ। जस्। इत्येतस्य प्रथमा इति
संज्ञाशवाम्। अवधारणार्थो मात्रशब्दः प्रत्येकं सम्बध्यते। प्रातिपदिकार्थमात्रे लिङ्गमात्रे परिमाणमात्रे वचनमात्रे च प्र
थमा स्यात्। अत्र प्रवृत्तिनिमित्ते तदाश्रयस्य प्रातिपदिकार्थः। अलिङ्गमव्ययेलिङ्गप्रवृत्तिनिमित्तकाः प्रमादय उदाह
रणम्। उच्चैः। नीचैः। पुमान्। स्त्री। नपुंसकम्। लिङ्गं पुंस्त्रीनपुंसकाख्यम्। हवः। कुमारी। कुलम्। तटः। तटी। तटम्
परिमाणं परिच्छेदकम्। द्रोणः। खारी। आढकम्। वचनं संख्या एकः। द्वौ। बहवः। उक्तेष्वेकत्वादिषु प्रथमा या
अप्राप्तौ वचनग्रहणम्। प्रातिपदिकग्रहणे निपातस्यानर्थकस्य प्रातिपदिकत्वमुक्तं ततोऽपि प्रथमा यथा स्यात्। अ
ध्यागच्छति। पदसामानाधिकरण्ये उपसंख्यानमधिकान्नक्षत्रशब्दादधिकरणे तृतीयासप्तम्यौ भवतः। पुष्येण पा
यसमश्नीयात्। लुबविशेषे इति अणो लुप्। नक्षत्रे किम्। पञ्चालेषु वसति। लुपीति किम्। मघासु ग्रहः। अधिकर॰ ६२

णान्नुवृत्तिः। किम्। अग्रपूष्यः इति ४८ सूत्राणि भाष्ये २।३।२। व्याख्यातानि ४६ प्रातिपदिकार्थलिङ्गपरिमाणवचनमा
त्रे प्रथमा। कौ। सु। का। सु। औ। जस्। इत्येतस्य प्रथमा इति संज्ञा प्राचाम्। अवधारणार्थो मात्रशब्दः प्रत्येकं सम्बध्यते। प्राति
पदिकार्थमात्रे लिङ्गमात्रे परिमाणमात्रे वचनमात्रे च प्रथमा स्यात्। अत्र प्रवृत्तिनिमित्तं तदाश्रयश्च प्रातिपदिकार्थः। अलि
ङ्गमव्यये लिङ्गप्रवृत्तिनिमित्तकाः। पुमादयस्तूदाहरणम्। उच्चैः। पुमान्। स्त्री। नपुंसकम्। लिङ्गे पुंस्त्रीनपुंसकाख्यम्।।
वृक्षः। कुमारी। कुलम्। तटः। तटी। तटम्। परिमाणे परिच्छेदकम्। द्रोणः। खारी। आढकम्। वचने संख्या। एकः।
द्वौ। बहवः। उक्तेष्वप्येकत्वादिषु प्रथमायाः अप्राप्तौ वचनग्रहणम्। प्रातिपदिकग्रहणे निपातस्यानर्थकस्य प्रातिपदिक
त्वमुक्तं ततोऽपि प्रथमा यथा स्यात्। अव्यापदसामानाधिकरण्ये उपसंख्यानमधिकत्वात्।। अभिहिते प्रथमा २
इति वा तिङ्समानाधिकरणे प्रथमा २ पूर्वं ह्यपवादा अभिनिविशन्ते पश्चादुत्सर्गाः १ उपजनिष्यमाणनिमित्तो उ
प्यपवाद उपसंजातनिमित्तमप्युत्सर्गं बाधते २ प्रकल्प्य वापवादविषयं तत उत्सर्गोऽभिनिविशते ३ अपवादो यद्यप्यन्य
त्र चरितार्थस्तर्ह्यन्तरङ्गेण बाध्यते ४ परिभाषा इमाः ४७ सम्बोधने च। कौ। सु। का। सम्बोधनमभिमुखीकरणम्।
तत्र प्रथमा स्यात्। हे देव। हे देवौ। हे देवाः। इत्यादि सूत्रत्रयं भाष्ये तु न व्याख्यातम् ४८ सामन्त्रितम् संज्ञाप्रदेशाः ६।१।
२९८।८।१।७२। कौ। सु। हा। पु। सम्बोधने या प्रथमा तदन्तमामन्त्रितसंज्ञं स्यात्। हे देव ४९ एकवचने सम्बुद्धिः संज्ञाप्रदेशः
६।१।६९।७।३।१०६। कौ। सु। अ। पु। सम्बोधने प्रथमाया एकवचनं सम्बुद्धिसंज्ञं स्यात्। हे हरे। हे पटो ५० षष्ठी शेषे।
कौ। सु। का। कर्मादिकारकेभ्योऽन्यः प्रातिपदिकार्थव्यतिरिक्तः स्वस्वामिसम्बन्धादिः शेषः। तत्र षष्ठी स्यात्। राज्ञः
पुरुषः। पशोः सेवनम्। पितुः पुत्रः। षष्ठीशेष इति वक्ति शेषस्य प्रतिषेधः ।५१।। ज्ञोऽविदर्थस्य करणे कौ। सु। का।
जानातेरज्ञानार्थस्य करणे शेषत्वेन विवक्षिते षष्ठी स्यात्। सर्पिषो जानीते। सर्पिषा करणभूतेन प्रवर्तते इत्यर्थः।।

अविदर्थस्य किम्। स्वरेण पुत्रं जानाति भाष्ये तु नेदं व्याख्यातम् ५२ अधीगर्थदयेशां कर्म्मणि कौ। सू। का। अधीगर्थः
सि॰प॰ स्मरणार्थाः। दयदानगतिहिंसादानेषु ईश ऐश्वर्य्ये। एतेषां कर्म्मणि शेषत्वेन विवक्षिते षष्ठी स्यात्। मातुः स्मरति। सर्पि
५० षो दयते। सर्प्पिष ईष्टे। कर्म्मणीति किम्। मातुर्गुणैः स्मारति। शेष इत्येव। मातरं स्मारति। कर्म्मादिषु कर्म्मकवद्वचनम्
50 १। ५३। कृञः प्रतियत्ने। कौ। सू। सतो गुणान्तराधानं प्रतियत्नः। डुकृञ्। इत्येतस्य कर्म्मणि शेषत्वेन विवक्षिते षष्ठी स्या
त्प्रतियत्ने गम्यमाने। एधोदकस्योपस्कुरुते शेष इत्येव एधोदकमुपस्कुरुते। भाष्ये तु नेदं व्याख्यातम् ५४ रुजार्था
नां भाववचनानामज्वरेः। कौ। सू। का। रोगार्थानां धातूनां भावकर्तृकाणां ज्वरिभिन्नानां कर्म्मणि शेषत्वेन विवक्षिते
षष्ठी स्यात् चौरस्य रुजति रोगः। रुजार्थानां किम्। एति जीवन्तमानन्दः भाववचनानां किम्। नदीकूलानि रुजति। अ
ज्वरेः किम्। चौरं ज्वरयति ज्वरः। अज्वरिसंताप्योरिति वक्तव्यम् १। कौ। सू। का। चौरं संतापयति ५५ आशिषि नाथः। कौ
सू। का। नाथृ। इत्येतस्य आशीरर्थस्य कर्म्मणि शेषत्वेन विवक्षिते षष्ठी स्यात्। सर्प्पिषो नाथते। मधुनो नाथते आशि
षि किम्। राजानमुपनाथति। याचत इत्यर्थः नाथः किम्। तं जीव इत्यादि सूत्रपञ्चकं भाष्ये तु न व्याख्यातम् ५६ जासिनि
प्रहणनाटक्राथपिषां हिंसायाम् कौ सू का जासि निप्रहण। नाट। क्राथ। पिषा इत्येतेषां हिंसार्थकानां कर्म्मणि
शेषत्वेन विवक्षिते षष्ठी स्यात्। जसु। इति चुरादिर्दृश्यते। चौरस्योज्जासयति। निप्र इत्येतौ संहतौ विपर्य्यस्तौ व्यस्तौ वा दृश्ये
ते। चौरस्य निप्रहन्ति। चौरस्य प्रणिहन्ति चौरस्य निहन्ति चौरस्य प्रहन्ति। णट। वृषलस्योन्नाटयति। क्रथ। वृषलस्य
क्राथयति। णटक्रथोर्घटादयो मित इति मित्वे पिनि यातनाद्धिः पिषॢ। चौरस्य पिनष्टि हिंसायां किम्। धानाः पि
नष्टि। एतेषां किम्। चौरं हिनस्ति ५७ व्यवहृपणोः समर्थयोः। कौ। सू। का। व्यवहृ। पण। इत्येतयोस्तुल्यार्थयोः कर्म्म
णि शेषत्वेन षष्ठी स्यात् द्यूते क्रयविक्रयव्यवहारे तुल्यार्थावेतौ शतस्य व्यवहरति शतस्य पणते। समर्थयोः किं ५०

शलाकां व्यवहरति। विजिगीषतीत्यर्थः ५८ दिवस्तदर्थस्य कौ सू का दिव् इत्येतस्य द्यूतार्थस्य क्रयव्यवहारार्थस्य च कर्म्म
णि षष्ठी स्यात्। शतस्य दीव्यति तदर्थस्य किम् ब्राह्मणं दीव्यति। स्तौतीत्यर्थः॥ योगविभाग उत्तरार्थः ५९ विभाषोपसर्गे
कौ सू। का। पूर्वसूत्रेण नित्ये प्राप्ते विकल्पोऽयम्। उपसर्गे सति दिवः कर्म्मणि षष्ठी वा स्यात्। शतस्य प्रदीव्यति पक्षे द्विती
या। शतं प्रदीव्यति। उपसर्गे किम्। शतस्य दीव्यति तदर्थस्येत्येव शलाकां प्रतिदीव्यति ६० द्वितीया ब्राह्मणे। कौ। वै। अ
हि। दिवस्तदर्थस्येत्यस्यापवादः ब्राह्मणे मन्त्रभिन्नो वेदः। तत्र दिवः कर्म्मणि द्वितीया स्यात्। गामस्य तदहः। सभाया
दीव्येयुः ६१ प्रेष्यब्रुवोर्हविषो देवतासम्प्रदाने। कौ। सू। का इषगतौ ब्रूञ्। इत्येतयोर्धात्वोर्लोण्मध्यमपुरुषैकवचनान्त
योर्देवतासंप्रदानेऽर्थे वर्तमानयोर्हविषः कर्म्मणः षष्ठी स्यात् अग्नये छागस्य हविषो वपाया मेदसः प्रेष्य। अनुब्रूहि
वा प्रेष्यब्रुवोः किम्। अग्नये छागं हविर्वपां मेदो जुहुधि हविषः किम्। अग्नये गोमयानि प्रेष्य देवतासंप्रदाने किम्
माणवकाय पुरोडाशान् प्रेष्य हविषोऽप्रस्थितस्य । इन्द्राग्निभ्यां छागं हविर्वपां मेदः प्रस्थितं प्रेष्य ६२ चतुर्थ्यर्थे बहु
लं छन्दसि। कौ। वै। अ। हि। चतुर्थ्यर्थे षष्ठी वा स्याद्वेदे पक्षे चतुर्थी पुरुषमृगश्चन्द्रमसः। पुरुषमृगश्चन्द्रमसे दात
व्य इत्यर्थः बहुलं किम् हिमवते हस्ती षष्ठ्यर्थे चतुर्थी (या खर्वेण पिबति तस्यै खर्वः। तस्या इत्यर्थः ६३ यजेश्च कर
णे कौ वै अ हि यज इत्येतस्य धातोः करणे षष्ठी वा स्याद्वेदे आग्नेयस्य घृतस्य यजते घृतेन यजते इत्यादि सूत्रद्वया
भाष्ये तत्प्रत्याख्यातम् ६४ कृत्वोऽर्थप्रयोगे कालेऽधिकरणे कौ सू का कृत्वोऽर्थानां प्रयोगे कालेऽधिकरणे षष्ठी
स्यात् पञ्चकृत्वोऽह्नो भुङ्क्ते द्विरह्नोऽधीते कृत्वोऽर्थग्रहणं किम् अहनि शेते प्रयोगग्रहणं किम् रात्रौ भुङ्क्ते।
गम्यते हि द्विस्त्रिर्वेति कालइति किम्। द्विः कांस्यां भुङ्क्ते। अधिकरणे किम् द्विरह्ना भुङ्क्ते। शेषइत्येव। द्विरह्न्य
धीते ६५ कर्तृकर्म्मणोः कृति। कौ। सू। का। कृत्प्रत्ययान्तयोगेऽनुक्ते कर्तरि कर्म्मणि च षष्ठी स्यात्। भवतः शायिका

कर्म्मणि अपां स्रष्टा। पुरां भेत्ता। कर्तृकर्म्मणोः किम्। शस्त्रेण भेत्ता। कृति किम्। तद्धिते माभूत्। कृतपूर्वी कटम्। भुक्तपूर्वी
सू॰प॰ ओदनम्। अविवक्षितकर्म्मभ्यां कृभुजिभ्यां भावे क्तः। सुप्सुपेति समासः। पूर्व्वादिनिः सपूर्व्वाच्चेति इनि प्रत्ययः। पश्चात्कर्म्म
५१ योगस्तद्धितान्तशब्दोपस्थापितक्रियायाम्। कृद्ग्रहणे तु कृदन्तशब्दस्याभिधेया या क्रिया कर्तृकर्म्मणोः षष्ठीविधानादत्र न
51 षष्ठी। गुणकर्म्मणि वेष्यते। ६१ कौ॰ सू॰ का॰। नेताऽश्वस्य स्रुघ्नस्य स्रुघ्नं वा। नन्वकवाक्ये नैवानेन न भवितव्यम्। तत्र द्वितीयया
तावन्न भवितव्यम्। किं कारणम्। कृतेनाऽभिहितं कर्म्मेति कृत्वा। इनि प्रत्ययेन वाऽपि नोत्पत्तव्यम्। किं कारणम्। असामर्थ्यात्
कथमसामर्थ्यम्। सापेक्षमसमर्थं भवतीति। यत्तावदुच्यते द्वितीयया तावन्न भवितव्यमिति। योऽसौ कृतकटयोरभिसम्ब
न्धः स उत्पन्ने प्रत्यये निवर्तते। अश्लिष्टकरोतेः कटेन सामर्थ्यमिति कृत्वा द्वितीया भविष्यति। यदप्युच्यते इनि प्रत्ययेन वाऽ
पि नोत्पत्तव्यमिति नेदमुभयं युगपद्भवति वाक्यं च प्रत्ययश्च। यदा वाक्यं च प्रत्ययश्च। यदा वाक्यं न तदा प्रत्ययः। यदा प्रत्य
यः सामान्येन तदाहतिः। तत्रावश्यं विशेषार्थिना विशेषोऽनुप्रयोक्तव्यः। कृतपूर्वी। किम्। कटम्। इति भाष्यम्। विशेषक
र्म्मसम्बन्धे निर्भक्तेऽपि कृतादिभिः। विशेषनिरपेक्षोऽन्यः कृतशब्दः प्रवर्तते १ अथ कर्म्मकर्तसत्येव क्तान्ते भावाऽभिधा
यिनि। ततः क्रियावता कर्त्रा योगो भवति कर्म्मणाम् २ अविग्रहा गतादिस्था यथा ग्रामादिकर्म्मभिः। क्रिया सम्बध्यते
तद्वत्कृतपूर्व्यादिषु स्थिता ३ हरिकारिकाश्चमाः ६६ उभयप्राप्तौ कर्म्मणि कौ सू॰ का॰। पूर्व्वसूत्रस्य नियमोऽयम्। उभ
योः प्राप्तिर्यस्मिन् कृति तत्र कर्म्मण्येव षष्ठी स्यात्। न तु कर्तरि। आश्चर्यो गवां दोहोऽगोपेन। पयसः पानं देवदत्तेन उभ
यप्राप्तौ कर्म्मणि षष्ठ्याः प्रतिषेधेऽकादिप्रयोगेऽप्रतिषेधः २१ भेदिका देवदत्तस्य काष्ठानाम् चिकीर्षा विश्वामित्रस्य कट
स्य अकाकारयोः प्रयोगे प्रतिषेधो नेति वक्तव्यम् २ इत्यपरे स्त्रीप्रत्यययोरकाकारयोर्नायं नियमः ८१ कौ॰ सू॰ का॰। शेषे
विभाषा २॥ कौ॰ सू॰ का पाणिनेः सूत्रस्य कृतिः शोभना। पाणिनिना सूत्रस्य कृतिः शोभना। पाणिनिना सूत्रस्य कृतिः ५१

प्रशोभना। अकाकारयोस्तिरिक्तस्त्रीप्रत्ययमात्रेऽयं विकल्प इत्येके अपरे तु प्रत्ययमात्रे काकावर्जिते विकल्पमिच्छन्ति
शाहानामनुशासनमाचार्य्यस्य। आचार्य्याणीति वा ६८ क्तस्य च वर्त्तमाने कौ। सू। का। न लोकेति वक्ष्यमाणो निषेधोऽप
मेशुनः षष्ठी विधीयते। वर्त्तमाने विहितस्य क्तप्रत्ययस्य योगे षष्ठी स्यात् राज्ञां मतः राज्ञां बुद्धः राज्ञां पूजितः क्तस्य किम्
ग्र[illegible]यमानः। वर्त्तमाने किम्। ग्रामं गतः क्तस्य वर्त्तमाने न पुंसके भावे उपसंख्यानम् १।६८। अधिकरणवाचिनश्च।
कौ। सू। का। क्तोऽधिकरणे चेति विहितस्य। तस्य प्रयोगे षष्ठी स्यात्। इदमेषां शायितम्। इदमेषामासितम्। इदमेषां गतम्
इदमेषां भुक्तम्। भाष्यकृतेनैव व्याख्यानम् ६९ न लोकाव्ययनिष्ठाखलर्थतृनाम् कौ। सू। का। कर्तृकर्म्मणोः कृतीति
प्राप्ता षष्ठी निषिध्यते। ल। उ। उक। अव्यय। निष्ठा। खलर्थ। तृन्। इत्येतेषां प्रयोगे षष्ठी न स्यात्। लः इति शतृ। शानच्।
कानच्। क्वसु। कि। किन्। इत्येते लादेशाः इत्यन्ते ओदनं पचन्। ओदनं पचमानः। ओदनं पेचानः। ओदनं पेचिवान्। प
पिः सोमम्। ददिर्गाः। उ। उक। कटं चिकीर्षुः। कन्यामलंकरिष्णुः उका दैत्यान्घातुको हरिः अव्ययम् कटं कृत्वा निष्ठा ओ
दनं भुक्तवान्। देवदत्तेन भुक्तम् खलर्थ ईषत्करः कटो भवता तृन् इति प्रत्याहारग्रहणम्। लटः शतृशानचावित्या
रभ्य आतृनो नकारात्। तेन शानन् चानश्। शतृ। तृन्। इत्येतेषां ग्रहणं भवति। सोमं पवमानः। नडमाघ्नानः। वेदम
धीयन्। कर्त्ता कटान् लादेशे सोहिस्वग्रहणं किकिनोः प्रतिषेधार्थम् १। उकारप्रयोगेनेति वक्तव्यम् २ उकप्रतिषे
धे कमेर्भाषायामप्रतिषेधः ३ दास्याः कामुकः। अव्ययप्रतिषेधे तोसुन्कसुनोरप्रतिषेधः ४। पुरा सूर्य्यस्योदेतोरा
धेयः पुरा क्रूरस्य विसृपो विरप्शिन्। शानन्चानश्शतृणामुपसंख्यानम् ५ द्विषः शतुर्वा ६ कौ। सू। का। चोर
स्य द्विषन्। चोरं द्विषन् ७० अकेनोर्भविष्यदाधमर्ण्ययोः कौ। सू। का। भविष्यदर्थस्य अकस्य भविष्यदर्थस्याधम
र्ण्यार्थस्य चायमर्ण्यार्थस्य इनः प्रयोगे षष्ठी न स्यात्। कटं कारको व्रजति इनः ग्रामं गमी शतं दायी। भविष्यदाधमर्ण्य

योः किम्। यवानां लावकः अवश्यंकारी कटस्य अकस्य भविष्यति १ इन आधमर्ण्ये च २ चकाराद्भविष्यति ७१ कृत्या
सू॰प॰ नां कर्तरि वा कौ। सू। का। कर्तृकर्मणोः कृतीति नित्ये प्राप्ते विकल्पः यम्। कृत्यप्रत्ययान्तानां योगे कर्तरि षष्ठी वा स्यात्
५२ भवता कर्तव्यः कटः भवतः कर्तव्यः कर्तव्यः कटः कर्तरि किम् गेयो माणवकः साम्नाम् भव्यगेयेत्यादिना कर्तरि
52 यत् उभयप्राप्तौ कृत्ये षष्ठ्याः प्रतिषेधो वक्तव्यः १ इति काशिका योगविभागः करिष्यते गेयो माणवकः साम्नामिति
कौ। सू। का। तुल्यार्थैः शब्दैर्योगे तृतीया वा स्यात् तुला। उपमा इत्येतौ वर्जयित्वा। पक्षे षष्ठी। तुल्यो देवेन। तुल्यो देव
स्य अतुलोपमाभ्यां किम्। तुला देवदत्तस्य नास्ति। उपमा कृष्णस्य नास्ति। उपमा कृष्णस्य नास्ति। वेत्यनुवृत्तैव सिद्धे ऽ
न्यतरस्याग्रहणमुत्तरार्थम्। अन्यथा चकारेण तृतीयाऽनुकृष्येत। इत्यादि सूत्रद्वयं माधवेन व्याख्यातम्। ७२। चतु
र्थी चाशिष्यायुष्यमद्रभद्रकुशलसुखार्थहितैः। कौ। सू। का। आयुष्य। मद्र। भद्र। कुशल। सुख। अर्थ। हित। इत्ये
तदर्थैर्योगे चतुर्थी वा स्यात्। पक्षे षष्ठी। आयुष्यं देवदत्ताय भूयात्। आयुष्यं देवदत्तस्य। चिरंजीवितं देवदत्ताय। चिरंजी
वितं देवदत्तस्य। मद्रभद्रौ पर्यायौ। तत्रान्यतरोपादानं प्रपञ्चार्थम्। मद्रं देवदत्ताय। मद्रं देवदत्तस्य। भद्रं देवदत्ताय
भद्रं देवदत्तस्य। कुशलं देवदत्ताय। कुशलं देवदत्तस्य। निरामयं देवदत्तस्य। सुखं देवदत्ताय। सुखं देवदत्तस्य। शं देव
दत्ताय। शं देवदत्तस्य। अर्थो देवदत्ताय। अर्थो देवदत्तस्य। प्रयोजनं देवदत्ताय प्रयोजनं देवदत्तस्य। हितं देवदत्ताय।
हितं देवदत्तस्य। पथ्यं देवदत्ताय। पथ्यं देवदत्तस्य। आशिषि किम्। आयुष्यं देवदत्तस्य पयः इति २८ सूत्राणि भा
ष्ये २। ३। ३। व्याख्यातानि। इति सूत्रपाठे द्वितीयाध्यायस्य तृतीयः पादः १ द्विगुरेकवचनम्। कौ। सू। सा। त। द्वि
गुरेकवचनम् कौ। सू। सा। त। द्विगुरर्थः समाहार एकवत्स्यात्। पञ्चपूली। अर्थस्यैकवत्त्वादनुप्रयोगेप्येकवचनम्
पञ्चपूलीयम्। द्विगुरर्थ एकवद्भवतीति वक्तव्यम् १ एकशेषप्रतिषेधश्च २ समाहारग्रहणं चतद्धितार्थे प्रतिषे ५२

पाद्यम् २ नवासमाहोरेकत्वात् ४।२। द्वन्द्वश्च प्राणितूर्य्यसेनाङ्गानाम्। कौ। सू। सा। द्वि। एकवचनमित्यनुवर्तते। अङ्गश
ब्दः प्रत्येकं सम्बध्यते प्राण्यङ्ग। तूर्य्याङ्ग। सेनाङ्ग। इत्येतेषां द्वन्द्व एकवत् स्यात्। प्राणी जीवः। पाणिपादम्। तूर्य्यहृत्समम्।
मार्दङ्गिकपाणविकम्। सेनासैन्यम्। रथिकाश्वारोहम्। हस्त्यश्वादिषु द्वन्द्वेतु परत्वाद्विभाषा वृक्षमृगेत्यादिना विक
ल्पो भवति इतरेतरयोगे समाहारे च द्वन्द्वो विहितः। तत्र समूहस्यैकत्वादेकवचने सिद्धम्। नियमार्थमिदं प्रकरणे
प्राण्यङ्गादीनां समाहार एव द्वन्द्वो भवति। नत्वितरेतरयोगे प्राणितूर्य्यसेनाङ्गानां तत्सर्वे पदोत्तरपदग्रहणम् ।।२।
अनुवादे चरणानाम्। कौ। सू। सा। द्वि। चरणाः शाखा। तदध्येतृवाचिनां द्वन्द्व एकवत्स्यात् ज्ञातार्थस्य प्रतिपादने सति
उदगात्कठकौथुमम्। प्रत्यष्ठात्कठकालापम्। कठकालापानामुदयप्रतिष्ठे ज्ञाते यदा शब्देनानूद्यते तदेदमुदाहर
णम्। प्रयुक्तप्राथमिके प्रतिपादने तदा प्रत्युदाहरणम्। अनुवादे किम्। उदगुः कठकालापाः। स्थेणोरिति वक्तव्ये
अयतन्मा वेति वक्तव्यम् २ स्थेणोरयतन्मा वेति वक्तव्यम् १। इति काशिका। स्थेणोर्लङीति वक्तव्यम् ।। कौ। सू। सा। द्वि। १
अध्वर्य्युक्रतुरनपुंसकम्। कौ। सू। सा। द्वि। अध्वर्य्युर्यजुर्वेदः क्रतुः सोमसाध्यो यागः। यजुर्वेदविहितक्रतुवाचि
नामनपुंसकलिङ्गानां द्वन्द्व एकवत्स्यात्। अर्काश्वमेधम्। अध्वर्य्युक्रतुः किम्। इषुवज्रौ। सामवेदविहितावेतौ। अन
पुंसकं किम्। राजसूयवाजपेयौ इह तु न भवति। दर्शपौर्णमासौ। यजुर्वेदविहितत्वेऽपि तयोः सोमसाध्यत्वाभावात्
इत्यादिसूत्रत्रये भाष्यानुमतमाख्यातम् ५ अध्ययनतोऽविप्रकृष्टाख्यानाम्। कौ। सू। सा। द्वि। अध्ययनेन प्रत्यासन्ना आ
ख्या येषां तेषां द्वन्द्व एकवत्स्यात्। पदकक्रमकम्। अध्यायनतः किम्। पितापुत्रौ। अविप्रकृष्टाख्यानां किम्। या
ज्ञिकवैयाकरणौ ६ जातिरप्राणिनाम्। कौ। सू। सा। द्वि। प्राणिभिन्नजातिवाचिनां द्वन्द्व एकवत्स्यात्। आराशस्त्रि
धानाशष्कुलि। ज्ञातिः किम्। नन्दकपाञ्चजन्यौ अप्राणिनां किम्। ब्राह्मणक्षत्रियाः अप्राणिनामिति पर्युदा

सू.प.
५३
53

साद्दृश्यजातीयानामेव। नतु गुणक्रियाजातीयानाम्। रूपरसौ। गमनाकुञ्चने। जातेः प्राधान्यविवक्षायामयमेक
वद्भावः। द्रव्यविवक्षायां तु। बदरामलकानि ७ विशिष्टलिङ्गो नदीदेशोऽग्रामाः। कौ। स्। सह। भिन्नलिङ्गानां नदी
वाचिनां ग्रामवर्जदेशवाचिनां च द्वन्द्व एकवत्स्यात्। उद्ध्यश्च इरावती च। उद्ध्येरावति। गङ्गा च शोणश्च। गङ्गाशोणम्।
कुरवश्च कुरुक्षेत्रं च। कुरुकुरुक्षेत्रम्। कुरुजाङ्गलम्। विशिष्टलिङ्गः किम्। गङ्गायमुने। मद्रकेकयाः। नदीदेशः
किम्। कुक्कुटमयूर्यौ। अग्रामाः किम्। जाम्बवं नगरं शाल्मूकिनी ग्रामः। जाम्बवशाल्मूकिन्यौ अग्रामा इत्यत्र न
गराणामिति वक्तव्यम् १ नेह। मथुरापाटलिपुत्रम्। उभयतश्च ग्रामाणां प्रतिषेधो वक्तव्यः २ ग्रामनगरोभ
यावयवदेशे ग्रामसमन्यैव प्रतिषेधो वक्तव्य इत्यर्थः ८ क्षुद्रजन्तवः कौ। स्। सा। द्व। क्षुद्रजन्तुवाचिनां द्वन्द्व ए
कवत्स्यात्। दंशमशकं। यूकालिक्षम्। आनकुलात् क्षुद्रजन्तवः ९ येषां च विरोधः शाश्वतिकः। कौ। स्। स
द्व। विरोधो वैरम्। शाश्वतिको नित्यः। येषां नित्यो विरोधस्तद्वाचिनां द्वन्द्व एकवत्स्यात्। मार्जारमूषिकम्। अ
हिनकुलम्। चकारः पुनर्विधानार्थः। तेन विभाषावृक्षमृगेति परमपि विकल्पं बाधित्वा नित्यमेव भवति। गोव्याघ्रम्
काकोलूकम्। शाश्वतिकः किम्। स्त्रीपुरुषौ कलहायेते १० शूद्राणामनिरवसितानाम्। कौ। स्। सा। द्व। येर्भु
क्ते पात्रं संस्कारेणापि न शुध्यति ते निरवसिताः। तद्भिन्ना ये शूद्रास्तद्वाचिनां द्वन्द्व एकवत्स्यात्। तक्षायस्कारम्
रजकतन्तुवायम्। अनिरवसितानां किम्। चण्डालमृतपाः ११ गवाश्वप्रभृतीनि च। कौ। स्। सा। द्व। गवाश्व
इत्येवमादीनि कृतैकवद्भावानि द्वन्द्वरूपाणि साधूनि भवन्ति। गवाश्वम्। रूपान्तरे तु नायं विधिः। गोऽश्वम्।
गोऽश्वौ। पशुद्वन्द्वे उत्तरसूत्रेण विकल्पः। गवाश्वम्। गवेडकम्। अजाविकम्। अजैडकम्। अजैडकम्। कु
ब्जवामनम्। कुब्जकिरातम्। पुत्रपौत्रम्। श्वचण्डालम्। स्त्रीकुमारम्। दासीमाणवकम्ः शाटीपटीरम्। शाटी ५३

प्रच्छदम्। शाटीपट्टिकम्। उष्ट्रखरम्। उष्ट्रशशम्। मूत्रशकृत्। मूत्रपुरीषम्। यकृन्मेदम्। मांसशोणितम्। दर्भश
रम्। दर्भपूतीकम्। अर्जुनशिरीषम्। अर्जुनपुरुषम्। तृणोलपम्। दासीदासम्। कुटीकुटम्। भागवतीभागवतम्
एतानि गवाश्वप्रभृतीनि १२ विभाषा वृक्षमृगतृणधान्यव्यञ्जनपशुशकुन्यश्ववडवपूर्वापराधरोत्तराणाम्। कौ। स
सा। द्वा। वृक्ष। मृग। तृण। धान्य। व्यञ्जन। पशु। शकुनि। इत्येतद्वा विनां द्वन्द्वो नायकवत्। अश्ववडव। पूर्वापर। अधरोत्तरा इ
त्येतद्द्वन्द्वं यथैवैकवत्स्यात्। प्लक्षन्यग्रोधम्। प्लक्षन्यग्रोधाः। रुरुपृषतम्। रुरुपृषताः। कुशकाशाः। व्रीहियवं
व्रीहियवाः दधिघृतम्। दधिघृतम्। दधिघृते। गोमहिषम्। गोमहिषाः तित्तिरिकपिञ्जलम्। तित्तिरिकपिञ्जलाः
अश्ववडवम्। अश्ववडवौ। पूर्वापरम्। पूर्वापरे। अधरोत्तरम्। अधरोत्तरे। बहुप्रकृतिः फलसेनावनस्पतिमृगश
कुनिक्षुद्रजन्तुधान्यतृणानाम् १३ कौ। स। सा। द्व। एषां बहुप्रकृतिरेव द्वन्द्व एकवद्वा स्यात्। फल। बदरामलकम्
बदरामलकानि। सेना। हस्त्यश्वम्। हस्त्यश्वाः। वनस्पति। प्लक्षन्यग्रोधम्। प्लक्षन्यग्रोधाः। मृग। रुरुपृषतम्। रुरुपृ
षताः। शकुनि। हंसचक्रवाकम्। हंसचक्रवाकाः। क्षुद्रजन्तु। यूकालिक्षम्। यूकालिक्षाः धान्य। व्रीहियवम्। व्रीहि
यवाः। तृण। कुशकाशाः। पशुशकुनिद्वन्द्वे विरोधिनां पूर्वं विप्रतिषिद्धम् २१ अश्ववडवयोः पूर्वलिङ्गता सपुद्वन्द्वनपु
सकम् ३। ए। विप्रतिषिद्धं वानधिकरणवाचि कौ। स। सा। द्व। अधिकरणद्रव्यम्। विरुद्धार्थानामद्रव्यवाचिनां द्वन्द्व एकव
द्वा स्यात्। शीतोष्णम्। शीतोष्णम्। शीतोष्णे। विप्रतिषिद्धं किम्। कामक्रोधौ। अनधिकरणवाचीति किम्। शीतोष्णे उ
दके। इत्यादिसूत्रत्रयं भाषितत्वव्याख्यातम् १४ नदधिपयआदीनि। कौ। स। सा। द्व। दधिपयस्। इत्येवमादीनि शब्दरू
पाणि एकवन्न भवन्ति। दधिपयसी। दधिपयसी। सर्पिर्मधुनी मधुसर्पिषी। ब्रह्मप्रजापती। शिववैश्रवणौ। स्कन्द
विशाखौ। परिव्राट्कौशिकौ। प्रवर्ग्योपसदौ। शुक्लकृष्णौ। इध्माबर्हिषी। दीक्षातपसी। श्रद्धातपसी। मेधातपसी।

सू॰प॰ ५४ 54

अध्यपनातयती। उलूखलमुसले। अयवसाने। अहामेये। ऋक्सामे। वाङ्मनसे। एतानि दधिपयआदीनि १५ अधि
करणैतावत्त्वे च। कौ। सा। सा। द। द्रव्यसंख्यापरिमाणे यस्मान्नेद्वन्द्व एकवन्न भवति दश दन्तोष्ठाः दश मार्दङ्गिकपाण
विकाः १६ विभाषा समीपे। कौ। सा। सा। द्व। द्रव्यसंख्यापरिमाणस्य समीपेऽथ न परिच्छेदे सति द्वन्द्व एकवद्वा स्यात्। उपदश
दन्तोष्ठम्। उपदशा दन्तोष्ठाः अव्ययस्य संख्यया अव्ययीभावोऽप्यारभ्यते। बहुव्रीहिरपि। न यदा तावदेकवचनं तदाऽव्य
यीभावोऽनुप्रयुज्यते। एकार्थस्यैकार्थ इति। यदा बहुवचनं तदा बहुव्रीहिरनुप्रयुज्यते। बह्वर्थस्य बह्वर्थ इति। इति भा
ष्यम्। १७ स नपुंसकम्। कौ। सा। सा। न। परवल्लिङ्गमित्यस्यापवादः। समाहारे द्विगुर्द्वन्द्वश्च नपुंसकं स्यात्। पञ्चग
वम्। द्वन्द्वे। पाणिपादम् १८ अव्ययीभावश्च। कौ। सा। सा। अ। अव्ययीभावसमासोऽपि नपुंसकं स्यात्। अधिहरि। अ
धिहरि। उन्मत्तगङ्गम्। पूर्वपदार्थप्रधानस्याऽलिङ्गत्वे प्राप्ते। अन्यपदार्थप्रधानस्य वाच्यलिङ्गत्वे प्राप्ते अनेन न
पुंसकत्वं कृतम्। भाष्ये तु नेदं व्याख्यातम् १९ तत्पुरुषोऽनञ्कर्मधारयः कौ। सा। सा। न। अधिकारोऽयम्। इत ऊर्ध्वं वक्ष्य
माणो नञ्समासकर्मधारयसमासवर्जस्तत्पुरुषो नपुंसकः स्यात्। वक्ष्यति विभाषा सेनासुरेति। ब्राह्मणसेनम्। ब्रा
ह्मणसेना। तत्पुरुषः किम्। दृढसेनो राजा। अनञ्कर्मधारयः किम्। असेना। परमसेना २० संज्ञायां कन्थोशी
नरेषु। कौ। सा। सा। न। कन्थाशब्दान्तस्तत्पुरुषो नपुंसकः स्यात्संज्ञायाम्। परमसेना २ सा कन्था यदुशीनरदेशेषु
भवति। सौशमिकन्थम्। आह्वरकन्थम्। संज्ञायां किम्। वीरणकन्था। उशीनरेषु किम्। दाक्षिकन्था। परवल्लि
ङ्गमित्यस्यापवादकमिदं प्रकरणम्। इत्यादि सूत्रषट्कं भाष्ये तु न व्याख्यातम् २१ उपज्ञोपक्रमं तदाद्याचिख्यासा
याम्। कौ। सा। सा। त। उपज्ञा। उपक्रम। इत्येतदन्तस्तत्पुरुषो नपुंसकः स्यात्। तयोरुपज्ञोपक्रम्यमाणयोरा
दिः प्राथम्यं चेदाख्यातुमिष्यते उपज्ञायत इति उपज्ञा आतश्चोपसर्गे इति कर्मणि अङ्। पाणिनेरुपज्ञा ५४

पाणिन्युपज्ञं व्याकरणम्। पाणिनेरुपज्ञानेन प्रथमतः प्रणीतमित्यर्थः उपक्रमस्तदादिरुपक्रमः दर्शनीयोपक्रमेस्स-
कुमारम्। उपज्ञोपक्रमं किम्। वाल्मीकिश्लोकाः। नयोगादिस्तदादिः। आद्योत्तमिच्छाया आचिख्यासा। तदादेराचि-
ख्यासा। तदाद्याचिख्यासायामिति किम्। देवदत्तोपज्ञो रथः। देवदत्तोपक्रमो रथः। २२। छाया बाहुल्ये। कौ। सु। सा। ता।
विभाषासेनेति वर्तमाने नित्यार्थमिदम्। छाया। इत्येतदन्तस्तत्पुरुषो नपुंसकः स्यात् पूर्वपदार्थस्य बाहुल्ये सति।
इक्षूणां छाया। इक्षुच्छायम्। बाहुल्ये किम्। कुड्यच्छाया २३ सभा राजाऽमनुष्यपूर्वा कौ। सु। सा। ता। सभा। इत्येतदन्त-
स्तत्पुरुषो नपुंसकः स्यात्। सा चेत्सभा राजपर्यायपूर्वा अमनुष्यपूर्वा च भवति। इनसभम्। ईश्वरसभम्। राजपर्या-
यस्यैवानन्तरस्वरूपविशेषयोः। राजसभा। चन्द्रगुप्तसभा। अमनुष्यपूर्वा। रक्षःसभम्। पिशाचसभम्। अमनुष्यशब्दो
रक्षःपिशाचादिषु रूढः। तेनात्र न भवति। काकसभा। राजामनुष्यपूर्वेति किम्। देवदत्तसभा २४ अशाला च कौ।
सु। सा। ता। शालाभिन्नार्थे वा यकोयः। सभाशब्दस्तदन्तस्तत्पुरुषो नपुंसकः स्यात्। स्त्रीसभम्। स्त्रीणां समूह इत्यर्थः अशा-
ला किम्। अनाथसभा अनाथकुटीत्यर्थः २५ विभाषा सेनासुराच्छायाशालानिशानाम्। कौ। सु। सा। ता। सेना। सुरा।
छाया। शाला। निशा। इत्येतदन्तस्तत्पुरुषो वा नपुंसकः स्यात् ब्राह्मणसेनम्। ब्राह्मणसेना। यवसुरम्। यवसुरा। कु-
ड्यच्छायम्। कुड्यच्छाया। गोशालम्। गोशाला। श्वनिशम्। श्वनिशा २६ परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः कौ। सु। सा-
ता। द्वन्द्वस्य तत्पुरुषस्य च परपदवल्लिङ्गं भवति द्वन्द्व। कुक्कुटमयूर्याविमे। मयूरीकुक्कुटाविमौ। तत्पुरुष। अर्द्धं
पिप्पल्याः। अर्द्धपिप्पली। समानाधिकरणसमासमाश्रित्यैकदेशिसमासे प्रसज्यमाने तत्पुरुषग्रहणं भाष्ये प्र-
त्याख्यातम् परवल्लिङ्गं द्वन्द्वतत्पुरुषयोरिति चेत् प्राप्तापन्नालंपूर्वगतिसमासेषु प्रतिषेधो वक्तव्यः १ द्विगुप्राप्ताप-
न्नालंपूर्वगतिसमासेषु प्रतिषेधो वक्तव्यः। इति काशिका। कौ। सु। सा। ता। द्विगु। पञ्चसु कपालेषु संस्कृतः पुरोडा

पाः। पञ्चकपालः। प्राप्त। प्राप्तोजीविकाम्। प्राप्तजीविकः। आपन्न। आपन्नोजीविकाम्। आपन्नजीविकः। अलं पूर्वो। अ
सू॰प॰ लंजीविकायै। अलंजीविकः। गतिसमास। निष्कौशाम्बिः पूर्वपदस्य च प्रतिषेधो वक्तव्यः २ समासादन्यलिङ्गमिति
५५ वेदश्वबडवयोश्चापोलुग्वक्तव्यः ३ निपातनात्सिद्धमेतत् किन्निपातनम् अश्वबडवपूर्वापरेति। इति भाष्यम् २७
पूर्ववदश्वबडवौ कौ। स। सा। त। अश्वबडवयोरितरेतरयोगद्वन्द्वे पूर्वपदस्येव लिङ्गं भवति अश्वबडवौ अश्वबडवा
55 न् अश्वबडवैः इत्यादिसूत्रद्वयं भाष्ये तु न व्याख्यातम् २८ हेमन्तशिशिरावहोरात्रे च च्छन्दसि। कौ। वै। अ द्वि हे
मन्तशिशिरौ। अहोरात्रे। इत्येतयोर्द्वन्द्वयोर्वेदे पूर्वपदस्येव लिङ्गं भवति हेमन्तशिशिराहतुनां प्रीणामि। अहो
रात्रे इदं नूमः। अहोरात्राणीष्टकाः। छन्दसि किम्। डः त्वि हेमन्तशिशिरे। अहोरात्राविमौ पुण्यौ। छन्दसि लिङ्गम
त्यपडक्तस्यस्यैवाः पंप्रपञ्चः २९ रात्राह्नाहाः पुंसि। कौ। स। स। त। पर्वलिङ्गमित्यस्यापवादः एत अह। अहा इ
त्येतदन्तो द्वन्द्वतत्पुरुषौ। पुंसि भवतः। अहश्च रात्रिश्च अहोरात्रः। रात्रेः पूर्वोभागः। पूर्वरात्रः। अह्नः पूर्वः। पूर्वा
ह्णः। अपराह्णः। मध्याह्नः। द्वयोरह्नोः समाहारः। द्व्यहः। त्र्यहः। परत्वात्समाहारे नपुंसकत्वं बाधते। अनुवाकाद
यः पुंसि १ अनुवाकाः। शंयुवाकाः। सूक्तवाकाः। संख्यापूर्वं रात्रं क्लीवम् १ कौ। स। सा। त। द्विरात्रम्। त्रिरात्रम् ३॰
अपथं नपुंसकम्। कौ। स। सा। त। अपथ। इत्येतन्नपुंसकं भवति अपथमिदम्। अपथानि गाहते मूढः। तत्पुरुष इत्येव
अपथो देशः। अपथा नगरी कृतसमासान्तानिर्देशादिह न भवति अपन्थाः पुण्यसुदिनाभ्यामहो नपुंसकत्वं वक्त
व्यम् १ पुण्याहम्। सुदिनाहम्। पुण्यसुदिनाभ्यामह्नः क्लीबतेष्टा १ कौ। स। सा। त पथः संख्याव्ययादेः २ कौ। स।
सा। त। द्विपथम्। त्रिपथम्। विपथम्। कृतसमासान्तनिर्देशादिह न भवति। सपन्थाः द्विगुश्च ३ अकारान्तोत्तर
पदो द्विगुः स्त्रियां भाष्यते ४। पञ्चपूली अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्टः ३। कौ। स। सा। त। वाबन्तः ५ ५५

पञ्चखट्वम्। पञ्चखट्वी आबन्तोवा ४ कौ। सा। सा। त। अनोनलोपश्चवाचस्त्रियाम् ६ पञ्चतक्षम् पञ्चतक्षी अनोनलो
पश्चवाद्विगुस्त्रियाम् ५ कौ। सा। सा। त। पात्रादिभ्यः प्रतिषेधः ७। पञ्चपात्रम्। त्रिभुवनम्। चतुर्युगम्। पाचाय
नस्पन ६ कौ। सा। सा। त। सामासेनपुंसकम् ७ कौ। सा। सा। त। मृदुपचति। क्रियाविशेषणानांच २। इतिकाशि
का ३१ अर्द्धर्चाः पुंसि कौ। सा। सा। त। मृदुपचति। क्रियाविशेषणानांच २ इतिकाशिका ३१ अर्द्धर्चाः पुंसि कौ
सा। सा। त। अर्द्धर्चा। इत्येवमादयः शब्दाः पुंसिक्लीबेचभवंति। अर्द्धर्चः। अर्द्धर्चम्। अर्द्धर्चे। गोमय। कषाय। कार्षा
पण। कुतप। कुणप। कपाट। शङ्ख। गूथ। यूथ। ध्वज। कबन्ध। पद्म। गृह। सरक। कंस। दिवस। यूष। अन्धकार। द
ण्ड। कमण्डलु। मण्ड। भूत। द्वीप। द्यूत। चक्र। धर्म। कर्मन्। मोदक। शतमान। यान। नख। चरण। पुच्छ। दाडि
हिम। रजत। सक्थ। पिधान। सार। पात्र। घृत। सैन्धव। औषध। आढक। चषक। द्रोण। खलीन। पात्रीव। षष्टिक। वा
रबाण। प्रोथ। कपित्थ। शुष्क। शाल। शील। शुल्क। शीधु। कवच। रेणु। ऋण। कपट। शीकर। मुसल। सुवर्ण।
वर्ण। पूर्व। चमस। क्षीर। कर्ष। आकाश। अष्टापद। मङ्गल। निधन। निर्यास। जृम्भ। हृत। पुस्त। बुस्त। क्ष्वेडित। शृ
ङ्ग। निगड। खल। मधु। मूल। मूलक। स्थूल। शराव। नाल। वप्र। विमान। मुख। प्रग्रीव। शूल। वज्र। कटक। क
ण्टक। कर्पट। शिखर। कल्क। नाट। मस्तक। वलय कुसुम। तृण। पङ्क। कुण्डल। किरीट। कुमुद। अर्बुद। अ
ङ्कुश। तिमिर। आश्रम। भूषण। इष्वास। मुकुल। वसन्त। तडाग। पिटक। विटङ्क। विडङ्ग। पिण्याक। माष। कोश।
फलक दिन। दैवत। पिनाक। समर। स्थाणु। अनीक। उपवास। शाक। कर्पास। विशाल। चषाल। खण्ड। दर
विट। रण। बलऽमक। मृणाल। हस्त। आर्द्र। हल। सूत्र। ताण्डव। गाण्डीव। मण्डप। पटह। सौध। योध। पार्श्व
शरीर। फल। छल। पुर। राष्ट्र। विम्ब। अम्बर। कुट्टिम। कुक्कुट। कुडप। ककुद। खण्डल। तोमर। तोरण। मञ्चक।

सू॰प॰
५६
56

पत्रक। पुस्त। मध्य। बाल। कपाल। वल्मीक। वर्षावस्त्र। वस्त्र। देह। उद्यान। उद्योग। स्नेह। स्तेन। स्तन। स्वर। संगम। निष्क
क्षेम। शूक। छत्र। पवित्र। यौवन। कलह। पालक। मूषिक। मण्डल। वल्कल। कुञ्ज। विहार। लोहित। विषाण। भव
न। अरण्य। पुलिन। दृढ। आसन। ऐरावत। शूर्प। तीर्थ। लोमश। तमाल। लोह। दण्डक। शपथ। प्रतिसर। दारु
धनुस्समान। वर्णेरक। कूर्च। तण्डक। मठ। सहस्र। ओदन। प्रवाल। शाकटस्यपराह्ण। नीड। शकल। तण्डुल। अर्द्ध
र्चादिः। अर्द्धर्चादयइतिबहुवचनम् १। बहुवचननिर्देशादाद्यर्थो गम्यते। इति भाष्यम् ३१। इदमोऽन्वादेशेऽशनुदात्तस्तृ
तीयादौ। कौ। सु। ह। शु। इदम्। इमेतस्य अन्वादेशविषयेऽनुदात्तो अश् इत्ययमादेशो भवति तृतीयादौ विभक्तौ। प
रतः। आभ्यां छन्दोऽधीतम्। अथो आभ्यां व्याकरणमधीयते। एभिः। अस्मै। आभ्याम्। एभ्यः। अस्मात्। आभ्याम्। ए
भ्यः। अस्य। एषाम्। एषु। अशादेशस्समानाधिकरणग्रहणेकर्मेयम् १। अन्वादेशश्च कथितानुकथनमात्रम् २
अशाववचने साकच्कार्थम् २। इमकाभ्यां छात्राभ्यां रात्रिरधीता अथो आभ्यामहरप्यधीतम्। अत्र इद्रोलोपो नास्ति अक
इत्यधिकारात् ३२। एतदस्त्रतसोस्त्रतसौ चानुदात्तौ। कौ। सु। त। स। आदि। एतद्। इमेतस्य अन्वादेशविषयेऽनुदात्तोऽश्
इत्यादेशो भवति त्रतसोः परतः। त्र। तस्। इमे तौ च अनुदात्तौ भवतः। एतस्मिन्ग्रामे सुखं वसामः अथो अत्र युक्ताः अधीमहे
तानस्माच्छन्दोऽधीष्व अथो अतो व्याकरणमप्यधीष्व एतदोऽशिति नैनैव अशादेशसिद्धेः पुनर्वचने सर्वानुदात्तत्वाय २७
द्वितीयाटौस्स्वेनः। कौ सु ह शु द्वितीया टा ओस्। इमेतेषु परेष्वन्वादेशविषये इदम् एतद् इत्येतयोरनुदात्त एन
आदेशो भवति। अनेन व्याकरणमधीतं। एनं छन्दोऽध्यापय। एनौ। एनान्। एनेन। एनयोः। एनयोः। एतेनच्छन्दोऽ
धीतम् अथो एनं व्याकरणमध्यापय। एनौ। एनान्। एनेन। एनयोः। एनयोः एनदिति नपुंसकैकवचने २। अन्वादेशे नपुं
सके एनद्वक्तव्यः १। कौ। सु। ह। त। एनत्। एने। एनानि ३४ आर्द्धधातुके कौ ति शु अधिकारोऽयम्। एवतद्वियार्थे ५६

इयतः प्राक् यदितऊर्ध्वमनुक्रमिष्यामः तदार्द्धधातुकविषय एवेयम्। वद्यातिहनोवधलिङि। वध्यात्। श्लेभिः। भवे
अजेर्वी। प्रवेयम्। वातिइः ख्यात्। आर्द्धधातुके किम्। चमात। जग्ध्यादिष्वार्द्धधातुकाश्रयत्वात्सतिनास्मिन्विधानम्॥
नञोन्त्यर्गलक्षणप्रतिषेधः २ उतस्सूच्यते आदेशेनवाध्यतइत्यत्सर्गः स्थानी सामान्याश्रयत्वादिशेषस्यानाश्रयइति
चेडवर्णोकारान्तस्योएणाद्विधिप्रसङ्गः ३ पौर्वापर्याभावात्तु सामान्येनानुपपत्तिः ४ सिद्धन्तु सार्वधातुके प्रति
षेधात् ५ असतिपौर्वापर्ये विषयसप्तमीविज्ञास्यते आर्द्धधातुके विषय इति। तदार्द्धधातुके विषये जग्ध्यादि
कृतेषु योयतः। प्राप्नोतिसततो भविष्यति। इति भाष्यम् १६ अद्ध्रो जग्धिर्ल्यप्तिकिति कौ। क। अदः इत्येतस्य धातो
र्जग्धिः इत्ययमादेशो भवति ल्यपि तकारादौ च किति परे। ल्यप्। प्रजग्ध्य तिकिति जग्धः जग्धवान्। आदेशइकार
उच्चारणार्थः न तु किञ्चित्कार्यार्थः। तीति किम्। अद्यते। किती ति किम्। अत्तव्यम् जग्धौ सिद्धे अन्तरङ्गत्वात्तिकिती
ति ल्यउच्यते। ज्ञापयत्यन्तरङ्गाणां ल्यपाभवति बाधनम् १ भाष्यकृत्कारिकेयम्। अन्तरङ्गानपि विधीनबहिरङ्गो ल्यब्बा
धते १ परिभाषेयम् १७ लुङ्सनोर्घस्लृ कौ ति स अद इत्येतस्य लुङि सनि च परे घस्लृ इत्ययमादेशः स्यात् लृ
दित्करणमङर्थम्। अघसत्। अघसताम्। अघसन्। जिघत्सति जिघत्सतः जिघत्सन्ति घस्लृभावे अद्ध्युपसंख्या
नम् १ प्रकर्षेणअत्तीति। प्रघसः १८ घञपोश्च कौ क उ अद इत्येतस्य घस्लादेशः स्यात्। घञि अपि च परे। घासः
प्रघसः। उपसर्गेष्वद इत्यप। इत्यादि सूत्रचतुष्टयं माध्येन व्याख्यातम् १९ बहुलं छन्दसि कौ वे स दि वेदे बहुलं
घस्लादेशो भवति घस्तान्नूनम् सग्धिश्च मे। इह न भवति आत्तामद्य मध्यतो मेदउद्भृतम्। उत्तरसूत्रस्यामत
रसोग्रहणोः नञकृते विकल्पो भविष्यति। कार्यान्तरार्थं च बहुलग्रहणम्। घस्तामित्यत्रोपधालोपो न भवति ४०
लिङस्यमतरसाम्। कौ। ति। स अदो लिटि घस्लादेशो वा स्यात् जघास जक्षतुः जक्षुः आद आदतुः आदुः ॥

वेञो वयिः कौ ति। व्वा वेञ्। इत्येतस्य धातोर्ल्लिटि परे वयिरित्यादेशो वा स्यात्। इकार उच्चारणार्थः। उवाय। ऊयतुः। ऊयुः।
सू॰प॰ ५८ लिटि वयो य इति यकारस्य संप्रसारणनिषेधः। वश्चास्यान्यतरस्यामिति। वकारादेशपक्षे। ऊवतुः। ऊवुः। वयादे
शाभावे। ववौ। ववतुः। ववुः। वेञ इति संप्रसारणनिषेधः ४२ हनो वध लिङि कौ ति अ॰ हन् इत्येतस्य धातोर्ल्लि
ङि परे वधादेशः स्यात्। वध्यात्। वध्यास्ताम्। वध्यासुः। किमयमदन्तः। आहोस्विद्धलन्तः। किञ्चातः। यदि
हलन्तः। वधेर्हलन्तत्व उक्तम्। किमुक्तम्। वधादेशो हन्हिंसनयोः प्रतिषेध इड्विधिश्चेति। अथादन्तः। न दोषो
भवति। यथा न दोषस्तथास्तु। इति भाष्यम्। ४३ लुङि च कौ। ति। अ॰ हनो वधादेशः स्याल्लुङि परे। अवधीत्। अ
वधिष्टाम्। अवधिषुः। वधादेशो ऽदन्तः। अतो लोप इत्यकारलोपः। तस्य स्थानिवद्भावाद्धलन्तलक्षणा वृद्धिर
तो हलादेर्लघोरिति वा वृद्धिर्न भवति। योगविभाग उत्तरार्थः। आत्मनेपदेषु लिङि विकल्पो माभूत्। भाष्ये त
पृथङ्नेदं व्याख्यातम् ४४ आत्मनेपदेष्वन्यतरस्याम्। कौ। ति। अ॰ पूर्वेण नित्ये प्राप्ते ऽयं विकल्पः। लुङि आत्मनेपदे
षु परे हनो वधादेशो वा स्यात्। अवधिष्ट। अवधिषाताम्। अवधिषत। अहत। अहसाताम्। अहसत। भाष्ये त
नेदं व्याख्यातम् ४५ इणो गा लुङि कौ ति अ॰ इण् इत्येतस्य धातोर्ल्लुङि परे गा इत्ययमादेशः स्यात्। अगात्
अगाताम्। अगुः। अगादिति भवता लुङीति वर्तमाने पुनर्ल्लुङ्ग्रहणमात्मनेपदेष्वन्यतरस्यामित्येतन्निवृत्त्यर्थं
इण्वदिक इति वक्तव्यम् ५ कौ। ति। अ॰ इक। अध्यगात्। अध्यगाताम्। अध्यगुः ४६। णौ गमिरबोधने। कौ। ति
णौ। इण्। इत्येतस्य धातोर्णौ परे गमिरित्ययमादेशः स्यात्। न तु बोधने ऽर्थे। इकार उच्चारणार्थः। गमयति। ग
मयतः। गमयन्ति। अबोधने किम्। प्रत्याययति अर्थान्। इण्वदिक इत्येव। अधिगमयति ४७ सनि च कौ ति स
नि परे इणो गमिरादेशः स्यात्। न तु बोधने ऽर्थे। जिगमिषति। जिगमिषतः। जिगमिषन्ति। अबोधन इति ५८

57

वा। अर्थान्प्रतीषिषति। इणवदिकः। अधिजिगमिषति योगविभागउत्तरार्थः। इङ्श्चेत्यत्र सनीत्येवानुवर्तते ४८ इङश्च। कौ
ति। सः। इङ्। इत्येतस्य वा गामित्ययमादेशः स्यात्स निपरमः अधिजिगांसते भाष्येतनेदं व्याख्यातम् ४९ गाङ्लिटि कौ
ति। अ। इङ् इत्येतस्य गाङित्ययमादेशः स्याल्लिटि विवक्षिते। अधिजगे। अधिजगाते। अधिजगिरे गाङ्ङनुबन्धकरणं
विशेषणार्थम् २ कुविशेषणार्थं न यथेः। गाङ्कुटादिभ्योऽञ्णिन्ङिदिति। गाकुटादिभ्य इति सूत्रे मानेइणादेश
स्यापि प्रसज्येत इति भाष्यम्। ज्ञापकं वा सानुबन्धकस्यादेशवचने इत्कार्याभावस्य २ सेस्थानानुबन्धकस्याप्यव
नम् ३ अस्यास्मिदमुच्चने मोरिति २ तिशिमिपामित्यिवक्तव्यम्। इहापि यथा स्यात्। वेहवेस्य। अस्य ज्ञापकस्य स
न्ति दोषाः। सन्ति प्रयोजनानि। दोषाः समाभूपास्मोद। तस्मान्नार्थोऽनेन ज्ञापकेन इति भाष्यम् ५० विभाषा लुङ्
लृङोः कौ। ति अ। इङो गाङादेशो वा स्याल्लुङ्लृङोर्विषये। आदेशपक्षे गाङ्कुटेति ङित्त्वम्। घुमास्थेतीत्वम् अध्या
गीष्ट। अध्यगीषाताम्। अध्यगीषत। आदेशाभावे। अध्यैष्ट। अध्यैषाताम्। अध्यैषत। लृङि। अध्यगीष्यत। अध्यगी
ष्येताम्। अध्यगीष्यन्त। आदेशाभावे। अध्यैष्यत। अध्यैष्येताम्। अध्यैष्यन्त इत्यादि सूत्रव्रतस्य भा
ष्येतनव्याख्यातम् ५१ णौ च संश्चङोः कौ। ति। णि। इङो गाङादेशो वा स्यात्सन्परे चङ्परे च णौ परतः। अधिजिगाप
यिषति। अध्यापिपयिषति। चङि। अध्यजीगपत्। अध्यापिपत ५२ अस्तेर्भूः। कौ। ति। अ। अस। इत्येतस्य धातो
र्भू इत्ययमादेशः स्यात्। आर्धधातुके। भविता। भवितारौ। भवितारः। भवितुम्। भावेतनयम् ५३ ब्रुवो वचिः। कौ। ति
अ। ब्रूञ्। इत्येतस्य धातोर्वचिरित्ययमादेशः स्यात्। आर्धधातुके इकार उच्चारणार्थः। वक्ता। वक्तारौ। वक्तव्यम्। स्थानिवद्भा
वेन कर्तृगामिनि क्रियाफले आत्मनेपदम्। ऊचे। वक्ष्यते ५४ चक्षिङः ख्याञ्। कौ। ति। अ। चक्षिङ्। इत्येतस्य धातोः
ख्याञित्ययमादेशः स्यात्। आर्धधातुके आख्यातनयम् स्थानिवद्भावेन नित्यमात्मनेपदं न भवमतिज्ञाकात्सनुव

न्यकरणसामर्थ्यात्। कृशादिरपमादेशः। कृशाता। कृशानवम्। असिद्धे शस्य विभाषायत्नं वक्तव्यम्॥ पूर्वत्रासिद्धमित
यिकारेणानान्तरे शस्य पत्वे विभाषेति वक्तव्यमित्यर्थः सौशब्दीयः। वृद्धाच्छो भवति। यत्वयो यथा। दितिवृज्जनम
वति आख्यातः। संयोगादेशनो धातोर्यण्वतइति निष्ठानत्वेन भवति॥ उक्ताख्यानम्। पुमः खय्यमपरे इति रुत्वेन। षष्ठ्यो
ख्यानम्। कृतवद्रुतिणत्वेन। नमः ख्यात्रे। शार्ङ्गैरे विसर्जनीयो भवति। जिह्वामूलीयो न भवति सर्वत्र यत्वस्यासिद्धत्वात्।
वर्जने प्रतिषेधः २। कौ। ति। अ। अवसेवत्याः। परिसेवत्याः॥ असनयोश्च ३। कौ। ति। अ। अस्। नृवदोरवदः। असन। वि
चूवलणः। वङ्लेतणी। ४। तणीति सेनाच्छन्दसोर्ग्रहणम्। एतत्प्रकरणोक्तं कार्यं मेनाच्छन्दसोर्बहुलं भवतीत्यर्थः
अत्रेम्। अदोजग्धिरिति न। वधकः। एत्वलिवधादेशो भवति। गात्रम्। इणोगोणादिके हनिगादेशो भवति विवलणः॥
अनवदातेनअहलादेरिति पूर्वविख्यातादेशेन। अजिरेतिष्ठति। अजेर्वी भावो नः ५५ वालिटि। कौ। ति। अ। वालिङः
ख्याजादेशो वास्याल्लिटि। आचख्यौ। आचख्यातः। आचख्युः॥ आदेशाऽभावे। आववदे। आवव्लाने। आवविदिरे॥ भाष्येण
नेदंव्याख्यानम् ५६ अजेर्व्यघञपोः कौ। ति। म्ना॥ अज। इत्येतस्य धातोर्वीइत्ययमादेशः स्यात्। आर्द्धधातुके। घञमपञ्च
वर्जयित्वा। प्रावायकः। प्रवयणीयम्। अघञपोः किम्। समाजः। समजः॥ दीर्घोच्चारणं किम्। प्रवीतः। घञपोः प्रतिषे
धे क्यप उपसंख्यानम्॥ ॥ वलादावार्द्धधातुके वेष्यते॥ कौ। ति। भ्वा। वेता। अजिता। वेष्यति। अजिष्यति। नार्थं उप
संख्यानेन। नाघञपोरिति प्रतिषेधेन। इदमाह लिवादिङः ख्याञ्वालिटीति ततो वस्मामिअजेर्वी भावो भवति
वा। व्यवस्थितविभाषा चेति। इति भाष्यम् ५७ वायौ। कौ। कृ। ड। यु इति स्तुटो ग्रहणम्। अजेर्वीसमादेशो वा
भवति यौ परि। प्रवयणः। प्राजनः॥ भाष्येण पृथक्त्वेन व्याख्यातम्। ५८। एपदन्तवियार्षजितो मतिलगाणिजोः। कौ।
स्। ता। च। एण। दन्तविय। आर्ष। जित्। इत्येते गोत्रप्रत्ययाः। तदन्तेभ्यः परयोर्यूनि जातयोरणिञोर्लुक् स्यात्। एण

कौरव्यः पिता। कौरव्यः पुत्रः। कुर्वादिभ्यो ण्यः तदन्ताद्यून्यपत्ये अत इञ् तस्य लुक्। तिकादिगणे त्वौरस शब्दस्याह वर्यात कु
र्वादिभ्यो ण्य इति ण्यप्रत्ययान्तस्य क्षत्रियगोत्रवाचकस्य कौरव्यशब्दस्य ग्रहणम्। इदन्तु ब्राह्मणगोत्रम्। अतः फिञ् न भ
वति क्षत्रिय श्वाफल्कः पिता। श्वाफल्कः पुत्रः। ऋष्यन्धकवृष्णिकुरुभ्यश्चेत्यण्। ततो यून्यपत्ये इञ्। तस्य लुक्॥
आर्षे॥ वासिष्ठः पिता। वासिष्ठः पुत्रः नितः॥ वैदः पिता वैदः पुत्रः। अनृष्यानन्तर्ये विदादिभ्योऽञ्। ततो यून्यत इञ्
तस्य लुक् अणः खल्वपि। तैकायनिः पिता। तैकायनिः पुत्रः। तिकादिभ्यः फिञ्। ततः प्राग्दीव्यतोऽण्। तस्य
लुक्। एतेभ्यः किम्। कौहडिः पिता। कौहडिः पुत्रः। शिवादिभ्योऽण्। ततो यून्यत इञ्। तस्य लुग्भवति। इति किं
वमरथ्यस्य छात्राः। वामरथ्याः। कुर्वादिभ्यो ण्यः। तस्मात् कण्वादिभ्यो गोत्र इति शैषिकोऽण्। तस्य लुग्भवति॥
आणिञोः किम्। दाक्षायणाः। आणिञोर्लुकि तद्राजाद्युवप्रत्ययस्योपसंख्यानम् १ तद्राजसंज्ञकात् परस्येत्यर्थः॥
बौधिः पिता। बौधिः पुत्रः। औडुम्बरिः पिता। औडुम्बरिः पितामहः। उदुम्बरशब्दात् साल्वावयवलक्षण इञ्। तत
इञन्ताद्यूनि यञिञोश्चेति फक्। तस्य लुक्। अणिञोर्लुकि क्षत्रियगोत्रमात्राद्युवप्रत्ययस्योपसंख्यानम्॥ १॥ इत्यप
स्य जाबालिः पिता। औजाबालिः पुत्रः। जबालस्यापत्यमत इञ्। अयं तद्राजो न भवति। तदन्तात् फकोऽलुग्विहि
तः। अब्राह्मणगोत्रमात्राद्युवप्रत्ययस्योपसंख्यानम् २ इत्यस्य बाधकत्वादिदं सूत्रम्। भाण्डिजङ्घिः पिता।
भाण्डिजङ्घिः पुत्रः। कार्णखरिकिः पिता। कार्णखरिकिः पुत्रः। भाण्डिजङ्घिकार्णखरिकी। वैशेषो ५९ पैला
दिभ्यश्च। कौ। ह्रा। न। अ। पैल। इत्येवमादिभ्यो युवप्रत्ययस्य लुक् स्यात्। पैलः पिता पुत्रश्च। पीलाया वेत्यण्।
तस्मादणो द्व्यच इति फिञ् तस्य लुक्। आङ्गः पिता पुत्रश्च। द्व्यञ्मगधेत्यादिना तद्राजसंज्ञकोऽण्। ततः फि
ञ्तस्य लुक्। अत्रेमे पैलादयः इञन्तास्तेभ्य इञः प्राचामिति लुकि सिद्धेऽपार्थः पाठः। पैल। शालङ्कि। सात्य

सू.क
५९
59

कि। सातै। कामि। राहवि। रावणि। औदन्वि। औदवजि। औदमेघि। औदमज्जि। औदभृज्जि। देवस्थानि। पैङ्गलोदायनि
राहक्षति। भौलिङ्गि। राणि। औदन्वि। औद्राहमानि औजिहानि। औदशुद्धि। तद्राजाच्चाणः। आकृतिगणोऽयम्। इ
त्यादिसूत्रत्रयं भाष्ये त्वनया आख्यातम् ६० इञः प्राचाम्। कौ। स्या। त। अ। गोत्रे यदिञन्तं तदन्तात् युवप्रत्ययस्य लुक् स्यात्।
तच्चेद्गोत्रं प्राचां भवति पान्नागारिः पिता पुत्रश्च। इञन्तात् फकन्तस्य लुक् प्राचां किम्। दाक्षिः पिता। दाक्षायणः पु
त्रः ६१ न तौल्वलिभ्यः कौ। स्या। त। अ। तौल्वलि। इत्येवमादिभ्यः परस्य युवप्रत्ययस्य पूर्वसूत्रविहितो लुङ् न स्यात्
तौल्वलिः पिता। तौल्वलायनः पुत्रः। तौल्वलि। धारणि। पारणि। दैलीपि। दैवति। वार्कलि। नैवकि। दैवमति। दैव
यज्ञि। चाफट्टकि। वैल्वकि। वैङ्कि। आनुराहति। पौष्करसादि। आनुरोहति। आनति। प्रादोहनि। नैमिश्रि। प्राड
हति। वान्धकि। वैशीति। आसिनासि। आहिंसि। आसुरि। नैमिषि। आसिवन्धकि। पौष्पि। कारेणुपालि। वै
कर्णि। वैरकि। वैहति। तौल्वल्यादिः इति ६१ सूत्राणि भाष्ये २।४।१। व्याख्यातानि ६२ तद्राजस्य बहुषु तेनैवा
स्त्रियाम्। कौ। स्या। त। अ। तद्राजसंज्ञकस्य प्रत्ययस्य लुक् स्यात्। तद्राजेनैव कृते बहुत्वे। स्त्रियां न तु लुग् भवति। अ
ङ्गाः। कलिङ्गाः तद्राजस्य किम्। औपगवाः। बहुषु किम्। आङ्गः तेनैवेति किम्। प्रियकालिङ्गाः अस्त्रियां कि
म्। आङ्ग्यः स्त्रियः तद्राजादीनां लुकि समासबहुत्वे प्रतिषेधः।१। अबहुत्वे लुग्वचनम्।२। द्वन्द्वे बहुषु लुग्व
चनम्।३। सिद्धन्तु प्रत्ययार्थबहुत्वे लुग्वचनात्।४। अस्त्रियामिति। काशम्।५। पत्नद्वये प्रीतिशेषः। द्वन्द्वे
बहुषु लुग्वचनम्।६। गर्गवत्सवाजाः। गोत्रस्य बहुषु लोपिनो बहुवचनान्तस्य प्रवृत्तौ द्व्येकयोरलुग्वक्तव्यः ७
विदानामपत्ये माणवकौ वैदः। वैदौ। एकवचनद्विवचनान्तस्य प्रवृत्तौ बहुषु लोपो शति ८ वेदस्यापत्यानि बहवो मा
णवका विदाः। वैदयोर्वा विदाः ६३ यस्कादिभ्यो गोत्रे। कौ। स्या। त। अ यस्क। इत्येवमादिभ्यः परस्य गोत्रप्रत्ययस्य ५९

लक्स्यात्। गोत्रप्रत्ययकृते बहुत्वे। स्त्रियान्तु न लुक्। यास्काः। लह्याः। बहुत्व इत्येव। यास्कः। ते नैव इत्येव। प्रिययास्काः। अस्त्रि
यामित्येव। यास्क्यः स्त्रियः। गोत्रे किम्। यास्काश्छात्राः। यस्क। लह्य। दुह्य। अयःस्थूण। तृणकर्ण। सदामत्त। कम्बलहार।
बहिर्योग। कर्णाटक। पिण्डीजङ्घ। बकसक्थ। विश्रि। कुद्रि। अजबस्ति। मित्रयु। रक्षोमुख। जङ्घारथ। उत्कास। कटुक
मन्थक। पुष्करसद्। विषपुट। उपरिमेखल। क्रोष्टुमान। क्रोष्टुपाद। क्रोष्टुमाय। शीर्षमाय। खरप। पदक। वर्मुक। भ
लन्दन। भडिल। भण्डिल। भडित। भण्डित। एते यस्कादयः। भाष्ये तु नेदं सूत्रं व्याख्यातम्॥ ६४ यञञोश्च। कौ। स्था। न। अ
यञ्। अञ्। इत्येतयोर्गोत्रप्रत्यययोर्लुग्भवति। गोत्रप्रत्ययकृते बहुत्वे। न तु स्त्रियाम्। यञ्। गर्गाः। वत्साः॥ अञ्। विदाः
उर्वाः। बहुत्व इत्येव। गार्ग्यः। वैदः। ते नैव इत्येव। प्रियगार्ग्याः। प्रियवैदाः। अस्त्रियामित्येव। गार्ग्यः। स्त्रियः। वैद्यः स्त्रि
यः। गोत्र इत्येव। द्वैप्याः। द्वीपादनुसमुद्रं यञ्। औत्साः। उत्सादिभ्योऽञ्। यञादीनामेकद्वयोर्वा तत्पुरुषे षष्ठ्या उपसं
ख्यानम्। इतः प्रभृति ये प्रत्यया बहुषु लुग्भाजस्ते यञादयः। गार्ग्यस्य कुलम्। गार्ग्यकुलम्। गर्गकुलम्। गार्ग्ययोः कु
लम्। गार्ग्यकुलम्। गर्गकुलम्। वैदस्य वैदयोर्वा कुलम्। वैदकुलम्। विदकुलम्। यञादीनां किम्। आङ्गस्य आङ्गयोर्वा कु
लम्। आङ्गकुलम्। एकद्वयोः किम्। गर्गाणां कुलम्। गर्गकुलम्। तत्पुरुषे किम्। गार्ग्यस्य समीपम्। उपगार्ग्यम्। षष्ठ्याः
किम्। शोभनगार्ग्यः॥ ६५ अत्रिभृगुकुत्सवसिष्ठगोतमाङ्गिरोभ्यश्च। कौ। स्था। न। अ। अत्रि। इत्येवमादिभ्यः परस्य गोत्रप्रत्यय
स्य लुक्स्याद्गोत्रकृते बहुत्वे। न तु स्त्रियाम्। अत्रेर्गोत्रापत्यानि पुमांसः। अत्रयः। इतश्चानिञ इति ढक् तस्य लुक्। भृगवः
कुत्साः। वसिष्ठाः। गोतमाः। अङ्गिरसः। ऋष्यणस्तस्य लुक्। बहुत्व इत्येव। आत्रेयः। भार्गवः। ते नैव इत्येव। प्रियात्रेयाः।
प्रियभार्गवाः। स्त्रियान्तु। आत्रेय्यः स्त्रियः। भाष्ये तु नेदं व्याख्यातम्॥ ६६। बह्वच इञः प्राच्यभरतेषु। कौ। स्था। न। अ। ब
ह्वचा विहितो य इञ् प्राच्यगोत्रे भरतगोत्रे च वर्तमानस्तस्य लुक्स्याद्गोत्रकृते बहुत्वे पन्नागाराः। मन्थरैषणाः। यु

सू.प.
६०
60

पिष्टिराः। अञ्जनाः। बह्वचः किम्। बैङ्क्या। पौष्ययः। प्राच्यभरतेष्विति किम्। बालाकयः। हास्तिदासयः। भरतग्र
हणमनर्थकम्। नह्यन्यत्र भरताः सन्तीति। नानर्थके ज्ञापकार्थम्। किं ज्ञाप्यते। यतज्ज्ञापयत्याचार्यः। अ
न्यत्र प्राग्ग्रहणे भरतग्रहणं न भवतीति किमेतस्य ज्ञापने प्रयोजनम्। इञः प्राचां भरतग्रहणं न भवति। औद्दाल
किः पिता औद्दालकायनः पुत्रः। इति भाष्यम्। ६७। न गोपवनादिभ्यः। कौ। स्रा। त। अ। गोपवन इत्येवमादि
भ्यः परस्य गोत्रप्रत्ययस्य लुग्न स्यात्। यञञोश्चेति लुक्प्राप्तः प्रतिषिध्यते। गोपवनाः। गोपवन। शिग्रु। बिन्दु।
भाजन। अश्वावतान। श्यामाक। श्यामक। श्यापर्ण। विदाद्यन्तर्गणोऽयं गोपवनादिः गोपवनादिप्रतिषेधः
प्राग्घरितादिभ्यः। ए। हारितः। हारितौ। बहुषु। हरिताः। ६८ तिककितवादिभ्यो द्वन्द्वे। कौ। स। त। आतिकादि।
भ्यः। कितवादिभ्यश्च द्वन्द्वे गोत्रप्रत्ययस्य लुक् स्याद् बहुत्वे। तैकायनयश्च कैतवायनयश्च तिककितवाः
तिकादिभ्यः फिञ्। तस्य लुक्। तिककितवाः। वङ्करभण्डीरथाः। उपकलमकाः। पफकनरकाः। वकनख गुदप
रिणद्धाः। उज्जककुभाः। लङ्कशान्तमुखाः। उत्तरशलङ्कटाः। कृष्णाजिनकृष्णसुन्दराः। अष्टककपिष्ठलाः। अ
ग्निवेशदाशेरुकाः। एते तिककितवादयः भाष्येणैव व्याख्यातम्। ६९ उपकादिभ्योऽन्यतरस्यामद्वन्द्वे। कौ। स
त। अ। उपक। इत्येवमादिभ्यः परस्य गोत्रप्रत्ययस्य वा लुक् स्याद् बहुत्वे द्वन्द्वे चाद्वन्द्वे च। उपकाः। औपका
यनाः। लमकाः। लामकायनाः। उपकलमकाः। अष्टककपिष्ठलाः। कृष्णजिनकृष्णसुन्दराः। इमे तु द्वन्द्वरूप
तिककितवादिषु पठ्यन्ते। तत्र पूर्वसूत्रेण नित्यं लुक्। अद्वन्द्वे त्वनेन विकल्पः। परिशिष्टानां द्वन्द्वेऽद्वन्द्वे च वि
कल्पः। उपक। लमक। अष्टक। कपिष्ठल। कृष्णजिन। कृष्णसुन्दर। चूडारक। आडारक। गडुक। उदङ्क। सुधाय
क। अबन्धक। पिङ्गलक। पिष्ट। सुपिष्ट। मयूरकर्ण। खरीजङ्घ। शलाथल। पतञ्जल। पदञ्जल। कठेरणि। कु ६०

पीतक। काशकृत्स्न। निदाघ। कलशीकण्ठ। दामकण्ठ। कृष्णपिङ्गल। कर्णक। जटिलक। बधिरक। जन्तुक।
अनुलोम। अनुपद। प्रतिलोम। अपजग्ध। प्रतान अनभिहित। कमक। वटारक। लेखाभ्र। कमन्दक। पिञ्जूलक।
वर्णक। मसूरकर्ण। मदाघ। कबन्धक। कमन्तक। कदामत्त। दामकण्ठ। एतेउपकादयः॥ अद्वन्द्वे इति द्वन्द्वे विका-
रनिवृत्त्यर्थम् १। ॐ। ७०। आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनच्। कौ। स्या। ता। अ॥ आगस्त्य। कौण्डिन्य। इत्येतयो
रवयवस्यगोत्रप्रत्ययस्याणो यञश्च लुक्स्यात्। अगस्ति। कुण्डिनच्। इत्येतावादेशौ चक्रमेण भवतः। अगस्त्
यः। कुण्डिनाः अगस्तिकुण्डिनच् इत्येतौ प्रकृत्यादेशौ भवत इति वक्तव्यम् १ लुक्प्रतिषेधे यह इहार्थम्। आगस्ती
याः प्रत्ययान्तनिपातनेहि ह्यभावः २। ७१ सुपो धातुप्रातिपदिकयोः। कौ। स्। सा। अ। धातु। प्रातिपदिक। ए
तयोरवयवस्य सुपो लुक्स्यात् धातु। आत्मनः पुत्रमिच्छति। पुत्रीयति। प्रातिपदिकस्य। राजपुरुषः। अन्नं यगवः।
धातुप्रातिपदिकयोः किम्। वृक्षः। इत्यादिसूत्रत्रयं भाष्येन न व्याख्यातम् ७२ अदिप्रभृतिभ्यः शपः। कौ। ति। अ। अद। इ
त्येवमादिभ्यो धातुभ्यः परस्य शपः। इत्येतस्य लुक्स्यात् अत्ति हन्ति द्वेष्टि ७३ बहुलं छन्दसि कौ। वे। अ। ह्वि। वेदेश
पो बहुलं लुक्स्यात् अदिप्रभृतिभ्योन भवत्यपि। वृत्रं हनति। अहिः शयते। अन्येभ्यश्च भवति। त्राध्वं नो देवाः ७४ यङोऽ
चि। कौ। ति। यङ्। लु। यङ्। इत्येतस्य बहुलं लुग्भवति अचि प्रत्यये परे चकारात्तेन विनापि बहुलं लुक्स्यात्। लो
लुवः। पोपुवः। सनीस्रंसः। दनीध्वंसः। अच्प्रत्ययं विनापि। कोकवीति शकुन्तः। वावदीति दुन्दुभिः। दुतोः वीति वि
क्तव्यम् १ तर्हि हि वक्तव्यम्। न वक्तव्यम्। इष्टमेवैतत्संगृहीतं गृहीतं स्रनीस्रंसो दनीध्वंस इत्येवमर्थं भाष्यम्। इति
भाष्यम् ७५ जुहोत्यादिभ्यः श्लुः कौ। ति। जु। हु इत्येवमादिभ्यो धातुभ्यः परस्य शपः श्लुः स्यात् लुकि प्रकृते
श्लुविधानं श्लाविति द्विर्भावार्थम्। जुहोति। बिभर्ति। नेनेक्ति। इत्यादिसूत्रद्वयं भाष्येन न व्याख्यातम ७६ बहुलं

छन्दसि। कौ। वे। अ। ह्वि। वेदे वङ्लं शपः श्लुर्भवति। जुहोत्यादिभ्यउक्तस्तत्र क्रवित्रभवति दातिप्रियाणि। अन्येभ्यश्चभ
सू॰प॰ ६१ वति। पूर्वो विवष्टि। जनिमा विवक्ति ७७ गातिस्थाघुपाभूभ्यः सिचः परस्मैपदेषु कौ। निम्वा गाति। स्था। घु। पा।
भू। इत्येतेभ्यः परस्य सिचू इत्येतस्य लुक् स्यात् परस्मैपदेषु परेषु गातीति इणादेशस्य ग्रहणम्। नतु गै इत्येतस्य।
अगात्। स्था। अस्थात्। घु। अदात्। पापानेइतिशब्दाते। नतु पारक्षणे। अपात्। भू। अ। भूत्। परस्मैपदेष्विति किं
अगासातां ग्रामौ देवदत्तेन गापोर्ग्रहणे इणपिवत्योर्ग्रहणम् ११०।७८। विभाषाघ्राधेट्छाशासः। कौ। ति
घ्रा। घ्रा। धेट्। शा। छा। सा। इत्येतेभ्यः परस्य सिचो लुग्वा स्यात् परस्मैपदेषु अघ्रासीत् अघ्रासीत्। अधात्।
शा। अशासीत्। अशात्। छो। अच्छासीत्। अच्छात्। षो। असासीत्। असात्। परस्मैपदेष्वित्येवा अघ्रासा
तां स्रमनसौ देवदत्तेन मा श्नेत्तनेर्दयाद्यावम् ७९ तनादिभ्यस्तथासोः। ति॥अ तेतन्। इत्येवादिभ्यो थात
कौ ति ते तन्। इत्येवमादिभ्यो थात्तभ्यः परस्य सिचो लुग्वा स्यात्। ता। सेथा। इत्येतयोः परयोः। अतेत। अतनि
ष्ट। अतथाः। अतनिष्ठाः। असात। असनिष्ट। असाथाः। असनिष्ठाः। तनसनेत्यातम्। थासासाहचर्यादात्म
नेपदस्य तशब्दस्य ग्रहणम्। परस्मैपदे न भवति। अतनिष्टयूयम्। आत्मनेपदे यीतथासाविति वक्तव्यम् १ एक
वचनग्रहणं वा २।८० मन्त्रेघसह्वरणशवृहदहाद्वृक्गमिजनिभ्योलेः कौ। भे। अ ह्वि घस। ह्वार। णश
हा दह। आत्। वृञ्। कृ। गमि। जनि। इत्येतेभ्यः परस्य लेर्लुग्भवति मन्त्रे। घस। अदत्त्रमो मदन्तपितरः। अदो
घस्लादेशः गमहनेत्युपधालोपः। शासिवसोनिषः। ह्वृकौटिल्ये। माह्वर्मित्रतम्। णश। प्रणङ्मर्त्यस्य। नशे
र्वेतिकुत्वम्। हङ्हनेर्होहावपि। स्वृहवोवन। आव॥ दह। मानोपक्र॥ आदित्याकारान्तग्रहणम्। साप्ररणे। आप्रा
द्यावापृथिवी अन्तरिक्षम्। हनी। परावरभीरमृधथा॥ कृञ्। अकृन्कर्म। गमलृ। अग्मन्। जनी। अज्ञातवाअस्य ६१

दन्ताः। ब्राह्मणप्रयोगोऽयम्। मन्त्रग्रहणं ब्राह्मणस्याप्युपलक्षणम्। भाष्ये तु नेदं व्याख्यातम्। ८१। आमः। कौ
तिम्ब्ना। आम्। इत्येतदन्तात्परस्य लेर्लुक् स्यात्। एधांचक्रे। ईहांचक्रे। आमो। लेर्लोपे लङ्लोटोरुपसंख्यानम्। १
आमन्तेभ्यो णलः प्रतिषेधः २ आमन्तेभ्योऽप्येवं ग्रहणस्य लोऽप्रतिषेध इति वेदमः प्रतिषेधो वक्तव्यः २ ॥ ८२
अव्ययादाप्सुपः। कौ। सा। अव्ययाद् विहितस्य आपः सुपश्च लुक् स्यात्। तत्र। शालायाम्। सुपः। कृत्वा। हृत्वा।
वा। अव्ययादापो लुग्वचनमानर्थक्यं लिङ्गाभावात्॥ २। ८३॥ नाव्ययीभावादतोऽम्त्वपञ्चम्याः। कौ। सा। सा। अ
अदन्तादव्ययीभावात्सुपो न लुक्। किन्तु तस्य पञ्चमीं विना अमादेशो भवति उपकुम्भं तिष्ठति उपकुम्भं पश्य
अतः किम्। अधिहरि अपञ्चम्याः किम्। उपकुम्भादानय। अमि पञ्चमीप्रतिषेधेऽपादानग्रहणम् १॥ ८४
तृतीयासप्तम्योर्बहुलम्। कौ। सा। सा। अ। सर्वस्मिन् तेन नित्यममादेशे प्राप्ते विकल्पोऽयम्। अदन्तादव्ययीभावा
त्तृतीयासप्तम्योर्वा अमादेशः स्यात् उपकुम्भेन कृतम्। उपकुम्भं कृतम्। उपकुम्भे निधेहि। उपकुम्भं निधेहि
सप्तम्या ऋद्धिनदीसमाससंख्यावयवेभ्यो नित्यम् २। ऋद्धि। सुमद्रम्। नदीसमासः। उन्मत्तगङ्गम्। संख्यावय
व। एकविंशतिभारद्वाजम्। त्रिपभ्यो नित्यम्। २ ...शाडौतमम् ८५ लुटः प्रथमस्य डारौरसः॥ कौ। ति। सा
लुटः स्थाने यः प्रथमपुरुषस्तस्य। डा। रौ। रस्। इत्येते आदेशाः क्रमेण भवन्ति। कर्ता। कर्तारौ। कर्तारः। टिलोपे टेरेविधि
हेतुं टो डारौरसः सर्वविप्रतिषिद्धम्। १। आत्मनेपदानां डारौरसो भवन्तीति वक्तव्यम् १ तत्र समसंख्यार्थम्। डा
विकारस्य शित्करणं सर्वादेशार्थम् २। प्रश्लिष्टनिर्देशोऽयम्। डा। आ। डा। सोऽनेकाल्शित्सर्वस्येति सर्वादेशो
भविष्यति। इति। भाष्यम्। डारौरसः कृते टेरेत्वाद्धितेषु संप्रसारणे। समसंख्येन नार्थोऽस्ति सिद्धं स्थानेऽन्तरतो
राः १॥ प्रत्ययस्वरएव वादी लसार्वधातुकानुदात्तात्तलम्। तेन तत्र न प्रसक्तः प्रत्ययस्वरः कदाचित् २। प्रत्यय

स्वरश्चतासेर्हतिसत्रियोगशिष्टः। तेनवाप्यमानुदात्तो लोप्यतेतस्मान्नदोष ३ कारिकाश्माः इति २७ सूत्राणि भाष्ये २
सू॰प॰ ५।२। व्याख्यातानि इतिसूत्रपाठे द्वितीयाध्यायस्य चतुर्थः पादः अध्यायस्य १ प्रत्ययः संज्ञाप्रदेशाः ३।१।६२। कौ
९२ स।अ।उ। संज्ञाधिकारोऽयम्। इतऊर्ध्वमायस्मात्क्रमपरिसमाप्तेर्यानन्वक्रमिष्यामस्तेप्रत्ययसंज्ञकाबोद्धाः य
तानितव्यतव्यानीयरः। कर्तव्यम्। करणीयम्। प्रकृत्युपपदोपाधीनां प्रतिषेधोवक्तव्यः॥ ३।१।२॥ परश्च॥
कौ। स।अ।उ॥ आपञ्चमपरिसमाप्तेरयमधिकारः। धातोः प्रातिपदिकाद्वापरः प्रत्ययसंज्ञकइत्। यथे।
कर्तव्यम्। करणीयम्। अकारः समुच्चयार्थः। तेनोणादीनांपरत्वेनविकल्पते॥ उभयनियमोऽयम्। प्रकृ
तिपरएवप्रत्ययः। प्रयोक्तव्यः। प्रत्ययपरैवप्रकृतिरिति। इतिभाष्यम् ३ आद्युदात्तश्च। कौ। स।प्र। अधिका
रोऽयमापञ्चमाध्यायात्। प्रत्ययआद्युदात्तोभवति कर्तव्यम् आगमास्त्वनुदात्ताभवन्ति १ आगमास्त्वविद्य
मानवदङ्गानीतिवक्तव्यम्।२॥ प्रत्ययस्वरविधावेव ४ अनुदात्तौ। सुप्पितौ॥ कौ।ख।प्र॥ पूर्वसूत्रापवादः
सुपः पितश्चप्रत्ययाअनुदात्ताभवति दृषदौ। दृषदः पितः पचति भाष्येत्वनेदंव्याख्यातम् ५ गुप्तिज्
किद्भ्यः सन् कौ।ति।भ्वा।गुप।तिज।कित्। इत्येतेभ्यो धातुभ्यः सन्प्रत्ययः। स्यात्। जुगुप्सते विकि।त्सति
तितिक्षते। गुपादिष्वनुबन्धकरणसामर्थ्यात्आत्मनेपदम् ६ मान्बधदान्शान्भ्योदीर्घश्चाभ्या
सस्य। कौ।ति।भ्वा॥ मान।बध।दान।शान। इत्येतेभ्यो धातुभ्यः सन् स्यात्। अभ्यासस्यदीर्घश्चभवति मीमां
सते बीभत्सते दीदांसते। शीशांसते। उत्तरसूत्रेवाग्रहणंसर्वस्यशेषोविज्ञायते। तेनकृ चित्रभवति।
अभिमानयति ७ धातोः कर्मणः समानकर्तृकादिच्छायांवा॥ कौ।ति।स। इषिकर्मणोधातोरिषिणैव
समानकर्तृकस्मादिच्छायामर्थे सन्प्रत्ययोवास्यात् कर्तुमिच्छति। चिकीर्षति॥ हर्तुमिच्छति। जिही

ष्वेति । धातो किम् । सोपसर्गान्माभूत् । प्रकर्तुमैच्छत् । प्राचिकीर्षत् । कर्म्मणः किम् । गमनेनेच्छति । इति करणान्मा
भूत् । समानकर्तृकात् किम् । शिष्याः पठन्त्विति इच्छति गुरुः इच्छायां किम् । कर्त्तुं जानाति । धातुशब्दः सूत्रार्थो विधाना
द्दस्य सनन्ताद्धातुकसंज्ञा भवति । पूर्वसूत्रद्वयविहितसन्नन्तं भवति आशङ्कायामचेतनेषूपसंख्यानम् ।१। अश्मा
लुलुठिषते । कूलं पिपतिषति । आशङ्कायां सन्वक्तव्यः ।१। कौ । ति । सा श्वा मुमूर्षति ।। एवं तन्नग्रहणेन नार्थः । आशं
ङ्कायामिच्छा । इदमपि सिद्धं भवति । श्वा मुमूर्षतीति । इति भाष्यम् ।। सन्नन्तान्नात्मनःप्रतिषेधो वक्तव्यः ।२। चिकीर्षितुमि
च्छति । जिहीर्षितुमिच्छति ।। इषिसन्निति वक्तव्यम् २ स्वार्थे सन्नन्तात् भवत्येव । जुगुप्सिषते । मीमांसिषते शैषिका
न्मतुवर्थीयाच्छैषिको मतुवर्थिकः । सरूपः प्रत्ययो नेष्टः सन्नन्तान्न सनिष्यते ।।१।। भाष्यकारिकेयम् । शैषिकाच्छै
षिकः सरूपो न भवति । शालायां भवः शालीयो मठः । तत्र भवमिति छप्रत्ययो न भवति । विरूपस्तु भव
ति । अहिच्छत्रे भव आहिच्छत्रः । तत्र भव आहीच्छत्रीयः । तथा मतुवर्थीयात्सरूपो मतुवर्थो न । दण्डो ऽस्यास्तीति दण्डिक
सोऽस्यास्तीति इन् न भवति विरूपस्तु भवत्येव । दण्डिमती सेना तथा इच्छासन्नन्तादिच्छासन्न भवतीति ७ सूत्रा
णि भाष्ये ३ ।१।२ व्याख्यातानि ८ सुप आत्मनः क्यच् । कौ । ति । न । इषिकर्म्मणः इच्छाकर्तृसेवात्मिनः सुबन्तादिच्छाया
मर्थे क्यच् प्रत्ययो वा स्यात् आत्मनः पुत्रमिच्छति । पुत्रीयति सुपः किम् । वाक्यान्माभूत् । महान्तं पुत्रमिच्छति आ
त्मनः किम् । राज्ञः पुत्रमिच्छति ।। ककारो नाः क्य इति विशेषणार्थः । चकारः सामान्यग्रहणाविघातार्थः सविशेष
णानां वृत्तिर्न वृत्तस्य वा विशेषणेन प्रयुज्यत इति वक्तव्यम् २ महान्तं पुत्रमिच्छति अमुण्डादीनामिति वक्तव्यम् २
मुण्डं करोति मुण्डयति माणवकम् मुण्डमिच्छत्यादिना णिच् क्यचि मान्ताव्ययप्रतिषेधः ।२। इदमिच्छति ।
किमिच्छति । अव्ययम् । उच्चैरिच्छति । नीचैरिच्छति । मान्तादव्ययाच्च क्यच् न १ । कौ । ति । ना इषिकर्म्मणः

सुबन्तादात्मन इच्छायामर्थे काम्यच्प्रत्ययो वा स्यात् पुत्रमात्मन इच्छति। पुत्रकाम्यति योगविभाग उत्तरत्र क्यचश्चवान्
सू.प. ६३ कर्षणार्थः। चकारादित्संज्ञा काम्यचः ककारस्य इत्संज्ञा न भवति। आदितस्य ककारः कर्तव्यः॥ काम्यचश्चित्करणं तर्थैका
कस्येदर्थाभावात् इति भाष्यम् १० उपमानादाचारे। कौ। ति। ना। उपमानात्कर्मणः सुबन्तादाचारेऽर्थे वा क्यच्
स्यात्। पुत्रमिवाचरति। छात्रीयति शिष्यम्। प्रावारीयति कम्बलम्। अधिकरणाच्चेति वक्तव्यम्। ए कौ। ति। ना
63 कुटीयति प्रासादे। प्रासादीयति कुट्याम् ११ कर्तुः क्यङ् सलोपश्च। कौ। ति। ना। उपमानात्कर्तुः सुबन्तादाचारे
ऽर्थे क्यङ् वा स्यात्। पत्रन्तस्य कारान्तस्य सुबन्तस्य सकारः स लोपश्च भवति श्येन इवाचरति। श्येनायते काकः। व्यव
स्थित विकल्पोऽयं सलोपः। ओजायते। अप्सरायते। अत्र नित्यं भवति। पयायते। पयस्यते। अत्र वा भवति प्रलो
न्वस्येति परिभाषया नेह। हंसायते। सलोपो वा १ ओजसोऽप्सरसो नित्यम्। २। आचारेऽवगल्भक्लीबहोडेभ्यः क्वि
ब्वा वक्तव्यः। ३। कौ। ति। ना। अवगल्भो वक्ते। क्लीबते। क्लीबांचक्रे होडते। होडांचक्रे। सर्वप्रातिपदिकेभ्य आचारे
क्विब्वा वक्तव्यः। ४। इत्यपरे। कौ। ति। ना अश्वति॥ ननु इदानीमवगल्भादीनां ग्रहणं कर्तव्यं। कर्तव्यं च। किं प्रयोजनं
आत्मनेपदार्थान्नत्वन्यानायेदामि। गल्भक्लीबहोडइति इति भाष्यम् १२ भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः॥ कौ
ति। ना। भृश। इत्येवमादिभ्यः प्रातिपदिकेभ्योऽच्व्यन्तेभ्यो भवत्यर्थे क्यङ् वा स्यात् हलन्तानां भृशादीनामन्त्यस्य
लोपश्च भवति अभृशो भृशो भवति। भृशायते। हलन्तस्य। उन्मनायते। चुरादौ ग्राम गुहे इत्येव पठितव्यम्॥ गु
हे योऽयं ग्रामश्शाहृ इत्युक्तो सामर्थ्यात्स ग्रामधाहूलद्यो से ग्रामश इति पाठो ज्ञापयति उपसर्गसमानाकारं पूर्वपदं धा
तुसंज्ञाप्रयोजकप्रत्ययोत्पत्तौ पृथक् क्रियत इति तेन नमनः शाह्याचाराट्। उदमनायत अश्वैः किम्। भृशो भवति।
भृश। शीघ्र। चपल। मन्द। पण्डित। उत्सुक॥ सुमनस्। दुर्मनस्। अभिमनस्। उन्मनस्। रहस्। रोहत्। रेहत्। ६३

वेहत्। संश्वत्। त्रपत्। शाश्वत्। भ्रमत्। वेहत्। शुचिस। शुचिवर्चस। अंडर। वर्चस। ओजस। सुरजस। अरजस।
एतेभ्यः भृशादयः भृशादिषु भूतनद्भावग्रहणं कर्तव्यम् १ इह मा भूत् तक्रादिवा भृशा भवन्ति वेपट्वा भृशान त्वत्रादय
स्तेदिवा ह्रभवन्तीत्यर्थः विप्रतिषेधानर्थक्यं च भवत्यर्थे काङ्वचनात् २ डाविवचनप्रामात् ३ नानिवजिवधुक्रु
मन्ससदृशाधिकरणेन यथाह्नमनि १ मायोऽयम् सू पा १२ लोहितादिडाज्भ्यः क्यष् कौ ति नालोहित इत्ये
वमादिभ्योऽञ्यन्तेभ्यः प्रातिपदिकेभ्यो डाजन्तेभ्यश्च भवनीत्यर्थो वा क्यष् स्यात् लोहितायति। लोहि
तायते डाच् पटपटायति। पटपटाय्। लोहित चरित नील फेन मद्र हरित दास मन्द लोहितादिराकृतिग
णः लोहितडाज्भ्यः क्यषवचनम् १ कौ। ति। ना भृशादिष्वितराणि २ कौ ति ना काङ् नीलायते फेनायते १३
कष्टाय क्रमणे कौ। ति नाकष्टशब्दाच्चतुर्थ्यन्तात्क्रमणेऽर्थे काङ् वा स्यात् कष्टाय क्रमते। कष्टायते सत्रक
क्षकृच्छ्रगहनेभ्यः कण्वचिकीर्षायामिति वक्तव्यम् १ कौ मि ना सत्रादयो हिंसाविषये यायार्थाः। कण्वं पा
पम्। सत्रायते कक्षायते कष्टायते। गहनायते सत्रादिभ्यश्चतुर्थ्यन्तेभ्यः क्रमणेऽनार्जवे काङ् वक्तव्यः १
इत्येपरे १४ कर्मणो रोमन्थतपोभ्यां वर्तिचरोः कौ ति नाशिमन्थात पसश्च तेनाभ्यां कर्मभ्यां क्रमेण वर्तनेना
यावरणे वार्थे काङ् वा स्यात्। रोमन्थं वर्तयति। रोमन्थायते जपस्वरतिजपस्यति हन्ववल्लनइति वक्तव्यम् १
कौ। मि ति। ना इह मा भूत्। कीटो रोमन्थं वर्तयति उद्गीर्णस्य अवगीर्णस्य वा मन्थो रोमन्थः इति भाष्यमत
पसः परस्मैपदं च २ कौ ति ना १६ वाष्पोष्मभ्यामुद्वमने कौ ति ना वाष्प ऊष्मन् इत्येताभ्यां कर्मभ्यामुद्वम
नेऽर्थे काङ् वा स्यात् वाष्पमुद्वमति। वाष्पायते। ऊष्माणमुद्वमति। ऊष्मायति फेनाच्चेति वक्तव्यम् १ कौ
ति। ना। फेनायते १७॥ शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे कौ ति ना शब्दादिभ्यः काङ् वा स्यात्

सू॰पा॰
६४

रोतीत्यर्थे शब्दं करोति शब्दायते वैरायते कलहायते अभ्रायते कण्वायते मेघायते अटाट्टाशीकाकोटापोटा
सोटा। प्रुष्टाप्लुष्टाग्रहणं कर्तव्यम् १ सुदिनदुर्दिनाभ्यां च २ सुदिनायते दुर्दिनायते नीहाराच्च १ नीहारायते
सुदिनदुर्दिननीहारेभ्यश्च २ कौ ति ना १८ सुखादिभ्यः कर्तृवेदनायाम् कौ ति ना सुख इत्येवमादिभ्यः क
र्मभ्यो ऽनुभवे ऽर्थे क्यङ् वा स्यात्। वेदनाकर्तृ इति यदि सुखादीनि भवन्ति सुखं वेदयते सुखायते कर्तृग्रहणं किम्
परस्य सुखं वेदयति सुख। दुःख। तृप्र। कृच्छ्र। अस्र। आस्र। अलीक। करुण। कृपण। सोढ। इत्येतानि सुखादीनि १९ न
मोवरिवश्चित्रङः क्यच् कौ ति ना नमस् वरिवस् चित्रङ् इत्येतेभ्यः करोतीत्यर्थे वा क्यच् स्यात् नमस्करोति न
मस्यति देवान् वरिवस्यति गुरून् चित्रीयते। चित्रङो ङित्करणादात्मनेपदम् कानादिषु प्रत्ययार्थनिर्देशः क
र्तव्यः १ नमसः पूजायाम् २ कौ ति ना वरिवसः परिचर्यायाम् ३ कौ ति ना चित्रङ आश्चर्ये ४ कौ ति
ना २० पुच्छभाण्डचीवराण्णिङ् कौ ति ना पुच्छ भाण्ड चीवर इत्येतेभ्यः करोतीत्यर्थे णिङ् वा स्यात् पुच्छ
मुदस्यति उत्पुच्छयते भाण्डानि समाचिनोति संभाण्डयते चीवराण्यर्जयति संचीवरयते चीवराणि परिधत्ते
संचीवरयते भिक्षुः ङकारश्चात्मनेपदार्थः णकारः सामान्यग्रहणार्थः। णेरनिटीति भाण्डात्समाचयने १ कौ
ति ना चीवरादर्जने परिधाने च २ कौ ति ना पुच्छादुदसने पर्यसने च ३ कौ ति ना भाष्ये तु नेदं व्याख्यातम् वा
र्तिकानि पूर्वसूत्रोक्तानि २१ मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच् कौ ति ना मुण्डप्रभृति
भ्यः करोतीत्यर्थे णिच् स्यात्। मुण्डं करोति। मुण्डयति मिश्रयति श्लक्ष्णयति लवणयति। व्रतयति पयः। भु
ङ्क्त इत्यर्थः व्रतयति शूद्रान्नम्। वर्जयतीत्यर्थः हलयति। हलिं गृह्णातीत्यर्थः कलयति कलिं गृह्णातीत्यर्थः। कृत
यति कृतं गृह्णातीत्यर्थः तूस्तानि विहन्ति वितूस्तयति केशान् विजटीकरोतीत्यर्थः हलिकल्योरत्वं निपातनेन स ६४

न्वङ्गावप्रतिषेधार्थम् १ परत्वाद्वृद्धौ सत्यां टिलोपः अजहलत् १ अवकलत् २२ धातोरेकाचो हलादेः क्रियासमभि
हारे यङ् । कौ ति पर्येतः पुनःपुनर्भृशार्थश्च क्रियासमभिहारः । तत्र वर्तमानादेकाचो हलादेर्धातोर्यङ् वा स्यात् पुनः प
चति पापच्यते अतिशयेन ज्वलति जाज्वल्यते धातोः किम् । सोपसर्गान्माभूत् भृशं प्राटति । एकाचः किम् । भृ
शं जागर्ति हलादेः किम् । भृशमीहते ऊर्णोतेश्चोपसंख्यानम् १ सूचिसूत्रिमूत्र्यट्यर्त्यशूर्णोतिभ्यो यङ् वाच्यः १
इति भाष्यकृतः कौ मि य सूच । सोसूच्यते सूत्र सोसूत्र्यते मूत्र मे मोमूत्र्यते अट अटाट्यते ऋ अरार्यते अश्
अशाश्यते ऊर्णुञ् प्रोर्णोनूयते भृशं शोभते भृशं रोचते अत्र यङ् नेति भाष्यकृतः वाच्य ऊर्णोतेः सर्ववद्भावो
यङ्प्रसिद्धिः प्रयोजनम् आमश्च प्रतिषेधार्थमेकाचश्चेड्उपग्रहात् १ कारिकेयम् इड्ग्रहः इट्प्रतिषेधः वि
भाषा गुण इति पञ्चमी २३ नित्यं कौटिल्ये गतौ वि य गत्यर्थाद्धातोः कौटिल्य एव यङ् स्यात् न तु क्रियासम
भिहारे कुटिलं व्रजति वाव्रज्यते कुटिलं क्रामति चंक्रम्यते नित्यग्रहणं विषयनियमार्थम् । तेन क्रियासमभि
हारे न भवति भृशं व्रजति २४ लुपसदचरजपजभदहदशगृभ्यो भावगर्हायाम् कौ ति च लुप सद च
र जप जभ दह दश गृ इत्येतेभ्यो धातुभ्यो भावगर्हायां यङ् स्यात् लुप गर्हितं लुम्पति लोलुप्यते सद्
सासद्यते चर चञ्चूर्यते जप । जञ्जप्यते दह । दन्दह्यते दंश दन्दश्यते गृ ६ निजेगि । दह । दन्दह्यते । दंश
न्दश्यते गृ निजेगिल्यते भावगर्हायां किम् साधु जपति भावग्रहणं किम् साधनगर्हायां माभूत् मन्त्रं ज
पति । सूत्रे नित्यग्रहणमनुवर्तते भावगर्हायामेव न तु क्रियासमभिहारे भृशं लुम्पति २५ सत्यापपाशरूप
वीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच् कौ ति चु सत्यादिभ्यः सूत्रोक्तेभ्यः प्रातिपदिकेभ्यश्चु
रादिभ्यश्च धातुभ्यो णिच् स्यात् सत्यमाचष्टे सत्यापयति सत्यशब्दस्य णिच्यापुगागमः पाशं विमुञ्च

सु॰ प॰
८५
65

ति विपाशयति रूपं पश्यति रूपयति वीणयाउपगायति। उपवीणयति तूलेनाऽनुकुष्णाति अनुतूलयति श्लोकैरु
पस्तौकैरुपस्तौति उपश्लोकयति त्वचं गृह्णाति त्वचयति वर्मणा सन्नह्यति संवर्मयति चूर्णैरवध्वंसयति अवचू
र्णयति चुरादिभ्यः स्वार्थे णिच्। चोरयति चिन्तयति अर्थवेदसत्यानामापुक् चेति वक्तव्यम् १ अर्थापयति वेदापयति अ
सत्यापयति अर्थवेदसत्यानामापुक् १ कौ ति चु २९ हेतुमति च कौ ति। णिहेतुमति व्यापारे प्रेरणादौ वाच्ये धातोर्णि
च्स्यात् कुर्वन्तं प्रेरयति। कारयते पचन्तं प्रेरयति। पाचयति। पाचयते मतं करोतीत्युपसंख्यानेन सूत्रयत्याद्यर्थम् १ सूत्रं करो
ति। सूत्रयति। सूत्रयति तत्करोति तदाचष्टे १ कौ ति चु आख्यानात्कृतस्तदाचष्टे कृल्लुक् प्रकृतिप्रत्यापत्तिः प्रकृतिवच्च
कारकम् २ कौ ति चु आख्यानवाचकात्कृदन्तात्तदाचष्टे इत्यर्थे णिच् स्यात्। कृतो लुग्भवति। प्रकृतेः स्वरूपावस्थानं
भवति कारकं च प्रकृतिवद्भवति चकारात्कार्यमपि कृतं तत्सादिकं हेतुमति णिचि या प्रकृतिस्तद्वद्भवतीत्यर्थः कं
सवधमाचष्टे कंसं घातयति राजागमनमाचष्टे राजानमागमयति आख्यानशब्दाच्च प्रतिषेधो वक्तव्यः ३ आख्यानमाचष्टे इति
दृश्यर्थे च प्रवृत्तौ ४ आख्यानादित्येतत्पदरहितं कृतस्तदाचष्टे इत्यादि पूर्ववार्तिकस्य सर्वमनुवर्तते मृगरमणमाचष्टे
मृगान्रमयति यदारण्ये रममाणान्मृगान्प्रतिपद्य आचष्टे एतस्मिन्नवकाशे एवंविधा मृगा रमन्त इति तदा प्रतिपाद
दर्शनार्थो प्रवृत्तिर्भवति दृश्यर्थायां किम् ग्रामे यदा मृगरमणमाचष्टे तदा मा भूत् ग्रामे मृगाणामसंभवात्तद्दर्शना
र्थे प्रवृत्तिः आङ्लोपश्च कालात्यन्तसंयोगे मर्यादायाम् ५ कृतस्तदाचष्टे इत्याद्यनुवर्तते आरात्रिविवासमाचष्टे। रा
त्रिं विवासयति यावद्रात्रेरतिक्रमणं तावत्कथाः कथयतीत्यर्थः चित्रीकरणे प्रापि ६ नक्षत्रयोगे ज्ञि ७ जानात्यर्थे णिच
स्यात् कृतस्तदाचष्टे इत्याद्यनुवर्तते पुष्ययोगं जानाति। पुष्येण याजयति मघाभिर्याजयतीति १५ सूत्राणि
भाष्ये ३।१।२। व्याख्यातानि २७ कण्ड्वादिभ्यो यक् कौ ति क कण्ड्वा। इत्येवमादिभ्यो यक्प्रत्ययः स्यात् कण्ड्वादयो धा ८५

नवः प्रातिपदिकानिवर्त्तन्तेधातवविकाराद्धातुभ्योयग्भवति नमनन्तप्रातिपदिकेभ्यः कण्डूयति कण्डूयतेजित्वात्कर्त्रगामिनिक्रि
याफलेआत्मनेपदम् कण्डूञ् मन्तु हृणीङ्।वल्गुअस्तु मनस।महीङ्।लाड्।लेट।इरस।इरज।इरज।इरज्। उवडुवस
उषस्।वेट्।मेधाकुषुभ।नमससगव।तन्तम्।षम्मस।सुखो।दुःखो।भिक्ष।चरण।चरम।अवरसपर।अररभिषज्।भिष्णज्।
अपर आर।इषुधय।वरण।चुरण।तुरण।भुरण।गद्गद एला।केला।वेला।शेलालिट्लोट्।लेख।रेख।द्रवस।तिरस।अग
द।उरस।तरण।पयस्।संभूयस।संवर।आकृतिगणोऽयम्॥ कंड्वादिभ्योवेतिक्रमम् १ धातुप्रकरणाद्धातुः कस्यचास
जनादयि।आहचायमिमदीर्घैमन्येधातुर्विभाषितः १ कारिकेयम् २८ गुपूधूपविच्छिपणिपनिभ्यआयः कौति भ्वाण
सू।धूप विच्छ।पण।पन।इत्येतेभ्योधातुभ्यआयप्रत्ययः स्यात्।स्वार्थे गोपायति धूपायति विच्छायति।पणायति।पनाय
ति पनधातोः स्तुतावेवआयप्रत्ययः।नतुव्यवहारे।पणसाहचर्यात्।शतस्यपणते।अनुबन्धः केवलेचरितार्थस्तेनआयप्र
त्ययान्तादात्मनेपदंनभवति इत्यादिसूत्रद्वयंभाष्येतुनव्याख्यातम् २९ ऋतेरीयङ् कौ ति अ सूत्र।इतिसौत्रोधातुर्घृण
यांवर्त्तते।तस्मादीयङ् स्यात्।ङित्वादात्मनेपदम्।ऋतीयते।ऋतीयेते ऋतीयेते ऋतीयन्ते ऋतेश्छाङि।तिवक्ष्यमाणेईयङ्।वि
यानेत्वायपति।धातुविहितानांप्रत्ययानामायन्नादयोनभवन्तीति ३० कमेर्णिङ् कौ ति भ्वाकम्।इत्येतस्माद्धातोर्णि
ङ्स्यात् कामयते कामयेते कामयन्ते णकारोहम्यर्थः।ङकारआत्मनेपदार्थः ३१ आयादयआर्द्धधातुकेव कौ ति
भ्वाप्रूर्वोक्ताआय ईयङ्णिङ्।इत्येतेप्रत्ययाआर्द्धधातुकविषयेवाभवन्ति गोप्तागोपायिता ऋतिता ऋतीयिता कमि
ता कामयिता ३२ सनाद्यन्ताधातवः संज्ञाप्रदेशाः ३।१।५१ कौ तिभ्वा सनादयः कमेर्णिङ् न्ताः प्रत्ययाअन्तेयेषां
तेधातुसंज्ञाभवन्ति चिकीर्षति पुत्रीयति पुत्रकाम्यति ३३ स्यतासीलृलुटोः॥ कौ ति भ्वास्य।तासि।इत्येतौप्रत्ययौ
धातोर्भवतोयथाक्रमंलृलुटोः परतः लृइतिलृङ्लृटोर्ग्रहणम् करिष्यति अकरिष्यत् श्वःकर्त्ता तासेरिडादित्वात्कारण

सू·प·
६६
68

मन्त्रनासिकलोपप्रतिषेधार्थम् सेमन्ता ३४ सिब्बहुलं लेटि कौ वे अ न्ते सिप् इत्येष प्रत्ययो धातोर्बहुलं भवति लेटि पर
तः जोषिषत् तारिषत् मन्दिषत् बहुलग्रहणात् क्वचिन्न भवति पताति विद्युत् उदधिं च्यावयाति सिब्बहुलं छन्द
सि सनाद्यन्ते न घत्वार्थः १ सवयवमक्थः २ अथवा सिसीहा: यथा तोरवश्ववांश्च पालिङ्ग्यम् सस्सोपद् सिपि कृते
तत्काललक्षणाड्द् प्रतिषेधः स्यात् सम्पितश्चनेकाचश्वताश्च प्रवर्तते सिब्बहुलं छन्दसि णिदक्तव्यः २ सविषत् प्रण
णोचिना विषत् ३५ कास्प्रत्ययादाममन्त्रे लिटि कौ ति स्वा कास् इत्येतस्माद्धातोः प्रत्ययान्तेभ्यश्च धातुभ्य आमप्र
त्ययः स्याल्लिटि परे न तु मन्त्रे कासांचक्रे त्ययान्तेभ्यः लोलूयांचक्रे अमन्त्रे किम् कृष्णो नो नाव आमो मकार स्यान्ते
ता न भवति कासश्चाम विधानसामर्थ्यात् कासग्रहणेन च कासउपसंख्यानम् १ चकासग्रहणे कासउपसंख्यानम् २
कास्यकाचइति वक्तव्यम् २ तुलमस्योचकार दरिद्रोचकार कास्यनेकाच्ग्रहणं कर्तव्यम् १ कौ ति स्वा ३६ इजादेश्चा
गुरुमतो ऽनृच्छः कौ ति स्वा इजादिर्यो धातुर्गुरुमाननृच्छत्यस्तस्मादाम् स्याल्लिटि परे ईहांचक्रे ऊहांचक्रे एधां
चक्रे इजादेः किम् ततक्ष गुरुमतः किम् इयेष अनृच्छः किम् आनर्च्छ गुरुमतश्चाम्विधाने लिरनि मितान्प्रतिषे
धः १ उपदेशावचनात्सिद्धम् इतिभाष्यम् यद्युपदेशग्रहणं क्रियते उब्जेरामवक्तव्यः २ ऊर्णोतेश्चोपसंख्यानम् २ प्र
तिषेधस्येति शेषः अरवि प्रतिषेधो ज्ञायक उब्जेरामभावस्य वधषोऽन्यार्थं वर्णविप्रतिषेधो वक्तव्यः उब्जेश्चाम्
वक्तव्यः । उभयेन वक्तव्यम् उपदेशग्रहणं न करिष्यते । कस्मान्न भवति । इयेष । सन्निपातलक्षणो विधिरनिमित्तं तद्वि
घातकस्येति इति भाष्यम् ३ । ३७ दयायासश्च ॥ कौ ति स्वा दय अय । आस । दयाया । सश्च ॥ कौ ति ॥ स्वा दय । अय ।
आस । इत्येतेभ्यश्चाम् स्याल्लिटि परे दयांचक्रे अयांचक्रे दयांचक्रे आयांचक्रे आसांचक्रे भाष्यतनेदंख्या । नम् ३८
उषविदजागृभ्योऽन्यतरस्याम् । कौ । ति स्वा उष दाहे । विद ज्ञाने जागृ । इत्येतेभ्यश्चाम् वा स्याल्लिटि परे ओषांचकार उ ६६

वोष विदांचकार। विवेद जागरांचकार जजागार विदेरामकित् १ विदिरकारान्तत्वामः सन्नियोगेन इतिभाष्यम् ३९
भीह्रीभृहुवां श्लुवच्च कौ ति नु जिभी ह्री डुभृञ् हु इत्येतेभ्यश्चाम्वास्याल्लिटि परे तस्मिन्नामि परे श्लाविव कार्यं च भव
ति श्लुवद्भावाद्द्वित्वम् इत्त्वं च विभयांचकार विभाय जिह्रयांचकार जिह्राय बिभरांचकार बिभार जुहवांच
कार जुहाव ४० कृञ्चानु ति म्या आम् प्रत्ययान्त पश्चात् लिट् कारेण कृञ् प्रत्याहारः कृ भू अस। इत्येते गृह्यन्ते
ते यदि स्युस्तु न गृह्यन्ते। अनित्यत्वनार्थत्वात् पावयांचकार पावयांबभूव पावयामास अनुप्रयोग विधान सामर्थ्याद् स्तेर्भ
भवो न भवति विपर्यास निवृत्त्यर्थं व्यवहित निवृत्त्यर्थं च १४१ विदांकुर्वन्त्वित्यन्यतरस्याम कौ ति अविदांकुर्वन्त्वित्ये
तद्वा निपात्यते किं पुनरिह निपात्यते वेत्ते लोटि परे आम् प्रत्ययः। गुणाभावः। लोटो लुक्। लोट्परकस्य कृञो ऽनु
प्रयोगश्च निपात्यते इति करणः प्रदर्शनार्थः। न केवलं प्रथमपुरुषबहुवचनम्। किन्तर्हि सर्वाण्येव लोड्वचनान्यनु
प्रयुज्यन्ते विदांकरोतु। विदांकुरुतात्। विदांकुरुताम्। विदांकुरुतात् वैत्तु यद्वेवेत्तु। वितात्। विताम् विताम् विद
न्तु इत्यादि सूत्रद्वये भाष्ये तु न व्याख्यानम् ४२ अभ्युत्सादयांप्रजनयांचिकयांरमयामकः पावयांक्रियाद्विदामक्रन्नि
ति च्छन्दसि कौ वै अत् अभ्युत्सादयाम् प्रजनयाम् चिकयाम् रमयाम् पावयांक्रियात्। इत्यत्र लिङि आम् क्रियादित्यस्य
स्य चानुप्रयोगो निपात्यते विदामक्रन् इत्यत्र विदेर्लुङि आम् गुणाभावो ऽक्रन्नित्येतस्य चानुप्रयोगो निपात्यते वेदे च
हु। णिच्। अभ्युत्सादयामकः लोके तु अभ्युदसीषदत् जनेश्चिच्च। प्रजनयामकः। लोके तु प्राजीजनत्। चिनोतेर्णि
च्। चिकयामकः। लोके तु अचेषीत् रमणिच्। रमयामकः लोके तु अरीरमत्। पुञ्। पूञ। णिच्। पावयांक्रियात्। लोके
तु पाव्यात्। विद विदामक्रन्। लोके तु अवेदिषुः इति १९ सूत्राणि भाष्ये ३।१। व्याख्यातानि ४३ च्लि लुङि कौ ति स्मा
च्लि इत्ययं प्रत्ययो धातोः स्याल्लुङि परे अकर्षित्॥ इकारउच्चारणार्थः कारः स्वरार्थः। लकारस्यादेशाः सिजादयो

वद्व्रजे ४४ ह्मे:सिच कौ ति म्वा हलि। इत्येतस्य सिज्यादेशः स्यात् अकाषीत् अह्लाषीत् इकारउच्चारणार्थः वकार :
स्त्र·प्र· स्वरार्थः। आगमानुदात्तत्वे हि प्रत्ययस्वरमिव विन्स्वरमपि बाधेत अमः स्पृशास्यानिमादेशोदिम्प्रकारो ऽन्तवध्यते सृशमृ
८७ शकृषतृपदृपांसिच्वा १ स्पृश अस्पृक्षीत् मृश अमृक्षत् अम्राक्षीत् तृप अतृपत् अत्राप्सीत् दृप अदृपत्
अद्राप्सीत् स्पृशमृशकृषतृपदृपां च्लेः सिज्वा वाच्यः १ कौ ति म्वा ४५ शलइगुपधादनिटःक्सः कौ ति म्वा शल
67 न्तायो धातुरिगुपधस्तस्मात्परस्यानिटः च्लेः क्स इत्यादेशः स्यात् डहग्रधुत्वेत् लिह। अलिक्षत् शलः
किम्। अभैत्सीत्। इगुपधात्किम्। अधाक्षीत्। अनिटः किम्। अकोषीत् ४६ श्लिष आलिङ्गने। कौ। ति। दि। श्लिषा
इत्येतस्माद्धातोः परस्यादिः इत्येतस्माद्धातोः परस्यात् च्लेरित्येतस्य क्स इत्यादेशः स्यादालिङ्गने ऽर्थे अश्लिक्षत् कन्यां
देवदत्तः आलिङ्गने किम्। समश्लिषज्जतु काष्ठम्। श्लिषआलिङ्गने नियमाऽनुपपत्ति। वैयेयमावात्।२। सिद्ध
त्वश्लिषआलिङ्गने ऽविगाविषये २ अङ्घ्रियानेवश्लिषोऽनालिङ्गने इ। योगविभागः करिष्यते। श्लिषः वक्षो भवति
किमर्थमिदम् पुषादिपाठादङ् प्राप्नोति तद्बाधनार्थम्। ततआलिङ्गने। इदमिदानीं किमर्थं स्यात्। नियमार्थम्।
श्लिषआलिङ्गने एव। इति भाष्यम् ४७ नदृशः। कौ। तिम्वा॥ दृशिर्। इत्येतस्माद्धातोः परस्य च्लेः वक्त्र देशो न स्या
त्। अदर्शत्। अद्राक्षीत्। इरितो वेत्यङ् विकल्पः ४८ णिश्रिद्रुस्रुभ्यः कर्त्तरि चङ्। कौ ति म्वा सिचोऽपवादः।
एपन्तेभ्यो धातुभ्यः श्रिञ्। द्रु। स्रु। इत्येतेभ्यश्च परस्याच्लेरित्येतस्य चङ् इत्ययमादेशः स्यात् कर्त्तृवाचिनि लुङि परे।
अचीकरत्। अजीहरत्। अशिश्रियत् अदुद्रुवत्। असुस्रुवत्। चङोङकारो गुणप्रतिषेधार्थः चकारश्चङी
ति विशेषणार्थः कर्त्तरि किम् अकारयिषातां कटौ देवदत्तेन। णिश्रिद्रुस्रुषु कमेरुपसंख्यानम् १ अचकमत।
णिङित्। अचीकमत कमेश्च्लेश्चङ् वक्तव्यः १ कौ। ति। म्वा॥ कर्म्मकर्तरि च २ ४९ विभाषाधेट्श्व्योः कौ। ति ८

श्वा। धेट्। टुओश्वि। इत्येताभ्यां परस्य च्लेरङादेशो वा स्यात्। अदधात्। चङोः भावे विभाषाख्ये धेटि ति वा सिचो लुक्। अधात्। अधा
सीत्। अशिश्वियत्। चङोः भावे अङ् लिकस्य च्लेः। अश्वत्। अश्वयीत्। कर्तरीत्येव। अधिषातां गावौ वत्सेन इत्यादि सूत्रत्रये भाष्ये
तु न व्याख्यातम् ५० गुपेश्छन्दसि। कौ। ना। वे। अत्।। गुप्। इत्येतस्मात् परस्य २० च्लेरङादेशो वा स्यादेदे इमा त्रो मित्रावरुणौ
गृह्णान् जुगुपतम्। अगोप्सम्। अगोपिष्टम्। अगोपिषाहम्। इति भाषायाम् ५१ नोनयतिध्वनयत्येलयत्यर्दयतिभ्यः। कौ।
वे। अ। त्। अन। ध्वन। इल। अर्द। इत्येतेभ्यो णयन्तेभ्यो णिश्रीत्यादिना प्राप्तश्चङादेशो न स्यादेदे। काममूनयीः श्रोननत् इतिलो
के। मा त्वाग्निर्ध्वनयीत्। अदध्वनत्। इति लोके। काममेलयीत्। ऐलिलत्। इति लोके। काममर्दयीत्। आर्दिदत्। इति लोके। ५२
अस्यतिवक्तिख्यातिभ्योऽङ्। कौ। ति। अ। असु क्षेपणे। वच। ख्या। इत्येतेभ्यः परस्य च्लेः इत्येतस्य अङ् इत्ययमादेशः स्यात्। कर्तरि
वा विनिलुङि परे। पर्यास्थत्। पर्यास्थत। पर्यास्थेताम्। पर्यास्थन्त वचयात् अक्रे जादेशो वा। अवोचम्। अवोचताम्। अ
वोचन्। ख्यायातस्मादङादेशो वा। अख्यत्। अख्यताम्। अख्यन्। कर्तरि किम्। पर्यासिषातां गावौ वत्सेन अस्यतिग्रहणमा
त्मनेपदार्थं पुषादित्वात् १ कर्म्मकर्म्मकर्त्तरिचि २ ५३ लिपिसिचिह्वश्च कौ ति श्वा लिप षिचिर ह्वेञ्। इत्येतेभ्यः परस्य
च्लेरङादेशः स्यात्। अलिपत्। असिचत्। आह्वत्। योगविभाग उत्तरार्थः इत्यादि सूत्रपञ्चके भाष्ये तु न व्याख्यातम् ५४
आत्मनेपदेष्वन्यतरस्याम्। कौ। ति। श्वा।। लिप। षिचर। ह्वेञ्। इत्येतेभ्यः परस्य च्लेरङादेशो वा स्यादात्मनेपदेषु परेषु। अलिप
त। अलिप्त। असिचत। असिक्त। आह्वत। आह्वस्त ५५ पुषादिद्युताद्यॢदितः परस्मैपदेषु कौ ति श्वा पुष इत्यादिभ्यः
द्युत। इत्यादिभ्यः। ऌकारेत्संज्ञकेभ्यश्च यातभ्यः परस्य च्लेरङादेशः स्यात् परस्मैपदेषु दिवाद्यन्तर्गणः पुषादिर्गृह्यते
न तु भ्वाद्यन्तर्गणः नापि क्र्याद्यन्तर्गणः। अपुषत्। अयुषत्। द्युतादिर्भ्वाद्यन्तर्गणः अद्युतत्। अश्वितत् ऌदितः गम्लृ
अगमत्। परस्मैपदेषु किम्। अपोतिष्ट ५६ सर्त्तिशास्त्यर्तिभ्यश्च। कौ ति श्वा।। सृ। शासु। ऋ। इत्येतेभ्यः परस्य च्लेरङ

देशः स्यात् अससरत्। असिषत् आरत् योगविभाग आत्मनेपदार्थः। ससारेत वकारः परस्मैभपदः नुकर्षणार्थः नबड
सू॰प॰ तरवडपयोस्तते ५७ इति विगोतो वा। कौ। तिभ्या इति तो धातोः परस्य च्लेरङादेशो वा स्यात् मिदिर अमिदम् अभेत्सीत्।
६८ छिदिर। अच्छिदत्। अच्छैत्सीत्। परस्मैपदे षितेव। अच्छित्त। अतिन ५८ जृस्तम्भुम्रुच्लुचुग्रुचुग्लुचुग्लुञ्चुश्विभ्यश्च कौ। ति
भ्या जृष्। स्तम्भुः सौत्रो धातुः। म्रुचु। चु। म्लुचु। ग्रुचु। ग्लुञ्चु। टुओश्वि। इत्येतेभ्यः परस्य च्लेरङादेशो वा स्यात् अजरत्। अ
जारीत्। अस्तभत्। अस्तम्भीत्। अम्रुचत्। अम्रोचीत्। अम्लुचत्। अम्लोचीत् अग्रुचत्। अग्रोचीत्। अग्लुचत्। अग्लोचीत्
अग्लुचत्। अग्लुञ्चीत् अशिश्वियत्। अश्वियीत्। अश्वत् इदग्लुविग्रहणे ग्लुञ्चिग्रहणेव द्धिः क्रियते अस्मरतरक्क
मकतेम्। इति भाष्यम् ५९ कृमृदृरुहिभ्यश्छन्दसि कौ वे अ त कृमृदृ। द। रुह। इत्येतेभ्यः परस्य च्लेरङादेशो वा स्याद्वेदे
शाकलाङ्गुष्ठकोकरत्। अथोः मरत्। अदरत् अधीन पर्वतानाहहत् छन्दसि किम्। अतार्षीत्। अमृत। अदारीत्। अरु
क्षत्। भाष्येत्तनेदं व्याख्यातम् ६० विणोति पदः। कौ। ति। दि। पद। इत्येतस्माद्धातोः परस्य च्लेः इत्येतस्य विण् इत्ययमादेशः
स्यात्। एकवचनेत शब्दे परे। उदपादि सस्यम् तेकिम्। उदपत्साताम् ६१ दीपजनबुधपूरितायिप्यायिभ्यो ऽन्यतरस्याम्।
कौ। ति। भ्याः दीपी। जनी। बुध। पूरी। ताय। ओप्यायी। इत्येतेभ्यः परस्य च्लेश्चिणादेशो वा स्यात्तत शब्दे परे। अदीपि। अदीपिष्ट
जनी प्रादुर्भावे। नतजननजनने। अजनि। अजनिष्ट बुधश्चवबोधने इति गृह्यते। नतबुधबोधने। अबोधि। अबुद्ध अपूरी
अपूरिष्ट। अतायि। अतायिष्ट। अप्यायि। अप्यायिष्ट। इत्यादि सूत्रपञ्चकं भाष्येतनव्याख्यातम् ६२ अचः कर्म्मकर्तरि। कौ
ति। कर्म्म। विणत भावकर्म्मणोरिति नित्ये प्राप्ते इयं विकल्पः। अजन्ताद्धातोः परस्य च्लेश्चिणादेशो वा स्यात्कर्म्मकर्तरि त
शब्दे परतः अकारि कटः स्वयमेव। अकृत। अलावि केदार अलविष्ट कर्म्मकर्तरीति किम्। अकारि कटो देवदत्तेन ६३
दुहश्च कौ ति कर्म्म दुह इत्येतस्माद्धातोः परस्य च्लेश्चिणादेशो वा स्यात्कर्म्मकर्तरि त शब्दे परतः अदोहि गौः स्वयमे ६८
68

वा। अडागम। कर्म्मकर्त्तरीत्येव। अदोहि गौर्गोपालेन। ६४ न रुधः। कौ। ति। कर्म्म। रुधिर्। इत्येतस्मात्परस्य इञ्चिणादेशो न
भवति कर्म्मकर्त्तरि। अवारुद्ध गौः स्वयमेव कर्म्मकर्त्तरीत्येव। अवारोधि गौर्देवदत्तेन ६५ तपोऽनुतापे च। कौ। ति। भा
तप सन्तापे। इत्येतस्मात्परस्य इञ्चिणादेशो न स्यात् कर्म्मकर्त्तरि अनुतापे च। कर्म्मकर्त्तरि। अतप्त तपस्तापसः अनुता
पे। अन्वतप्त पापेन। कर्म्मणि लुङ्। पापं कर्तृ तेनाप्याहृतं इत्यर्थः। अथवा भावे लङ्। पापवता पुंसा कर्त्रा आशोचीत्यर्थः ९९
चिण् भावकर्म्मणोः। कौ। ति। भा। धातोः। परस्य इञ्चिणादेशो भवति भावकर्म्मवाचिनि तशब्दे परतः। भावे अशायि
भवता। कर्म्मणि। अकारि कटो देवदत्तेन॥ चिण्ग्रहणं विस्पष्टार्थम्। ६७ सार्वधातुके यक्। कौ। ति। भा। धातोर्यक्प्र
त्ययो भवति भावकर्म्मवाचिनि सार्वधातुके परतः। भावे। भूयते भवता। आस्यते। शय्यते। कर्म्मणि। पच्यते ओदनः।
गम्यते ग्रामो देवदत्तेन। ककारो गुणवृद्धिनिषेधार्थः। भावकर्म्मणोर्विधाने कर्म्मकर्त्तर्य्युपसंख्यानम् १ ६८
कर्त्तरि शप्। कौ। ति। भ्वा। कर्तृवाचिनि सार्वधातुके परे धातोः शप् स्यात्। पचति भवति। पकारः स्वरार्थः। शकारः सा
र्वधातुकसंज्ञार्थः। इत्यादि सूत्रत्रये भाष्येण व्याख्यातम् ६९। दिवादिभ्यः श्यन्। कौ। ति॥ दि। शपः सूत्रापवादः॥
दिवु। इत्येवमादिभ्यो धातुभ्यः श्यन् स्यात् दीव्यति। सीव्यति। नकारः स्वरार्थः। शकारः सार्वधातुकसंज्ञार्थः ७०
वा भ्राशभ्लाशभ्रमुक्रमुक्लमुत्रसित्रुटिलषः॥ कौ। ति। भ्वा। प्राप्तासु विभाषेयम्। टुभ्राशृ। टुभ्लाशृ। भ्रमु। क्रमु।
क्लमु। त्रसी। त्रुट। लष। इत्येतेभ्यो धातुभ्यः श्यन् वा स्यात्। भ्राश्यते। भ्राशते। भ्लाश्यते। भ्लाशते। भ्राम्यति। भ्रमति। भ्र
मति। क्राम्यति। क्रामति। त्रस्यति। त्रसति। त्रुट्यति। त्रुटति। लष्यति। लषति ७१ यसोऽनुपसर्गात्। कौ। ति। दि।
यसु प्रयत्ने। इत्येतस्मादनुपसर्गाद्दिवादेः श्यन् वा स्यात्॥ यस्यति। यसति। अनुपसर्गात्किम्। प्रयस्यति॥ अनुप
सर्गादिति शक्यमकर्त्तुम्। इति भाष्यम् ७२ संयसश्च। कौ। ति। दि। यसः संपूर्वाच्च श्यन् वा स्यात्। संयस्यति। संयसति

इत्यादिसूत्रषट्कं भाष्येतनयाख्यातम् ७३ स्वादिभ्यः श्नुः॥ कौ॥ ति॥ ख्वा॥ शपोऽपवादः॥ षुञ्॥ इत्येवमादिभ्यः श्नुप्रत्य
यः स्यात् सुनोति सिनोति॥ शकारः शित्कार्यार्थः ७४ श्रुवः शृ च कौ ति ख्वा श्नु॥ इत्येतस्माद्धातोः श्नुप्रत्ययो भव
ति॥ तत्सन्नियोगेन श्रु इत्येतस्य शृ इत्यादेशश्च भवति शृणोति॥ शृणुतः॥ शृण्वन्ति ७५ अक्षो॥ न्यतरस्याम्॥ कौ॥ ति॥
ख्वा॥ श्नु॥ इत्येतस्माद्धातोः श्नुप्रत्ययो भवति॥ तत्सन्नियोगेन श्रु इत्येतस्य शृ इत्यादेशश्च भवति॥ शृणोति॥ शृणुतः॥ शृ
ण्वन्ति ७५ अक्षो॥ न्यतरस्याम्॥ कौ॥ ति॥ ख्वा॥ अक्षू॥ इत्येतस्माद्भ्वादिकात् श्नुप्रत्ययो वा स्यात्॥ अक्ष्णोति॥ अक्षति ७६
तनूकरणे तक्षः॥ कौ॥ ति॥ ख्वा॥ तक्ष॥ इत्येतस्मात्तनूकरणेऽर्थे वर्तमानात् श्नुप्रत्ययो वा स्यात्॥ तक्ष्णोति॥ तक्षति काष्ठम्
तनूकरणे किम्॥ संतक्षति॥ वाग्भिः जनो कार्यत्वाद्धातूनां विशेषणोपादानम् ७७ तुदादिभ्यः शः कौ ति ख्वा
शपोऽपवादः॥ तुद॥ इत्येवमादिभ्यो धातुभ्यः शप्रत्ययः स्यात् तुदति॥ तुदतः॥ तुदन्ति ७८ रुधादिभ्यः श्नम्
कौ॥ ति॥ रु॥ शपोऽपवादः॥ रुधिर॥ इत्येवमादिभ्यो धातुभ्यः श्नम्प्रत्ययः स्यात्॥ रुणद्धि भिनत्ति शकारः श्नसोरल्लो
प इति विशेषणार्थः मकारस्तु अन्त्यादचः परप्रयोगार्थः॥ श्नमि शित्करणं षादिहस्वार्थम् १ बहुलेपित्सार्वधात
के छन्दसि २ पितोऽपित्त्वम्॥ मीञ्॥ प्रमिणीमिज निवीम्॥ मीनातेर्निगम इति ह्रस्वः॥ अपितस्थापितम्॥ शृणोत
ग्रावाणः ७९ तनादिकृञ्भ्य उः॥ कौ॥ ति॥ ख्वा॥ शपोऽपवादः॥ तनु॥ इत्येवमादिभ्यो धातुभ्यो डुकृञ् इत्येतस्माच्च उप्र
त्ययः॥ स्यात्॥ तनोति॥ सनोति करोति कुरुतः कुर्वन्ति॥ तनादित्वात्कृञः सिद्धे सिज्लोपेच न ङ्ष्यति॥ विएव
ञ्ञेवेन दोषः स्यात्सोऽपि शेज्ञो विभाषया १ कार्तिकेयम् १ गणकार्य्यमनित्यम् ४ नञ् घटितमनित्यम् ५
आतिदेशिकमनित्यम् ६ सर्वविधिभ्यो लोपविधिरिड्विधिश्च बलवान् ७ प्रकृतिग्रहणे यङ्लुगन्तस्यापिग्र
हणम् ८ विधौ परिभाषोपतिष्ठते नानुवादे ९ परिभाषा इमाः प्राचीनमते भाष्ये॥ दर्शनात्त्रिमुल्लाप्यता इतिन ६५

नवीनावदात्स्म ८० धिन्विकृण्व्योरच। कौ। ति। धिन्वि। कृवि। इत्येतयोर्धात्वोरुप्रत्ययः स्यात्। तयोरत्र अकारोऽन्ता-
देशः स्यात्। धिनोति कृणोति। अतो लोपस्य स्थानिवद्भावाल्लघूपधगुणो न भवति धिन्विकृण्व्योरिति वक्तव्यम् १ ८१ क्र्यादि-
भ्यः श्ना कौ ति श्ना श्योऽपवादः। डुक्रीञ्। इत्येवमादिभ्यो धातुभ्यः श्ना प्रत्ययः स्यात् क्रीणाति श्रीणाति शाक-
रः सार्वधातुकसंज्ञार्थः इत्यादि सूत्रद्वयं भाष्येऽनन्वाख्यातम् ८२ स्तम्भुस्तुम्भुस्कम्भुस्कुम्भुस्कुञ्भ्यश्च कौ ति श्ना
श्रायाश्चत्वारो धातवः सौत्रास्तेभ्यः स्कुञ् इत्येतस्मात् क्र्यादिकाच्च श्नु प्रत्ययः। स्यात्। श्ना प्रत्ययश्च। स्तभ्नोति स्तभ्नाति
स्तम्नाति। स्तुभ्नोति। स्तुभ्नोति स्कभ्नोति स्कभ्नाति। स्कुभ्नोति। स्कुभ्नाति। स्कुनोति। स्कुनाति। उदित्करणं सार्व-
मध्याद्धि करणविषयादन्यत्रापि सौत्राणां धातूनां प्रयोगो भवति ८३ हलः श्नः शानज्झौ ॥ कौ ॥ ति। क्र्याद्धल उत्त-
रस्य श्ना इत्येतस्य शानच् इत्येष आदेशो भवति हि प्रत्यये परतः। पुषाण मुषाण हलः। कीम्। क्रीणीहि दौ किम्
मुष्णाति। श्नाविकारस्य शानच्करणं नर्थकं स्थानिवद्भावात् १ पित्त्वाङिद्वदिति ङित्त्वं पित्त्वन्न भवतीति वक्तव्यम् २ ८४
छन्दसि शायजपि कौ। वै। अ। तृ। वेदे अः। शायजादेशो भवति हौ परतः। अपि शब्दाच्छानजपि भवति गृभाय जिह्व-
या मधु बधान वत्सम् शायच्छन्दसि सर्वत्र १ हौ वा ह्यौ वेत्यर्थः अभिक्षाभायत् योऽश्नाभायत्। उदगृभायत् ८५
व्यत्ययो बहुलम्। कौ। वै। अ। तृ। शबादयो ये विकरणप्रत्ययास्तेषां वेदे बहुलं व्यत्ययो भवति आण्डा शुष्णस्य भेदति
भिनत्तीति प्राप्ते। सवनं मरति। म्रियत इति प्राप्ते इन्द्रो वस्तेन नेषत्। नयतीति प्राप्ते। नयते लोट् शप् सिपौ द्वौ वि-
करणौ। इन्द्रेण युजा तरुषेम वृत्रम् तरेमेति प्राप्ते। तरतेर्विध्यादौ लिङ् उः सिप् शप् चेति त्रयो विकरणाः। सुप्ति-
ङुपग्रहलिङ्गनराणां कालहलच्स्वरकर्तृयङां च। व्यत्ययमिच्छति शास्त्रकृदेषां सोऽपि च सिध्यति बाहुलकेन १ का-
रिकेयम्। सुप्यो व्यत्ययः। धुरि दक्षिणायाः दक्षिणस्यामिति प्राप्ते। तिङां व्यत्ययः। चषालं ये अश्वयूपाय तक्षति। तद-

नीतिप्राप्ते। उपग्रहः परस्मैपदात्मनेपदे तद्व्यत्ययः। ब्रह्मचारिणमिच्छते। इच्छतीति प्राप्ते। प्रतीपमन्य ऊर्मिर्युध्यति। इध्य
सू॰प॰ ७० 70 न इति प्राप्ते। लिङ्व्यत्ययः। मधोस्तृप्ता इवासते। मधुन इति प्राप्ते। नरः पुरुषः। तद्व्यत्ययः अधासवीरैर्दशभिर्वियूयाः। वि
यूयादिति प्राप्ते कालः कालवाची प्रत्ययः। श्वोऽग्नीनाधास्यमानेन। लुटो विषये लृट्। हलां व्यत्ययः। त्रिष्टुभौजः। सुभितम
ग्रवीरम्। क्षुभितमिति प्राप्ते अचां व्यत्ययः। उपगायन्तु मां पत्नयो गर्भिण्यः। दीर्घस्य ह्रस्वः॥ स्वरव्यत्यय पराढिक्षु
न्दसीत्यत्र वक्ष्यते कर्तृशब्दः कारकमात्रपरः तद्धाविप्रत्ययव्यत्ययः। अग्न्यादायः। अग्न्यादायः। आशिर्विषयेऽच् य
ङितियङोऽयपशाद्दादावभ्यालिङ्याशिष्यङितिङकारेण प्रत्याहारः। तेषां व्यत्ययो भेदतीत्यादिरुक्तः ८६ लिङ्याशि
ष्यङ्। कौ। वै। अ। त। प्राप्तोऽपवादः। आशिषि लिङि परे वेदेऽङ् प्रत्ययः स्यात् छन्दस्युभयथेति लिङः सार्वधातुक
संज्ञाऽपि स्था। उपस्थेयम्। गा। सत्यमुपगेयम्। गम्लृ। गमेयमजानतो गृहान्। वच। मन्त्रं वोचेमाग्नये। विद। विदेय
मेनो मनसि प्रविष्टाम्। शकॢ। व्रतं चरिष्यामि तच्छकेयम्। रुह। स्वर्गं लोकमारुहेयम्। आशिष्यङः प्रयोजने स्थागागा
मिवचिविदयः १ शाकिरुह्या अतिवक्तव्यम् २ दृशेरग्वक्तव्यः ३ कौ। वैअ। त। दृशिर। पितरं वदृशेयं मातरं च॥ अदृ
तगुणाः स्यात् इहहउपस्थेयामेति आडयिवक्तव्यः॥ ४। इति ४४ सूत्राणि भाष्ये ३।१।४। व्याख्यातानि ८७ कर्म
वत्कर्मणा तुल्यक्रियः कौ ति। कर्मकर्तेरिशावित्यतः कर्तृग्रहणमनुवर्तते। तत्र प्रमायाविषविणम्यते। कर्मस्थ
याक्रियया तुल्यक्रियः कर्ता कर्मवद्भवति कर्मवत्स्यायोयषायगात्मनेपदचिण्चिण्वद्भावा भवन्ति तथा कर्त्रवस्था
यामपीत्यर्थः भिद्यते काष्ठं स्वयमेव अभेदि काष्ठं स्वयमेव। पच्यते ओदनः स्वयमेव। कारिष्यते कटः स्वयमेव वृक
रणे स्वाश्रयमपि यथा स्यात्। भिद्यते कुसूलेन। अकर्मकाणां भावे लकारः सिद्धो भवति कर्मणा किम्। करणाधिक
रणाभ्यां तुल्यक्रिये मा भूत्। साधुरसिश्छिनत्ति। साधुस्थाली पचति कर्मवदकर्मकस्य कर्ता १ तथा कर्मरुह ७०

हेतुस्समानयातौ २ कर्म्मस्थभावकानां कर्म्मस्थक्रियाणां च ३ आत्मनेपदशबादिविधिप्रतिषेधः ४ लान्तास्य कर्म्मवदतिदेशः ५
अन्यथा हि कृत्यक्तखलर्थेषु प्रतिषेधः ६ ततर्हि लग्रहणं कर्त्तव्यम्। न कर्त्तव्यं। क्रियते माला स्वयमेव। लिङ्याशिष्यङिति ह्रि लकार
कानिर्देशः। इति भाष्यम् सकर्म्मकाणां प्रतिषेधो वक्तव्यः ७ कौ। ति। कर्म्म अम्भोऽम्भस्य प्राप्त अम्भोन्यमाक्षिप्यतः। दुही
पच्योर्बहुलं सकर्म्मकयोः ८। कौ। ति। कर्म्म। दुह। दुग्धो गौः पयः स्वयमेव। उदुम्बरः फलं पच्यते। सृजियुजोः श्यंस्तु ९
कौ। ति। कर्म्म। सृज। युज। इत्येतयोः कर्त्ता बहुलं कर्म्मवत्। यगपवादः श्यन् भवति सृज्यते मालाम्। युज्यते ब्रह्मचारी यो
गम्। सृजेः श्रद्धोपपन्ने कर्तरि कर्म्मवद्भावो वाच्यः १० सृजेः श्रद्धोपपन्ने कर्त्तर्येवेति वाच्यम् १। कौ। ति। कर्म्म युजेस्तु नाप्ये
कर्म्मकर्त्तरि यक्कोऽभावाय ११ करणेन तुल्यक्रियः कर्त्ता बहुलम् १२ परिवारयति कण्टकैः। हेतुम्। परिवारयन्ते कण्ट
का हेतुम् स्रवत्यादीनां प्रतिषेधः १३ भूषाकर्म्मकिरादिसनां चान्यत्रात्मनेपदात् १४ कौ। ति। कर्म्म भूषावाचिनां किरादी
नां सन्नन्तानां च यक्चिणः। चिणः एव दिदं प्रतिषेधः। आत्मनेपदं तु भवत्येव भूषयते कन्या स्वयमेव। अबुभूषत। रमण्डय
ते। अममण्डत। किरादि। कृ। अवकिरते हस्ती स्वयमेव। अवाकीर्ष्ट। गॄ। अवगिरते। अवागीर्ष्ट। दृङ्। आद्रियते।
आदृत। धृङ्। ध्रियते। अधृत। प्रच्छ। आपृच्छते। आपृच्छत। सन्। विकीर्षते कटः स्वयमेव। अविकीर्षिष्ट १५ तप
स्तपः कर्म्मकस्यैव। कौ। ति। कर्म्म तप सन्तापे। इत्येतस्य कर्त्ता कर्म्मवद्भवति। स च तपः कर्म्मकस्यैव नान्यकर्म्मका
स्य। तपति तापसं तपः। दुःखयतीत्यर्थः। तप्यते तपस्तापसः। अर्जयतीत्यर्थः। तपः कस्यैवेति किम्। उत्तपति सुवर्णं हे
वर्णकारः। भाष्ये तु पृथग्वदन्ने वेदं व्याख्यानम् १६ न दुहस्नुनमां यक्चिणौ। कौ। ति। कर्म्म। दुह। स्नु। णम। इत्येतेषां कर्म्म
वद्भावात्प्राप्तौ यक्चिणौ न भवतः दुहेरनेन यक् प्रतिषिध्यते। चिण्तु दुहश्चेत्यनेन नश्च विहितः दुग्धे गौः स्वयमेव। अदुग्ध।
अदोहि। अप्रस्नुत प्रस्नुते गौः। स्वयमेव। प्रास्नोष्ट गौः स्वयमेव। नमते। अनंस्त दण्डः स्वयमेव। यक्चिणोः प्रतिषेधे हे

तमस्मिन्वृश्रिञ्जामुपसंख्यानम् १ कौ। ति। कर्म्म। णिच्। कारयते कटः स्वयमेव। अचीकरत। श्रिञ्। उच्छ्रयते दण्डः
सू॰ प॰ स्वयमेव। उदशिश्रीयत। ब्रूञ्। ब्रूते कथा स्वयमेव। अवोचत यक्चिणोः प्रतिषेधे णिश्रन्थिग्रन्थिब्रूञात्मनेपदाका-
७१ र्म्मकाणामुपसंख्यानम् १ इति भारद्वाजीयाः। कौ। ति। कर्म्म णि उत्पुच्छयते गौः। अन्तर्भावितण्यर्थतायामुत्पु-
७१. च्छयते गाम्। पुनः कर्तृत्वविवक्षायामुत्पुच्छयते गौः। उदपुपुच्छत्। ग्रन्थ। चुरादिः क्र्यादिश्च। ग्रन्थति मेखलाम्।
ग्रन्थ्यते मेखला अग्रन्थिष्ट क्र्यादेस्तु ग्रथ्नीते। ग्रन्थ। चुरादिः क्र्यादिश्च। ग्रन्थति ग्रन्थम्। ग्रन्थते। ग्रन्थः। अग्रन्थिष्ट। क्र्या-
देस्तु ग्रथ्नीते। ब्रूञ्। ब्रूते कथा। अवोचत। आत्मनेपदाकर्म्मकाणाम्॥ विकुर्वते सैन्धवाः। वेः शब्दकर्म्मणः १ कर्म्मा-
काद्वेतितङ्। अन्तर्भावितण्यर्थस्य पुनः प्रेषणत्यागे। विकुर्वते सैन्धवाः। व्यकारिषाताम्। व्यकारिषत। व्यकृत।
व्यकृषाताम्। व्यकृषत ६० कुषिरजोः प्राचां श्यन्परस्मैपदञ्च। कौ। ति। कर्म्म कुष रज इत्येताभ्यां धातुभ्यां क-
र्म्मकर्त्तरि श्यन् परस्मैपदञ्च वा स्यात्। कुष्यति पादः स्वयमेव। रज्यति वस्त्रं स्वयमेव पक्षे। कुष्यते। रज्यते। कुषिरजोः
श्यन्विधाने सार्वधातुकवचनम् १। अवचने हि लिङ्लिटोः प्रतिषेधः २। ६१ धातोः। कौ। त्र। अधिकारोऽयम्। आ
तृतीयाध्यायपरिसमाप्तेः। इतऊर्ध्वं वक्ष्यमाणाः प्रत्यया धातोर्बिधेयाः। वक्ष्यति तव्यत्तव्यानीयरः। कर्तव्यम्। करणीयम् ६२
तत्रोपपदं सप्तमीस्थम् संज्ञाप्रदेशः ३।१।९२। कौ। सू। स। त। एतस्मिन्धात्वधिकारे सप्तम्यन्तपदे वाच्यमुपपदसंज्ञं
स्यात्। वक्ष्यति कर्म्मण्यण्। कुम्भकारः। स्थग्रहणे सूत्रेषु सप्तमीनिर्देशप्रतिपत्त्यर्थम् उपपदसंज्ञायाः समर्थव-
चनम् १ निमित्तमुपपदं प्रत्ययस्येति वक्तव्यम् २ ६३ कृदतिङ् संज्ञाप्रदेशः।३।४।९३। कौ। सू। स। त। एतस्मिन्धात्वधिकारे
सप्तम्यन्तपदे वाच्यमुपपदसंज्ञं स्यात्। वक्ष्यति कर्म्मण्यण्। कुम्भकारः॥ स्थग्रहणं सूत्रेषु सप्तमीनिर्देशप्रतिपत्त्यर्थम् उपप
दसंज्ञायां समर्थवचनम् १ निमित्तमुपपदं प्रत्ययस्येति वक्तव्यम् २ ६३ कृदतिङ्॥ संज्ञाप्रदेशः।३।४।९०। कौ। सू। ह। पु। एत ७१

स्मिन्धात्वधिकारे तिङ्भिन्नः प्रत्ययः कृत्संज्ञः स्यात्। कर्तव्यं। करणीयम्। अतिङ् किम्। स्यात्। अतिङिति शक्यमकर्तुम्
इति भाष्यम्। इति ७ सूत्राणि भाष्ये इ। ११५। आख्यातानि ६४। वासरूपोऽस्त्रियाम् परिभाषाप्रदेशः। ३।१।९४। कौ
कृ। अस्मिन्धात्वधिकारेऽसरूपोऽपवादप्रत्यय उत्सर्गस्य वाधको वा स्यात्। स्त्र्यधिकारोक्तप्रत्ययैर्विना। ण्वुल्तृचौ उत्सर्गौ
इगुपधज्ञाप्रीकिरः कः इत्यपवादः। तद्विषये ण्वुल्तृचावपि भवतः। क्षिपः। क्षेपकः। क्षेप्ता। असरूपः किम्। गोदः॥ अ
स्त्रियां किम्। चिकीर्षा असरूपो वाधको भवतीति वक्तव्यम् १। प्रयोगे लादेशेषु प्रतिषेधः २ नानुबन्धकृतमसारूप्यम् १
ताच्छीलिकेषु वाऽसरूपविधिर्नास्ति २ क्तल्युट्तुमुन्खलर्थेषु वाऽसरूपविधिर्नास्ति ३ लादेशेषु वाऽसरूपविधिर्ना
स्ति ४ परिभाषा इमाः ६५ कृत्याः। संज्ञाप्रदेशः। ३।१।९५। कौ। कृ। ण्वुल्तृचौ। इत्यतः प्राग्ये प्रत्ययास्ते कृत्यसंज्ञा भव
न्ति। काकपेया। अचो यत्। कृ ण्वुल्तृचौ। इत्यतः प्राग्ये प्रत्ययास्ते कृत्यसंज्ञा भवन्ति काकपेया। अचो यत्। कृत्यैरधिका
र्थवचने इति समासः कृत्यसंज्ञायां प्राङ् ण्वुल्वचनम् १ ६६ तव्यत्तव्यानीयरः कौ। कृ। तव्यत्। तव्य। अनीयर। इ
त्येते प्रत्यया धातोर्भवन्ति कर्तव्यम्। कर्तव्यम्। करणीयम् तकाररेफौ स्वरार्थौ। केलिमर उपसंख्यानम् १ कौ
कृ। पचेलिमा माषाः। पक्तव्या इत्यर्थः वसेस्तव्यत् कर्तरि णिच्च २ कौ। कृ। वस। वास्तव्यः ६७ अचो यत् कौ। कृ। अज
न्ताद्धातोर्यत् प्रत्ययो भवति। गेयम्। चेयम्। जेयम्। यतो नाव इति स्वरार्थस्तकारः। अज्ग्रहणमजन्तभूतपूर्वादपि यथा
स्यात्। दित्स्यम्। धित्स्यम्। यतिजनेरुपसंख्यानम् १। तकिशसिचतियतिजनीनामुपसंख्यानम् १ इति भाष्यकृतः। तक
तक्यम्। शसु। शस्यम्। चते। चत्यम्। यती। यत्यम्। जनी। जन्यम्। जनेर्यद्विधिः स्वरार्थः। ण्यता रूपसिद्धेः जनिवध्योश्चेति
वृद्धिनिषेधात्। हनो वा वध च। ३। वध्यः। यत्ते घात्यः॥ तकिशसिचतियतिजनिभ्यो यद्वाच्यः १ कौ। कृ। हनो वा यद्वधश्च वक्तव्य ः २
कौ। कृ। ६८ पोरदुपधात्। कौ। कृ। ण्यतोऽपवादः। पवर्गान्ताद्धस्वाकारोपधाद्धातोर्यत् स्यात्। शप। शप्यम्। लभ। लभ्य

सू॰प॰

७२

म् पोरितिकिम्। पाक्यम्। अडयघात्किम्। कोथम्। तपरकरणं किम्। आथम्। इत्यादि सूत्रद्वये भाष्येत्तनव्याख्यातम् ९९
शकिसहेः। स्या कौ। कृ। शक्लृ। षह। इत्येताभ्यां यत्स्यात्। शक्यम्। सह्यम् १०० गदमदचरयमश्चानुपसर्गे। कौ। कृ। गा
द। मदी। चर। यम। इत्येतेभ्योऽनुपसर्गेभ्यो यत्स्यात्। गद्यम् मद्यम् चर्य्यम्। यम्यम्। अनुपसर्गे किम्। प्रगाद्यम्। यमेः श्र
वैणसिद्धे नियमार्थं ग्रहणम् चरेराङि चागुरौ १ कौ। कृ। चर। आचर्य्यो देशः अगुरौ किम्। आचर्य्य उपनेता १०१ अवद्य
पण्यवर्य्या गर्ह्यपणितव्यानिरोधेषु कौ। कृ। अवद्य। पण्य। वर्य्या। इत्येते निपात्यन्ते। क्रमेण गर्ह्ये। पणितव्य। अनिरो
ध इत्येतेष्वर्थेषु अवद्यं पापम्॥ अनूद्यमन्यत्। वदः सुपि क्यप् च॥ पण्यः कम्बलः। पणितव्य इत्यर्थः। पाण्यमन्यत्। शते
न वर्य्या कन्या। वृत्याऽन्या स्त्रीलिङ्गनिर्देशः किमर्थः। वार्य्या ऋत्विजः इत्यादि सूत्रद्वये भाष्येत्तनव्याख्यातम् १०२ वह्यं क
रणम् कौ। कृ। वह्यम्। इत्येतद्यत्प्रत्ययान्तं निपात्यते करणे विशेष्यम्। वह। वहन्त्यनेनेति॥ वह्यं शकटम्। करणे किं
वाह्यमन्यत् १०३ अर्य्यः स्वामिवैश्ययोः। कौ। कृ। अर्य्य। इत्येतद्यत्प्रत्ययान्तं निपात्यते स्वामिवैश्ययोर्वाच्ययोः ऋ। अर्य्यः
स्वामी। अर्य्यो वैश्यः। स्वामिवैश्ययोः किम्। आर्य्यो ब्राह्मणः। स्वामिन्यन्तोदात्तत्वं च १ २०४ उपसर्य्या काल्या प्रजने।
कौ। कृ। उपसर्य्या इत्येतद्यत्प्रत्ययान्तं निपात्यते गर्भग्रहणे प्राप्तकाला यदि भवति। सृ। उपसर्य्या गौः॥ काल्या प्रजने
किम्। उपसार्य्या मथुरा भाष्येत्तनेदं व्याख्यातम् २०५ अजर्य्यं संगतम्। कौ। कृ। अजर्य्यम्। इत्येतन्नञ्पूर्वे जी
र्य्यतेर्य्यत्प्रत्ययान्तो निपात्यते संगते चेद्विशेष्यं भवति जृष् नजीर्य्यतीति। अजर्य्यमार्य्यसंगतम्॥ संगते किम्। अज
रिता कम्बलः अजर्य्यं कर्तरि १ १०६ वदः सुपि क्यप् च कौ कृ वद। इत्येतस्मादनुपसर्गे सुबन्त उपपदे क्यप्स्यात्।
चकाराद्यत्। ब्रह्मोद्यम्। ब्रह्मवद्यम्। सुपि किम्। वाद्यम्। अनुपसर्गे किम्। प्रवाद्यम् वदः सुप्यनुपसर्गग्रहणम् १। १०७
भुवो भावे। कौ। कृ॥ भू। इत्येतस्मादनुपसर्गे सुबन्त उपपदे भावे क्यप्स्यात्। ब्रह्मभूयं गतः। ब्रह्मत्वं गत इत्यर्थः॥ भाव ७२

ग्रहणमुत्तरार्थम् सपीत्येव। भव्यम्। अनुपसर्ग इत्येव। प्रभव्यम् ९८ हनस्त च कौ क्व हन इत्येतस्मादनुपसर्गे सुबन्त उपपदे
भावे क्यप् स्यात्। हन्तेस्तकारोऽन्तादेशश्च ब्रह्मणो हननम्। ब्रह्महत्या। अश्वहत्या।। हनस्त क्विप्स्त्रियां छन्दसि १ तां भ्रूणहत्या
निरुद्ध्यानुवरणम्। असैस्ता भ्रूणहत्यायैव तत्र्थं परिगृह्णाण स्त्रियां किम्। आग्नेतदस्युहत्याय। छन्दसि किम्। अश्वहत्या। २०९
एतिस्तुशास्वृदृजुषः। क्यप् कौ। इ। इण्। स्तु। शास्। वृ। दृ। जुषी। इत्येतेभ्यः क्यप् स्यात् इत्यः स्तुत्यः शिष्यः वृत्यः ज
ष्यः क्वचित्त्वनुवर्तमाने पुनः क्यब्ग्रहणं बाधकविषयेऽपि प्रवृत्त्यर्थम्। अवश्यस्तुत्यः ओरावश्यक इति ण्यन्न भवति क्वचि
यौ हल्ग्रहणम् १ इष्ट मा भूत् वृङ् वार्य्या ऋत्विजः। अञ्जेश्चोपसङ्ख्यानं संज्ञायाम् २ आङ्पूर्वादञ्जेः संज्ञायामुपसंख्यान
म् १ कौ। क्व। अञ्ज। आज्यं घृतम्। शंसिदुहिगुहिभ्यो वा।। इति काशिका। शंस्। शस्यम्। शंस्यम्। दुह। दुह्यम्। दोह्य
दुह्। गुह्यम्। गोह्यम् ११० ऋदुपधाच्चाक्लृपिचृतेः कौ। क्व। ऋकारोपधाद्धातोः क्यप् स्यात् क्लृप्। चृती। इत्येतौ वर्जयि
त्वा वृतु। वृत्तम्। वृधु। वृध्यम्। अक्लृपिचृतेः। किम्। कल्प्यम्। चर्त्यम्। तपरकरणं किम्। कृत। कीर्त्यम्। भाष्ये त्वनेदं व्या
ख्यातम् १११ ईच खनः कौ। क्व। खनु। इत्येतस्मात् क्यप् स्यात्। ईकारश्चान्तादेशः खेयम् इच्च वन इत्येव वक्तव्यम्। इति भाष्यम् २१२
भृञोऽसंज्ञायाम् कौ क्व डुभृञ् इत्येतस्मात् क्यप् स्यात् संज्ञां वर्जयित्वा। भृत्याः कर्मकराः भर्तव्या इत्यर्थः असंज्ञायां किम्। भार्य्या
नाम क्षत्रियाः भृञः संज्ञाप्रतिषेधे स्त्रियामप्रतिषेधोऽन्येन विहितत्वात् १ स्त्रियां संज्ञाप्रतिषेधो वक्तव्यः २ संपूर्वाद्विभाषा १
इति काशिका समश्च बहुलम् ३ कौ क्व संभृत्याः संभार्य्याः। संज्ञायां पुंसि दृष्टत्वान्न ते भार्य्या प्रसिद्ध्यति। स्त्रियां भावा
धिकारोऽस्ति तेन भार्य्या प्रसिद्ध्यति।। अथवा बहुलं कृत्याः संज्ञायामिति तत् स्मृतम् यथा यत्यं यथा जन्यं यथा मित्यं स्थेयं व
सा २ कारिके इमे ११३ मृजेर्विभाषा कौ क्व ऋदुपधत्वात् क्यप् नित्यं विभाषेयम्। मृज्। इत्येतस्माद्वा क्यप् स्यात् परिमृज्यः। परि
मार्ग्यः।। भाष्ये त्वनेदं व्याख्यातम् ११४ राजसूयसूर्यमृषोद्यरुच्यकुप्यकृष्टपच्याव्यथ्याः। कौ। क्व। राजसूय। सूर्य। मृषो

य। रुच्य। कुप्य। कृष्टपच्य। अव्यथ्य। इत्येते क्यबन्ता निपात्यन्ते षुञ् राजा सोतव्यः। सोमो राजा वा इह सूयते इति राजसूयः क्रतुः
सू.प. निपातनाद्दीर्घः षू। सृ। सुवति सरति सरति वा। सूर्यः। क्यपोरुडागमः। सर्तेरुत्वं वा। मृषोपपदाद्वदेः क्यप्। मृषोद्यम्॥
७३ रुच्या रोचते। सो रुच्यः गुप। इत्येतस्मादोः कत्वं। कुप्यम्। सुवर्णरजतभिन्नं धनम्। गोप्यमन्यत्। कृपचव्। कृष्टे स्वयमेव पच्य
न्त इति। कृष्टपच्याः शालयः। कर्मकर्तरि क्यप् व्यथ। न व्यथते। अव्यथ्यः॥ सूर्यरुच्याव्यथ्याः कर्तरि १ कुप्यं संज्ञायाम् २
73 कृष्टपच्यस्यान्तोदात्तत्वं च कर्मकर्तरि च ३ ११५ भिद्योद्ध्यौ नदे। कौ। कृ। भिद। उज्झ। इत्येतो कर्तरि क्यबन्तौ निपात्येते। नदे वा
च्ये। भिदिर्। भिनत्ति कूलमिति। भिद्यः उज्झ। उज्झत्युदकमिति। उद्ध्यः उज्झो दत्वं च निपात्यते। नदे किम्। भेत्ता। उज्झि
ता। इत्यादि सूत्रत्रयं भाष्ये न व्याख्यातम् ११६ पुष्यसिध्यौ नक्षत्रे॥ कौ। कृ॥ पुष। सिध। इत्येतौ अधिकरणे क्यबन्तौ
निपात्येते नक्षत्रे वाच्ये पुष। पुष्यन्त्यर्था अस्मिन्निति। पुष्यः षिध। सिध्यन्त्यर्था अस्मिन्निति। सिध्यः। नक्षत्रे किम्। पोषणः
सेधनः ११७ विपूयविनीयजित्या मुञ्जकल्कहलिषु कौ। कृ। विपूय। विनीय। जित्या इत्येते क्यबन्ता निपात्यन्ते क्रमेण मु
ञ्जादिष्वर्थेषु पूङ्। विपूयो मुञ्जः। विपव्यमन्यत्। णीञ्। विनीयः। कल्कः। विनेयमन्यत् जित्या हलिः। जीयमन्यत् ११८
प्रत्यपिभ्यां ग्रहेः॥ कौ। कृ प्रति। अपि। इत्येवं पूर्वाद्ग्रह धातोः क्यप् प्रत्ययो भवति मतस्य न प्रतिगृह्यम्। तस्मात्त्राऽपि
गृह्यम् छन्दसीति वक्तव्यम् १ कौ। कृ। लोके तु ण्यदेव। प्रतिग्राह्यम्। अपिग्राह्यम् ११९ पदास्वैरिबाह्यापक्ष्येषु च कौ
कृ। यग्रहेः क्यप् प्रत्ययो भवति पदादिषु वाच्येषु पदे स्ववन्ते तिङन्ते वा। प्रतिगृह्यसे ज्ञाकृत्ता। अवगृह्यं पदम्। यस्यावग्र
हः क्रियते अस्वैरी परतन्त्रः। गृह्यकाः शुकाः। पञ्जरादिवन्धनेन परतन्त्रीकृता इत्यर्थः बाह्यायाम्। ग्रामगृह्या सेन
ना। ग्रामवहिर्भूतेत्यर्थः। स्त्रीलिङ्गनिर्देशादत्र न भवति। पक्षे भवः पक्ष्यः। अर्जुनगृह्याः। तत्पक्षाश्रिता इत्यर्थः॥ इ
त्यादि सूत्रत्रयं भाष्ये न व्याख्यातम् १२० विभाषा कृवृषोः। कौ कृ॥ डुकृञ्। वृषु। इत्येताभ्यां क्यप् प्रत्ययो वा स्यात्॥ ७३

पचादिभ्यः। क्रमेण ल्यु। णिनि। अच्। इत्येते प्रत्यया भवन्ति इनदि नन्दयतीति। नन्दनः। ग्रह। गृह्णातीति। ग्राही ऋपच्। पच
तीति। पचः नन्दिवाशिमदिदूषिसाधिवर्द्धिशोभिरोचिभ्यो ण्यन्तेभ्यः संज्ञायाम्। नन्दनः वाशनः मदनः दूषणः साध
नः। वर्द्धनः। शोभनः। रोचनः। सहितपिदमः संज्ञायाम्। सहनः। तपनः। दमनः। जल्पनः। रमणः। दर्पणः। संक्रन्द
नः। संकर्षणः। संहर्षणः। जनार्दनः। यवनः। मधुसूदनः। विभीषणः। लवणः। चित्तविनाशनः। कुलदमनः। शत्रु
दमनः। इति नन्द्यादिः ग्राही उत्साही। उदासी। उद्भासी। स्थायी। मन्त्री। संमर्दी। रक्षश्रुवपशां नौ। निरक्षी। निश्रा
वी। निवापी। निशायी। याचृव्याहृव्रजवदवसां प्रतिषिद्धानाम्। अयाची। अव्याहारी। असंव्याहारी। अव्राजी। अवादी। अवा
सी। अचामचित्तकर्तृकाणाम्। अकारी। अहारी। अविनायी। विशयी। विषायी विशयी विषयी विशायी विषयी देशे
विशायी। विषयी देशः। अभिभावी भूते। अपराधी। उपरोधी। परिभवी। परिभावी। इति ग्रहादिः। पच। वच। वप। वद
चल। पत। नदट्। भषट्। प्लवट्। चरट्। गरट्। तरट्। चोरट्। गाहट्। सूरट्। देवट्। दोषट्। रज। मद। क्षप। सेव। मे
ष। कोष। मेध। नर्त। व्रण। दर्श। सर्प। दम्भ। दर्प। जारभर। श्वपच। पचादिराकृतिगणः अजपि सर्वधातुभ्यः १ भवः। सवः
पचाद्यनुक्रमणमनुबन्धासञ्जनार्थमपवादबाधनार्थं च २।१४५ इगुपधज्ञाप्रीकिरः कः। कौ। क। इगुपधेभ्यो धातुभ्यः। ज्ञा।
प्रीञ्। कृ। इत्येतेभ्यश्च कप्रत्ययः स्यात्। क्षिपः। लिखः। बुधः। जानातीति। ज्ञः। प्रीणातीति। प्रियः। किरतीति। किरः। इगुप
येभ्य उपसर्गे कविधिर्मेधापर्थेः।। नवाद्युपादीनां दर्शनादनुपसर्गेऽपि २।१३८ आतश्चोपसर्गे। कौ। क। श्याद्व्यधेति ण
स्यापवादः। आकारान्तेभ्यो धातुभ्य उपसर्ग उपपदे कप्रत्ययः। स्यात् प्रस्थः सुग्लः भाष्ये तु नेदमाख्यातम् १३०
पाघ्राध्माधेट्दृशः शः। कौ। पा। घ्रा। ध्मा। धेट्। दृशिर्। इत्येतेभ्यो धातुभ्यः शप्रत्ययः। स्यात्। पिबः। जिघ्रः धमः। धयः।
पश्यः। जिघ्रः संज्ञायां प्रतिषेधः।। व्याजिघ्रतीति। व्याघ्रः। घ्रः। संज्ञायां न।। कौ। कृ। १३१। अनुपसर्गाल्लिम्पविन्दधारि

सू॰प॰
७५

पारिवेद्युदेजिचेतिसातिसाहिभ्यश्च कौ॰ क्र॰ लिम्प । विन्द । धारि । पारि । वेदि । उदेजि । चेति । साति । साहि । इत्येते
भ्योऽनुपसर्गेभ्यः शः स्यात् । लिप । लिम्पतीति । लिम्पः । विन्दतीति । विन्दः ॥ धृञ् । धृङ् । धारयः ॥ पार पारयः विद
वेदयः एजृ उदेजयः चिती चेतयः साति सौत्रो धातुः । सातयः । षह । साहयः नौ लिम्पेः १ कौ॰ क्र॰ निलिम्पा दे
वाः । गविच विन्दे: संज्ञायामुपसंख्यानम् २ गवादिषु विन्देः संज्ञायामुपसंख्यानम् १ । कौ॰ क्र॰ । विदॢ । गोविन्दः । अर
विन्दम् १३९ ददातिदधात्योर्विभाषा कौ॰ क्र॰ डुदाञ् । डुधाञ् । इत्येताभ्यां वा शः स्यात् ददः दधः पक्षे श्याद्व्यधेति
णः । दायः । धायः । अनुपसर्गादित्येव । प्रदः । प्रधः । भाष्ये तु नेदं व्याख्यातम् १४० ज्वलितिकसन्तेभ्यो णः । कौ॰ क्र॰ ।
ज्वल दीप्तौ । इत्येवमादिभ्यः कसगतावित्यन्तेभ्यो धातुभ्यो णप्रत्ययो वा स्यात् । ज्वालः । चालः । पक्षे अच् । ज्वलः । चलः
अनुपसर्गादित्येव उज्ज्वलः तनोतेर्णउपसंख्यानम् १ कौ॰ क्र॰ अवतनोतीति । अवतानः १४१ श्याद्व्यधास्रुसं
स्रुतीणवसावहृलिहश्लिषश्वसश्च । कौ॰ क्र॰ श्यै । आतु । व्यध । आस्रु । संस्रु । अतीण् । अवसा । अवहृ । लिह । श्लिष ।
श्वस । इत्येतेभ्यो णः स्यात् । श्यैङ् । अवश्यायः । प्रतिश्यायः । श्यायतेरादन्तत्वादेव सिद्धे पृथग्ग्रहणमातश्चोपसर्गे
इति कप्रत्ययबाधनार्थम् । आदन्तेभ्यः । दायः । धायः । व्यध । व्याधः । स्रु । आस्रावः । इण् । अत्यायः । षो । अवसायः । हृ
ञ् । अवहारः लेहः । श्लेषः । श्वासः । इत्यादिसत्रवत्तष्यं भाष्ये न तु व्याख्यातम् १४२ दुन्योरनुपसर्गे । कौ॰ क्र॰ । टुदु । णी
ञ् । इत्येताभ्यामनुपसर्गेभ्यो णः स्यात् । दुनोतीति । नायः अनुपसर्गे किम् । प्रदवः । प्रणयः १४३ विभाषाग्रहः कौ॰ क्र॰
ग्रह । इत्येतस्माद्धातोर्वा णः स्यात् । ग्राहः । पक्षे अच् ग्रहः ॥ व्यवस्थितविभाषेयम् । जलचरे ग्राह एव । ज्योतिषि ग्रह ए
व । भवतेश्चेति वक्तव्यम् १ इति काशिका १४४ गेहे कः । कौ॰ क्र॰ ग्रह । इत्येतस्माद्धातोः कप्रत्ययो भवति । गेहे कर्त
रि गृह्णातीति । गृहं वेश्म । तात्स्थ्याद्दारा अपि गृहाः १४५ शिल्पिनि ष्वुन् । कौ॰ क्र॰ धातोः ष्वुन् प्रत्ययः स्यात् । शिल्पि ७५

निकर्त्तरि नर्त्तकः। षकारो ङीषर्थः। नर्त्तकी नृतिखनिरञ्जिभ्य इति वक्तव्यम् १ कौ।कृ। ३ हृसमाभ्रतः। वायकः १४६। गस्थ
कन्। कौ। कृ। गै। इत्येतस्मात् थकन् प्रत्ययः स्यात्। शिल्पिनि कर्त्तरि। गाथकः। इत्यादि सूत्रत्रये भाष्येतन व्याख्यानम् १
१४७ ण्युट् च। कौ। कृ। गै। इत्येतस्मात् थकन् प्रत्ययः स्यात्। शिल्पिनि कर्त्तरि। गायकः। इत्यादि सूत्रत्रये भाष्येतन व्या
ख्यानम् १४७ ण्युट् च कौ कृ गै। इत्येतस्माद्धातोः ण्युट् प्रत्ययः स्यात् शिल्पिनि कर्त्तरि। गायनः टकारो ङीबर्थः। गायनी
१४८। हश्च व्रीहिकालयोः। कौ। कृः। ओहाक्। ओहाङ्। इत्येताभ्यां ण्युट् स्यात्। व्रीहौ काले च कर्त्तरि। जहात्युदकमिति।
हायनो व्रीहिः। जिहीते भावानिति। हायनः संवत्सरः १४९ प्रुसृल्वः समभिहारे वुन्। कौ। कृ। प्रुङ्। सृ। लूञ्। इत्येते
भ्यो वुन् प्रत्ययः स्यात्। क्रियासमभिहारे। प्रवकः। सरकः। लवकः प्रसृल्वः साधुकारिणि वुन्विधानम् १ साधु
कारिण्युपसंख्यानम् २ कौ। कृ। १५० आशिषि च कौ। कृ। धातोर्वुन् स्यादाशिष्यर्थे जीवतात् जीवकः नन्दतात्
नन्दकः भाष्येतनेदं व्याख्यानम् इति ५० सूत्राणि भाष्ये २२६। व्याख्यातानि इति सूत्रपाठे तृतीयाध्यायस्य प्रथमः
पादः १ कर्म्मण्यण् कौ कृ धातोः कर्म्मण्युपपदे अण् प्रत्ययः स्यात्। कुम्भं करोतीति। कुम्भकारः। काण्डलावः
वेदाध्यायः कर्म्मणि निर्वर्त्यमानविक्रियमाण इति वक्तव्यम् १ कर्म्मणि निर्वर्त्यमानविक्रियमाण इति वेदाध्या
यादीनामुपसंख्यानम् २ यत्र च नियुक्तस्तत्रोपसंख्यानं कर्त्तव्यम् ३ ह्रग्रहनीवहिभ्यश्च ४ न वार्थः परिगणनेन। क
स्मान्न भवति ग्रामादिः संपश्यति हिमवन्तं शृणोति ग्रामं गच्छतीति अनभिधानमभिधानात् इति भाष्यम्। अकारादनुप
पदात्कर्म्मोपपदो विप्रतिषेधेन ५ शीलिकामिभक्ष्याचरिभ्यो णः पूर्वपदप्रकृतिस्वरत्वं च ६। शील। मांसशीलः।
मांसशीला कन्या। मांसकामः मांसकामा। भक्ष। मांसभक्षः। मांसभक्षा। चरग्राङ्पूर्वः। कल्याणाचारः। कल्याणा
चारा। शीलिकामिभक्ष्याचरिभ्यो णः ११। कौ। कृ। ईक्षिक्षमिभ्यां चेति वक्तव्यम् ७ कौ कृ ईक्ष। सुखप्रतीक्षः। सुख

प्रतीत्ता त्वमृष । कल्याणत्वमः । कल्याणत्वमा २ ह्वावामस्य कौ । क्र । कस्मायवादः ह्वेञ् । वेञ् । माङ् । इत्येतेभ्यः क
सू.प. र्मण्युपपदे अण् स्यात् । स्वर्गह्वायः । तन्तुवायः धान्यमायः भाष्येत्वनेदेवाख्यातम् ३ आतोऽनुपसर्गे कः कौ । क्र । अ
७५ णोऽपवादः । आकारान्ताद्धातोरनुपसर्गात्कर्मण्युपपदे कप्रत्ययः स्यात् । गोदः । कम्बलदः । पार्ष्णित्रम् ॥ अनुपसर्गे
75 किम् । गोसंदायः । कविधौ सर्वत्र प्रसारणिभ्यो डः ।१। कौ । क्र । ज्या । ब्रह्मज्यः । उपसर्गेऽपि । आह्वः । प्रह्वः । कप्रत्यये संप्रसा
रणं स्यात् निमित्तसंप्रसारणे ह्वोय एत्वाणादाङ् नश्चर्वतम् । योनादिष्वादयः पूर्वसिद्धकार्ये स्यातिवर्तेहि १ ग्रोवावभगवा
न्कामसत्वेनासिद्धिर्ग्यणस्त्वते । आतः कोऽलिङ्गेऽः पूर्वसिद्धग्रहणसूर्यामति २ कौरिकेइमे ४ सुपिस्थः कौ । क्र ।
स्था । इत्येतस्माद्धातोः सुबन्तउपपदे कः स्यात् समस्थः । विषमस्थः इतउत्तरे सकर्मकेषु कर्मकेषु कर्मण्यनुवर्तते
सुपिस्थोभावेच १ आस्कन्नामस्थानम् । आन्त्रस्थः प्रनिर्दिष्टार्थाः प्रत्ययाः । स्वार्थेभवन्ति १ योगविभागादिष्टसिद्धि २
परिभाषे इमे ५ तुन्दशोकयोः परिमृजापनुदोः कौ । क्र । परिमृज । अपनुद । इत्येताभ्यां तुन्दशोकयोः कर्मण्युपपदयो :
कः स्यात् मृज्न । तुन्दं परिमार्ष्टीति । तुन्दपरिमृजोऽलसः एनुद । शोकमपनुदति । शोकापनुदः पुत्रः आलस्यसुखा
हरणयोरितिवक्तव्यम् १ कौ । क्र । अन्यत्र । तुन्दपरिमार्जः । शोकापनोदः कप्रकरणे मूलविभुजादिभ्य उप
संख्यानम् २ । कौ । क्र । मूलविभुजो रथः । मूलविभुज । नखमुच । काकगुह । कुमुद । महीध्र । गिध्र । आकृतिगणोऽयं ६
प्रेदाज्ञः । कौ । क्र । ष्ठदाज् । ज्ञा । इत्येताभ्यां प्रोपसर्गाभ्यां कर्मण्युपपदे कः स्यात् । सर्वप्रदः । पथिप्रज्ञः । प्रेकिम् । गो
संदायः इत्यादिसूत्रद्वये भाष्ये त्वनयाख्यातम् ७ समिख्योः कौ । क्र । ख्याञ् । इत्येतस्मात्संपूर्वात्कर्मण्युपपदे कः
स्यात् । गां संचष्टे । गोसंख्यः पशुसंख्योः ८ गापोष्टक् कौ । क्र । गै । पा इत्येताभ्यामनुपसर्गाभ्यां कर्मण्युपपदे टक्प्र ७५
त्ययः स्यात् । क्षीरपा ब्राह्मणी ॥ सुरापापिबतेः सुरासीध्वोरिति वक्तव्यम् १ कौ । क्र । वहुलं तणि २ तणोतिसेनान्त्र

न्सोर्थेहरणम्‌ याज्ञाहरणीह्यरापीभवतिनैनांदेवाःपतिलोकंनयन्ति यज्ञाहरणीसुरायाभवतिनैनांदेवाःपतिलोकंनय
न्ति ९ हरतेरनुद्यमनेऽच्‌ कौ।क्र।हृञ्‌।इत्येतस्माद्धातोर्हरणादन्यत्रार्थेवर्तमानात्कर्मण्युपपदेऽच्प्रत्ययः स्यात्‌।अंशह
हरः।कवचहरः अनुद्यमनेकिम्‌।भारहारः शाक्तिलाङ्गलाङ्कुशतोमरयष्टिघटघटीधनुष्षुग्रहेरुपसंख्यानम्‌ १ कौ।
क्र ग्रह।शक्तिग्रहः।लाङ्गलग्रहः धार्यार्थेकिम्‌ योहिसूत्रंगृह्णातिनतुधारयतिससूत्रग्राहः ९ वयसिच।कौ।क्र।
हृञ्‌।इत्येतस्मात्कर्मण्युपपदेऽच्प्रत्ययःस्यात्‌ वयसिगम्यमाने।यन्नोद्यमनेनवयोगम्यतितत्रायंविधिः।कवचहरः
कुमारः इत्यादिसूत्रद्वयंभाष्येतनव्याख्यातम्‌ २१ आङिताच्छील्ये कौ।क्र।हृञ्‌।इत्येतस्मादाङ्‌पूर्वात्कर्मण्युपप
देऽच्स्यात्‌।ताच्छील्येनियतेतत्स्वाभाव्यात्‌।तस्योपगम्यमानायाम्‌।पुष्पाहारः।फलाहरः।ताच्छील्येकिम्‌।भारहा
रः कार्यवशात्‌ ९२ अर्हः।कौ।क्र।अर्ह।इत्येतस्मात्कर्मण्युपपदेऽच्स्यात्‌।पूजार्हाब्राह्मणी।गन्धार्हा ९३ स्तम्ब
कर्णयोरमिजपोः।कौ।क्र।रम।जप।इत्येताभ्यांकर्मणस्तम्बकर्णयोःसुबन्तयोरुपपदयोरच्स्यात्‌।स्तम्बेरमोहस्ती॥
कर्णे।जपःसूचकः।हस्तिसूचकयोरितिवक्तव्यम्‌ २।कौ।क्र।अरमत्र।स्तम्बेरन्ता।कर्णेजपिता ९४।शमिधातोः।स
ञ्ज्ञायाम्‌।कौ।क्र।शम्‌।इत्येतस्मिन्नुपपदेधातोरच्स्यात्‌।संज्ञायांगम्यमानायाम्‌।शंकरः।शंभवः।शंवदः।।शमिसंज्ञाया
यान्तग्रहणंकृञोहेत्वादिटप्रतिषेधार्थम्‌ १ शङ्करानामपरिव्रा।जिका।तच्छीलाशङ्करा।९५।अधिकरणेशेतेः।कौ।क्र।
शीङ्‌।इत्येतस्मादधिकरणेसुबन्तउपपदेऽच्स्यात्‌ खेशेते।खशयः।पार्श्वादिषूपसंख्यानम्‌ १ कौ।क्र।पार्श्वशयः।उ
दरशयः।पृष्ठशयः।पार्श्व।उदर।पृष्ठ।उत्तान।अवमूर्द्धन्‌। इतिपार्श्वादिः।दिग्धसहपूर्वाच्चेतिवक्तव्यम्‌ २ दिग्धसहशयः
उत्तानादिषुकर्तृषु ३ कौ।क्र।उत्तानशयः।अवमूर्द्धशयः।गिरौडश्छन्दसि ४।कौ।क्र।गिरौशेते।गिरिशः।तद्धि
तोवा ५ ९६ चरेष्टः।कौ।क्र।चर।इत्येतस्मादधिकरणेसुबन्तउपपदेटप्रत्ययःस्यात्‌।कुरुषुचरतीति।कुरुचरः।टका

रोहिणीवर्षः। कुरुचरी १७ भिक्षासेनादायेषु च। कौ। कृ। भिक्षा। सेना। आदाय। इत्येतेषु सुबन्तेषूपपदेषु चरेष्टः स्यात्। भि
स्त्र. प. क्षाचरः। सेनाचरः। आदायचरः। आदायचरः इह कस्मान्न भवति। कुरूंश्चरतीति। चरेर्भिक्षाग्रहणं ज्ञापकं कर्मण्यप्रसङ्
७८ गस्य इति भाष्यम् १८ पुरोऽग्रतोऽग्रेषु सर्त्तेः। कौ। कृ॥ सृ। इत्येतस्माद्धातोः पुरस्। अग्रतस्। अग्रे। इत्येतेषूपपदेषु टः स्या
76 त्॥ पुरः। सरतीति। पुरःसरः। अग्रतःसरः। अग्रेसरः। इत्यादि सूत्रत्रयं भाष्येऽनन्वाख्यातम् १९ पूर्वे कर्त्तरि कौ। कृ। पू
र्वशब्दे कर्तृवाचिन्युपपदे सृधातोष्टः स्यात्। पूर्वः सरतीति। पूर्वसरः। कर्त्तरि किम्। पूर्वं देशं सरतीति। पूर्वसारः। २० कृञो
हेतुताच्छील्यानुलोम्येषु कौ। कृ। डुकृञ्। इत्येतस्मात्कर्मण्युपपदे टः स्यात्। हेतौ ताच्छील्ये आनुलोम्ये च गम्ये हेतौ
शोककरी कन्या। यशस्करी विद्या। ताच्छील्ये। श्राद्धकरः। अर्थकरः। आनुलोम्ये। वचनकरः। एतेषु किम्। कुम्भकारः २१
दिवाविभानिशाप्रभाभास्करान्तानन्तादिबहुनान्दीकिंलिपिलिबिबलिभक्तिकर्तृचित्रक्षेत्रसंख्याजङ्घाबाह्वहर्यत्त
द्धनुररुष्षु। कौ। कृ। अहेत्वाद्यर्थमिदम्। दिवा। इत्येवमादिषु कृञष्टः स्यात् कर्मणि सु। पीतिहृदयमथनवर्त्तते। दिवा करो
तीति। दिवाकरः विभाकरः। निशाकरः। प्रभाकरः। भास्करः। सकारस्य निपातनाद्विसर्जनीयजिह्वामूलीयौ न भवतः
कारकरः। करणकारः स्वार्थिकः प्रत्ययः। अन्तकरः। आदिकरः। बहुकरः। नान्दीकरः। किंकरः। लिपिकरः। लिबि
करः। बलिकरः। भक्तिकरः। कर्तृकरः। चित्रकरः। क्षेत्रकरः संख्या। एककरः। द्विकरः जङ्घाकर बाहुकरः अहस्करः।
यत्करः तत्करः धनुष्करः अरुष्करः यत्करः तत्करः धनुष्करः। अरुष्करः किंयत्तद्बहुषु कृञोऽज्विधानम् १ कौ। कृ। किं
करा। यत्करा। तत्करा। बहुकरा २२ कर्मणि भृतौ कौ। कृ। कर्मशब्द उपपदे करोतेष्टः। स्यात्। वेतने गम्ये। कर्म करोती
ति। कर्मकरो भृतकः। भृतौ किम्। कर्मकारः इत्यादि सूत्रद्वयं भाष्येऽनन्वाख्यातम् २३ न शब्दश्लोककलहगाथा
वैरचाटुसूत्रमन्त्रपदेषु कौ। कृ शब्द। इत्येवमादिषूपपदेषु कृञष्टप्रत्ययो न भवति शब्दकारः श्लोककारः। कल ७८

हकारः । गाथाकारः । वैरकारः । चाटुकारः । सूत्रकारः । मन्त्रकारः । पदकारः २४ स्तम्बकरिर्व्रीहिः । शकृत्करिर्वत्सः । शकृ
तोरिन् । कौ । कृ । स्तम्बशकृत इत्येतयोः कर्म्मभूतयोरुपपदयोः कृञ इन्प्रत्ययः स्यात् । स्तम्बकरिर्व्रीहिः । शकृत्करिर्व
त्सः । व्रीहिवत्सयोरितिवक्तव्यम् १ कौ कृ २५ हरतेर्दृतिनाथयोः पशौ कौ कृ हृञ् इत्येतस्माद्दृतिनाथयोः कर्म्म
ण्युपपदयोरिन् स्यात् । पशौ कर्त्तरि । दृतिहरिः । नाथहरिः पशुः पशौ किम् । दृतिहारः । नाथहारः भाष्ये त्वनेदं व्याख्या
नम् २६ फलेग्रहिरात्मम्भरिश्च । कौ । कृ । फलेग्रहिः । आत्मम्भरिः । इत्येतौ निपात्येते । ग्रह । फलानि गृह्णातीति । फ
लेग्रहिर्वृक्षः । उपपदस्यैकारान्तत्वमिन्प्रत्ययश्च डुभृञ् आत्मम्भरिः । आत्मनो मुमागमश्चेन्प्रत्ययश्च अनुक्तसमु
च्चयार्थश्चकारः । तेन उदरम्भरिः भृञः कुक्ष्यात्मनोर्मुम् च १ कुक्षिम्भरि २७ छन्दसि वनसनरक्षिमथाम् कौ
वौ । सन । तृ । वन षण सम्भक्तौ । षणु दाने । रक्ष । मथ । इत्येतेभ्यः कर्म्मण्युपपदे इन् स्यात् । वेदे । ब्रह्मवनिं त्वा क्षत्रवनि
त्वा । तस्मादेतद्गोसनिम् । चत्वरक्षो पथिरक्षीश्वानौ । हविर्म्मथीनाम् । भाष्ये त्वनेदं व्याख्यानम् २८ एजेः खश् । कौ । कृ । ए
जृ इत्येतस्माद्ण्यन्तात्कर्म्मण्युपपदे खश्प्रत्ययः स्यात् जनमेजयतीति । जनमेजयः खकारो मुमर्थः । शकारः सार्व
धातुकसंज्ञार्थः । वातशुनीतिलशर्द्धेषु अजधेट्तुदजहातिभ्यः कौ । कृ । वात शुनी तिल शर्द्ध इत्येतेषु यथासंख्यमुपप
देषु अज । धेट । तुद । ओहाक । इत्येतेभ्यः खश् भवति । वातमजा मृगाः । शुनिंधयः । तिलन्तुदः । शर्द्धंजहा माषा २९ ना
सिकास्तनयोर्ध्माधेटोः । कौ । कृ । ध्मा । धेट् । इत्येताभ्यां नासिकास्तनयोः कर्म्मणोरुपपदयोः खश् स्यात् । नासिकन्धमः
नासिकन्धयः । स्तनन्धयः । धेटष्टित्वान्ङीप् । स्तनन्धयी । स्तनेधेटः १ कौ । कृ । नासिकायां ध्माश्च २ कौ । कृ । चकाराद्धे
टः । मुष्टौ ध्मश्च धेटश्चेति वक्तव्यम् ३ नासिका नाडी मुष्टि घटी खारीष्विति वक्तव्यम् १ इति भाष्यकृतः । घटी खारी इत्युपसं
ख्यानम् १ कौ । कृ । घटिंधमः । घटिंधयः । खारिंधमः । खारिंधयः । खरिंधमः । खरिंधयः ३० नाडीमुष्टयोश्च कौ । कृ

ध्मा।धेट्।इत्येताभ्यांनाडीमुष्ट्योःकर्म्मण्युपपदयोःखश्भवति नाडिंधमः।मुष्टिंधमः।नाडिंधयः मुष्टिंधयः।भा
स्तु·प· ७७ ष्येतनेदंव्याख्यानम् ३१ उदिकूलेरुजिवहोः कौ।कृ।रुजो।वह।इत्येताभ्यामुत्पूर्वाभ्यांकूलेकर्म्मण्युपपदेखश्प्रभ
वति कूलमुद्रुजः कूलमुद्वहः इत्यादिसूत्रसप्तकंभाष्येतनव्याख्यानम् ३२ वहाभ्रेलिहः।कौ।कृ।लिह।इत्ये
77 तस्माद्धातोर्वहाभ्रयोःकर्म्मण्युपपदयोःखश्प्रभवति।वहंलिहोगौः।अभ्रंलिहोवायुः ३३ परिमाणेपचः॥
कौ।कृ।डुपचष्।इत्येतस्मात्परिमाणवाचिनिकर्म्मण्युपपदेखश्प्रभवतिः प्रस्थंपचास्थाली।खारिंपचः।कटाहः ३४
मितनखेच।कौ।कृ।डुपचष्।इत्येतस्मान्मितनखयोःकर्म्मण्युपपदयोःखश्भवति मितंपचाब्राह्मणी।नखंप
चायवागूः ३५ विध्वरुषोस्तुदः।कौ।कृ।तुद।इत्येतस्माद्धातोर्विध्वरुषोः कर्म्मण्युपपदयोः खश्प्रभवति विधुन्तु
दः।अरुन्तुदः ३६ असूर्य्यललाटयोर्दृशितपोः।कौ।कृ।दृशिर।तप।इत्येताभ्याम्।असूर्य्य।ललाट।इत्येतयोः
कर्म्मण्युपपदयोर्यथासंख्यंखश्प्रभवति असूर्य्यंपश्याराजदाराः।ललाटंतपःसूर्य्यः ३७ उग्रंपश्येरम्मदपाणि
न्धमाश्च।कौ।कृ।उग्रंपश्य।इरम्मद।पाणिन्धम।इत्येतेखश्प्रत्ययान्तानिपात्यन्ते।दृशिर।उग्रंपश्यः।मदी।इरंमदो
मेघज्योतिः।ध्मा।पाणिन्धमोऽध्वा ३८ प्रियवशेवदःखच् कौ।कृ।वद।इत्येतस्मात्प्रियवशयोःकर्म्मण्युपपदयोः
खच्प्रत्ययःस्यात् प्रियंवदः।वशंवदः।खकारोमुमर्थः।चकारः खचिट्खइतिविशेषणार्थः।खच्प्रकरणेगमेः सु
प्युपसंख्यानम् १ मितंगमः।मितंगमाहस्तिनी।गमेःसुपिवाच्यः १कौ।कृ।विहायसोविहच २ चकारात्खच्।वि
हंगमः।विहायसोविहङ्गनिवाच्यम् २ कौ।कृ।खच्चवाडित् ३ विहंगः खच्चडिद्वावाच्यः ३ कौ।कृ।डच ४ विहगः
डेचविहायसोविहादेशोवक्तव्यः ४ कौ।कृ ३९ द्विषत्परयोस्तापेः कौ कृ तप इत्येतस्मात्ण्यन्ताद्द्विषत्परयोः कर्म्मणि
उपपदयोःखच्स्यात् द्विषंतपः।परंतपः इत्यादिनवसूत्राणिभाष्येतनव्याख्यातानि ४० वाचियमोव्रते।कौ।कृ।यम।इत्येत ७७

स्माद्धातोः शब्दे कर्म्मण्युपपदे खच् स्यात्। व्रते गम्यमाने। वाचंयमो मौनी। नव्रती व्रते किम्। वाग्यामः ४१ पूःसर्व्वयोर्दारिसहोः। कौ। कृ
दारि। षह। इत्येताभ्यां यथासंख्येन पुरसर्व्वयोः कर्म्मणोरुपपदयोः खच् स्यात्। पुरन्दरः। सर्व्वंसहः भगे च दारेरिति वक्तव्यम् १ शा
तिका शिका भगं दारयतीति। भगंदरः ४२ सर्व्वकूलाभ्रकरीषेषु कषः कौ। कृ। कष। इत्येतस्माद्धातोः सर्व्व। कूल। अभ्र। क
रीष। इत्येतेषु कर्म्मस्पूपपदेषु खच् स्यात्। सर्व्वंकषः। खलः। कूलंकषा नदी। अभ्रंकषो वायुः। करीषंकषा वात्या ४३ मेघर्त्तिभ
येषु कृञः कौ कृ डुकृञ्। इत्येतस्मान्मेघ। ऋति। भय। इत्येतेषु कर्म्मस्पूपपदेषु खच् स्यात् मेघंकरः। भयंकरः भयशब्देन तद
न्तविधिः। अभयंकरः ४४ क्षेमप्रियमद्रेऽणच। कौ। कृ। क्षेम। प्रिय। मद्र। इत्येतेषु कर्म्मस्पूपपदेषु डुकृञ् इत्येतस्मादण् स्या
त्। चकारात्खच्। क्षेमकारः। क्षेमंकरः। प्रियकारः। प्रियंकारः। मद्रकारः। मद्रंकरः वेति वक्तव्ये पुनरण्ग्रहणं हेत्वादि
षु टे बाधितम् ४५ आशितेभुवः करणभावयोः कौ। कृ। भू। इत्येतस्मात् आशितशब्दे सवन्त उपपदे खच् स्यात्। करणे
भावे चार्थे आशितो भवत्यनेन आशितंभव ओदनः भावे आशितस्य भवनम् आशितंभवम् ४६ संज्ञायां भृतॄवृजिधारिसहित
पिदमः कौ कृ डुभृञ्। तॄ। वृजि। धारि। षह। तप। दम। इत्येतेभ्यो धातुभ्यो यथासंभवं कर्म्मण्युपपदे खच् स्यात्संज्ञा
याम्। विश्वंभर्त्ति। विश्वंभरा पृथ्वी। रथेन तरति। रथंतरं साम। पतिंवरा कन्या। शत्रुंजयो हस्ती। युगंधरः पर्व्वतः। शत्रुंसह
शत्रुंतपः। अरिंदमः। संज्ञायां किम्। कुटुम्बभारः ४७ गमश्च कौ कृ गम्लृ। इत्येतस्माद्धातोः सुप्युपपदे खच् स्यात्सं
ज्ञायाम्। सुतंगमः। रामितंगमः योगविभाग उत्तरार्थः ४८ अन्तात्यन्ताध्वदूरपारसर्व्वानन्तेषु डः कौ। कृ। अन्त। अत्यन्त
अध्व। दूर। पार। सर्व्व। अनन्त। इत्येतेषु कर्म्मस्पूपपदेषु गम्लृ इत्येतस्माद्धातोर्ड प्रत्ययः। स्यात्॥ अन्तं गच्छति। अन्तगः। अत्य
न्तगः। दूरगः। पारगः। सर्व्वगः। अनन्तगः। डित्सामर्थ्यादभतेऽपि टेर्लोपः डप्रकरणे सर्व्वत्रपन्नयोरुपसंख्यानम् १ कौ। कृ
सर्व्वत्रगः। पन्नगः। उरसो लोपश्च २ कौ कृ उरगः सुदुरोरधिकरणे ३ कौ। कृ। सुगम्। दुर्गम्। निसो देशे ४ निर्गो देशः अन्ये

सू।प।
७८

षपिरक्ष्यते १ इत्यपरस्य स्वगारगः ग्रामगः गुरुतल्पगः। अन्यत्रापि दृश्यत इति वक्तव्यम् ४ कौ। कृ। ४९ आशिषि हनः कौ
कृ हन। इत्येतस्मात्कर्म्मण्युपपदे डः स्यादाशीर्वादे गम्ये शत्रुं वध्यात् शत्रुहः आशिषि किम् शत्रुघः दारावाहनोऽणन्तस्य
च टः संज्ञायाम् १ कौ कृ दारुशब्द उपपदे आङ्पूर्वाद्धन्तेरण् अन्त्यस्य च टकारादेशो भवति संज्ञाविषये दारावाघाटः चारौ
वा २ कौ कृ चारावाघाटः चरावाघातः कर्म्मणि समि च ३ कौ। कृ। वर्णान् संहन्तीति। वर्णसंघाटः वर्णसंघातः पदसंघाटः
पदसंघातः ५० अपे क्लेशतमसोः कौ। कृ। हन। इत्येतस्मादपपूर्वात् क्लेशतमसोः कर्म्मणोरुपपदयोर्डः स्यात्। क्लेशा
पहः पुत्रः। तमोऽपहः सूर्यः इत्यादि सूत्रद्वयं भाष्येन व्याख्यातम् ५१ कुमारशीर्षयोर्णिनिः कौ। कृ हन इत्येतस्मा
त् कुमारशीर्षयोः कर्म्मणोरुपपदयोर्णिनिप्रत्ययः स्यात् कुमारघाती। शीर्षघाती। शिरसः शीर्षादेशो निपातनात् ५२
लक्षणे जायापत्योष्टक् कौ। कृ हन इत्येतस्माज्जायापत्योः कर्म्मणोरुपपदयोर्लक्षणवति कर्तरि टक्प्रत्ययः स्यात्
जायाघ्नो ब्राह्मणः। पतिघ्नी वृषली ५३ अमनुष्यकर्तृके च कौ। कृ। हन। इत्येतस्मादमनुष्यकर्तृकेऽर्थे वर्तमानात्कर्म्मण्युप
पदे टक् स्यात् जायाघ्नस्तिलकालकः। पतिघ्नी पाणिलेखा। वातघ्नं तैलम्। श्लेष्मघ्नं मधु। पित्तघ्नं घृतम्। शशघ्नो शकुनी
अप्राणिकर्तृक इति वक्तव्यम् १ अमनुष्यकर्तृक इत्येवा कथं नगरघ्नो हस्ती। कृत्यल्युटो बहुलमित्येवात्राणभविष्यति
इति भाष्यम् ५४ शक्तौ हस्तिकवाटयोः कौ कृ। हन। इत्येतस्माद्धन्तेर्हस्तिकवाटयोः कर्म्मणोरुपपदयोः शक्तौ। गम्य
माने टक् स्यात् हस्तिघ्नो मनुष्यः। कवाटघ्नश्चौरः। शक्तौ किम्। विषेण हस्तिनं हन्तीति। हस्तिघातः। भाष्येऽनेन द्वयं व्या
ख्यातम् ५५ पाणिघताडघौ शिल्पिनि कौ। कृ। पाणिघताडघौ इत्येतौ निपात्येते शिल्पिनि कर्तरि हन पाणिघः। ताडघः
टक् टिलोपो घत्वं च निपातनात् राजघ उपसंख्यानम् १ कौ। कृ। राजानं हन्तीति। राजघः ५६ आढ्यसुभगस्थूलपलितन
ग्नान्धप्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन्। कौ। कृ। डुकृञ्। इत्येतस्मादाढ्यादिषु अर्थेष्वच्व्यन्तेषु कर्म्मसूपपदेषु करणे ख्युन् ७८

त्ययः स्यात्। आढ्यंकरणम्। सुभगंकरणम्। स्थूलंकरणम्। पलितंकरणम्। नग्नंकरणम्। अन्धंकरणम्। प्रियंकरणम्
च्व्यर्थेष्विति किम्। आढ्यीकुर्वंति तैलेन। अच्वौ किम्। आढ्यीकरोत्यनेन। ख्युनिष्ठिप्रतिषेधानर्थक्यं ल्युट् ख्युनोरविशेषात् १ मम
र्थमिति वेत्राथयत्नात् २ उत्तरार्थं तु। इति भाष्यम् ५७ कर्तरि भुवः खिष्णुच्खुकञौ॥ कौ। क्त। भू। इत्येतस्माद्धातोराढ्यादिषु च्व्य
र्थेष्वच्व्यन्तेषु सुबन्तेषूपपदेषु कर्तरि खिष्णुच्॥ खुकञ्। इत्येतौ प्रत्ययौ भवतः॥ आढ्यंभविष्णुः। आढ्यंभावु
कः। सुभगंभविष्णुः। सुभगंभावुकः। स्थूलंभविष्णुः। स्थूलंभावुकः। पलितंभविष्णुः। पलितंभावुकः। नग्नंभविष्णुः। नग्नंभावु
कः। अन्धंभविष्णुः। अन्धंभावुकः। प्रियंभविष्णुः। प्रियंभावुकः च्व्यर्थेष्वित्येव। आढ्यो भविता अच्वाविति किम्। आढ्यीभविता॥
इष्णुच इकारादित्वमुदात्तत्वात्कृतं भुवः। नञ् स्नुक्क्रमिध्यर्थमिकारादित्वमिष्णुचः १ कारिकेयम् ५८ स्पृशोऽनुदके क्विन्
कौ। क्त। स्पृश। इत्येतस्माद्धातोरनुदके सुबन्त उपपदे क्विन् प्रत्ययः स्यात्। घृतं स्पृशतीति। घृतस्पृक्। मन्त्रेण स्पृशतीति। मन्त्र
स्पृक्। अनुदके किम्। उदकस्पर्शः॥ क्विन्प्रत्ययस्य कुरिति विशेषणार्थो नकारो न कार्यः। तदनुबन्धकपरिभाषयैव क्विपो
ग्रहणसिद्धेः ५९ ऋत्विग्दधृक्स्रग्दिगुष्णिगञ्चुयुजिक्रुञ्चां च कौ। क्त ऋत्विक्। दधृक् स्रक् दिक् उष्णिक् इत्येते क्वि
न्नन्ता निपात्यन्ते॥ अञ्चु। युजिर। क्रुञ्च। इत्येतेभ्यः क्विन् भवति यज ऋतौ यजतीति। ऋत्विक्। युजिर। क्रुञ्च। इत्येतेभ्यः क्विन् भ
वति यज। ऋतौ यजतीति। ऋत्विक् धृष धृष्णोतीति दधृक्। धृषेर्द्वित्वमन्तोदात्तत्वं च सृज। सृज्यत इति। स्रक्। कर्मणि
क्विन्नमागमश्च दिश दिप्यनेऽसौ। दिक्। दिशेः कर्मणि क्विन्। ष्णिह। उष्णिक्। उत्पूर्वात् ष्णिहेः क्विन् उपसर्गान्त्यलोपः ष
त्वं। निपातनैः सह पाठादञ्चतेः सुबन्तमात्र उपपदे क्विन्। प्राङ्। प्रत्यङ्। उदङ् युजिर युङ्। युञ्जौ। युञ्जः॥ क्रुञ्च। क्रु
ञ्चौ। ञ्चः॥ निपातनैः सह पाठादञ्चनलोपो न ६० त्यदादिषु दृशोऽनालोचने कञ् च। कौ। क्त। दृशिरः। इत्येतस्माद्धातोरनालोचनार्थे
वर्तमानात्त्यदादिषूपपदेषु कञ् प्रत्ययः स्यात् चकारात् क्विन् तादृशः तादृशौः। तादृशाः। यादृशः। यादृशौ। यादृशाः

क्विन्। तादृक्। तादृशी। तादृशः। अन्यालोचनेकिम्। तमपश्यतीति। तद्दर्शः तादृशादयोरूढाइति नदर्शनक्रियापेक्षास्ति द
सू.प. शोः समानान्ययोश्च १ सदृक्। सदृशः। अन्यादृक्। अन्यादृशः। समानान्ययोश्चेति वक्तव्यम् १ कौ। क्वि। ६१ सत्सूद्विषद्रुहदुहयुज
७५ विदभिदच्छिदजिनीराजामुपसर्गेऽपि क्विप्। कौ। क्वि। सत्। सू। द्विष। द्रुह। दुह। युज। विद। भिद। छिद। जि। नी। राज्। इ
त्येतेभ्योधातुभ्यउपसर्गेऽनुपसर्गेच सुबन्तउपपदे क्विप्प्रत्ययःस्यात्। षद्लृ। संसत्। अविषत्। सू। अदादिर्गृह्यते। नतु
79 दादिः। द्विषसाहचर्यात्। प्रसूः। द्विष। प्रद्विट्। मित्रद्विट्। द्रुह। प्रध्रुक्। मित्रध्रुक् दुह। प्रधुक्। गोधुक्। युज। युजिर्॥
प्रयुक्। अश्वयुक्। विद। अदादिर्दिवादीरुधादिश्च गृह्यते। नतु विद्लृलाभइति। अकारस्याविवक्षितत्वात्। प्रवित्। ब्रह्मवित्
भिदिर्। प्रभित्। काष्ठभित्। छिदिर्। प्रच्छित्। रज्जुच्छित्॥ जि। प्रजित्। शत्रुजित्। णीञ्। प्रणीः। सेनानीः। राज्। विराट्। स
म्राट् सदादिषु सुब्ग्रहणम् १ ६२ भजोण्विः। कौ। क्वि। भज। इत्येतस्माद्धातोरुपसर्गेऽनुपसर्गेच सुबन्तउपपदे ण्विप्रत्ययः
स्यात् प्रभाक्। अर्द्धभाक्। इत्यादिस्तत्र षड्भाष्येतनव्याख्यातम् ६३ छन्दसिसहः कौ। वै। धातु। षह। इत्येतस्माद्धातोरुपस
र्गेऽनुपसर्गेच सुबन्तउपपदेण्विप्रत्ययोभवतिवेदे जलाषाट्। तुराषाट् अन्येषामपीतिपूर्वपदेदीर्घः। सहेः साडः इतिषत्वे
छन्दसिकिम्। जलासाहः ६४ वहश्च कौ॥ वै॥ धातु वह। इत्येतस्माद्धातोः सुबन्तउपपदेछन्दसिण्विः स्यात्। प्रष्ठवाट्।
दित्यवाट्। कौयोगविभागउत्तरार्थः ६५ कव्यपुरीषपुरीष्येषुञ्युट् कौ। वै। धातु। वह॥ इत्येतस्माद्धातोः कव्य। पुरीष। पु
रीष्य। इत्येतेषूपपदेषु वेदेञ्युट्प्रत्ययः स्यात् कव्यवाहनः पितॄणाम्। पुरीषवाहनः। पुरीष्यवाहनः ६६ हव्येऽनन्तःपादं
कौ। वै। धातु॥ षह। इत्येतस्माच्छन्दसिहव्यशब्दउपपदेञ्युट्स्यात्। अनन्तःपादंचेदविवक्षितेते॥ अग्निश्च हव्यवाहनः
अनन्तःपादंकिम्। हव्यवालग्निरजरः पितानः। पादमध्येण्विरेव ६७ जनसनखनक्रमगमोविट्। कौ। वै। धातु। जन। सन
खन। क्रम। गम। इत्येतेभ्यः सुबन्तउपपदेछन्दसिविट्प्रत्ययः स्यात्। जन। जनी। अब्जाः। गोजाः। षन। गोषाइन्द्रो नृषाअसि ७५

त्वना। विभत्वाः। कृपत्वाः। कृमा। दधिक्राः। गम्ला। अग्रमाः विड्वनोरिसातम्। अनटकारो विशेषणार्थः ६८ अदोऽनन्ने कौ। क्त
उदा। इत्येतस्माद्धातोरन्नशब्दभिन्ने सुबन्त उपपदे विट् स्यात्। आममत्ति आमात्। मृगात्। सस्यात्। अनन्ने किम्। अन्नादः ६९
क्रव्ये च। कौ। क्त। अद। इत्येतस्मात् क्रव्यशब्दे उपपदे विट् स्यात्। आममत्ति आम्पात् पूर्वसूत्रेणैव सिद्धे वचनमणो बाधार्थम्
कव्ये क्रव्याद इति। पक्वमांसशब्दे उपपदेऽण्। पृषोदरादित्वादुपपदस्य क्रव्यादेशः अदोऽनन्ने क्रव्यग्रहणं कामरूपनिवृत्त्यर्थे
म्। ७० दुहः कब्घश्च। कौ। क्त। दुह। इत्येतस्माद्धातोः सुबन्त उपपदे कप्रत्ययः स्यात् घकारश्चान्तादेशः। कामदुघा धेनुः
यमे दुघा भाष्ये तु नेदं व्याख्यातम् ७१ मन्त्रे श्वेतवहोक्थशस्पुरोडाशो ण्विन् कौ। वै। आत्। श्वेतवह। उक्थशास। पुरोडाश
इत्येतेभ्यो ण्विन् प्रत्ययो भवति। मन्त्रविषये वह। श्वेतवाहौ। श्वेतवाहः। णेस। उक्थशासौ। उक्थशासः। निपातनान्नलोप
दाश। पुरोडाशौ। पुरोडाशः। निपातनाद्डकारस्य ऽकारः। श्वेतवाहादीनां ऽस् १ श्वेतवाइन्द्रः। श्वेतवोभ्याम्॥ उक्थशा यजा
मानः। उक्थशोभ्याम् पुरोडाः। पुरोडोभ्याम् अवयाः अवयोभ्याम् पदस्य च २ इहमाभूत्। श्वेतवाहौ॥ श्वेतवाहः श्वेतवाहा
दीनां ऽस्पदस्येति वक्तव्यम् १ कौ। वै। आ। त। अवयाः श्वेतवाः पुरोडाश्च ३ कौ। वै। आ। त। एते सम्बुद्धौ कृतदीर्घा निपात्यन्ते हे अवया
हे श्वेतवाः। हे पुरोडाः ७२ अवे यजः। कौ। वै। आत्। यज। इत्येतस्माद्धातोरवशब्दे उपपदे ण्विन् स्यान्मन्त्रे अवयाजौ॥ अवयाज
योगविभाग उत्तरार्थः। इत्यादि सूत्रपञ्चकं भाष्ये तु न व्याख्यातम् ७३ विजुपे छन्दसि कौ। वै। आत्। यज। इत्येतस्माद्धातोरु
पशब्दे उपपदे छन्दस्येव विट् प्रत्ययो भवति॥ उपयट्। विट्करणं सामान्यग्रहणाविघातार्थम्। वेरपृक्तस्येति छ
न्दोग्रहणं ब्राह्मणार्थम् ७४ आतो मनिन्क्वनिब्वनिपश्च कौ। वै। आत्। आकारान्ताद्धातोः। सुबन्त उपसर्गेऽनुपसर्गे वोपप
दे मनिन्। क्वनिप्। वनिप्। इत्येते प्रत्ययाश्छन्दसि भवन्ति वकाराद्विट् सुदामा अश्वत्थामा क्वनिप् सुधीवा। सुपीवा। वनि
प्। सुदावा घृतपावा विट् कीलालपा ७५ अन्येभ्योऽपि दृश्यन्ते॥ कौ। क्त। छन्दसीति निवृत्तम्। आकारान्तभिन्नेभ्यो

सू.प.
८०
80

पिबातेर्भ्यो मनिन्। क्वनिप्। वनिप्। विच्। इत्येते प्रत्यया भवन्ति। सु। सुशर्मा। मनिन्। इण्। प्रातरित्वा। क्वनिप्। जन। विजावा। वनि
प्। रेट्। रोट्। सुगण्। विच्। दृशिग्रहणाद्विहृपपदादपि भवति। धीवा। पीवा ७६ क्विप् च। कौ। क्र। धातोः क्विप् स्यात्। स्रंसु उ
खास्रत्। ध्वंस। पर्णध्वत् ७७ स्थः क च। कौ। क्र। स्था। इत्येतस्माद्धातोः कप्रत्ययः स्यात्। चकारात् क्विप्। शंस्थः। शंस्था। इत्यत्र चकारा
द्वितीयाभावः सुपि स्थ इति कप्रत्यये क्विप् चेति क्विपि च सिद्धे घञ् मिथातो विस्पष्टार्थं वा पुनरार्थं सूत्रम् ७८ सुप्यजातौ णिनि
स्ताच्छील्ये। कौ। क्र। अजात्यर्थे सुबन्त उपपदे धातोर्णिनिः प्रत्ययः स्यात्। ताच्छील्ये गम्ये उष्णभोजी। सुपीति वर्तमाने पुनः सुब्
ग्रहणमनुपसर्गनिवृत्त्यर्थम्। अनुयायी। अनुजीवी। विनाशी। अजातौ किम्। ब्राह्मणानामन्त्रयिता ताच्छील्ये किम्। उष्णं
भुङ्क्ते कदाचित्। णिन्विधौ साध्वकारिण्युपसंख्यानम् १ कौ क्र अताच्छील्यार्थमिदम्। साधुकारी। साधुदायी। ब्रह्मणि वदः २
कौ क्र। ब्रह्मवादी ७९ कर्तर्युपमाने कौ क्र कर्तृवाचिन्युपमान उपपदे धातोर्णिनिः। स्यात्। उष्ट्र इव क्रोशति। उष्ट्रक्रोशी
ध्वाङ्क्षरावी। उपपदार्थः कर्ता प्रत्ययार्थे कर्तुरुपमानम्। अताच्छील्यार्थं जात्यर्थं च सूत्रम्। कर्तरि किम्। अपूपानिव भक्षयति
माषान्। उपमाने किम्। उष्ट्रः क्रोशति भाष्ये तु नेदं व्याख्यातम् ८० व्रते कौ क्र सुबन्त उपपदे धातोर्णिनिः स्यात्। व्रते गम्य
माने। शास्त्रविहितो नियमो व्रतम्। स्थण्डिलशायी अश्राद्धभोजी अताच्छील्यार्थं जात्यर्थं च सूत्रम् ८१ बहुलमाभीक्ष्ण्ये
कौ। क्र। पौनःपुन्ये द्योत्ये सुबन्त उपपदे धातोर्बहुलं णिनिः स्यात्। क्षीरपायिण उशीनराः बहुलग्रहणादिह न भवति। कुल्माषा
दः इत्यादि सूत्रद्वयं भाष्ये तु न व्याख्यातम् ८२ मनः। कौ। क्र। मन। इत्येतस्माद्धातोः सुबन्त उपपदे णिनिः स्यात्। दर्शनीयमा
नी ८३ आत्ममाने खश्च कौ क्र मन। इत्येतस्मादात्मकर्मकमनने वर्तमानात्सुबन्त उपपदे खश्प्रत्ययः स्यात्। चकाराण्णि
निः। पण्डितमात्मानं मन्यते पण्डितंमन्यः। पण्डितमानी आत्ममाने किम्। दर्शनीयमानी चैत्रो मैत्रस्य कर्मकर्तरि च १ इति प्र
सूत्राणि भाष्ये ३ २ १ व्याख्यातानि ८४ भूते कौ क्र अधिकारोऽयं वर्तमाने लडिति यावत्। इत ऊर्ध्वं वक्ष्यमाणाः प्रत्यया भूतकालि ८०

केयावर्थे विन्ते यः। वर्त्तति करणे यजः। अग्निष्टोमेनेष्टवान्। अग्निष्टोमयाजी भूते किम् अग्निष्टोमेन यजते ८५ करणे
यजः कौ उक्त यज इत्येतस्माद्धातोर्भूतेऽर्थे वर्तमानात् करणे उपपदे णिनिः स्यात् अग्निष्टोमयाजी अग्निष्टोमः फलभाव
नायां करणम् इत्यादि सूत्रद्वयं भाष्येतन व्याख्यातम् ८६ कर्मणि हनः कौ। क्त। हन। इत्येतस्माद्भूतार्थात् कर्मण्युपपदे
णिनिः स्यात् पितृव्यघाती ८७ ब्रह्मभ्रूणवृत्रेषु क्विप्। कौ। क्त हन। इत्येतस्माद्भूतार्थात् ब्रह्म भ्रूण वृत्र। इत्येतेषूपप
देषु क्विप् प्रत्ययः स्यात् ब्रह्महा भ्रूणहा वृत्रहा उभयतो नियमोऽयम् ब्रह्मादिष्वेव हन्तेः क्विब्भवति किं वेवब्रह्मा
दिष्वेवेति भाष्यम् ८८ बहुलं छन्दसि कौ वेश्व तृ हन इत्येतस्मादुपपदान्तरेऽपि छन्दसि क्विप् स्यात् यो मातृहा
पितृहा न यो भवति अमित्रघातः इत्यादि सूत्रपञ्चकं भाष्येतन व्याख्यातम् ८९ सुकर्मपापमन्त्रपुण्येषु कृञः कौ
क्त डुकृञ्। इत्येतस्मात् सुशब्दे कर्म। पाप। मन्त्र। पुण्य। इत्येतेषु च कर्मसूपपदेषु क्विप् स्यात् सुकृत्। कर्मकृत्। पापकृ
त्। मन्त्रकृत्। पुण्यकृत् ९० सोमे सुञः कौ क्त षुञ् इत्येतस्मात् सोमशब्दे कर्मण्युपपदे क्विप् स्यात् सोमसुत्। सोमसुतौ ९१
अग्नौ चेः कौ क्त चिञ्। इत्येतस्माद्धातोरग्नौ कर्मण्युपपदे क्विप् स्यात्। अग्निचित् अग्निचितौ अग्निचितः ९२ कर्मण्यग्न्याख्या
याम् कौ क्त चिञ् इत्येतस्मात् कर्मण्युपपदे कर्मण्येव कारके क्विप् स्यात् अग्न्याधारस्थलविशेषस्याख्यायाम् श्येनचित्
९३ कर्मणीनि विक्रियः कौ क्त कर्मण्युपपदे विपूर्वात् क्रीणातेरिनिः प्रत्ययः स्यात्। डुक्रीञ्। घृतविक्रयी तैलविक्र
यी कर्मणि कुत्सिते २ इह मा भूत् धान्यविक्रायः कुत्सितग्रहणं कर्तव्यम् १ कौ क्त ९४ दृशेः क्वनिप् कौ। क्त दृशिर्
इत्येतस्माद्धातोः कर्मण्युपपदे क्वनिप् प्रत्ययः स्यात्। मेरुदृश्वा पारदृश्वा इत्यादि समस्तसूत्राणि भाष्येतन व्याख्यातानि ९५
राजनि युधिकृञः कौ क्त युध डुकृञ्। इत्येताभ्यां कर्मणि वा विनि राजन्शब्दे उपपदे क्वनिप् स्यात् राजानं योधितवान्
राजयुध्वा। युधिरन्तर्भावितण्यर्थः। राजकृत्वा ९६ सहे च कौ। क्त। कर्मणीति निवृत्तम्। युध। डुकृञ्। इत्येताभ्यां सह

सू॰प॰
८८
८१

शाद्द् उपपदे कनिप् स्यात्। सहयुध्वा सहकृत्वा ९८ सप्तम्यां जनेर्डः कौ कृ। जनन। जनी। इत्येतस्मात् सप्तम्यन्ते उपपदे डप्रत्य-
पः स्यात् सरसिजम्। मन्दुरजः ९९ पञ्चम्यामजातौ। कौ। कृ। अजात्यर्थे पञ्चम्यन्ते उपपदे जनधातोर्डः स्यात् बुद्धेर्जातः
बुद्धिजः। संस्काराज्जातः संस्कारजः। खेदजः। खेदजः। सखेजः। अजातौ किम्। अश्वाज्जातः ९९ उपसर्गे च संज्ञायाम् कौ
कृ। उपसर्गे चोपपदे जनधातोर्डः स्यात्। संज्ञाविषये। प्रजाः १०० अनौ कर्म्मणि कौ कृ अनुपूर्वाज्जनधातोः कर्म्मण्युप
पदे डः स्यात्। पुमांसमनुरुध्य जाता। पुमनुजा स्त्र्यनुजः ११ अन्येष्वपि उपपदेषु जनधातोर्डः स्यात्। असप्तम्यामपि। अ
जः। द्विजः पञ्चम्यां जातावपि। ब्राह्मणजः उपसर्गेऽसंज्ञायामपि अभिजाः। अनावकर्म्मण्यपि। अनुजः अन्येभ्यो
पि दृश्यते १ कौ। कृ। आखा। उत्खा। परिखा ९२ निष्ठा। कौ। कृ। भूतार्थवृत्तेर्धातोर्निष्ठासंज्ञौ क्त। क्तवतू। इत्येतौ प्रत्ययौ भवत १
कृतः। भुक्तः। कृतवान्। भुक्तवान्। निष्ठासंज्ञायामितरेतराश्रयत्वादप्रसिद्धिः १ द्विर्बोक्तक्तवतुग्रहणम् २ आदिकर्म्मा
णि निष्ठा वक्तव्या ३ कौ। कृ। प्रकृतः कटं देवदत्तः। यद्वा भूतकालत्वार्थे ४ वा वा प्रतन्याम् ५ ९३ सुयजोर्ङ्वनिप्। कौ। कृ। सुञ्। यज
इत्येताभ्यां ङ्वनिप्प्रत्ययः स्यात् सुत्वा। सुत्वानौ। सुत्वानौ। सुत्वानौ। सुत्वानः। यज्वा। यज्वानौ। यज्वानः इत्यादि सूत्रत्रये भाष्येत
न व्याख्यातम् ९४ जीर्यतेरतृन् कौ। कृ। जीर्यतेर्धातोरतृन्प्रत्ययः स्यात्। जृष्। जरत्। जरन्तौ। जरन्तः। वा असरूपेण
निष्ठापि। जीर्णः। जीर्णवान् ९५ छन्दसि लिट् कौ। वै। आत्। भूतार्थवृत्तेर्धातोश्छन्दसि लिट् स्यात् अहं सूर्यमुभयतोद
दर्श। अहं द्यावापृथिवी आततान ९६ लिटः कानज्वा कौ वै अ तृ लिटः कानजित्ययमादेशो वा स्यात्। छन्दसि विषये
यो ऽग्निं चिक्यानः। वहणे सुषुवाणः। लिडिति निवर्त्तमाने पुनर्लिड्ग्रहणं परोक्षे लिटो व्यादेशार्थम् ९७ क्वसुश्च कौ
वै। आत् लिटः क्वसुरित्ययमादेशः स्याच्छन्दसि। जक्षिवान्। पपिवान्। योगविभाग उत्तरार्थः ९८ भाषायां सदवस
श्रुवः कौ कृ षण्लृ। वस। श्रु। इत्येतेभ्यः परस्य लिटो लोके ऽपि क्वसुरादेशः स्यात्। सेदिवान्। सेदिवांसौ। सेदिवांसः वस। ८८

अप्रूषिवान्। शु। शुशुवान्। भाषायां सदादिभ्यो वा लिट् १ अनद्यतनपरोक्षयोरत्र २ तस्य क्वसुः परोक्षे नित्यम् ३ ९१६ उ
पेयिवाननाश्वाननूचानश्च कौ। क्व। उपेयिवान्। अनाश्वान्। अनूचानः। इत्येते शब्दा वा निपात्यन्ते। इण्। उपेयिवान्। लिटः
क्वसुरिड्हितमभ्यासदीर्घत्वं च सो विट्त्व। उपसर्गस्य विवादितम्। ईयिवान्। समीयिवान्। अश। अनाश्वान्। अश्नातेर्नञ्पूर्वात्क
सुरिडभावश्च वच अनूचानः लिटः कानच् अनूचानः कर्तरि १ अनक्रमसंयच नोपेयिवान्नियातो द्विर्वचनादिड् भविष्य
ति परत्वात् अन्येषामेकाचो द्विर्वचने नित्यमित्याहुः १ अस्य पुनरिट्वचनित्यो द्विर्वचने वचनविहन्यते इत्यस। द्विर्वचने वेकाच्
त्वात् तस्मादिड् बाधते हितम् २ कारिके इमे ९९ लुङ् कौ ति भ्वा भूतकालिकक्रियाहृतेर्धातोर्लुङ् स्यात् अकार्षीत् अ
पाठीत् वसेर्लुङ् रात्रिशेषे १ वस अमुत्र अवात्सम् लडो विषये लुङ् जागरणसन्ततौ २ प्रयोक्तरि अतिक्रान्तप्रहरत्र
ये जागरितवति पूर्वेण लुङ् भवति मुहूर्तमात्रमपि स्वपिति तु लडेव। अमुत्र अवसम् ९१ अनद्यतने लङ्। कौ ति भ्वा भूता
नद्यतनकालिककालिकक्रियाहृतेर्धातोर्लङ् स्यात् अकरोत् अपचत् परोक्षे च लोकविज्ञाते प्रयोक्तुर्दर्शनविषये १ अरु
णद्यवनः साकेतम् परोक्षे किम्। उदगादादित्यः लोकविज्ञाते किम्। चकार कटं देवदत्तः प्रयोक्तुरित्यादि किम्। जघा
न कंसं किल वासुदेवः ९१२ अभिज्ञावचने लृट् कौ ति ल स्मृतिबोधनउपपदे भूतानद्यतनकालिकक्रियाहृतेर्धातो
र्लृट् स्यात्। अभिजानासि देवदत्त काश्मीरेषु वत्स्यामः वचः। वचनग्रहणं पर्यायपरिग्रहार्थम्। स्मरसि कृष्ण काश्मीरे
षु वत्स्यामः २ इत्यादि स्वहृदये भाषेत न यातव्येतम् ९१३ न यदि कौ क्व यत् इत्येतस्य शब्दस्य प्रयोगे पूर्वेण सूत्रेण विहितो लृ
ट् न स्यात् अभिजानासि देवदत्त यत्काश्मीरेषु अवसाम अत्र लङेव ९१४ विभाषा साकाङ्क्षे कौ ति। ल। अभिज्ञावचन उप
पदे यच्छब्दप्रयोगे केवले च वा लृट् स्यात् लक्ष्यलक्षणभावेन साकाङ्क्षे प्रयोक्तर्यर्थः अभिजानासि देवदत्त काश्मीरेषु वत्स्या
मस्तत्रौदनं भोक्ष्यामहे। स्मरसि देवदत्त यत्काश्मीरेषु वत्स्या। मस्तत्रौदनं भोक्ष्यामहे वा सोऽलक्षणे भोजने लक्ष्यम् य

वेलङ् अवसाम अभुञ्ज्महि विभाषासाकांक्षे सर्वत्र १ यद्दिवायद्दिवेत्यर्थः २५ परोक्षे लिट् कौ ति भ्वाभूतानद्यतन
परोक्षार्थहत्तेर्धातोलिट्स्यात् चकार पपाव सुममनयोरुक्तमः १ सुप्तोहंकिलविललाप। मत्तोहंकिलविललाप अस
त्याप ह्नवेच २ कौ ति ल नेकालिङ्गेषवाक्येः। नाहंकलिङ्गान्जगाम साधनेष्वपरोक्षेषु इतिभाष्यम् परोभावः परस्मात्क्षेलि
टिह्यपताम् उत्तेवादेः परादक्षणः सिद्धेवास्मान्निपातनात् १ कात्तिकेयम् ११६ हशश्वतोर्लङ्च कौ ति लह शश्वत् इत्येतः
योरुपपदयोरुपपयोर्भूतानद्यपरोक्षार्थहर्धातोर्लङ् स्यात् चकाराल्लिट् इतिहाकरोत् इतिहचकार शश्वदकरोत्
शश्वच्चकार इत्यादि सुत्रमन्तव्ये भाष्येतन्नव्याख्यातम् ११७ प्रश्नेवासन्नकाले कौ ति ल आसन्नकालेपृच्छ्यमानेभूता
नद्यतनद्यतनपरोक्षार्थहत्तेर्लङ्लिटौभवतः अगच्छत्किम् जगामकिम् आसन्नकालेकिम्। कंसंजघानकिम् अत्र
लिडेवनत्वलङ् ११८ लट्स्मे कौ ति ल स्म इत्येतस्मिन्नुपपदे भूतानद्यतनपरोक्षार्थहर्धातोर्लट्स्यात् यज
तिस्मयुधिष्ठिरः स्मपुराभूतमात्रे १ स्मपुराशब्दाभ्यामायुक्ताभ्यांलट्स्मइत्यादिपञ्चसूत्रीलक्ष्यते। तत्रभूतमात्रेप्रत्ययोभ
वतीत्यर्थः वस्मपुराद्यतने २ स्मपुरालक्षणंलट्स्मेअपरोक्षेवपुरिलङ्चास्मेइत्येतत्सूत्रत्रयंभूतमात्रेनप्रवर्त्तते कि
न्त्वअनद्यतनेभूतविशेषप्रवर्त्ततइत्यर्थः स्मादिविधिःपुरान्तोपवविशेषणाकिंकृतेभवति नस्मापुराद्यतनइतिब्रुवताका
त्यायनेनेह १ अत्रहतिरवनत्वस्मलट्स्मइत्यत्रनास्तिनजकार्य्यम् अपरोक्षानवननौनचनन्वेअविहितौ २ नपुराद्यत
नइतिभवेत्तवेदेतद्वाच्येतत्रवापिलङ् ग्रहणम् अविशेषेणस्मपुराहेतत्इतितत्रचापिस्मृणभूषः ३ अपरोक्षेवेत्येवःप्राक
पुरिसेशब्दनादभ्वविनहतः सर्वत्रनृवतनस्तथाप्तनिजाकिमिहकार्य्यम् ४ स्मादवपरोक्षेत्यकार्य्यमपिशाकामेतदि
तिविद्धि। शकंहिनिवर्त्तेपितेपरोक्षइतिलट्स्मइत्यत्र ५ स्मादेषातवबुद्धिर्हिः सालक्षणेप्येवमेवतीमिति। लट्स्मइति
भावेत्रार्थस्तस्मात्कर्थ्यपरार्धन्वकारिकाइत्याः ११९ अपरोक्षेच कौ ति ल स्मेउपपदेभूतानद्यतने ३ परोक्षे ३ ऐवत्रो

मानाद्वर्तमानवृत्तेर्धातोर्लट् स्यात् एवं स्म पिताब्रवीति भाष्ये तु पृष्टे ऽपि देष्ट्याः ख्यातम् १९ ननौ। पृष्टप्रतिवचने कौ ति ल अनद्यतन
परोक्ष इति निवृत्तम्। ननुशब्दे उपपदे प्रश्नपूर्वकप्रतिवचने गम्यमाने भूते धातोर्लट् स्यात् अकार्षीः किम्। ननु करोमि भोः। पृष्टप्र
तिवचने किम्। नन्वकार्षीन्माणवकः। वर्तमाने लडित्येव सिद्धम् इति भाष्यम् १२१ नन्वोर्विभाषा कौ ति ल नन्वोरुप
पदयोः पृष्टप्रतिवचने गम्यमाने भूतार्थवृत्तेर्धातोर्वा लट् स्यात् पक्षे लुङ् कटमकार्षीः किम्। न करोमि। नाकार्षम्। अहं नु करो
मि। अहं न्वकार्षम् भाष्ये तु नेदं व्याख्यातम् १२२ पुरि लुङ् चास्मे कौ ति ल अनद्यतन इति मण्डूकप्लुत्याऽनुवर्तते। पुरा
शब्दयोगे स्मवर्जिते भूतानद्यतने वा लुङ् स्यात् चकाराल्लट् अवात्सुरिह पुराच्छात्राः वसन्तीह पुराच्छात्राः पक्षे स्वविषये
लङ् लिटौ। अवसन् ऊषुः अस्मे किम् यजति स्म पुरा स्मः सर्वेभ्यो विप्रतिषेधेन २ परविप्रतिषेधेन पूर्वविप्रतिषेधेन वेति भा
वः १२३ वर्त्तमाने लट् कौ ति प्रावर्तमानार्थवृत्तेर्धातोर्लट् स्यात् भवति पचति प्रवृत्तस्याविरामे शिष्याभवन्त्यवर्तमानतात् १
नित्यप्रवृत्ते च कालाविभागात् २ व्याख्यातारम्भानपवर्गात् इति भाष्यम् न वर्तते चक्रमिषुर्न पात्यते न स्यन्दन्ते सरितः सागराय। कू
टस्थोऽयं लोको न विचेष्टितास्ति यो ह्येवं पश्यति सोऽप्यनन्धः १ मीमांसको मन्यमानो युवा मेधाविसंमतः प्रफाकं स्मेहानुपृच्छ
ति किं न्ते पतनलक्षणम् २ अनागते न पमिश्रान्तिक्रामन्ते न च काकम यदि स प्रतिपतसि सर्वो लोकः पतत्यम् ३ अनागते प्रति
क्रान्ते वर्तमानमिति त्रयम्। सर्वत्र च गतिर्नास्ति गच्छतीति किमुच्यते ४ क्रियाप्रवृत्तौ यो हेतुस्तदर्थं यद्विचेष्टितम् तत्सा
मीक्ष्य प्रयुञ्जीत गच्छतीत्यविचारयन् ५ कारिका इमाः। वर्तमानकालाभाववादिनोऽपरे प्राहुः विसस्य वाला इव दह्यमाना
न लक्ष्यते विकृतिः संनिपाते अस्तीति तां वेदयन्ते त्रिभावाः सूक्ष्मो हि भावोऽनुमितेन गम्यः १ कारिकेयम् वर्तमानका
लाभाववादिनः इति धे सूत्राणि भाष्ये ३।२।१२ व्याख्यातानि २६ लटः शतृशानचावप्रथमासमानाधिकरणे कौ कृ लटः
स्थाने शतृ। शानच्। इत्येतावादेशौ भवतः अप्रथमान्तेन सामानाधिकरण्ये सति पचन्तं देवदत्तं पश्य पचमानं देवदत्तं पश्य॥

सू.प.
८३
83

अप्रथमासमानाधिकरणे किम् देवदत्तः पठति लडिति वर्तमाने लृड्ग्रहणं प्रथमासामानाधिकरण्येऽपि क्वचित् । सन्
ब्राह्मणः लटः शतृशानचावप्रथमासमानाधिकरणे इति वेत्यस्य योगान्तरपदयो रूपसंख्यानम् १ प्रथमाप्रतिषेधेऽन्तरपदे
आदेशानुपपत्तिः २ सिद्धन्तु प्रत्ययोत्तरपदयोश्चेति वचनात् ३ आदेशसमानाधिकरणे छाउन्नमासन्नन्तवे प्रकृतेरपि
सामानाधिकरण्ये भवतीति तद्यथा अमूं पश्याग्निरग्रेति गम्यते इति भाष्ये एवास्थितादिभावयाथिकाप्यो णिक्रियन्ते १ परि
भाषेयम् १२५ सम्बोधने च कौ कृ सम्बोधनविषये लटः शतृशानचौ भवतः हे पचन् हे पचमान प्रथमासमानाधिकर
णार्थमिदम् भाष्ये तु नेदं व्याख्यातम् १२६ लक्षणहेत्वोः क्रियायाः कौ कृ क्रियाविहे क्रियाजनके चार्थे वर्तमानाद्धातोः पर
स्य लटः शतृशानचौ भवतः शयाना भुञ्जते यवनाः हेतौ अर्जयन् वसति लक्षणहेत्वोः किम् पचति लिखति क्रियायाः
किम् । यः कम्पते सोऽश्वत्थः । यदपप्लवते तल्लघु लक्षणहेत्वोः क्रियाया गुण उपसंख्यानम् १ कर्तृश्च लक्षणयोः पर्या
येणानुपयोगे २ तत्त्वाख्याने च ३ सदादयश्च बहुलम् ४ सन् ब्राह्मणः अस्ति ब्राह्मण विद्यमानो ब्राह्मणः विद्यते ब्राह्मणः वि
द्यते ब्राह्मणः इङ्जुहोत्योर्वा ५ अधीते अधीयानः हु जुहोति जुह्वन् माङ्याक्रोशे ६ कौ कृ मा पचन् मा पचमानः १२७
तौ सत् संज्ञाप्रदेशः २ ११ कौ कृ शतृ शानच् इत्येतौ सत्संज्ञकौ भवतः ब्राह्मणस्य कुर्वन् ब्राह्मणस्य कुर्वाणः तौसदिति
वचनमसंसर्गार्थम् १ तौग्रहणमिति भावः उत्तरयोर्लादेशे वावचनम् २ साधुनाभिधाने च ३ प्राप्नोतीति शेषः स्वरश्च साध्यः ४
उपग्रहप्रतिषेधश्च ५ अलादेशषष्ठीप्रतिषेधः ६ १२८ पूङ्यजोः शानन् प्रत्ययः स्यात् पवमानः । यजमानः इत्यादि सूत्र
सूत्राणि भाष्ये तु न व्याख्यातानि १२९ ताच्छील्यवयोवचनशक्तिषु चानश् कौ कृ ताच्छील्य वयोवचन । शक्ति । इत्येतेषु ग
म्यमानेषु धातोश्चानश्प्रत्ययः स्यात् ताच्छील्ये । कतीह मुण्डयमानाः वयोवचने कतीह कवचं वहमानाः शक्तौ कतीह नि
घ्नानाः ० १३० इङ्धार्योः शत्रकृच्छ्रिणि कौ कृ इङ्धारि इत्येताभ्यां शतृप्रत्ययः स्यात् अकृच्छ्रिणि कर्तरि अधीयन् पा ८३

रायणम् धारयन्नुपनिषदम् अकृच्छ्रिणेति किम्। कृच्छ्रेणाधीते कृच्छ्रेण धारयति ११। द्विषोऽमित्रे कौ कृद्विष इत्येतस्माद्
धातोः कर्तरि शतृप्रत्ययः स्यात् द्विषन् द्विषन्तौ अमित्रे किम् द्वेष्टि पतिं स्त्री १२ सुञो यज्ञसंयोगे कौ कृत्सुनोतेः शतृप्रत्ययः
स्यात् यज्ञेन सम्बन्धे सुञ्। सर्वे सुन्वन्तः। सर्वे यजमानाः सत्रिण इत्यर्थः यज्ञसंयोगे किम्। सुनोति सुरणम् १३ अर्हः प्रशंसा
याम् कौ कृदर्हः। इत्येतस्माद्धातोः प्रशंसाविषये शतृप्रत्ययः स्यात् अर्हन्निह भवान् विद्याम् प्रशंसायां किम्। अर्हति शत्रुर्वधम् १४
आक्वेस्तच्छीलतद्धर्मतत्साधुकारिषु कौ कृ भ्राजभासेति क्वियमभिव्याप्य वक्ष्यमाणाः प्रत्ययाः तच्छील तत्साधुकारि इत्ये
तेषु कर्तृषु वेद्याः वक्ष्यति तृन्। वदिता जनापवादान् यः स्वभावतः फलनिरपेक्षस्तत्र प्रवर्तते स तच्छीलः अन्नमपहर्तारः।
विनाऽपि शीलेन स्वधर्मोऽयमिति यः प्रवर्तते स तद्धर्मा कर्ता कटम् यान्तर्थे साधु यः करोति स तत्साधुकारी १५ तृन् कौ
कृ धातोस्तृन् प्रत्ययः स्यात्तच्छीलादिषु कर्तृषु तच्छीले। वदिता जनापवादान् तद्धर्मणि। अन्नमपहर्तारः श्राद्धकारका भ-
वन्ति श्राद्धे सिद्धे तत्साधुकारिणि। कर्ता कटम् नकारः स्वरार्थः तृन्विधावृत्विक्षु चानुपसर्गस्य १ ऋत्विक्शीलाद्यर्थमिदम्। होता
पोता अनुपसर्गस्य किम्। प्रशास्ता। तृन्नेव भवति तृन्नितादौ च निति कृत्यतौ इति गतेः प्रकृतिस्वरः स्यात्। तृन्विधौ कृत्स्वरो भव
ति नयतेः षुक्च २ वा तृन् णिञ् नेष्टा नवा धात्वन्यमेव यामन्तरे नेषतीरित्यर्थः त्विषेर्देवतायामकारश्चोपधाया अनि
ट्त्वं च ४ त्विष। त्वष्टा यद्वा तु क्षान्ते यद्वा तु क्षेः एतेन सर्वे सिद्धा विशेषाः निट्तेवेति इति भाष्यम् क्षदेश्च युक्ते ५ क्षद। क्षत्ता छन्द
सि तृच्च ६ वा तृन् छद। छत्तृभ्यः संगृहीतृभ्यः। छन्तृभ्यः १६ अलंकृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतुवृधु
सहचर इष्णुच् कौ कृ अलंकृञ्। निराकृञ्। जन। उत्पच। उत्पत। उन्मद। रुचि। अपत्रप। वृतु। वृधु। सह। चर। इत्येते
भ्यो धातुभ्यस्तच्छीलादिषु कर्तृष्विष्णुच् प्रत्ययः स्यात् डुकृञ्। अलंकरिष्णुः निराकरिष्णुः जन प्रजनिष्णुः डुपचष् उत्प
चिष्णुः मदी उन्मदिष्णुः रुच रोचिष्णु त्रपूष अपत्रपिष्णुः मद उन्मदिष्णुः रुच रोचिष्णु त्रपूष अपत्रपिष्णुः वृतु वर्तिष्णु :

स्तृ.प.
८४

तृपु वर्द्धिष्णुः षह सहिष्णुः चर। चरिष्णुः इत्यादिसूत्रत्रयं भाष्येन न व्याख्यातम् १२० ऐष्णुर्दसि कौ वे त्र त्र एपन्ताद्हतोर्वैत॰
च्छीलादिषु इष्णुइष्णुच् स्यात् हृषदेषारपिसवः। वीहर्षयोरपिसवः १२८ भवश्च कौ वे त्र त्र भू इत्येतस्माद्धातोर्वैदेन च्छीला
दिषु कर्तृषु इस्नुच् स्यात् विभविस्नुः योगविभाग उत्तरार्थः चकारोऽनुक्तसमुच्चयार्थः भ्राजिस्नुनालोहितवन्दनेन १२९ ग्ला॰
जिस्थश्चग्स्नुः कौ क्रु क्नुर्दसीति। निहृतम् ग्लै। जि। स्था। इत्येतेभ्यस्तच्छीलादिषु कर्तृषु ग्स्नुप्रत्ययः स्यात् ग्लास्नुः जिष्णुः स्था
स्नुः कस्नोः किते स्य इकारप्रतिषेधः १ अकिति गुणप्रतिषेधः २ तव इट्प्रतिषेधश्च ३ चाद्गुणप्रतिषेधोऽपि स्यादेशीभ्यो
स्नुश्छन्दसि ४ क्स्नोर्गित्वान्न स्थ ईकारः क्ङितोरीत्वशासनात्। गुणाभावस्त्रिषु स्मार्यः श्रुकोः निदू नेकगोविदोः १ कारि
केयम् १३० त्रसिगृधिधृषिक्षिपेः क्नुः कौ। क्नु॥ त्रसी। गृधु। धृष। क्षिप। इत्येतेभ्यस्तच्छीलादिषु क्नुप्रत्ययः स्यात्। त्रस्नुः
गृध्नुः। धृष्णुः। क्षिप्नुः भाष्येन नेदं व्याख्यातम् १३१ शमित्यष्टाभ्यो घिनुण् कौ क्रु इति शादृशाघर्थः शम इत्येवमादिभ्यो॰
ष्टाभ्यो धातुभ्यस्तच्छीलादिषु घिनुण्प्रत्ययः। स्यात्। शमी। दमी। श्रमी। भ्रमी। तपी। क्लमी। प्रमादी। अष्टाभ्यः किम्। असिता। घ
कार उत्तरत्र कुत्वार्थः। उकार उच्चारणार्थः घिनुण्येव कर्मधः १ घिनुण्कर्मणो। णमितिवक्तव्यम् २ ह्हमाभूत्। संपृणोक्तिपृणाक
मिति १३२ संपृचानुरुधाङ्यमाङ्यसपरिसृसंसृजपरिदेविसंज्वरपरिक्षिपपरिरटपरिवदपरिदहपरिमुहदुषद्विषद्रुहदुहयु
जाक्रीडविविचत्यजरजभजातिचरापचरामुषाभ्याहनश्च कौ क्रु संपृचादिभ्यस्तच्छीलादिषु घिनुण् स्यात्। संपर्की। अनादिर्हेत्व
नेनत्वदादिर्लोपविकरणत्वात्। संपर्ची हपिर अनु। रोधी। यम। आयामी। यस। आयासी। सृ परिसारी। सृज। संसर्गी। देहभा॰
दिः परिदेवी। ज्वर। संज्वारी क्षिप। दिवादिस्तुदादिश्च। परिक्षेपी। रट। परिराटी। वद। परिवादी। दह। परिदाही। मुह। परिमो
ही दुष दोषी द्विष। द्वेषी। द्रुह। द्रोही दुह। दोही। युजिर। युज। योगी। क्रीड। आक्रीडी। विचिर। विवेकी। त्यज। त्यागी। रञ्ज। रागी
भज। भागी। चर। अतिचारी। मुष। आमोषी हन अभ्याघाती। इत्यादिसूत्रवत् ह्यपे भाष्येन न व्याख्यातम् १३३ वौ कषलसकत्थस्र ८४

म्भः कौ कृ कष हिंसार्थः। लस। कम्प। स्रम्भु। इत्येतेभ्यो विशब्द उपपदे तच्छीलादिषु घिनुण् स्यात्। विकाषी विलासी। वि
कम्पी। विस्रम्भी १४४ अपे च लषः कौ कृ लष। इत्येतस्मादपशब्द उपपदे तच्छीलादिषु घिनुण् स्यात् कारादिशब्देऽपि
अपलाषी विलाषी १४५ प्रे लपसृद्रुमथवदवसः कौ कृ लप सृ द्रु मथे वद वस इत्येतेभ्यः प्रशब्द उपपदे तच्छीलादिषु
घिनुण् स्यात् प्रलापी प्रसारी प्रद्रावी प्रमाथी प्रवादी प्रवासी वस निवासार्थः। न तु आच्छादनार्थः लुग्विकरणत्वात्
निन्दहिंसक्लिशखादविनाशपरिक्षिपपरिरटपरिवादिव्याभाषासूयो वुञ् कौ कृ निन्दादिभ्यस्तच्छीलादिभ्यस्तच्छीलादिषु वुञ्
स्यात् णिदि निन्दकः हिंसि। हिंसकः। क्लिश। क्लेशकः खाद खादकः। णश णप्रन्तः विनाशकः क्षिप परिक्षेपकः। रट
परिराटकः। वद णप्रन्तः। परिवादकः। भाष। व्याभाषकः असूयतिः कण्ड्वादिः असूयकः निन्दादिभ्यो वुञ्वचनं ण्वुलः प्रतिषे
धार्थम् १ तृजादिप्रतिषेधार्थं चैके २ १४७ देविक्रुशोश्चोपसर्गे कौ कृ देवि क्रुश इत्येताभ्यामुपसर्ग उपपदे तच्छीलादिषु
वुञ् स्यात् दिव दिवादिश्चुरादिश्च परिदेवक क्रुश आक्रोशकः उपसर्गे किम् देवयिता क्रोष्टा इत्यादिस्तत्रत्यं भाष्ये तु न वा
ख्यातम् १४८ चलनशब्दार्थादकर्मकाद्युच् कौ कृ चलनार्थेभ्यः शब्दार्थेभ्यश्चाकर्मकेभ्यस्तच्छीलादिषु युच् प्रत्ययः
स्यात् चलनः चोपनः शब्दार्थात् शब्दनः रवणः अकर्मकात्किम्। पठिता विद्याम् १४९ अनुदात्तेतश्च हलादेः कौ कृ अनु
दात्तेतो हलादेर्धातोस्तच्छीलादिषु युच् स्यात् वृत वर्तनः वृधु वर्धनः अनुदात्तेतः किम् भविता हलादेः किम् एधिता
ग्रादिग्रहणं किमर्थम्। इह यथा स्यात् जुगुप्सनः मीमांसनः अकर्मकात्किम् वसिता वस्त्रम् १५० जुचङ्क्रम्यदन्द्रम्यसृगृधि
ज्वलशुचलषपतपदः कौ कृ जुप्रभृतिभ्यो यातेभ्यस्तच्छीलादिषु युच् स्यात्। जु इति सौत्रो धातुः जवनः क्रम चङ्क्रमणः य
ङन्ताद्युच्। द्रम। दन्द्रमणः स्तच्छीलादिषु युच् स्यात् जु इति सौत्रो धातुः। जवनः य यङन्ताद्युच् सृ सरणः गृधु। गर्धनः
ज्वल। ज्वलनः। शुच। शोचनः। लष इच्छार्थः। लषणः। पतॢ। पतनः पद। पदनः १५१ क्रुधमण्डार्थेभ्यश्च कौ कृ क्रोधार्थेभ्यो

भूषार्थेभ्यश्च धातुभ्यस्तच्छीलादिषु युच् स्यात् कौ० यत । रोषणः । मण्डार्थेभ्यः । मण्डनः । भूषणः । इत्यादिसमस्तसूत्राणि भाष्ये
सू.प. तनव्याख्यातानि ८५२ नयः । कौ० क० । यकारान्तेभ्यो धातुभ्यस्तच्छीलादिषु युच् न स्यात् क्नूयिता । क्ष्मायिता ८५३ सूददीप
८५ दीक्षश्च कौ० क० । सूद । दीपी । दीक्ष । इत्येतेभ्यस्तच्छीलादिषु युच् न स्यात् सूदिता । दीपिता । दीक्षिता । नमिकम्पीतिरप्रतिषे
85 नधुचो वाथे सिद्धे दीपग्रहणं ज्ञापयति । ताच्छीलिकेषु वासरूपविधिर्नास्तीति प्रायिकम् । तेन कम्राकमनायुवतिः कम्राक
मनाशान्वा इति सिद्धम् ८५४ लषपतपदस्थाभूवृषहनकमगमशृभ्य उकञ् कौ० क० लष । पत्लृ । पद । स्था । भू । वृषु । हन
कम । गम्लृ । शॄ । इत्येतेभ्यस्तच्छीलादिषु उकञ् प्रत्ययः स्यात् लाषुकः पातुकः पादुकः । स्थायुकः । भावुकः । वर्षुकः । घात
कः । कामुकः । आगामुकः । शारुकः ८५५ जल्पभिक्षकुट्टलुण्टवृङः षाकन् कौ० क० जल्प । भिक्ष । कुट्ट । लुण्ट । वृङ् । इत्ये
तेभ्यस्तच्छीलादिषु षाकन् स्यात् । जल्पाकः । भिक्षाकः कुट्टाकः । लुण्टाकः । वराकः । षित्वान्ङीष् । वराकी ८५६ प्रजोरि
निः । कौ० क० । जु । इत्येतस्मात् प्रपूर्वात् तच्छीलादिषु इनिप्रत्ययः स्यात् । प्रजवी । प्रजविनौ ८५७ जिदृक्षिविश्रीण्वमाव्यथाभ्यम
परिभूप्रसूभ्यश्च कौ० क० जिप्रभृतिभ्यस्तच्छीलादिषु इनिः स्यात् । जि । जयी । दृङ् । दरी । क्षि । क्षयी । विपूर्वः श्रिञ् । विश्रयी । इण्
अत्ययी । टुवम । वमी । व्यथ नञ्पूर्वः । अव्यथी अम अभिपूर्वः । अभ्यमी भू परिपूर्वः परिभवी । षू प्रपूर्वः । प्रेरणार्थः । प्रसवी ८५८
स्पृहिगृहिपतिदयिनिद्रातन्द्राश्रद्धाभ्य आलुच् कौ० क० स्पृहादिभ्यस्तच्छीलादिषु आलुच् प्रत्ययः स्यात् । स्पृह चुरादिः ।
स्पृहयालुः । गृह चुरादिः । गृहयालुः पत चुरादिः । पतयालुः । दय । दयालुः द्रा निपूर्वः । निद्रालुः । द्रा तत्पूर्वः । तन्द्रालुः । त
त्वस्य नान्तत्वमपि निपात्यते । डुधाञ् श्रत्पूर्वः । श्रद्धालुः । लुश्शासिद्धे । आलुच् करणमण्यन्तेो विधानार्थम् । शयालु
आलुविधौ शीङ्ग्रहणम् ८५९ दयिट्सिशदसदोरुः कौ० क० दा । धेट् । षिञ् । शद्लृ । षद्लृ । इत्येतेभ्यस्तच्छीलादिषु रुप्रत्ययः
स्यात् डुदाञ् । दो । धेट् । दारुः । सेरुः शद्रुः सद्रुः । इत्यादिद्वादशसूत्राणि भाष्ये तनव्याख्यातानि ८६० सृघस्यदः क्मरच् कौ० क० ८५

सृ। घस्लृ। अद। इत्येतेभ्यस्तच्छीलादिषु क्मरच्प्रत्ययः स्यात्। सृमरः। घस्मरः। अद्मरः ६१ भञ्जभासमिदो घुरच् कौ कृ
भञ्जो। भासृ। ञिमिदा। इत्येतेभ्यस्तच्छीलादिषु घुरच्प्रत्ययः स्यात्। भङ्गुरं काष्ठम्। भञ्जेः कर्मकर्तरि प्रत्ययः। विताङ्कते
भासुरं ज्योतिः मेदुरः पशुः ६२ विदिभिदिच्छिदेः कुरच् कौ। कृ। विद ज्ञानार्थः। भिदिर्। छिदिर्। इत्येतेभ्यस्तच्छीला
दिषु कुरच्प्रत्ययः स्यात् विदुरः पण्डितः भिदुरं काष्ठम् छिदुरा रज्जुः। भिदिच्छिदोः कर्मकर्तरि प्रत्ययः ६३ इण्नशजिस
र्तिभ्यः क्वरप्। कौ। कृ। इण्। णश। जि। सृ। इत्येतेभ्यः क्वरप्प्रत्ययः स्यात् इत्वरः नश्वरः जित्वरः ६४। गत्वरश्च कौ। कृ। ग
त्वर इति निपात्यते तच्छीलादिषु गम्लृ गत्वरः गमेरनुनासिकलोपः क्वरप्प्रत्ययश्च ६५ जागरूकः कौ कृ जागृ। इत्ये
तस्मात्तच्छीलादिषु ऊकप्रत्ययो निपात्यते। जागरूकः ६६ यजजपदशां यङः कौ कृ। यज। जप। दंश। इत्येते
भ्यो यङन्तेभ्यस्तच्छीलादिषु ऊकः स्यात्। यायजूकः। जञ्जपूकः। दंदशूकः ६७ नमिकम्पिस्म्यजसकमहिंस
दीपो रः कौ कृ नमि कम्पि। स्मि अजस् कम हिंस दीप इत्येतेभ्यस्तच्छीलादिषु रप्रत्ययः स्यात् णम नम्रं काष्ठम्
कपि कम्प्रा शाखा ष्मिङ् स्मेरं मुखम् जसु नञ्पूर्वः अजस्रं सततम् कमु कम्रः कम्रा युवतिः हिसि। हिंस्रः दीपी
दीप्रः ६८ सनाशंसभिक्ष उः कौ। कृ। सन्प्रत्ययान्तात् आशंस। भिक्ष। इत्येतेभ्यो धातोस्तच्छीलादिषु उप्रत्ययः स्यात् सन्
चिकीर्षुः आङः शासु इच्छायामिति गृह्यते न त्वन्यः आशंसुः भिक्ष भिक्षुः ६९ विन्दुरिच्छुः कौ कृ विन्दुः इ
च्छुः इत्येतौ उप्रत्ययान्तौ निपात्येते तच्छीलादिषु विद ज्ञानार्थः नुमागमो निपातनात् विन्दुः निपातनान्नुम्
इषु इच्छार्थः इच्छुः छत्वं निपातनात् ७० क्याच्छन्दसि कौ वे अ तु क्याच् क्यङ् क्यष् इत्येतदन्तात्तच्छीलादिषु
वेदे उप्रत्ययः स्यात् मित्रयुः सेदयुः समयुः छन्दसि किम् मित्रीयिता ७१ आदृगमहनजनः किकिनौ लिट् च कौ
वे आत् आ ऋ इत्येतदन्तात् गम्लृ हन जनी इत्येतेभ्यस्तच्छीलादिषु वेदे किकिनौ प्रत्ययौ भवतः तौ च लिड्वत् :

सू.प.
८८
९६

श्रादेतान् पा पपिः सोमम् ऋन्दतेतान् तृ ततुरिः गम्लृ जग्मिर्योधुः हन जघ्निर्वृत्रम् जन जज्ञिर्हिबीजम् किकि
नोः कित्त्वम् ककारगुणप्रतिषेधार्थम् १ उत्सर्गश्छन्दसि सदादिभ्यो दर्शनात् २ किकिनौ इति शेषः षद्लृ सदिः मन
मेनिः रम रेमिः णम नेमिः स्फसिवाभवत् विच विविचं रत्नधातमम् भाषायां धाञ्कृसृजनिनमिभ्यः २
कौ कृ दुधाञ् दधिः डुकृञ् चक्रिः सृ सस्रिः जनि जज्ञिः णम नेमिः सासहिवावहिवाचलिपापतीनां निपा
तनम् ४ कौ कृ षह सहासमत्वसासहिः वह वावहिः चल धुवस्तिष्ठाविवावलिः सहिवहिचलिपतिभ्यो य
ङन्तेभ्यः किकिनौवक्तव्यौ १ इत्यपरेषामियः कृकञ्चपिवक्तव्यः ५ कौ कृ जिभी भीरुकः ७२ स्वपितृषोर्नजिङ्
कौ कृ जिष्वप् जितृष् इत्येताभ्यां तच्छीलादिषु नजिङ् स्यात् स्वप्नक् स्वप्नक् तृष्णक् तृष्टपेषेति वाच्यम् १
इति काशिका जितृषा धृष्णक् इत्यादि षट्सूत्राणि भाष्ये तत्र व्याख्यातानि १७३ शृवन्द्योरारुः कौ कृ शृ
वदि इत्येताभ्यां तच्छीलादिष्वारुप्रत्ययः स्यात् शरारुः वन्दारुः १७४ भियः क्रुक्लुकनौ कौ कृ जिभी इत्येतस्मा
तच्छीलादिषु क्रु क्लुकन् इत्येतौ प्रत्ययौ भवतः भीरुः भीलुकः १७५ स्थेशभासपिसकसोवरच् कौ कृ ष्ठा ईश भा
सृ पिस कस इत्येतेभ्यस्तच्छीलादिषु वरच् प्रत्ययः स्यात् स्थावरः ईश्वरः भास्वरः पेस्वरः ७६ यश्च यङः कौ कृ
वा इत्येतस्माद्यङन्तात् तच्छीलादिषु वरच् स्यात् यायावरः १७७ भ्राजभासधुर्विद्युतोर्जिपृजुग्रावस्तुवः क्विप् कौ
कृ भ्राजादिभ्यस्तच्छीलादिषु क्विप्प्रत्ययः स्यात् भ्राज विभ्राट् विभ्राड् विभ्राजौ भास् भाः भासौ धुर्वी। धूः
धुरौ द्युत विपूर्वः विद्युत् विद्युतौ ऊर्ज ऊर्क् ऊर्जौ। पृ पूः पुरौ जुइति सौत्रः जूः नियातनाद्दीर्घः जुवौ ष्टुञ् ग्रा
वपूर्वः ग्रावस्तुत् ग्रावस्तुतौ ग्रन्थे ऽपीत्येवोपपदञ्च: १७८ अन्येभ्योऽपि दृश्यते कौ कृ भ्राजादिभ्य इतरेभ्यो ऽ
पि धातुभ्यस्तच्छीलादिषु क्विप् स्यात् भित् छित् वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घश्च १ वच वाक् प्रच्छ ८८

शाट्शाट् स्वपिप्रच्छोरसंप्रसारणं चेति वक्तव्यम् १ इत्यपरे क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसंप्रसारणं च १ कौ क्र द्यु
तिगमिजुहोतीनां द्वे च कौ क्र द्युत दिद्युत् गम्लृ जगत् जुहोतेर्दीर्घश्च २ कौ क्र हु जुहूः दृणातेर्ह्रस्वश्च द्वे च क्विप् चेति व
क्तव्यम् ४ दृ दद्दृत् ध्यायतेः संप्रसारणं च ५ कौ क्र ध्यै धीः जुहूः जुहोतेर्द्वेपतेर्वा दद्दृत् दृणातेर्दीर्यतेर्वा जूः ज्व
रतेर्जोर्यतेर्वा धीः ध्यायतेर्दधातेर्वा इति भाष्यम् ७९ भुवः संज्ञान्तरयोः कौ क्रम् इत्येतस्मात्संज्ञायामन्तरे च गम्यमाने
क्विप् स्यात् मित्रभूर्नाम कश्चित् अन्तरे प्रतिभूर्धनिकाधमर्णयोर्मध्यस्थः इत आरभ्य तच्छीलादिषु निवृत्तम् १८० वि
प्रसंभ्यो ड्वसंज्ञायाम् कौ क्र वि प्र सम् इत्येतेभ्यो भुवो डुः प्रत्ययः स्यादसंज्ञायाम् विभुः सर्वगः प्रभुः स्वामी संभुर्जनिता
असंज्ञा । यां किम् विभूर्नाम कश्चित् डुप्रकरणे मितद्र्वादिभ्य उपसंख्यानम् १ कौ क्र द्रु मितं द्रवतीति मितद्रुः मितद्रु ।
मितद्रवः मितद्रु शतद्रु शंभु एते मितद्र्वादयः १८१ धः कर्मणि ष्ट्रन् कौ क्र धेट् डुधाञ् इत्येताभ्यां कर्मणि ष्ट्रन् प्रत्य
यः । स्यात् । धात्री स्तनदायिनी धात्री आमलकी इत्यादि सम्यक् सूत्राणि भाष्येण न व्याख्यातानि १८२ दाम्नीशसयुयुजस्तुतुद
सिसिचमिहपतदशनहः करणे कौ क्र दावादिभ्यः ष्ट्रन् स्यात्करणेऽर्थे दाप् दात्रम् णीञ् नेत्रम् शसु शंसु शस्त्रम्
यु । योत्रम् । युजिर् । योक्त्रम् । ष्टुञ् । स्तोत्रम् तुद तोत्त्रम् षिञ् सेत्रम् षिच सेक्त्रम् मिह मेढ्रम् पत्लृ पत्त्रम् दंश
दंष्ट्रा अजादित्वाट्टाप् दंशेरनुनासिकलोपेन निर्देशः कितोऽन्यत्रापि लोपज्ञापनार्थः तेन दशनमिति सिद्धम् णह नद्धी ८२
हलसूकरयोः पुवः कौ क्र पूङ् पूञ् इत्येताभ्यां ष्ट्रन् स्यात्करणेऽर्थे तच्चेत्करणं हलसूकरयोरवयवो भवति पोत्रं हल
सूकरयोर्मुखम् १८४ अर्तिलूधूसूखनसहचर इत्रः कौ क्र ऋ लूञ् धू षू खन षह चर इत्येतेभ्य इत्रप्रत्ययः स्यात् अ
रित्रम् लवित्रम् । धवित्रम् । सवित्रम् । खनित्रम् सहित्रम् चरित्रम् १८५ पुवः संज्ञायाम् कौ क्र पूङ् पूञ् इत्येताभ्यां करणे
इत्रः स्यात् समुदायेन संज्ञा चेद्गम्यते पवित्रं दर्भः १८६ कर्तरि चर्षिदेवतयोः कौ क्र पूङ् पूञ् इत्येताभ्यां करणे कर्तरि चेत्र्

सू॰प॰ ८७ 87

त्रः स्यात्करणे ऋषिदेवतयोर्वाच्ययोः। पूयतेऽनेनेति पवित्रोऽयमृषिः देवतायां करणेऽग्निः पवित्रम् १८७ ञीतः क्तः कौ क्त
ञिइत्संज्ञको यस्तस्माद्धातोर्वर्तमाने क्तप्रत्ययः स्यात् ञिमिदा मिन्नः १८८ मतिबुद्धिपूजार्थेभ्यश्च कौ क्त इच्छार्थे
बुद्ध्यर्थे पूजार्थेभ्यो वर्तमाने क्तः स्यात् मन राज्ञां मतः बुध राज्ञां बुद्धः पूज राज्ञां पूजितः शीलितो रक्षितः क्षान्त आक्रु
ष्टो जुष्ट इत्यपि रुष्टश्च रुषितश्चोभावभिव्याहृत इत्यपि १ हृष्टतुष्टौ तथा कान्तस्तथोभौ संयतोद्यतौ कष्टं भविष्यतीत्याहुरमृता
ताः पूर्ववत्स्मृताः २ अप्रयुक्तसमुच्चयार्थश्चकारो बलमस्यार्थसंग्रहकारिके इमे। इति ६५ सूत्राणि भाष्ये २ २ ३ व्याख्या
तानि इति सूत्रपाठे तृतीयोऽध्यायस्य द्वितीयः पादः २ उणादयो बहुलम् कौ क्त ३ उणः इत्येवमादयो व्याकर
णान्तरप्रसिद्धाः प्रत्यया वर्तमाने काले संज्ञायां विषये बहुलं वा स्युः कृवापाजिमिस्वदिसाध्यशूभ्य उण् कारुः वायुः
पायुः जायुः मायुः स्वादुः साधुः आशुः उणादीन् विस्तरतोऽग्रे वक्ष्यामः बाहुलकं प्रकृतेस्तनुदृष्टेः। प्रायसमुच्च
यनादपि तेषाम् कार्यसशेषविधेश्च तदुक्तं नैगमरूढिभवं हि सुसाधु १ नाम च धातुजमाह निरुक्ते व्याकरणे शकट
स्य च तोकम् यन्न विशेषपदार्थसमुत्थं प्रत्ययतः प्रकृतेश्च तदूह्यम् २ संज्ञासु धातुरूपाणि प्रत्ययाश्च ततः परे कार्या
द्विद्यादनूबन्धमेतच्छास्त्रमुणादिषु ३ कारिका इमाः २ भूतेऽपि दृश्यन्ते कौ क्त ३ उणादयः प्रत्यया भूतेऽपि दृश्य
न्ते वृतम् वर्त्म चरितम् चर्म भसितम् भस्म भाष्येऽनेनेदं व्याख्यातम् ३ भविष्यति गम्यादयः कौ क्त ३ भविष्य
ति काले गम्यादयो णिनिप्रत्ययान्ताः शब्दाः साधवो भवति ग्रामंगमी गमी आगमी भावी प्रस्थायी प्रतिरोधी प्रति
योधी प्रतिबोधी प्रतियोगी एते गम्यादयः भविष्यतीत्यनद्यतन उपसंख्यानम् १ भविष्यदधिकारस्य प्रयोजनं यावा
स्यवतीत्यनपशाहत्ताय २ भूतेऽपि लटः साधुत्वमाभूत् ४ यावत्पुरानिपातयोर्लट् कौ ति ल यावत् पुरा इत्येतयोरु ८७
पपदयोर्भविष्यत्यर्थे धातोर्लट् स्यात् यावद्भुङ्क्ते पुरा भुङ्क्ते निपातयोः किम् यावद्दास्यते तावद्भुङ्क्ते करणभूतया पु

गयास्यति यावत्पुरादिषु लड्विधिर्लटः पूर्वविप्रतिषिद्धम् १५ विभाषा कदाकर्ह्योः कौ ति ल कदा कर्हि इत्येतयोरुपपद
योर्भविष्यति काले धातोर्वा लट् स्यात् कदा भुङ्क्ते कदा भोक्ष्यते कर्हि भुङ्क्ते कर्हि भोक्ष्यते इत्यादिसूत्रद्वयं भाष्ये तु न व्या॰
ख्यातम् ६ किंवृत्ते लिप्सायाम् कौ ति ल किंशब्देन वृत्ते यत्तस्मिन्नुपपदे लाभेच्छायां गम्यमानायां भविष्यति धातोर्वा
लट् स्यात् पक्षे लृट्लुटौ कं भोजयति भोजयिष्यति भोजयिता वा कतरो भिक्षां ददाति दास्यति दाता वा कतम
स्वर्लोकं याति यास्यति याता वा लिप्सायां किम् कः काशीं गमिष्यति ७ लिप्स्यमानसिद्धौ च कौ ति ल अकिंवृ
त्तार्थमिदम् लिप्स्यमानेनान्नादिना स्वर्गादेः सिद्धौ गम्यमानायां भविष्यति धातोर्वा लट् स्यात् पक्षे लृट्लुटौ योऽन्नं
ददाति दास्यति दाता वा स स्वर्गं लोकं याति यास्यति याता वा ८ लोडर्थलक्षणे च कौ ति ल लोडर्थः प्रैषादिर्
लक्ष्यते येन तत्र वर्त्तमानाद्धातोर्भविष्यति वा लट् स्यात् पक्षे लृट्लुटौ उपाध्यायश्चेदागच्छति आगमिष्यति आग॰
न्ता वा अथ त्वं छन्दोऽधीष्व उपाध्यायागमनमध्ययनप्रैषस्य लक्षणम् इत्यादिसूत्रद्वयं भाष्ये तु न व्याख्यातम् ९ लिङ्
चोर्ध्वमौहूर्त्तिके कौ ति ल ऊर्ध्वं मुहूर्ताद्भव ऊर्ध्वमौहूर्त्तिकः तादृशे भविष्यति लोडर्थलक्षणे वर्त्तमानाद्धातोर्लिङ् स्या
त्। चकाराल्लट् च वा। पक्षे लृट्लुटौ मुहूर्तादुपरि उपाध्यायश्चेदागच्छेत् आगच्छति आगमिष्यति। आगन्ता वा। अ
थ त्वं छन्दोऽधीष्व १० तुमुन्ण्वुलौ क्रियायां क्रियार्थायाम् कौ कृ ३ क्रियार्थायां क्रियायामुपपदे धातोर्भविष्यति
तुमुन्ण्वुलौ प्रत्ययौ भवतः भोक्तुं व्रजति भोजको व्रजति क्रियायां किम् भिक्षिष्य इत्यस्य जटाः क्रियार्थायां किम्
धावतस्ते पतिष्यति दण्डः ण्वुलः क्रियार्थोपपदस्य पुनर्विधानं तृजादिप्रतिषेधार्थम् ११ भाववचनाश्च कौ कृ
३ भावे इत्यधिकृत्ये घञादयो वक्ष्यन्ते तेऽपि भविष्यति क्रियार्थायां क्रियायामुपपदे भवन्ति पाकाय व्रजति भूतये व्रज
ति तुमर्थाद्भाववचनादिति पुनर्विधिः भाववचनानां यथाविहितानां प्रतिपदविध्यर्थः १ यथाविहिता इति वक्तव्यम् २

सू॰ प॰ ८८

व्यतिकरो माभूत् १२ अण्कर्मणि च कौ कृ ३ कर्मण्युपपदे क्रियार्थायां क्रियायां सत्यां धातोरण् प्रत्ययः स्यात् काण्ड
लावो व्रजति गोदायो व्रजति अणः पुनर्वचनं क्रियते ऽपते पवादविषये ऽनिवृत्त्यर्थम् १ उत्सर्गविधिरेव प्रतिपदविधिः २
अपर्यायेणेति वक्तव्यम् २ तत्तर्हि वक्तव्यम् न वक्तव्यम् येन सेनियोगः करिष्यते इति भाष्यम् १३ लृट् शेषे च कौ ति
भ्वा भविष्यति धातोर्लृट् स्यात् क्रियार्थायां क्रियायां सत्यामसत्यां वा करिष्यामीति व्रजति शेषे करिष्यति लृट् शे
षवचनं क्रियायां प्रतिपदविध्यर्थम् १ १४ लृटः सद्वा कौ कृ भविष्यति लृटः स्थाने सत्संज्ञकौ शतृशानचौ वा आदेशौ
वा भवतः सकरिष्यति सकरिष्यन् सकरिष्यते सकरिष्यमाणः इत्यादि सिद्धम् करिष्यन्तं देवदत्तं पश्य करिष्यमा
णं देवदत्तं पश्य सद्विधिर्नित्यमप्रथमासमानाधिकरणे १ संबोधने च लक्षणहेत्वोः क्रियाया अप्युपलक्षणमेत
त् १५ अनद्यतने लुट् कौ ति भ्वा भविष्यदनद्यतने धातोर्लुट् स्यात् श्वः कर्ता अनद्यतन इति बहुव्रीहिः तेन
व्यामिश्रे न भवति अद्य श्वो वा गमिष्यति परिदेवने श्वस्तनी भविष्यदर्थे २ भविष्यन्तीति लृटः संज्ञा प्राचाम् कालप्र
कर्षात्पमानम् अनद्यतन इवानद्यतन इति इति भाष्यम् १६ पदरुजविशस्पृशो घञ् कौ कृ ३ पद रुज विश
स्पृश इत्येतेभ्यो घञ् प्रत्ययः स्यात् पद्यते ऽसौ पादः रुजत्यसौ रोगः विशत्यसौ वेशः स्पृशतीति स्पर्शः स्पर्श उप
ताये १ उपतापो रोगः स्पर्शो व्याधिविशेषः उपताये किम् कम्बलस्य स्पर्शः पदिनादच् स्वरे विशेषः १७
सृ स्थिरे कौ कृ ३ सृ इत्येतस्मात्स्थिरे कर्तरि घञ् स्यात् चिरं तिष्ठन् कालान्तरं सरतीति खदिरसारः स्थिरे
किम् सर्ता सारकः व्याधिमत्स्यबलेष्विति वक्तव्यम् १ अस्थिरार्थमेतत् अतीसारो व्याधिः विसारो मत्स्यः बले
शालसारः व्याधिमत्स्यबलेषु चेति वाच्यम् २ कौ कृ ३ १९ भावे कौ कृ ३ भावे वाच्ये धातोर्घञ् स्यात् पाकः या
कौ त्यागः रागः धातुना साध्यरूपा क्रियोच्यते घञादिना तु सैव क्रिया सिद्धरूपोच्यते अत एवात्र लिङ्गसंख्यायोगः ८०

भावेसर्वलिङ्गोनिर्देशः १८ अकर्तरिचकारकेसंज्ञायाम् कौ कृ ३ कर्तृभिन्नेकारकेधातोर्घञ्स्यात् संज्ञाविषये प्रास्यन
इति प्रासः कुन्तः आहरन्तिरसमस्मादिति आहारः अकर्तरिकिम् मिषत्यसौमेषः पचाद्यच् स्वरेभेदः संज्ञायांकिम्
कर्तव्यःकटः चकारःसंज्ञाव्यभिचारार्थः दीयतेऽसौ दायः कारकग्रहणमनादेशस्वार्थविज्ञानात् १ भाष्येतुकारके
संज्ञायामितिप्रत्याख्यातम् २ः परिमाणाख्यायांसर्वेभ्यः कौ कृ ३ परिच्छित्तिहेतोःसंख्यायांसर्वधातुभ्योघञ्स्यात् एकस्तण्डु
लनिचाय द्वौः शूर्पनिष्पावौ द्वौकारौ सर्वग्रहणमयोऽपिबाधनार्थम् अन्यथापुरस्तादपवादन्यायादेरचमेवबाधेत
परिमाणाख्यायांकिम् निश्चयः आख्याग्रहणंरूढिनिरासार्थम् तेनसंख्यापिगृह्यते सर्वेभ्यइतियज्ञमीनिर्देशात्त
कृत्याअयपवादोबाध्यते नत्वअर्थोअपाःस्त्रीप्रत्ययाः द्वेप्रसृती सर्वग्रहणमनर्थकंपरिमाणाख्यायामितिसिद्धत्वात् १
वजन्तुक्रमणामजविषये २ अबवनेहिस्त्रीप्रत्ययानामप्यपवादविज्ञानम् ३ दारजारौकर्तरिणिलुक्च ४ कौ कृ
३ दृ दारयन्तीति दाराः जृष् जरयन्तीति जाराः करणेवा ५ दीर्यन्तेतैः दाराः जीर्यन्तेतैः जाराः २१ इङश्च कौ कृ
३ एरचोऽपवादः इङ् अध्ययनेतस्माद्धातोर्घञ्स्यात् अधीयतेऽसौ अध्यायः उपेत्याधीयतेयस्मात्सः उपाध्यायः इङश्चा
पादानेस्त्रियामुपसंख्यानेतदन्ताच्चवाङीष् १ कौ कृ ३ उपेत्याधीयतेऽस्याः उपाध्यायी उपाध्याया शृवायुवर्णनि
वृतेषु २ कौ कृ ३ शृ शारोवायुः शारोवर्णः गौरिवाकृतनीशारः प्रायेणशिशिरेकृशः २२ उपसर्गेरुवः कौ। कृ।
३। अपोऽपवादः रु शब्देतस्मादुपसर्गेउपपदेघञ्स्यात् संरावः उपरावः उपसर्गेकिम् रवः इत्यादिवृत्तद्वेषसूत्रा
णिभाष्येत्वनाख्यातानि २३ समियुद्रुदुवः कौ। कृ। ३। यु। द्रु। दु। इत्येतेभ्यःसमाउपपदेघञ्स्यात् संयावः संद्रावः
समिकिम् यवः २४ श्रिणीभुवोऽनुपसर्गे कौ कृ ३ अपोऽपवादः श्रिञ् णीञ् भू इत्येतेभ्योऽनुपसर्गेभ्योघञ्स्यात्
श्रायः नायः भावः अनुपसर्गेकिम्। प्रश्रयः प्रणयः प्रभवः कथंराज्ञोनयइति कृत्यल्युटोबहुलवचनादच् २५ वौ

सू.प. ८९ 89

त्त्राव: कौ कृ ३ श्रयो:पवाद: डुक्षु श्रु इत्येताभ्यां विशब्द उपपदे घञ् स्यात् विक्षाव: विश्राव: २६ अवोदोर्नियः कौ कृ
३ णीञ् इत्येतस्मादव उद इत्येतस्मादव उद इत्येतयोरुपपदयोर्घञ् स्यात् अवनाय: उन्नाय: कथमन्नाय: पदार्थानामि
ति कृत्सस्तुटोवहुलमितिभविष्यति २७ प्रेद्रुस्तुस्रुव: कौ कृ ३ द्रु ष्टुञ् स्रु इत्येतेभ्य: प्रशब्द उपपदे घञ् स्यात प्रद्राव :
प्रस्ताव: प्रस्ताव: प्रस्राव: प्रेकिम् द्रव: स्तव: स्रव: २८ निरभ्यो:पूल्वो: कौ कृ ३ पू लू इत्येताभ्यां क्रमेण निर अभि
इत्येतयोरुपपदयोर्घञ् स्यात् पूञ् पूङ् निष्पाव: लूञ् अभिलाव: निरभ्यो:किम् पव: लव: २९ उन्न्योर्ग्र: कौ कृ ३
गृ इत्येतस्मा उत् नि इत्येतयोरुपपदयोर्घञ् स्यात् उद्गार: समुद्रस्य निगारो देवदत्तस्य उन्न्यो:किम् गर: ३० कृ धान्ये
कौ कृ ३ कॄ इत्येतस्माद्धातोरुत् नि इत्येतयोरुपपदयोर्घञ् स्यात् धान्यविषये उत्कारो धान्यस्य निकारो धान्यस्य धा
न्ये किम् भित्तोत्कर: पुष्पनिकर: ३१ यज्ञे समि स्तुव: कौ कृ ३ ष्टुञ् इत्येतस्माद्धातो: संशब्द उपपदे यज्ञविषये घञ्
स्यात् समेत्य स्तुवन्ति यत्र स: संस्तावो देश: यज्ञे किम् संस्तव: छात्रयो: परिचय इत्यर्थ: ३२ प्रे स्त्रोऽयज्ञे कौ कृ ३ स्तॄञ्
इत्येतस्मात् प्रशब्द उपपदे यज्ञविषयादन्यत्र घञ् स्यात् शङ्खप्रस्तार: मणिप्रस्तार: अयज्ञे किम् बर्हि:प्रस्तर: ३३ प्रथ
नेवावशब्दे कौ कृ ३ स्तॄञ् इत्येतस्माद्विशब्द उपपदे अशब्दविषये विस्तारे गम्ये घञ् स्यात् पटस्य विस्तार: प्रथने किम्
तृणविस्तर: अशब्दे किम् विस्तरो वचसाम् ३४ छन्दोनाम्नि च कौ कृ ३ स्तॄञ् इत्येतस्माद्विशब्द उपपदे छन्दोनामग्रह
णात् ३५ उदि ग्रह: कौ कृ ३ ग्रह वृह निश्चिगमश्चेति अपो:पवाद: ग्रह इत्येतस्माद्धातोरुत् इत्येतस्मिन्नुपपदे घञ्
स्यात् उद्ग्राह: ३६ समि मुष्टौ कौ कृ ३ ग्रह इत्येतस्मात्संशब्द उपपदे मुष्टिविषये धात्वर्थे घञ् स्यात् अङ्गुलिसन्निवे
शेन मुष्टि: अहो मल्लस्य संग्राह: दृढमुष्टितया ख्यायते मुष्टौ किम् संग्रहो धान्यस्य समिमुष्टाविति अनर्थकं वचनं प
रिमाणाख्यायामिति सिद्धत्वात् १ उपरिमाणार्थं च २ उद्ग्राभनिग्राभौ च्छन्दसि स्रुगुद्यमननिपातनयो: ३ उद्ग्राभं च ८९

निशाभेवत्रहस्तदेवाग्रवीह्यपन् ३७ परिण्योर्नीणोर्द्यूताभ्रेषयोः कौ कृ उ णीञ् इत्येतस्मात्परिपूर्वात् । इण् इत्येतस्मान्नि
पूर्वाद्घञ् स्यात् क्रमेणैतेऽभ्रेषविषये परिणायेन शारान्हन्ति समन्तान्नयनेनेत्यर्थः एषोऽत्र न्यायः उचित
मित्यर्थः द्यूताभ्रेषयोः किम् परिणयो विवाहः न्ययो नाशः इत्यादि सूत्रषट्कं भाष्ये तेन व्याख्यातम् ३८ परावनु
यात्ययइणः कौ कृ उ इण् इत्येतस्मात्परिशब्दउपपदे घञ् स्यात् क्रमप्राप्तस्यानतिपाते गम्ये तवपर्य्यायः अन
पात्यये किम् कालस्य पर्य्ययः अतिपात इत्यर्थः ३९ व्युपयोः शेतेः पर्य्याये कौ कृ उ शीङ् इत्येतस्माद्व्युप
इत्येतत्पूर्वात्पर्य्यायोगम्ये घञ् स्यात् तव विशायः मम राजोपशायः पर्य्याये किम् विशयः संशयः उपशयः
समीपशयनम् ४० हस्तादाने चेरस्तेये कौ कृ उ चिञ् इत्येतस्मात्प्रत्यासत्तौ गम्यमानायां घञ् स्यात् चैर्ध्यैवैत्र
भवति पुष्पप्रचायः हस्तादाने किम् हस्तादाने किम् अस्यामोयष्ट्याप्रचयं करोति अस्तेये किम् । पुष्पप्रचयश्चौ
र्य्येण ४१ निवासचितिशरीरोपसमाधानेष्वादेश्च कः कौ कृ उ चिञ् इत्येतस्मान्निवासादिष्वर्थेषु घञ् स्यात् आदेश्चा
कारः स्यात् निवासो वासस्थानम् काशीनिकायः चीयतेऽसौ चितिः आकायमग्निं चिन्वीत पादादिशिरोऽन्तं शरीरम्
अनित्यकायः राशीकरणमुपसमाधानम् महान्गोमयनिकायः निवासादिषु किम् चयः ४२ संघे चानौत्तराधर्य्ये
कौ कृ अ चिञ् इत्येतस्मात्प्राणिसमूहेऽनौत्तराधर्य्यविषये गम्ये घञ् स्यात् आदेश्च ककारादेशः भिक्षुकनि
कायः अनौत्तराधर्य्ये किम् सूकरनिचयः संघे किम् ज्ञानकर्म्मसमुच्चयः ४३ कर्म्मव्यतिहारे णच् स्त्रियाम्
कौ कृ उ क्रियाविनिमये गम्यमाने स्त्रीलिङ्गे भावे धातोर्णच् स्यात् व्यावक्रोशी व्यावहासी चकारेण च स्त्रिया
मजिति विशेषणार्थः कर्म्मव्यतिहारे स्त्रीग्रहणं प्रतिपादकार्थम् १ पृथग्ग्रहणं बाधकनार्थम् २ व्यावचर्ची वद्य
तीत्यादिषु दोषः ३ सिद्धन्तप्रकृते स्त्रीग्रहणेणाग्रहणेणिज्ग्रहणेव ४ ४४ अभिविधौ भाव इनुण् कौ कृ उ कि

यायाः कार्त्स्न्येन सम्बन्धे गम्यमाने यातो भीवेष्वनेणस्यात् सोत्कुटिनम् संराविणम् सांराविणम् अभिविधौ किम् संरा
स.॰पा॰ ५० वः अभिविधौ भावग्रहणं नञ्स्वकेकादिनिवृत्त्यर्थम् १ अण्ग्रहणं वाधकवाधनार्थम् २ नतेऽस्य ठः ३ संक्रूदनम् ४५
आक्रोशेऽवन्योर्ग्रहः कौ क ३ ग्रह इत्येतस्मात् अव नि इत्येतयोरुपपदयोर्घञ्स्यात् शापे गम्यमाने अवग्राहस्ते
भूयात् अभिभव इत्यर्थः निग्राहस्ते भूयात् वध इत्यर्थः आक्रोशे किम् । अवग्रहः पदस्य निग्रहश्चोरस्य इत्यादि
९० सूत्रैकादशके भाष्येन व्याख्यातम् ४६ प्रे लिप्सायाम् कौ क ३ ग्रह इत्येतस्मात् प्रशब्द उपपदे घञ्स्यात् लाभेच्छा
यां गम्यमानायाम् पात्रप्रग्राहेण चरति भिक्षुः लिप्सायां किम् प्रग्रहो देवदत्तस्य ४७ परौ यज्ञे कौ क ३ ग्रह
इत्येतस्मात् परिशब्द उपपदे घञ्स्यात् प्रत्ययान्तवाच्यं यज्ञविषयं चेत् उत्तरपरिग्राहः स्फ्येन वेदिसंस्करणम् यज्ञे
किम् परिग्रहो देवदत्तस्य ४८ नौ वृ धान्ये कौ क ३ वृङ् वृञ् इत्येताभ्यां निशब्द उपपदे घञ्स्यात् धान्यविषये
नीवारा व्रीहयः धान्ये किम् निवरा कन्या ४९ उदि श्रयतियौतिपूद्रुवः कौ क ३ अजपोरपवादः उच्छब्द उपपदे
श्रयत्यादिभ्यो घञ्स्यात् श्रिञ उच्छ्रायः यु उद्यावः पूङ् पूञ् उत्पावः द्रु । उद्द्रावः कथं समुच्छ्रय इति वाहुलका
त् ५० विभाषाङि रुप्लुवोः कौ क ३ रु प्लु इत्येताभ्यामाङि उपपदे वा घञ्स्यात् आरावः आरवः आप्ला
वः आप्लवः ५१ अवे ग्रहो वर्षप्रतिबन्धे कौ क ३ ग्रह इत्येतस्मादवशब्द उपपदे घञ्वा स्यात् वर्षेण प्रतिबन्धेऽ
भिधेये अवग्राहः अवग्रहो देवस्य वर्षप्रतिबन्धे किम् अवग्रहः पदस्य ५२ प्रे वणिजाम् कौ क ३ ग्रह इत्येतस्मा
त्प्रशब्द उपपदे वा घञ्स्यात् तुलासूत्रं चेत्प्रत्ययार्थः । तुलाप्रग्राहेण चरति तुलाप्रग्रहेण वणिजां किम् प्रग्र
हो देवदत्तस्य ५३ रश्मौ च कौ क ३ ग्रह इत्येतस्मात्प्रशब्द उपपदे घञ्वा स्यात् रश्मौ वाच्ये प्रग्राहः प्रग्रहः र
थादियुक्तानामश्वादीनां संयमनरज्जुरित्यर्थः ५४ वृणोतेराच्छादने कौ क ३ वृञ् इत्येतस्मात्प्रशब्द उपपदे घञ्ः ५०

ज्ञवास्मात् प्रैसयान्नेनाच्छादनविषयेऽभिधेये प्रवारः प्रवरः प्रश्नाच्छादने किम्। प्रवरो गौ ५५ परौ भुवोऽवज्ञाने
कौ हृ ३ म्र इत्येतस्मात्परिशब्दउपपदे तिरस्कारे गम्यमाने वा घञ्स्यात् परिभावः परिभवः अवज्ञाने किम् परि
भवः ५६ एरच् कौ हृ ३ घञोऽपवादः इवर्णान्ताद्धातोर्भावे अकर्तरि च कारके संज्ञाविषयेऽच्स्यात् चयः जयः
त्वयः वकारो विशेषणार्थः क्वाजविज्ञकाणामिति अज्विधौ भयस्योपसंख्यानम् १ भयादीनामिति वक्तव्यम् इति
भाष्यकृतः भयम् वर्षम् भयादीनामुपसंख्यानेनपुंसके क्तादिनिवृत्त्यर्थम् १ कौ हृ ३ कल्पादिभ्यः प्रतिषेधः २
कल्पः अर्घः मन्त्रः जवसवौ छन्दसि वक्तव्यौ २ कौ वै ग्रा त इ बौत्तमे जवः अपमेपज्वोदनः सवः ५७ ऋदोरप्
कौ हृ ३ ऋवर्णान्तेभ्य उवर्णान्तेभ्यश्च धातुभ्योऽप्प्रत्ययः स्यात् कृ करः गृ गरः शृ शरः पृ परः यु यवः लुञ्
लवः दकारस्तकारो वा मुखसुखार्थः भाष्ये तु नेदं व्याख्यातम् ५८ ग्रहवृदृनिश्चिगमश्च कौ हृ ३ घञोऽपवादः
ग्रहादिभ्यो धातुभ्योऽप् स्यात् ग्रह ग्रहः वृङ् वृञ् वरः दृङ् दरः विज्ञनिश्चिवेः निश्चयः अवाहुपासिद्धेत्रिश्चिग्रह
णे कृत्स्वरेण मध्योदात्तार्थम् गम्लृ गमः अविधौ निश्चिग्रहणमनर्थकं स्तेयपस्यघाज्विधौ प्रतिषेधात् १ अस्तेयार्थमि
तिवक्तव्यानिष्टत्वात् २ वशिरण्योरुपसंख्यानम् २ कौ हृ ३ वश। वशने। वशः रण रणन्त्यस्मिन्निति रणः घञर्थेक
विधाने स्थालापाद्यर्थमिति निवृत्त्यर्थम् ४ ष्ठा। प्रतिष्ठन्तेऽस्मिन्धान्यानीति प्रस्थः स्ना प्रस्नान्त्यस्मिन्निति प्रस्नः पा प्रपि
बन्त्यस्यामिति प्रपा व्यध आविध्यन्त्यनेनेति आविधः हन आविघ्नन्ति मनोऽसिश्वास्मिन्निति विघ्नः युध आयुध्यन्तेऽनेनेति
आयुधम्। घञर्थे कविधानम् १ कौ हृ ३ ५९ उपसर्गेऽदः कौ। हृ। ३ अद इत्येतस्मादुपसर्गउपपदेऽप्स्यात् प्रघसः। विघसः
उपसर्गे किम् घासः इत्यादिवत्त्रिंशन्ति सूत्राणि भाष्ये तु न व्याख्यातानि ६० नौ ण च कौ हृ ३ अद इत्येतस्मान्निशब्द उपपदे ण
प्रत्ययः स्यात् चकारादप् न्यादः निघसः ६१ व्यधजपोरनुपसर्गे कौ हृ ३ व्यध जप इत्येताभ्यामनुपसर्गाभ्यामप्स्यात् व्यध

91

यः जपः अनुपसर्गे किम् आजापः उपजापः ६२ स्वनहसोर्वा कौ कृ उ स्वन हसे इत्येताभ्यामनुपसर्गाभ्यां वा अप् स्यात् स्व
नः स्वानः हसः हासः अनुपसर्गे इत्येव प्रस्वानः प्रहासः ६३ यमः समुपनिविषु च कौ कृ उ यम इत्येतस्माद्धातोः सम्
उप नि वि इत्येतेषूपपदेषु अनुपसर्गे च वा अप् स्यात् संयमः संयामः उपयमः उपयामः नियमः नियमः विर्यमः विया
मः वियामः अनुपसर्गे यमः यामः ६४ नौ गदनदपठस्वनः कौ कृ उ गद णद पठ स्वन इत्येतेभ्यो निशब्द उप
पदे वा अप् स्यात् निगदः निगादः निनदः निनादः निपठः निपाठः निस्वनः निस्वानः ६५ क्वणो वीणायां च कौ कृ
उ क्वण इत्येतस्मान्निपूर्वादनुपसर्गाद्वीणाविषयाच्च वा अप् स्यात् निक्वणः निक्वाणः अनुपसर्गात् क्वणः क्वाणः वी
णाग्रहणं सोपसर्गार्थम् कल्याणप्रक्वणा वीणा एतेषु किम् प्रक्वाणः ६६ नित्यं पणः परिमाणे कौ कृ अ पण इत्ये
तस्मात् परिमाणे गम्ये नित्यमप् स्यात् मूलपणः शाकपणः विक्रयाय मूलकादीनां परिमितो मुष्टिर्बन्धोऽभिधीयते
परिमाणे किम् पाणः ६७ मदोऽनुपसर्गे कौ कृ उ मदे इत्येतस्मादनुपसर्गादप् स्यात् मदः धनमदः अनुपसर्गे किम्
उन्मादः ६८ प्रमदसंमदौ हर्षे कौ कृ उ प्रमद संमद इत्येतौ निपात्येते हर्षे वाच्ये प्रमदः संमदः हर्षे किम् प्रमादः सं
मादः ६९ समुदोरजः पशुषु कौ कृ उ अज इत्येतस्मात् सम् उद इत्येवंपूर्वात् पशुविषयके धात्वर्थेऽप् स्यात् संपूर्वोऽ
जिः समूहे समजः पशूनां समूहः उत्पूर्वोऽजिः प्रेरणे उदजः पशूनां प्रेरणम् पशुषु किम् समाजो ब्राह्मणानाम्। उदाजः
क्षत्रियाणाम् ७० अक्षेषु ग्लहः कौ कृ उ ग्लह इत्येतन्निपात्यते देवनविषये पणरूपेण ग्राह्यं वस्तु इति ग्रह अक्षस्य
ग्लहः अक्षेषु किम् पादस्य ग्रहः ७१ प्रजने सर्तेः कौ कृ उ सृ इत्येतस्मादप् स्यात् प्रथमगर्भग्रहणविषये गवामुपसरः
स्त्रीगवीषु वृषगवानां गर्भाधानाय प्रथममागमनमित्यर्थः ७२ ह्वः संप्रसारणं च न्यभ्युपविषु कौ कृ उ ह्वेञ् इत्येतस्य नि अ
भि। उप। वि इत्येवंपूर्वस्य संप्रसारणमप्प्रत्ययश्च स्यात् निहवः अभिहवः उपहवः विहवः। एषु किम्। प्रह्वायः। आहोतेर ९१

पिसिद्धे निह्नव इत्यादि सूत्रेण तपजो निहत्यर्थम् ७३ आ ङि युद्धे कौ कृ उ ह्वेञ् इत्येतस्य आङि उपपदे संप्रसारणमप् च
स्यात् युद्धेऽभिधेये आहूयन्तेऽस्मिन्निति आहवः युद्धे किम् आह्वायः ७४ निपानमाहावः कौ कृ उ आहाव इत्येतन्नि
पात्यते निपानेऽभिधेये आह्वायम् निपाने कूपादिसमीपे यन्नीतं जलयानार्थम् उदकाधारः ह्वेञ् आहावः संप्रसारणमप् प्रत्यय
श्च निपातनाद्भवति निपाने किम् आह्वायः ७५ भावेऽनुपसर्गस्य कौ कृ उ ह्वेञ् इत्येतस्य अनुपसर्गस्य संप्रसारणं
भावेऽप् च स्यात् हवः अनुपसर्गस्य किम् आह्वायः ७६ हनश्च वधः कौ कृ उ हन इत्येतस्य अनुपसर्गस्य अन्ते दा
तो वधादेशो भावेऽप् च स्यात् वधश्चौराणाम् चकाराद् यजपि घातः भाव इत्येव घाताः अनुपसर्ग इत्येव आघातः ७७
मूर्तौ घनः कौ कृ उ घन इत्येतन्निपात्यते काठिन्ये वाच्ये हन दधिघनः घनादेशोऽप् च निपातनाद्भवति घनं दधि इति न
धर्म्मशब्देनयम्मीभण्यते ७८ अन्तर्घनो देशे कौ कृ उ अन्तर्घन इत्येतन्निपात्यते देशे वाच्ये हनाज्जन्तर्घनः घनादेशोऽ
प् च निपातनात् । वाहीकग्रामविशेषस्य संज्ञेयम् देशे किम् अ॰॰घातः ७९ अगारैकदेशे प्रघणः प्रघाणश्च कौ कृ उ
प्रघण प्रघाण इत्येतौ निपात्येते गृहावयवे वाच्ये हा॰॰मा॰॰ पाद्भिः पादैर्हन्यते इति प्रघणः प्रघाणः भावेऽप् पाक्षिकी वृद्धिः
द्वारदेशे द्वौ प्रकोष्ठौ तत्र बाह्यप्रकोष्ठस्यैतन्निपातनम् आगारैकदेशे किम् प्रघातोऽन्यः ८० उद्घनोऽत्याधानम् कौ कृ
उ उद्घन इत्येतन्निपात्यते उपरिस्थापनेऽभिधेये हन उद्घनः अधिकरणेऽप् यस्मिन् काष्ठेऽन्यानि काष्ठानि संस्थाप्य तक्ष्यन्ते
अत्याधाने किम् उद्घातोऽन्यः ८१ अपघनोऽङ्गम् कौ कृ उ अपघन इत्येतन्निपात्यते पाणौ पादे च वाच्ये अपघन करणेऽ
प् घनादेशश्च अङ्गे किम् अपघातोऽन्यः ८२ करणेऽयोविद्रुषु कौ कृ उ हन इत्येतस्मात् अयस् वि द्रु इत्येतेषूप
पदेषु करणेऽप् स्यात् घनादेशश्च अयोघनः विघनः द्रुघनः संज्ञायां तु पूर्वपदात् संज्ञायामिति णत्वम् । द्रुघणः कुठा
रविशेषः ८३ स्तम्बे क च कौ कृ उ हन इत्येतस्मात् स्तम्बशब्द उपपदे करणे कप्रत्ययः स्यात् चकाराद् अप् तत्संनि

सू॰प॰
९२

योगेनयनादेशश्च स्तम्बघ्नः अपित स्तम्बघनः करणइत्येव स्तम्बघातः ८४ परौघः कौ कृ ३ हन इत्येतस्मात्प
रिघादुपपदे करणे घस्यात् तस्मिन्नियोगेनघशब्दश्चादेशः परिहन्यतेऽनेनइ.... परिघः इत्यादिसूत्रषट्कं भा॰
ष्येननव्याख्यानम् ८५ उपघ्नआश्रये कौ कृ ३ उपघ्न इत्येतन्निपात्यते सामीप्ये वाच्ये हन पर्वतेनोपहन्यतइन्यतइति।
पर्वतोपघ्नः उपधालोपोऽत्र निपातनात् आश्रयेकिम् उपघातोऽन्यः ८६ सङ्घोद्घौगणप्रशंसयोः कौ कृ ३ सङ्घ।उद्घ
इत्येतौनिपात्येते क्रमेण गणप्रशंसयोरर्थयोः हन सङ्घः समूहः उद्घः प्रशंसा टिलोपोऽघप्रत्ययोघत्वंच निपातनात् ग
णप्रशंसयोः किम् सङ्घातः उद्घः प्रशंसा टिलोपोऽघप्रत्ययोघत्वंच निपातनात् गणप्रशंसयोः किम् सङ्घातः उद्घा
तः ८७ निघोनिमितम् कौ कृ ३ निघ इत्येतन्निपात्यते समन्तान्मितेवेऽभ्यते निर्विशेषेण हन्यन्ते ज्ञायन्तेइति
निघावृक्षाः समारोहपरिणाहाइत्यर्थः निमितेकिम् निघातः ८८ ड्वितःक्त्रिः कौ कृ ३ ड्वित् यस्य तस्माद्धातोः
क्त्रिप्रत्ययः स्यात् भावेऽकर्तरि च कारके त्रेर्मम्नित्यमिति केवलो न प्रयुज्यते डुपचष् पाकेन निर्वृत्तम् पक्त्रिमम् डुव
प् उप्त्रिमम् डुकृञ् कृत्रिमम् ८९ ट्वितोऽथुच् कौ कृ ३ टु इत् यस्य तस्माद्धातोरथुच्प्रत्ययः स्यात् भावेऽकर्तरि च कार
के टुवेपृ वेपथुः टुओश्वि श्वयथुः टुक्षु क्षवथुः टुदु दवथुः ९० यजयाचयतविच्छप्रच्छरक्षोनङ् कौ कृ ३ यजा
टुयाच यती विच्छ प्रच्छ रक्ष इत्येतेभ्यो नङ्प्रत्ययः स्यात् भावेऽकर्तरि च कारके यज्ञः याञ्चा यत्नः विश्नः प्रश्नः
रक्ष्णः यजादिभ्यो नस्य ङित्त्वे संप्रसारणप्रतिषेधः १ याचि ङित्त्वे गुणप्रतिषेधः २ निपातनादेतत्सिद्धम् किं निपातनम्
प्रश्नेचासन्नकालइति इतिभाष्यम् ९१ स्वपोनन् कौ कृ ३ ञिष्वप् इत्येतस्मान्नन्प्रत्ययः स्यात् भावेऽकर्तरि च कारके
स्वप्नः नकारः स्वरार्थः इत्यादिसूत्रत्रयं भाष्येननव्याख्यानम् ९२ उपसर्गेघोः किः कौ कृ ३ उपसर्गउपपदे घुसंज्ञकेभ्यः
किप्रत्ययः स्यात् भावेऽकर्तरि च कारके प्रधिः विधिः निधिः कित्त्वादाकारलोपः ९३ कर्मण्यधिकरणे च कौ कृ ३ क ९२

92

म्नाणोउपपदेषुसंज्ञकेभ्यो ऽधिकरणे किः स्यात् जलानि धीयन्ते ऽस्मिन्निति जलधिः शरधिः ९४ स्त्रियांक्तिन् कौ कृ उ
स्त्रीलिङ्गे भावादौ धातोः क्तिन् प्रत्ययः स्यात् व्रजजयामपवादः कृतिः मतिः स्त्रियांक्तिन्नावादिभ्यश्च १ आप्तिः राद्धिः दी
प्तिः स्रस्तिः ध्वस्तिः निष्ठायां वा सेटो ऽकोरवचनात् सिद्धम् २ निष्ठायां सेट इति वक्तव्यम् १ कौ कृ उ ९५ स्थागापापचो
भावे कौ कृ उ ष्ठा गा पा डुपचष् इत्येतेभ्यः स्त्रीलिङ्गे भावे क्तिन् स्यात् अङो ऽपवादः प्रस्थिति उपास्थितिः संगीतिः
उपगीतिः संपीतिः निपीतिः पक्तिः व्यवस्थायामिति निर्देशादङपि अवस्था संस्था स्थादिभ्यः सर्वापवाद — स —१
सिद्धत्वाड्डियाने स्यादि प्रतिषिध्यात् २ श्रुयजीषिस्तुभ्यः करणे ३ कौ कृ उ श्रु श्रूयते ऽनयेति श्रुतिः यज इत्येते नया इ
ष्टिः इषु इष्टिः ष्टुञ् स्तुतिः श्रुयजिस्तुभ्यः करणे १ इति काशिका ग्लाम्लाज्याहाभ्यो निः ४ ग्लै ग्लानिः म्लै म्लानिः
ज्या ज्यानिः ओहाक् ओहाङ् हानि ९६ मन्त्रेवृषेषपचमनविदभूवीराउदात्तः कौ वै ष त वृष इषु डुपचष् मन विद
भू वी रा इत्येतेभ्यः क्तिन् स्यान्मन्त्रविषये स चोदात्तः वृष्टिः इष्टिः पक्तिः मननमन्नतिद्वयमपि दृश्यते मतिः वित्तिः रातिः क्ति
न् सिद्ध एव उदात्तत्वमात्रं विधीयते इत्यादि सूत्रद्वयं भाष्ये न व्याख्यातम् ९७ ऊतियूतिजूतिसातिहेतिकीर्तयश्च कौ कृ
उ ऊति यूति जूति साति हेति कीर्ति इत्येते स्त्रियां भावे क्तिन्नन्ता उदात्ता निपात्यन्ते मन्त्रविषये अव ऊतिः ज्वर
त्वरेत्यादिना ऊठ् यु यूतिः जु इति सौत्रः जूतिः निपातनाद्द्वयोरपि दीर्घः षो सातिः इत्वाभावो निपातनात् सनोते
र्वा जननस्यात्वम् हि हेतिः हन इत्यस्य वा नकारस्य इत्वे निपात्यते कृत कीर्तिः ९८ व्रजयजोर्भावे क्यप् कौ कृ उ
व्रज यज इत्येताभ्यां स्त्रीलिङ्गे भावे क्यप् स्यात् स चोदात्त व्रज्या इज्या पितृमनुष्यव्रतगर्यम् क्यब्विधिरधिकरणे च १ सम
जन्तित स्यामिति समज्या ९९ संज्ञायां समजनिषदनिपतमनविदषुञ्शीङ्भृञिणः कौ कृ उ समज इत्येवमादिभ्यः
स्त्रीलिङ्गे भावे ऽकर्तरि च कारके क्यप् स्यात् संज्ञायां स चोदात्तः अज समजन्त्यस्यामिति समज्या सभा षद्लृ निषीदन्ति

स्त्री·प·
९३
93

अस्यामिति निषद्याऽऽपणः पत्लृ निपत्यापिच्छिलाभूमिः मन मन्यन्तेऽनयेति मन्यागलपार्श्वशिरा विद विदन्त्यऽ
नयाऽस्यामितिवा विद्या षुञ् अभिषूयते सोमोऽस्यामिति सुत्याऽभिषववदिनम् शीङ् शेतेऽस्यामिति शय्याखट्वा
दिः डुभृञ् भृत्याजीविका भावेकाप् इण् ईयतेऽनयेति इत्याशिबिका भाष्येतुनेदंव्याख्यानम् १०० कृञः श च कौ
कृ ३ डुकृञ् इत्येतस्मात्स्त्रीलिङ्गे भावे शप्रत्ययः स्यात् चकारात्क्यप् क्रिया क्यपि तु कृत्या कृञः शं चेति वा वचनम् १ कृ
तिः १०१ इच्छा कौ कृ ३ इच्छा इत्येतन्निपात्यते स्त्रियाम् इषु इच्छायां भावे शप्रत्ययः यगभावो निपातनात् परिचर्या
परिसर्य्यामृगयाटाट्यानामुपसंख्यानम् १ कौ कृ ३ चर परिचर्यापूजा सृ परिसर्य्या परिसरणम् मृग मृगया अट
अटाट्या जागर्तेरकारो वा २ कौ कृ ३ जागृ जागरा पक्षे शः जागर्य्या १०२ अ प्रत्ययात् कौ कृ ३ प्रत्ययान्तेभ्यो धातु
भ्यः स्त्रियामकारप्रत्ययः स्यात् कर्तुमिच्छा चिकीर्षा जिहीर्षा पुत्रीया पुत्रकाम्या लोलूया कण्डूया इत्यादिसूत्रद्वयं
भाष्येतुनव्याख्यानम् १०३ गुरोश्च हलः कौ कृ ३ गुरुमान्यो धातुर्हलन्तस्तस्मात्स्त्रियामकारप्रत्ययः स्यात् ईहा ऊहा।
कुण्डा हुण्डा गुरोः किम् भक्तिः हलः किम् नीतिः १०४ षिद्भिदादिभ्योऽङ् कौ कृ ३ षकारइत्यस्यधातोस्तेभ्यो भिदा
दिभ्यश्च अङ् प्रत्ययः स्यात् स्त्रियाम् त्रपूष्। जृष्। जरा ऋद्दृशोऽङि गुणः भिदादिभ्यः भिदा छिदा भिदा छिदा वि
दा क्षिपा गुहा श्रद्धा मेधा गोधा आरा हारा कारा बन्धने क्षिपा तारा ज्योतिषि धारा रेखा चूडा पीडा वपा वसा
कारा बन्धने क्षिपा तारा ज्योतिषि धारा रेखा चूडा पीडा वपा वसा मृजा कृपा इति भिदादिः भिदा विदारणे इति
वक्तव्यम् १ भित्तिरन्या छिदा द्वैधीकरणे इति वक्तव्यम् २ छित्तिरन्या आरा शस्त्र्यामिति वक्तव्यम् ३ आर्तिरन्या धारा
प्रपात इति वक्तव्यम् ४ धृतिरन्या गुहा गिर्योषध्योरिति वक्तव्यम् ५ गूढिरन्या क्रपेः संप्रसारणं च १ कौ कृ ३ कृपा
१०५ चिन्तिपूजिकथिकुम्बिचर्चश्च कौ कृ ३ चिति पूज कथ कुबि चर्च इत्येतेभ्यो ण्यन्तेभ्यः स्त्रियामङ् स्याद् चिन्ता ९३

पूजा कथा कुम्बा चर्चा इत्यादिसूत्रद्वयं भाष्येतन्न व्याख्यातम् १०८ आतश्चोपसर्गे कौ कृ ३ आकारान्तेभ्यो धातुभ्य उपस
र्गे उपपदे स्त्रियामङ् स्यात् उपदा उपधा अन्तर्द्धा १०७ ण्यासश्रन्थो युच् कौ कृ ३ णि तन्तेभ्यः आस श्रन्थ इत्येताभ्यां च युच्
स्यात् अकारस्यापवादः णिकारणा हारणा आस आसना श्रन्थ विमोचने क्र्यादिः श्रन्थना सन्दर्भार्थस्य चुरादेस्तु ण्य
न्तत्वादेव सिद्धम् युच्प्रकरणे घट्टिवन्दिविदिभ्य उपसंख्यानम् २ घट्ट भ्वादिः नतु चुरादिः घट्टना वदि वन्दना विद् वेदना
घट्टिवन्दिविदिभ्यश्चेति वाच्यम् १ कौ कृ ३ इषेरनिच्छार्थस्य २ कौ कृ ३ इष दिवादिः क्र्यादिश्च अन्वेषणा परेष्टा ३ कौ
कृ ३ इष अन्यापरीष्टिचर् अन्यापर्य्येषणा च वर १०८ रोगाख्यायां ण्वुल् बहुलम् कौ कृ ३ इष अन्यापरीष्टिचरी धातोः
स्त्रियां ण्वुल्प्रत्ययः स्यात् रोगसंज्ञायाम् क्तिन्नादीनामपवादः प्रच्छर्दिका प्रवाहिका बहुलग्रहणात् क्वचिन्न भवति शि
रोऽर्तिः धात्वार्थनिर्देशे ण्वुल् १ कौ कृ ३ आसिका शायिका इक्श्तिपौ धातुनिर्देशे २ कौ कृ ३ पचेर्ब्रूहि पचतेर्ब्रूहि व
र्णात्कारः ३ कौ कृ ३ अकारः इकारः रादिफः ४ कौ कृ ३ रेफः मत्वर्थाच्छः ५ कौ कृ ३ मत्वर्थीयः इणजादिभ्य ६ कौ कृ
३ अज आजिः अत आतिः अद आदिः इञ्वपादिभ्यः ७ कौ कृ ३ डुवप् वापिः वस वासिः वद वादिः इक्कृष्यादिभ्यः ८ कौ
कृ ३ कृष कृषिः कृ किरिः गृ गिरिः सम्पदादिभ्यः क्विप् ९ कौ कृ ३ संपत् विपत् संपद् विपद् आपद् प्रतिपद् प्रतिपद्
प्रतिपद्भ्य एते संपदादयः १०९ संज्ञायाम् कौ कृ ३ धातोर्ण्वुल् स्यात्संज्ञायाम् उद्दालकपुष्पाणि भज्यन्तेऽस्यामिति उद्दा
लकपुष्पभञ्जिका मालभञ्जिका इत्यादिसूत्रवार्त्तिकं भाष्ये तन्न व्याख्यातम् ११० विभाषाख्यानपरिप्रश्नयोरिञ्च कौ कृ ३ परि
प्रश्ने आख्याने च गम्यमाने धातोरिञ्प्रत्ययः स्यात् चकाराण्ण्वुल् । कां कारिमकार्षीः सर्व्वां कारिमकार्षम् कां कारिकामकार्षीः
सर्व्वां कारिकामकार्षम् विभाषाग्रहणाद्यथाप्राप्तं प्रत्यया भवन्ति कां क्रियाम् कां कृत्याम् कां कृतिं वा अकार्षीः सर्व्वां क्रियां
सर्व्वां कृत्याम् सर्व्वां कृतिमकार्षम् एवं कां याजिकां कां पक्षिमित्यादि १११ पर्य्यायार्हर्णोत्पत्तिषु ण्वुच् कौ कृ ३ पर्य्यायादिषु

र्थेषु स्त्रियां धातोर्ण्वुच् प्रत्ययो वा स्यात् क्तिन्नादीनामपवादः पर्य्यायः परिपाटी क्रमः भवतश्चासिका भवतः शायिका अर्हो
सू॰प॰ ५४ योग्यता अर्हसि भवानिक्षुभक्षिकाम् ऋणे ऽत्पत्तस्य धार्य्यते इक्षुभक्षिकां मे धारयसि उत्पत्तिर्जन्म इक्षुभक्षिका उदपादि ११२
आक्रोशे नञ्यनिः कौ कृ उ नञि उपपदे आक्रोशे गम्यमाने धातोरनिप्रत्ययः स्यात् स्त्रियाम् अजीवनिस्ते शठ भूयात् अप्रयाणिः
९५ आक्रोशे किम् अकृतिस्तस्य शठस्य नञि किम् मृतिः ११३ कृत्यल्युटो बहुलम् कौ कृ उ भावे ऽकर्त्तरि च कारके वियामिति व
निवृत्तम् कृत्यसंज्ञकाः प्रत्यया ल्युट् च यत्रार्थे उक्तास्ततो ऽन्यत्रापि भवन्ति भावकर्म्मणोः कृत्या उक्ताः कारकान्तरे ऽपि भवन्ति
स्नात्यनेन स्नानीयं चूर्णम् दीयते ऽस्मै दानीयो विप्रः ल्युट् करणाधिकरणभावेष्वो ऽन्यत्रापि भवति राजभुज्यन्ते राज
भोजनाः शालयः बहुलग्रहणाद् अन्ये ऽपि कृतो ऽभिधेयं यथाभिधानं पादहारकः गलेचोपकः कृतो ल्युटो बहुलमिति वा
चकारं पादहारकार्थम् ९ स्थो ऽग्नीनाधास्यमानेन स्थः सोमेन यक्ष्यमाणेन अनद्यतने ऽपि ल्लृट् भवति ११४ नपुंसके भावे
क्तः कौ कृ उ नपुंसकत्वविशिष्टे भावे धातोः क्तप्रत्ययः स्यात् हसितम् जल्पितं छात्रस्य इत्यादिसूत्रपञ्चकं भाष्ये न व्याख्यातम् ११५
ल्युट् च कौ कृ उ नपुंसकत्वविशिष्टे भावे धातोर्ल्युट्प्रत्ययः स्यात् हसनम् जल्पनं छात्रस्य ११६ कर्म्मणि च येन संस्पर्शात् क
र्त्तुः शरीरसुखम् कौ कृ येन कर्म्मणा स्पृश्यमानस्य कर्त्तुः शरीरसुखमुत्पद्यते तस्मिन् कर्म्मणि उपपदे नपुंसके भावे धातो
र्ल्युट् स्यात् पूर्वेण सिद्धे नित्यसमासार्थं सूत्रम् पयःपानं सुखम् ओदनभोजनं सुखम् कर्म्मणि किम् तूलिकाया उत्थानं
सुखम् संस्पर्शात् किम् अग्निकुण्डस्योपासनं सुखम् कर्त्तुः किम् गुरोः स्नापनं सुखम् इह गुरुः कर्म्म न तु कर्त्ता शरीरग्र
हणं किम् पुत्रस्य परिष्वजनं सुखम् मानसी प्रीतिरत्र सुखं किम् कण्टकानां मर्दनं दुःखम् ११७ करणाधिकरणयोश्च
कौ कृ उ धातोः करणे ऽधिकरणे च ल्युट् स्यात् इध्मप्रव्रश्चनः पलाशशातनः अधिकरणे गोदोहनी स्थाली ११८ पुंसि
संज्ञायां घः प्रायेण कौ कृ उ पुंसि घो करणाधिकरणे तयोर्वाच्ययोर्धातोर्घप्रत्ययः स्यात् समुदायेन चेत् संज्ञा गम्यते दन्ता ६४

छाद्यते ऽनेन दन्तच्छदः आकुर्वन्त्यस्मिन्न् आकरः पुंसि किम् प्रसाधनम् संज्ञायां किम् प्रहरणः चकारश्छादेर्घे ऽद्व्युप
सर्गस्येति विशेषणार्थः प्रायग्रहणमकार्त्स्न्यार्थम् ११९ गोचरसंचरवहव्रजव्यजापणनिगमाश्च कौ कृ ३ गोचर संचर वह व्र
ज व्यज आपण निगम इत्येते घप्रत्ययान्ता निपात्यन्ते करणाधिकरणयोः संज्ञायाम् चर गावश्चरन्त्यस्मिन्निति गोचरो देशः
चर संचरन्त्यनेनेति संचरः वह वहः व्रज व्रजः व्यज व्यजः पण आपणः मन्त्र निगमः चकारो ऽनुक्तसमुच्चयार्थः कषः
निकषः गोचरादीनामग्रहणं प्रायवचनाद्यथा कषो निकष इति इति भाष्यम् १२० अवे तॄस्त्रोर्घञ् कौ कृ ३ तॄ स्तॄञ् इत्येता
भ्यामवशब्द उपपदे करणाधिकरणयोः संज्ञायां घञ्प्रत्ययः स्यात् अवतारः अवस्तारः प्रायग्रहणानुवृत्तेरसंज्ञायामपि
भवति अवतारो नद्याः षकारः ङीषर्थः जकारो वृद्धिस्वरार्थः भाष्ये तु नेदं व्याख्यातम् १२१ हलश्च कौ कृ ३ हलन्ता
द्धातोर्घञ् भवति करणाधिकरणयोरर्थयोः पुंसि संज्ञायाम् देवः आपामार्गः घञ्विधाववहाराधारावायानामुपसंख्या
नम् १ कौ कृ ३ हृञ् अवह्रियन्ते ऽस्मिन्निति अवहारः धृङ् धृञ् आधारः वि आवायः अध्यायपक्षे आधारावायशब्दौ
वार्तिके दर्शनादभियुक्तैः पठितौ इति कैयट १२२ अध्यायन्यायोद्यावसंहाराधारावायाश्च कौ कृ ३ अध्याय न्याय उद्याव
संहार आधार आवाय इत्येते घञन्ता निपात्यन्ते इङ् अधीयते ऽस्मिन्निति अध्यायः णीञ् नीयन्ते ऽनेनेति न्यायः यु
उद्यवन्त्यनेनेति उद्यावः हृञ् संह्रियते ऽनेनेति संहारः धृङ् धृञ् आध्रियन्ते ऽस्मिन्निति आधारः वि आवयन्त्यस्मिन्निति
आवायः चकारो ऽनुक्तसमुच्चयार्थः अवहारः भाष्ये तु नेदं व्याख्यातम् १२३ उदङ्को ऽनुदके कौ कृ ३ उदङ्क इत्येतद् घञ
न्तं निपात्यते ऽनुदकविषये धात्वर्थे अञ्चुरुत्पूर्वः तैलोदङ्कः अनुदके किम् उदकोदञ्चनः उदङ्को ऽनुदकग्रहणमनर्थकं
च प्रायवचनात् यथा गोदोहनः प्रसाधन इति इति भाष्यम् १२४ जालमानायः कौ कृ ३ आनाय इति निपात्यते जा
ले घञ् भवति णीञ् अनायामत्स्यानाम् करणे घञ् जाले किम् आनयः भाष्ये तु नेदं व्याख्यातम् १२५ खनो घच कौ कृ

सू.प.
९५
95

उ ण्वुन् इत्येतस्मात्करणे ण्वुप्रत्ययो भवति वकारादिज्ञ आवुनः आवोनः डोवक्रयः १ आवे डरोवक्रयः २ आवेरः इको
वक्रयः ३ आवेनिकः इकवकोवक्रोय ः ४ आवेनिकवकः ण्वुनेडउदइकरइकवकावाच्याः १ कौ क्र उ १२६ ईषद्दुः सु
षु कृच्छ्राकृच्छ्रार्थेषु खल् कौ क्र उ ईषत् दुः सु इत्येतेषु सुखेदुः खार्थेषूपपदेषु धातोः खल्प्रत्ययः स्यात् ईषत्करः क
टेभवता दुष्करः ईषद्दुः सुषु किम् कृच्छ्रेणकार्यः कृच्छ्राकृच्छ्रार्थेषु किम् ईषत्कार्यः खकारउक्तरत्रमुमर्थः लकारः स्वरा
र्थः अजभ्यांखीखलनाः १ स्त्रियाः खलनौ विप्रतिषेधेन २ १२७ कर्तृकर्मणोश्च भूकृञोः कौ क्र उ भू डुकृञ् इत्येताभ्यां यथा
यासंभवं कर्तृकर्मणोरुपपदयोरीषदादिषु चोपपदेषु खल् स्यात् अनाढ्येन भवता ईषदाढ्येन शक्यं सवितुम् ईषदाढ्यो
भवे भवता दराढ्यंभवम् स्वाढ्यंभवम् ईषदाढ्यंकरो देवदत्तो भवता दुराढ्यंकरः स्वाढ्यंकरः खल् कर्तृकर्मणोश्चार्थ
योः २ इह न भवति आढ्येन सभूयते कर्तृकर्मणोश्चार्थयोरिति वाच्यम् १ कौ क्र उ कर्तृकर्मग्रहणं चोपपदसंज्ञार्थम् २
१२८ आतो युच् कौ क्र उ आकारान्ताद्धातोरीषदादिषूपपदेषु युच्प्रत्ययः स्यात् या ईषत्पानः सोमो भवता दुष्पानः सुपा
नः इत्यादिसूत्रद्वयं भाष्येण न व्याख्यातम् १२९ छन्दसि गत्यर्थेभ्यः कौ वे अ त गत्यर्थेभ्यो धातुभ्यो वेदे ईषदादिषु युच् स्यात् वह्न सूप
सदनमन्तरिक्षम् १२ अन्येभ्योऽपि दृश्यते कौ वे आ त गत्यर्थादन्येभ्योऽपि धातुभ्यो वेदे युच् स्यात् विद सुवेदनामकृणो
ब्रह्मणेगाम् डाह सुदोहनामकृणोद्ब्रह्मणेगाम् भाषायां शासियुधिदृशिधृषिमृषिभ्यो युच् १ शास्नु दुःशासनः युधाडुर्यो धनः
दृशिर दुर्दर्शनः जिधृषा दुर्धर्षणः मृषेश्चेति वक्तव्यम् २ मृष दुर्मर्षणः भाषायां शासियुधिदृशिधृषिमृषिभ्यो युज्वाच्यः १
कौ क्र उ इति १२१ सूत्राणि भाष्ये ३३ १ व्याख्यातानि १३१ वर्तमानसामीप्ये वर्तमानवद्वा कौ ति ला वर्तमानसमीपे भूते भ
विष्यति च वर्तमानकालोक्ताः प्रत्यया वा भवन्ति कदा आगतोऽसि अयमागच्छामि भूते लट् कदा गमिष्यसि एष गच्छामि
भविष्यति लट् वर्तमानसामीप्ये वर्तमानवद्वचनं शास्त्रार्थम् १२३२ आशंसायां भूतवच्च कौ ति ल अप्राप्तप्राप्तीच्छा ९५

यो भविष्यति काले भूतवद् वर्तमानवच्च प्रत्यया वा भवन्ति देवश्चेद् वर्षीत् वर्षति वर्षिष्यति तर्हि धान्यमवाप्स्म वपामः वप्स्या
मः आशंसायां किम् आगमिष्यति आशंसायां भूतवदतिदेशे लङ्लिटोः प्रतिषेधः १ १३३ क्षिप्रवचने लृट् कौ ति ल पूर्वस्या
पवादः क्षिप्रवाचके उपपदे आशंसायां लृट् स्यात् देवश्चेत् क्षिप्रं वर्षिष्यति शीघ्रं वप्स्यामः आशु वप्स्यामः त्वरितं वप्स्यामः नेति व
क्तव्ये लृङ्ग्रहणं तु लेटोऽपि विषये यथा स्यात् स्मः शीघ्रं वप्स्यामः अनिष्पन्ने निष्पन्नशब्दः शीघ्रोऽनिष्पन्नत्वात् १ अस्य पर्याये नोभ
वत्सर्थे सर्वा विभक्तयः कर्तव्यमानत्वात् २ १३४ आशंसावचने लिङ् कौ ति ल भू पतत्रेत्यस्यापवादः आशंसावाचक उ
पपदे भविष्यति लिङ् स्यात् उपाध्यायश्चेदागच्छेदाशंसेऽधीयीय क्षिप्रवचनेऽपि परत्वाल्लिङेव आशंसे क्षिप्रमधीयीय भा
ष्यतने देवाख्यातम् १३५ नानद्यतनवत्क्रियाप्रबन्धसामीप्ययोः कौ ति ल क्रियायाः सातत्ये सामीप्ये च लङ्लुटौ न भवतः याव
जीवमन्नमदात् यावज्जीवमन्नं दास्यति सामीप्ये तुल्यजातीयेनाव्यवधानम् येयं पौर्णमास्यतिक्रान्ता तस्यामग्नीनाधित सोमेनाय
ष्ट येयममावास्यागामिनी तस्यामग्नीनाधास्यते सोमेन यक्ष्यते सर्वत्र लङ्लुटौ न भवतः नानद्यतनवत्प्रतिषेधे लङ्लुटोः प्रति
षेधो द्रष्टव्यः अद्यतनवद्वचने हि सति विधानमिदं विज्ञायेत इति भाष्यम् परोक्षे लिट् हृशश्वतोर्लङ् लट् स्मे परि लङ्वा स्मे इ
त्येतत्स्त्रवहितानामपि प्रत्ययाः प्रतिषिध्यन्ते यत्करणसामर्थ्यात् इति कैयटः १३६ भविष्यति मर्यादावचनेऽवरस्मिन्
कौ ति ल भविष्यति काले मर्यादोक्तावरस्मिन् विभागेऽनद्यतनवत्प्रत्ययो न भवति योऽयमध्वा गन्तव्य आपाटलि
पुत्रात् तस्य यदवरं कौशाम्ब्यास्तत्र द्विरोदनं भोक्ष्यामहे अत्र लटो निषेधाल्लृट् भवति भविष्यति किम् तत्र द्विरोदनमभुञ्ज
महि अत्र लङो निषेधो न भवति मर्यादावचने किम् योऽयमध्वा गन्तव्यस्तस्य यदवरं कौशाम्ब्यास्तत्र द्विरोदनं भोक्ता
स्महे अवरस्मिन्निति किम् तस्य परं कौशाम्ब्यास्तत्र द्विरोदनं भोक्तास्महे भविष्यति मर्यादावचनेऽवरस्मिन्निति क्रिया
प्रतिबन्धार्थम् १ एतच्चोपलक्षणम् तेन सामीप्यार्थं चेति द्रष्टव्यम् इति कैयटः १३७ कालविभागे चानहोरात्रा

णाम् कौ ति ल भविष्यतिकालेमर्य्यादोक्तावरस्मिन्कालेविभागेसतिअनद्यतनवत्प्रत्ययोनभवति सविभागो १
सू.प. ह्नोरात्रसम्बन्धीयदिनभवति योऽयंसंवत्सरआगामीतस्ययात्परस्त्रहायणीवास्तत्रयुक्ताअध्येष्यामहे अनहोरात्राणां
१८ किम् योऽयंमासआगामीतस्ययोऽवरःपञ्चदशरात्रस्तत्राध्येतास्महे योगविभागउत्तरार्थः अनहोरात्राणामितिनि
96 दि भागेप्रतिषेधः १ मेप्रविभागेप्रतिषेधोपक्रमः १३८ परस्मिन्विभाषा कौ ति ल अप्राप्तविभाषेयम् भविष्यतिकालेम
र्य्यादोक्तौपरस्मिन्कालविभागेसतिअनद्यतनवत्प्रत्ययोवानभवति नवेदहोरात्रसम्बन्धीसविभागः योऽयंसंवत्सरआगा
मीतस्ययत्परमाग्रहायण्यास्तत्रयुक्ताअध्येष्यामहे अध्येतास्महे कस्मिन्परस्मिन् काललिभागे कृतमेतत् योगविभा
गकरणसामर्थ्यात् इतिभाष्यम् १३९ लिङ्निमित्तेलृङ्क्रियातिपत्तौ कौ ति ल लिङोनिमित्तेहेतुहेतुमद्भावादिः
तत्रभविष्यतिकालेलृङ्प्रत्ययःस्यात् क्रियायाअनिष्पत्तौसत्याम् सुहृच्चेदभविष्यत्तदासुभिक्षमभविष्यत् अत्र
भविष्यत्सुहृच्चभवनक्रियाभविष्यत्सुभिक्षभवनक्रियायाहेतुः साधनातिपत्तावित्यपिवक्तव्यम् १ साधनातिपत्तिश्चेत्क्रि
यातिपत्तिरपिभवति तत्रक्रियातिपत्तावित्येवसिद्धम् इतिभाष्यम् १४० भूतेच कौ ति ल लिङ्निमित्तेसतिभूतकालेऽपिलृ
ङ्स्यात् क्रियायाअनिष्पत्तौसत्याम् दृष्टोभवतःपुत्रोऽन्नार्थीचङ्क्रमणपरोद्विजोब्राह्मणार्थीयदिसतेनदृष्टोऽभविष्यत्
ततोऽभोक्ष्यत नतुभुक्तवान् अन्येनपथासगतः भूतेलृङ्उताप्यादिषु १ उत्तरसूत्रार्थपर्यालोचनलभ्यमेतत् १४१
वोताप्योः कौ ति ल वा आ उताप्योः इतित्रीणिपदानि उताप्योःसमर्थयोर्लिङ् इतिसूत्रात्प्राग्भूतेलिङ्निमित्तेलृङ् वाऽमेत
दधिकृतोवेदितव्यम् वक्ष्यतिविभाषाकथमिलिङ्वेति कथंनामतत्रभवान्वृषलंयाजयिष्यत् एतेयथाप्राप्तम्
विभाषागर्हाप्रभृतौप्रागुताप्योःस्याम् १४२ गर्हायांलडपिजात्वोः कौ ति ल अपि जातु इत्येतयोःप्रयोगेकालसामा
न्येधातोर्लट्स्यात् निन्दायांगम्यमानायाम् अपिजायांत्यजति आतुतत्रभवान्वृषलंयाजयति गर्हितमेतत् गर्हायां १८

लक्ष्यितानानर्थक्यं क्रियासमाप्तिविवक्षितत्वात् १ १४२ विभाषाकथमिलिङ्च कौ ति ल कथम् इत्येतस्यप्रयोगेनि
न्दायांकालसामान्येलिङ्वास्यात् चकाराल्लडपि तत्रभवान्कथंधर्म्मंत्यजेत् तत्रभवान्कथंधर्म्मंत्यजति यदेकालत्रयो
कालकाराभवति अत्रलिङ्निमित्तेभविष्यतिनित्यल्लृङ्भूतेष कथंनामतत्रभवान्धर्म्मंमत्यक्ष्यत् इत्यादिस्त्रहयेभाष्येव्या
आख्यातम् १४४ किंवृत्तेलिङ्लृटौ कौ ति ल सर्वलकारापवादः किंवृत्तउपपदेनिन्दायांगम्यमानायांधातोर्लिङ्लृटौभव
तः कौ हरिंनिन्देत् कतरोहरिंनिन्देत् कतमोहरिंनिन्देत् कोहरिंनिन्दिष्यति कतरोहरिंनिन्दिष्यति कतमोहरिंनिन्दिष्य
ति अत्रलिङ्निमित्तेक्रियातिपत्तौपभविष्यतिनित्यल्लृङ्भूतेवा १४५ अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि कौ ति ल सर्वलका
रापवादः अकिंवृत्तेकिंवृत्तेवोपपदे संभावनामर्षयोर्गम्यमानयोर्लिङ्लृटौभवतः नसंभावयामिभवान्हरिंनिन्देत् नि
न्दिष्यति कोहरिंनिन्देत् कोहरिंनिन्दिष्यति अमर्षोऽक्षमा नमर्षयामितत्रभवान्वृषलंयाजयेत् याजयिष्यति कोवृषलं
भवान्याजयेत् याजयिष्यति अत्रभविष्यतिस्त्वस्यलृङ्भूतेवा किंवृत्तस्यानधिकारादुत्तरत्राकिंवृत्तग्रहणमनर्थकम् १ १४६
किंकिलास्त्यर्थेषुल्लृट् कौ ति ल लिङोऽपवादः किंकिल इत्येतस्मिन्नुपपदे अस्त्यर्थेषुवोपपदेषुसंभावनामर्षयोर्गम्य
मानयोर्धातोर्लृट्स्यात् नसंभावयामितत्रभवान्किंकिलवृषलंयाजयिष्यति अस्त्यर्थाअस्तिभवतिविद्यतयः अस्तितत्र
भवान्वृषलंयाजयिष्यति भवतितत्रभवान्वृषलंयाजयिष्यति विद्यतेतत्रभवान्वृषलंयाजयिष्यते भाष्येत्वनेदंव्याख्या
तम् १४७ जातुयदोर्लिङ् कौ ति ल लृटोऽपवादः जातु यत् इत्येतयोः प्रयोगे संभावनामर्षयोर्लिङ्स्यात् जातुतत्रभ
वान्वृषलंयाजयेत् नावकल्पयामिनमर्षयामि यत्तत्रभवान्वृषलंयाजयेत्रावकल्पयामि अत्रभविष्यतिनित्यंलृङ्
भूतेवा जातुयदोर्लिङ्विधानेयदाययोरुपसंख्यानम् १ यदाभवद्विधः क्षत्रियंयाजयेत् यदिभवद्विधः क्षत्रियंया
जयेत् यदाययोरुपसंख्यानम् १ कौ ति ल १४८ यच्चयत्रयोः कौ ति ल यच्च यत्र इत्येतयोः प्रयोगे संभावनामा

षेयोर्लिङ् स्यात् नयच्छ्रद्दधे न मर्षयेय यत्तत्र भवान् वृषलं याजयेत् नश्रद्दधे न मर्षये यत्तत्र भवान् वृषलं याजयेत् अत्र भ॰
सू॰प॰ विष्यतिनिमित्ते लृङ् भूते वा इत्यादिसूत्रत्रयं भाष्येन व्याख्यातम् १४९ गर्हायाञ्च कौ ति ल सर्वलकारापवादः यत्र य
८७ त्र इत्येतयोः प्रयोगे निन्दायां धातोर्लिङ् स्यात् यत्तत्र भवान् वृषलं याजयेत् गर्हामहे यत्तत्र भवान् वृषलः सन् वृषलं या
जयेत् गर्हामहे अत्र भविष्यति क्रियातिपत्तौ निमित्ते लृङ् भूते वा १५० चित्रीकरणे च कौ ति ल सर्वलकारापवादः यत्र य
97 त्र इत्येतयोः प्रयोगे आश्चर्ये गम्ये धातोर्लिङ् स्यात् यत्तत्र भवान् वृषलं याजयेत् यत्तत्र भवान् वृषलं याजयेत् यत्तत्र भ
वान् वृषलं याजयेदाश्चर्यमेतत् अत्र भविष्यति निमित्ते लृङ् भूते वा १५१ शेषे लृडयदौ कौ ति ल सर्वलकारापवादः य
च्चायत्रयोरन्यस्मिन् प्रयुज्यमाने चित्रीकरणे गम्ये लृट् स्यात् यदि शब्दप्रयोगेन न भवति आश्चर्यं यच्चायत्रयोरन्यस्मिन् प्रयुज्य
माने चित्रीकरणे गम्ये लृट् स्यात् यदि शब्दप्रयोगेन न भवति आश्चर्यमन्धो नाम कृष्णं द्रक्ष्यति चित्रं वधिरो नाम व्याक
रणमध्येष्यते अयदौ किम् आश्चर्यं यदि सोऽधीयीत लिङ्निमित्ताभावादिह लृङ् नास्ति चित्रिकरणे यदि प्रतिषेधानर्थ
क्यामपाश्रित्य २ नहि यद्युपपदे चित्रीकरणं गम्यते किं तर्हि संभावनम् इति भाष्यम् १५२ उताप्योः समर्थयोर्लि
ङ् कौ ति ल उत अपि इत्येतयोः समानार्थकयोः प्रयोगे धातोर्लिङ् स्यात् उताधीयीत अप्यधीयीत बाढमध्येष्यत इ
त्यर्थः बाढमित्यर्थे तुल्यार्थत्वे तौ समर्थयोः किम् उत दण्डः पतिष्यति अपि धास्यति द्वारम् प्रश्नः प्रच्छादने च गम्यते इतः
प्रभृति क्रियातिपत्तौ निमित्ते लृङ् इत्यादि सूत्रद्वयं भाष्येन व्याख्यातम् १५३ कामप्रवेदनेऽकच्चिति कौ ति ल सर्वल
कारापवादः स्वाभिप्रायप्रकाशने गम्यमाने धातोर्लिङ् स्यात् कच्चित् इत्येतत्प्रयोगेन न भवति कामो मे भुञ्जीत भवान् न
अकच्चितिति किम् कच्चिज्जीवति मे माता १५४ संभावनेऽलमिति चेत्सिद्धाप्रयोगे कौ ति ल सर्वलकारापवादः अलमर्थः
प्रौढिः तद्विषयके संभावने गम्यमाने धातोर्लिङ् स्यात् सिद्धस्यार्थस्याप्रयोगे सति अपि गिरिं शिरसा भिन्द्यात् संभा ८७

वनेकं पर्य्याप्तभङ्क्ष्व अलमिति किम् विदेशस्थायी देवदत्तः पाथेयं ग्रामं गमिष्यति सिद्धाप्रयोगो किम् अलं देवदत्तो हस्तिनं
हनिष्यति अत्र क्रियातिपत्तौ भूते भविष्यति च नित्यो ऌङ् १५५ विभाषा धातौ संभावनवचनेऽयदि कौ ति ल हे भा
वनार्थे धातावुपपदे धातोर्लिङ् वा स्यात् पूर्वसूत्रविषये न तत्पक्षे ऌट्प्रयोगो संभावयामि भुञ्जीत भवान् संभावयामि भुञ्जीत
भवान् संभावयामि भोक्ष्यते भवान् अयदि किम् संभावयामि यद्भुञ्जीत भवान् १५६ हेतुहेतुमतोर्लिङ् कौ ति ल हे
तुः कारणम् हेतुमत्फलम् हेतौ तत्फले भूते वार्थे वर्तमानाद्धातोर्लिङ् वा स्यात् कृष्णं नमेच्चेत्सुखं यायात् कृष्णं नंस्य
ति चेत्सुखं यास्यति उत्र कृष्णनमने हेतुः सुखयाने हेतुमत् अत्र क्रियातिपत्तौ नित्यो ऌङ् हेतुहेतुमतोर्लिङ् वा १ भवि
ष्यदर्थिकमिव २ इहमा भूत् वर्वतीति धावति हन्तीति पलायते दैवज्ञो नो गलो ग्राह इति योगविभागादिभिः मिथ्येन विभा
षान्तेगवादः संश्रितवन्तः पूर्वास्थितविभाषापरिगणनकारिकेयम् १५७ इच्छार्थेषु लिङ् लोटौ कौ ति ल सर्वलका
रापवादः इच्छार्थेषु धातुषूपपदेषु धातोर्लिङ् लोटौ भवतः इच्छामि भुञ्जीत भवान् इच्छामि भुङ्क्तां भवान् कामये भुञ्जीत
कामये भुङ्क्ताम् कामप्रवेदने चेत् १ इहमा भूत् इच्छन् करोति कामप्रवेदन इति वक्तव्यम् २ कौ ति ल १५८ समानकर्तृके
षु तुमुन् कौ कृ ल समानकर्तृकेषु इच्छार्थेषु धातुषूपपदेषु धातोस्तुमुन्प्रत्ययः स्यात् इच्छति भोक्तुम् कामयते भोक्तुम्
समानकर्तृकेषु किम् देवदत्तं भुञ्जानमिच्छति इत्यादिसूत्रत्रयं भाष्येतव्याख्यातम् १५९ लिङ् च कौ ति ल समानकर्तृकेषु
इच्छार्थेषु धातुषूपपदेषु धातोर्लिङ् स्यात् भुञ्जीयेतीच्छति क्रियातिपत्तौ ऌङ् १६० इच्छार्थेभ्यो विभाषा वर्तमाने कौ ति
ल लटोऽपवादः इच्छार्थेभ्यो धातुभ्यो वर्तमाने लिङ् वा स्यात् इच्छाति इच्छेत् कामयते कामयेत १६१ विधिनिमन्त्रण
मन्त्रणाधीष्टसंप्रश्नप्रार्थनेषु लिङ् कौ ति भ्वा विध्यादिष्वर्थेषु धातोर्लिङ् स्यात् विधिः प्रेरणम् भवान् ग्रामं गच्छेत् नि
मन्त्रणं नियोगकरणम् इह भवान् भुञ्जीत आमन्त्रणं कामचारकरणम् भवानिहासीत अधीष्टः सत्कारपूर्वको

स॰प्र॰
९८
98

व्यापारः भवान्छात्रमध्यापयेत् संप्रश्नः संप्रधारणम् किंभो वेदमधीयीय उत तर्कमधीयीय प्रार्थने याञ्चा भो भोजनं ल
भेय निमन्त्रणादीनामर्थे वेदामन्त्र्यै निमन्त्र्यै भवन्तमिति प्रत्ययानुपपत्तिः प्रकृत्यमिहितवान् १ द्विवचनबहुवचनाप्र
सिद्धिश्चौकार्थ्यात् २ सिद्धन्तु द्वितीयाकोदस्य प्रकृते प्रत्ययार्थे प्रत्ययविज्ञानात् ३ सपाकर्मादयोऽर्थाः संख्या चैव तन्
प्यातिङाम् प्रसिद्धो नियमस्तत्र नियमः प्रकृतेषु वा १ कारिकेयम् १६२ लोट् च कौ ति स्वा विध्यादिष्वर्थेषु धातोर्लोट् स्यात्
विधौ कटं करोतु भवान् निमन्त्रणे इह भुङ्क्तां भवान् आमन्त्रणे इहास्तां भवान् अधीष्टे छात्रमध्यापयतु भवान् संप्रश्ने
किम्भो देवमध्ययै उत तर्कमध्ययै प्रार्थने भो भोजनं लभै भाष्ये त्वमेवं व्याख्यातम् १६३ प्रैषातिसर्गप्राप्तकालेषु कृत्याश्च
कौ ति ल प्रैषः प्रेषणम् अतिसर्गः कामचारानुज्ञा प्राप्तकालः प्राप्तावसरः एतेष्वर्थेषु गम्यमानेषु धातोः कृत्यसंज्ञकाः
प्रत्यया भवन्ति चकाराल्लोट् भवतः कटः कर्तव्यः करणीयः कार्यः करोतु कटं भवान् लोटा बाधो मा भूदिति पुनर्वि
धानम् १६४ लिङ् चोर्ध्वमौहूर्तिके ति ल प्रैषादिष्वर्थेषु गम्यमानेषूर्ध्वमौहूर्तिकेऽर्थे वर्तमानाद्धातोः लिङ् भवति चका
त्सधाधाप्राप्तमपि भवति प्रेषितोऽतिसृष्टः प्राप्तकालो वा भवान् कटं कुर्यात् कटं करोतु कटः कर्तव्यो भवता इत्यादिस्तत्रत्ये
भाष्ये तन्न व्याख्यातम् १६५ स्मे लोट् कौ ति ल लिङः कृत्यानां चापवादः प्रैषादिष्वर्थेषु गम्यमानेषु स्मनेषु स्मशब्द उपप
दे प्रपदे ऊर्ध्वमौहूर्तिकेऽर्थे वर्तमानाद्धातोर्लोट् स्यात् प्रेषितोऽतिसृष्टः प्राप्तसमये वा भवान् कटं करोतु स्म १६६ अधी
ष्टे भव कौ ति ल लिङोऽपवादः सत्कारपूर्वकव्यापारगम्यमाने स्मे माने स्मशब्द उपपदे लोट् स्यात् राजन्माणवकमध्याप
य स्म १६७ कालसमयवेलासु तुमुन् कौ कृ उ काल समय वेला इत्येतेषूपपदेषु धातोस्तुमुन् प्रत्ययो भवति कालो
भोक्तुम् समयो भोक्तुम् वेला भोक्तुम् प्रथमान्तेष्विति वक्तव्यम् १ तत्रापश्यं प्रैषादिग्रहणमनुवर्त्यम् प्रथमान्तेषु
त्वन्यमाने इत्यापि प्रसज्येत कालः पचतिः इति भाष्यम् १६८ लिङ् यदि कौ ति ल यच्छब्दप्रयोगे कालसमयवेला ९८

लासूपपदेष्वुधातोर्लिङ्स्यात् कालोयद्भुञ्जीतिभवान्समयोयद्भुञ्जीतभवान् वेलायद्भुञ्जीतभवान् इत्यादिनवसूत्राणि
भाष्येतन्नव्याख्यातानि १६९ अर्हेकृत्यतृचश्च कौ ति ल योग्येगम्यमानेकृत्यसंज्ञःप्रत्ययस्तृच्प्रत्ययश्चस्यात् चकाराल्लिङ्
कन्यावोढव्या वहनीया वाह्या भवताकन्यावोढा भवान्कन्यांवहेत् १७० आवश्यकाधमर्ण्येयोर्णिनिः कौ कृ उ
आवश्यकेआधमर्ण्येचगम्यमानेधातोर्णिनिःस्यात् अवश्यंकारी आधमर्ण्ये शतंदायी १७१ कृत्याश्च कौ कृ उ
अवश्यकाधमर्ण्ययोर्गम्यमानयोर्धातोः कृत्यसंज्ञकाःप्रत्ययाभवन्ति अवश्यंकटःकर्तव्यः करणीयःकार्य्यः आधम
र्ण्ये शतंदातव्यम् १७२ शकीलिङ्च कौ ति ल शक्तौगम्यमानायांधातोर्लिङ्स्यात् चकारात्कृत्याः भवान्भा
रंवहेत् भवताभारोवोढव्यः वहनीयः लिङाबाधोमाभूदितिपुनर्विधिः १७३ आशिषिलिङ्लोटौ कौ ति भ्वा
आशीर्वादेऽर्थेधातोर्लिङ्लोटौभवतः चिरंजीव्यात्भवान् चिरंजीवतुभवान् १७४ क्तिच्क्तौचसंज्ञायाम् कौ कृ उ
आशीर्विषयेधातोःक्तिच् क्त इत्येतौप्रत्ययौभवतः समुदायेनचेत्संज्ञागम्यते भवतात् भूतिः समुतात् सातिः तन्त
तात् तन्तिः देवाएनंदेयासुः देवदत्तः क्तिच्याबाधोमाभूदितिपुनःक्तविधिः १७५ माङिलुङ् कौ ति भ्वा माङिउप
पदेधातोर्लुङ्स्यात् मामवान्कार्षीत् माभूत् कथंमाभवतुइति निषेधार्थोमाशब्दोऽयम् नतुमाङ् १७६ स्मो
त्तरेलङ्च कौ ति भ्वा स्मोत्तरेमाङिउपपदेधातोर्लङ्स्यात् चकाल्लुङ् मास्मकरोत् मास्मभवान् मास्मकार्षी
त् मास्माभूत् इति ४६ सूत्राणिभाष्ये ३२ व्याख्यातानि इतिसूत्रपाठेतृतीयाध्यायस्यतृतीयःपादः १ धातुसम्ब
न्धेप्रत्ययाः कौ ति ल धात्वर्थानांसम्बन्धेयत्रकालेप्रत्ययाउक्तास्ततोऽन्यत्रापिभवन्ति तिङन्तवाच्यक्रियायाः साध्या
नादन्तरोयेनगुणभूतक्रियावाचिभ्यःप्रत्ययाः वसन्ददर्श भूतेलङ् अग्निष्टोमयाज्यस्यपुत्रोजनिता पुनःप्रत्ययग्रहण
मयातप्रत्ययसंग्रहार्थम् मोम नासीत् गोमान्भविता प्रकृत्यर्थस्यभूतत्वेभूतत्वेभविष्यत्वेचमत्वु धातुसाचन्येप्रत्य

स्तु॰प॰
५५
99

स्यथाकालविधानात्सिद्धम् १ उपपदसत्तकालान्यत्वम् २ क्रियासमभिहारे लोट् लोटो हिस्वौ वा च तध्वमोः कौ
ति ल पौनःपुन्ये भृशार्थे च यत्तेयातो लोट् स्यात् तस्य च लोटस्तिङामपवादौ तिङसंज्ञौ क्रमेण परस्मैपदात्मनेपदसंज्ञौ
हि स्व इत्येतावादेशौ भवतः तध्वमोर्विषये तु हिस्वौ वा भवतः पुरुषसंज्ञा यकवचनसंज्ञा वचनान्तयोर्भवति हिस्वादेशवि
धानसामर्थ्यात् तेन सर्वपुरुषवचनवचनविषये परस्मैपदिभ्यो धातुभ्यो हिः कर्तरि आत्मनेपदिभ्यः स्वो भावकर्मकर्तृ
षु लुनीहि लुनीहीत्येवायं लुनाति इमौ लुनीतः इमे लुनन्ति त्वं लुनासि युवां लुनीथः यूयं लुनीथ यद्वा लुनीति
लुनीतीत्येव यूयं लुनीथ लुनीहि लुनीहीत्येवाहं लुनामि आवां लुनीवः वयं लुनीमः तेषु ते लुनीहि लुनी
हीत्येवायमलावीत् इत्यादि भविष्यति लुनीहि लत्येवायं लवायं लविष्यते इत्यादि अधीष्वाधीष्वेत्येवायमधीते
इमावधीयाते इमे अधीयते अधीष्वाधीष्वेत्येव त्वमधीषे युवामधीषे युवामधीयाथे यूयमधीध्वे यद्वाधीध्वमधी
ध्वमधीध्वमिति यूयमधीध्वे अधीष्वाधीष्वेत्येवाहमधीये आवामधीवहे वयमधीमहे एवं सर्वकालेषूदाहार्यम् हिस्वयोः
परस्मैपदात्मनेपदग्रहणं लादेशप्रतिषेधार्थम् १ समसंख्यार्थं च २ नवा तध्वमोराशावचने तातङ्कं पदादेशस्य २ अन्य
दादेशोपि तातङोः प्रतिषेधः ३ सिद्धान्ते लोण्मध्यमपुरुषैकवचनस्य क्रियासमभिहारे द्विर्वचनात् ५ २ समुच्चयेऽन्यत
रस्याम् कौ ति ल अनेकक्रियासमुच्चये योऽसौ समुच्चीयमानक्रियावचनाद्धातोर्वा लोट् स्यात् तस्य च हिस्वावादेशौ
भवतः तध्वमोर्विषये तु वा भवतः ओदनं भुङ्क्ष्व दाधिकमास्वादस्वेत्यभ्यवहरते तध्वमोस्तु पक्षेपि वनस्वादतश्चे
व यूयमभ्यवहरथ भुङ्ग्ध्वमास्वादध्वमित्येव यूयमभ्यवहरध्वे लोडादेशाभावे समुच्चयेऽपि भवति धानाः खादति अन्नं भुङ्क्ते दा
धिकमास्वादते भाष्यमतनेदं व्याख्यातम् ३ यथाविध्यनुप्रयोगः पूर्वस्मिन् कौ ति प्रथमे लोटो विधाने लाट् प्रकृति
भूत एव धातुरनुप्रयोक्तव्यः न च मः लुनीहि लुनीहीत्येवायं लुनाति छिनत्तीति नानुप्रयुज्यते अधीष्वाधीष्वे ५५

स्येवायमधीते पठतीतिनान्वप्रयुज्यते एकस्याश्चाकृतेश्चरितः प्रयोगो न द्वितीयस्यास्तृतीयस्याश्च भविष्यति १ परिभाषेयं ५
सम्बन्धे सामान्यवचनस्य कौ ति लङ्द्वितीये लोलोटि विषयानैस मान्यर्थस्य धातोरनुप्रयोगः कर्त्तव्यः सक्रान्नियथानाः
त्वादइत्येवायमभ्यवहइति ६ छन्दसि लुङ् लङ् लिटः कौ वै अ तृ धात्वर्थानां सम्बन्धे वेदे लुङ् लिटः कौ वै अ तृ धा
त्वर्थानां सम्बन्धे वेदे लङ् लङ् लिट् इत्येते प्रत्यया वा भवन्ति लुङ् लङ् लिट् इत्येते प्रत्यया वा भवन्ति लुङ् शकलाग
ष्ठको करत् लङ् अग्निमद्य होतारमवृणीतायं यजमानः लिट् अद्य ममार अद्याम्रियते इत्यादिस्तत्रद्वयं भाष्ये
त्तनव्याख्यातम् ७ लिङर्थे लेट् कौ वै अ तृ लिङोऽर्थे ये ऽर्था हेत्वादयस्तेषु अर्थेषु वेदे लेट् वा स्यात् जोषिषत् तारिषत् मन्दिष
त् नेमानेषत् कवयस्त्वादिषत् पतनातिदिद्युत् उदधिं च्यावयाति ८ उपसंवादाशङ्कयोश्च कौ वै अ तृ उपसंवादः प
रिभाषणं कृतेऽस्य १ एवं च त्वया अशङ्कानतर्कः एतयोरर्थयोर्गम्यमानयोर्वेदे लेट् स्यात् उपसंवादे अहमेव पशूनामीशे
मदन्ना एव वो ग्राहा हस्यान्ते अशङ्कायम् नेज्जिह्मायन्तो नरकं पताम उपसंवाद शङ्कयोश्चैव नानर्थको लिङर्थत्वात् १९
तुमर्थे सेसेनसेऽसेन्क्सेकसेनध्यैअध्यैन्कध्यैकध्यैन्शध्यैशध्यैन्तवैतवेङ्तवेनः कौ वै अ तृ तुमर्थो
भावः तत्राथे छन्दसि से इत्येवमादयः प्रत्यया धातोर्भवन्ति से सेन् वक्षेरायस्त्वावामेषे रथान् न् स्वरभेदः असे असेन्
क्सेदा दायजीवसे स्वरभेदः क्से कसेन् प्रेषे भगाय श्रियसे अध्यै अध्यैन् कामम् उपवरध्यै स्वरविशेषः कध्यै
कध्यैन् इन्द्राग्नी आहुवध्यै श्रियध्यै शध्यै शध्यैन् सहमादयध्यै सोममिन्द्राय यातवै तवेङ् दशमे मासि सूतवे तवेन्
स्वर्देवेषु गन्तवे कर्तवे हर्तवे १० प्रयै रोहिष्यै अव्यथिष्यै कौ वै अ त एते शब्दास्तुमर्थे छन्दसि निपात्यन्ते पा प्रपूर्वः
प्रयै देवेभ्यो हविः कैप्रत्ययः रुह प्रयातुं रोहिष्यै इष्यै इष्यैप्रत्ययः व्यथ नञ्पूर्वः अव्यथिष्यै इष्यैप्रत्ययः इत्यादिस्तत्र
नवकं भाष्ये तत्तनव्याख्यातम् ११ दृशे विख्ये च कौ वै अ त दृशे विख्ये इत्येतौ तुमर्थे छन्दसि निपात्येते दृशिर दृशि वि

श्वाय सूर्यम् विख्ये त्वा हरामि १२ शकि णमुल्कमुलौ कौ वै अ त शक्नोतावुपपदे छन्दसि तुमर्थे धातोर्णमुल् कमुल्
सू॰प॰ इत्येतौ प्रत्ययौ भवतः अग्निं वै देवा विभाजं नाशक्नुवन् विभक्तुमित्यर्थः अपलुपं नाशक्नुवन् अपलोप्तुमित्यर्थः १३ ईश्व
१०० रे तोसुन्कसुनौ कौ वै अ त ईश्वरशब्द उपपदे छन्दसि तुमर्थे धातोस्तोसुन् कसुन् इत्येतौ प्रत्ययौ भवतः ईश्वरोऽभिचरितोः अ
100 भिचरितुमित्यर्थः ईश्वरो विलिखः विलेखितुमित्यर्थः १४ कृत्यार्थे तवैकेन्केन्यत्वनः कौ वै अ त तवै केन् केन्य त्वन्
इत्येते प्रत्यया धातोश्छन्दसि भावे कर्मणि चार्थे भवन्ति अन्वेतवै अवगाहे इदन्तेण्यः कर्त्वं हविः १५ अवचक्षे च कौ वै
अ त अवचक्षे इत्येतच्छन्दसि कृत्यार्थे एशप्रत्ययान्तं निपात्यते वादिहू अवचक्षैः नावचक्षे नावख्यातव्यमित्यर्थः १६
भावलक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन् कौ वै अ त स्था इण् डुकृञ् वद चर हु तमु जनी इत्येतेभ्यो भा
वलक्षणे वर्तमानेभ्यश्छन्दसि तुमर्थे तोसुन् भवति आस्थातोरन्तर्वेद्यां सीदन्ति आसमाप्तेः सीदन्तीत्यर्थः पुरा सूर्यस्यो
देतोराधेयः पुरा वत्सानामपाकर्तोरास्ते पुरा प्रवदितोरग्नौ होतव्यम् पुरा प्रचरितोराग्नीध्रीये होतव्यम् आहोतोरप्रमत्त
स्तिष्ठति आ तमितोस्तिष्ठति आ जनितोः संभवामः १७ सृपितृदोः कसुन् कौ वै अ त सृपी उतृदिर इत्येताभ्यां भावल
क्षणे वर्तमानाभ्यां छन्दसि तुमर्थे कसुन् भवति पुरा क्रूरस्य विसृपो विरप्शिन् पुरा जत्रुभ्य आतृदः अलंखल्वोः प्रतिषे
धयोः प्राचां क्त्वा कौ कृ उ अलम् खलु इत्येतयोः प्रतिषेधयोः किं अलंकारः प्राचां ग्रहणं पूजार्थम् १९ उदीचां माङो व्य
तीहारे कौ कृ उ मेङ् इत्येतस्माद्धातोर्व्यतीहारेऽर्थे वर्तमानात् क्त्वा वा स्यात् अपिमित्य याचते उदीचां ग्रहणाद्यथाप्राप्तम
पि याचित्वाऽपमयते अपूर्वकालार्थोऽयमारम्भः इति भाष्यम् २० परावरयोगे च कौ कृ उ परेण पूर्वस्य योगे गम्यमाने
धातोः क्त्वा स्यात् अप्राप्य नदीं पर्वतः परनदीयोगोऽत्र पर्वतस्य अतिक्रम्य पर्वतं नदी अवरपर्वतयोगोऽत्र नद्याः भाष्ये
तु नेदं व्याख्यातम् २१ समानकर्तृकयोः पूर्वकाले कौ कृ उ एककर्तृकयोर्धात्वर्थयोः सतोः पूर्वकालिकक्रियावृत्तेर्धो १००

नोः क्त्वा स्यात् भुक्त्वा व्रजति द्वित्ववचनमविवक्षितम् स्नात्वा भुक्त्वा पीत्वा व्रजति समानकर्तृकयोः किम् भुक्तवति ब्राह्मणे
व्रजति देवदत्तः पूर्वकाले किम् व्रजति च जल्पति च समानकर्तृकयोरिति बहुष्वप्राप्तिः १ सिद्धं तु क्रियाप्रधानत्वात् २ स-
मानकर्तृकयोरनन्तरवचनस्येति वक्तव्यम् ३ वादाय स्वपितीत्युपसंख्यानमपूर्वकालत्वात् ४ न वा स्वप्नस्यापरकालत्वा-
त् ५ २२ आभीक्ष्ण्ये णमुल् च कौ कृ ३ क्रियायाः पौनःपुन्ये द्योत्ये धातोर्णमुल् स्यात् चकारात् क्त्वापि भोजंभोजं
व्रजति भुक्त्वाभुक्त्वा व्रजति पायंपायं व्रजति पीत्वापीत्वा व्रजति इत्यादि सूत्रद्वये भाष्ये तु न व्याख्यानम् २३ न यद्यनाकां-
क्षे कौ कृ ३ यच्छब्द उपपदे पूर्वकाले क्त्वाणमुलौ न भवतः यत्र पूर्वोत्तरे क्रिये तद्वाक्यं नापरमाकाङ्क्षते चेत् यदयं भुङ्क्ते
ततः पठति अनाकाङ्क्षे किम् यदयं भुक्त्वा व्रजति ततोऽधीते २४ विभाषाग्रेप्रथमपूर्वेषु कौ कृ ३ अग्रे प्रथम पूर्व इत्येते-
षूपपदेषु एककर्तृकयोर्धात्वर्थयोः पूर्वकाले क्त्वाणमुलौ वा भवतः अग्रे भोजं व्रजति अग्रे भुक्त्वा व्रजति प्रथमं भोजं व्रजति
प्रथमं भुक्त्वा व्रजति पूर्वं भोजं व्रजति पूर्वं भुक्त्वा व्रजति पक्षे लडादयः अग्रे भुङ्क्ते ततो व्रजति आभीक्ष्ण्ये तु पूर्वविप्रतिषेधा-
न्नित्यमेव अग्रे भोजंभोजं व्रजति अग्रे भुक्त्वाभुक्त्वा व्रजति अग्र्यादिष्वामविधेः समासप्रतिषेधः १ उक्तमेतत् अमैवाव्य-
येनेति इति भाष्यम् २५ कर्मण्याक्रोशे कृञः खमुञ् कौ कृ ३ कृञ इत्येतस्मात् कर्मण्युपपदे खमुञ् स्यात् आक्रो-
शे गम्यमाने चौरंकारमाक्रोशति चौरोऽसीत्याक्रोशमात्रं न त्वसौ चौरः भाष्ये तु नेदं व्याख्यानम् २६ स्वादुमि णमुल्
कौ कृ ३ कृञ इत्येतस्मात् स्वाद्वर्थेषूपपदेषु समानकर्तृकयोः पूर्वकाले णमुल् स्यात् स्वादुंकारं भुङ्क्ते अस्वाद्वीं स्वाद्वीं
कृत्वा भुङ्क्ते स्वादुंकारं भुङ्क्ते संपन्नंकारं भुङ्क्ते वासरूपेण क्त्वाऽपि स्वादुं कृत्वा भुङ्क्ते स्वाद्वीं कृत्वा भुङ्क्ते स्वादुमि मान्तनिपात-
नमीकाराभावार्थम् १ अन्तस्य च मकारान्तत्वं यथा स्यात् २ आवतमनः समानाधिकरणे ३ न तर्हि वक्तव्यम् अ-
व्ययकृतो भावे भवीष्यन्ति किं वक्तव्यमेतत् नहिऽ कथमनव्ययमानं गम्यते तुमर्थ इति वर्तते तुमर्थश्च कः भावः

इति भाष्यम् २७ अन्यथैवंकथमित्थंसु सिद्धाप्रयोगश्चेत् कौ कृ उ डुकृञ् इत्येतस्मादन्यथादिषूपपदेषु णमुल् स्यात् सि
द्धाऽप्रयोगश्चेत्करोतिर्भवति अन्यथाकारं भुङ्क्ते एवंकारं भुङ्क्ते कथंकारं भुङ्क्ते इत्थंकारं भुङ्क्ते सिद्धाऽप्रयोगे किम् अ
न्यथा कृत्वा शिरो भुङ्क्ते इत्यादि सूत्रपञ्चकं भाष्येऽनव्याख्यातम् २८ यथातथयोरसूयाप्रतिवचने कौ कृ उ डुकृञ् इत्येत
स्मात् यथा तथा इत्येतयोरुपपदयोरसूयाप्रतिवचने णमुल् स्यात् सिद्धाऽप्रयोगश्चेत्करोतेः यथाकारमहं भोक्ष्ये
तथाकारमहं भोक्ष्ये किं तवानेन असूयाप्रतिवचने किम् यथाकृत्वाहं भोक्ष्ये तथाकृत्वा द्रक्ष्यसि २९ कर्मणि दृशि
विदोः साकल्ये कौ कृ उ दृशिर् विद ज्ञाने इत्येताभ्यां कर्मण्युपपदे साकल्ये गम्यमाने णमुल् स्यात् कन्यादर्शं वरयति
सर्वाः कन्या वरयतीत्यर्थः ब्राह्मणवेदं भोजयति ये ये ब्राह्मणं जानाति ते सर्वं भोजयतीत्यर्थः साकल्ये किम् ब्राह्मणं दृष्ट्वा
भोजयति ३० यावति विन्दजीवोः कौ कृ उ विद्लृ जीव इत्येताभ्यां यावच्छब्द उपपदे णमुल् स्यात् यावद्वेदं भुङ्क्ते याव
ल्लभते तावदित्यर्थः यावज्जीवमधीते विप्रः ३१ चर्मोदरयोः पूरेः कौ कृ उ पूरी इत्येतस्मात् ण्यन्तात् चर्मोदरयोः कर्म
ण्युपपदयोर्णमुल् स्यात् चर्मपूरं स्तृणाति उदरपूरं भुङ्क्ते ३२ वर्षप्रमाण ऊलोपश्चास्यान्यतरस्याम् कौ कृ उ पूरी
इत्येतस्माद्वृष्टिप्रमाणे गम्यमाने णमुल् स्यात् पूरी इत्येतस्य ऊकारलोपश्च वा भवति गोष्पदपूरं वृष्टो देवः अस्येति किं
उपपदस्य मा भूत् मूषिकाबिलप्रं वृष्टो देवः ऊलोपश्चास्यान्यतरस्यां ग्रहणं शक्यमकर्तुम् इति भाष्यम् ३३ चेले क्नो
पेः कौ कृ उ क्नूयी इत्येतस्मात् ण्यन्तात् चेलार्थेषु कर्मसूपपदेषु वृष्टिप्रमाणे गम्ये णमुल् स्यात् चेलक्नोपं वृष्टो देवः
वस्त्रक्नोपम् इत्यादि सूत्रचतुष्टयं भाष्येऽनव्याख्यातम् ३४ निमूलसमूलयोः कषः कौ कृ उ कष इत्येतस्मान्निमूल
समूलयोः कर्मण्युपपदयोर्णमुल् स्यात् निमूलकाषं कषति समूलकाषं कषति निमूलं समूलं कषतीत्यर्थः इ
तः प्रभृति णमुल्विधौ यथाविध्यनुप्रयोगः कषादीनां बोध्यः ३५ शुष्कचूर्णरूक्षेषु पिषः कौ कृ उ पिष्लृ इत्येतस्मा १०१

शुष्क चूर्ण रूक्ष इत्येतेषु कर्मसूपपदेषु णमुल् स्यात् शुष्कपेषं पिनष्टि चूर्णपेषं पिनष्टि रूक्षपेषं पिनष्टि ३५ समूला
कृतजीवेषु हनकृञ्ग्रहः कौ कृ उ हन डुकृञ् ग्रह इत्येतेभ्यो धातुभ्यः क्रमेण समूल अकृत जीव इत्येतेषु कर्म
सूपपदेषु णमुल् स्यात् समूलघातं हन्ति अकृतकारं करोति जीवग्राहं गृह्णाति ३६ करणे हनः कौ कृ उ हन
इत्येतस्मात्करण उपपदे णमुल् स्यात् पाणिघातं हन्ति भूमिम् पदघातम् पाणिपद्भ्यां हन्तीत्यर्थः हनः करणेऽनर्थकं
वचनं हिंसार्थेभ्यो णमुल्विधानात् १ अर्थवत्तु हिंसार्थस्य विधानात् २ नित्यसमासार्थं च ३ ३७ स्नेहने पिषः कौ कृ
उ पिष्लृ इत्येतस्मात्स्नेहवाचिनि करण उपपदे णमुल् स्यात् उदपेषं पिनष्टि तैलपेषं पिनष्टि इत्यादिसूत्रत्रये भाष्ये तु
न व्याख्यातम् ३९ हस्ते वर्त्तिग्रहोः कौ कृ उ वृतु ग्रह इत्येताभ्यां हस्तवाचिनि करण उपपदे णमुल् स्यात् वृतु णिच् ह
स्तेन वर्तयति हस्तवर्तं वर्तयति करवर्तं वर्तयति हस्तग्राहं गृह्णाति करग्राहम् ४० स्वे पुषः कौ कृ उ पुष इत्येतस्मात्स्व
वाचिनि करण उपपदे णमुल् स्यात् स्वपोषं पुष्णाति गोपोषम् धनपोषम् मातृपोषं पुष्णाति ४१ अधिकरणे बन्धः कौ कृ
उ बन्ध इत्येतस्मादधिकरण उपपदे णमुल् स्यात् चक्रबन्धं बध्नाति कूटबन्धम् ग्रामबन्धम् इह कस्मान्न भवति ग्रामे ब
द्ध इति वक्ष्यामि अधिकरणे बन्धः संज्ञायाम् ततः कर्त्रोर्जीवपुरुषयोर्नशिवहोरिति कथमट्टालिकाबन्धं बद्धः चण्डा
लिकाबन्धं बद्धः उपमाने कर्मणि चेत्येवं भविष्यति इति भाष्यम् ४२ संज्ञायाम् कौ कृ उ बन्ध इत्येतस्मात्संज्ञायां विष
ये णमुल् स्यात् क्रौञ्चबन्धं बद्धः चण्डालिकाबन्धम् मयूरिकाबन्धम् अट्टालिकाबन्धम् बन्धविशेषाणां संज्ञा एताः
इत्याद्यष्टादश सूत्राणि भाष्ये तु न व्याख्यातानि ४३ कर्त्रोर्जीवपुरुषयोर्नशिवहोः कौ कृ उ णश वह इत्येताभ्यां क्रमेण
जीवपुरुषयोः कर्तृवाचिनोरुपपदयोर्णमुल् स्यात् जीवनाशं नश्यति पुरुषवाहं वहति कर्त्रोः किम् जीवेन नष्टः पुरु
षेण वोढः ४४ ऊर्ध्वे शुषिपूरोः कौ कृ उ शुष पूरी इत्येताभ्यामूर्ध्वशब्दे कर्तृवाचिन्युपपदे णमुल् स्यात् ऊर्ध्वशोषं शुष्य

ति ऊर्ध्वं शुष्यते ४५ उपमाने कर्मणि च कौ कृ उ उपमानवाचिनि कर्मणि कर्तरि चोपपदे धातोर्णमुल् स्यात् घृतनि
सि॰ प॰ धायं निहितः घृतमिव निहित इत्यर्थः कर्तरि अजनाशं नष्टः अज इव नष्ट इत्यर्थः ४६ कषादिषु यथाविध्यनुप्रयोगः
१०२ कौ कृ उ निमूलसमूलयोः कषः इत्यादिना उत्तरेषु ये ...मुक्तास्ते कषादयः तत्र यस्माद्धातोर्णमुलुक्तः स एव धातुरनुप्रयो
क्तव्यः निमूलसमूलयोः कषं कषति इत्याद्युदाहृतम् ४७ उपदंशस्तृतीयायाम् कौ कृ उः दंश इत्येतस्मा उपपूर्वात्तृती
102 यान्ते उपपदे णमुल् स्यात् मूलकेनोपदंशं भुङ्क्ते मूलकोपदंशं भुङ्क्ते तृतीयाप्रभृतीनीति समासविकल्पः वा समुच्चयेण
क्तोऽपि मूलकेनोपदंश्य भुङ्क्ते मूलकं चोपदंशः कर्म भुजेस्तु करणम् ०। ४८ हिंसार्थानां च समानकर्मकाणाम् कौ
कृ उ अनुप्रयुज्यमानधातुना तुल्यकर्मकेभ्यो हिंसार्थेभ्यो धातुभ्यस्तृतीयान्त उपपदे णमुल् स्यात् दण्डोपघातं गाः कल्प
पति दण्डेनोपघातम् समानकर्मकाणां किम् दण्डेनाहत्य चौरं गोपालो गाः कलयति ४९ सप्तम्यां चोपपीडरुधकर्षः
कौ कृ उ पीड रुधि कृष इत्येतेभ्य उपपूर्वेभ्यः सप्तम्यन्ते तृतीयान्ते चोपपदे णमुल् स्यात् पार्श्वोपपीडं शेते पार्श्वयो
रुपपीडम् पार्श्वयोरुपपीडम् पार्श्वाभ्यामुपपीडम् व्रजोपरोधं गाः स्थापयति व्रजे उपरोधम् व्रजेनोपरोधम् पाण्युप
कर्षं धाना संगृह्णाति पाणावुपकर्षम् पाणिनोपकर्षम् ५० समासत्तौ कौ कृ उ संनिकर्षे गम्यमाने सप्तम्यन्ते तृती
यान्ते चोपपदे धातोर्णमुल् स्यात् केशग्राहं युध्यन्ते केशेषु ग्राहम् केशैर्ग्राहम् ५१ प्रमाणे च कौ कृ उ दैर्घ्ये गम्यमाने
सप्तम्यन्ते तृतीयान्ते चोपपदे इत्यादि ५२ अपादाने परीप्सायाम् कौ कृ उ त्वरायां गम्यमानायामपादान उपपदे धातोर्ण
मुल् स्यात् शय्योत्थायं धावति शय्याया उत्थायम् शीघ्रतावशादवश्यकर्तव्यमपि किंचिन्नापेक्षते उत्थानमात्रमाद्रियत इ
त्यर्थः ५३ द्वितीयायां च कौ कृ उ त्वरायां गम्यमानायां द्वितीयान्ते चोपपदे धातोर्णमुल् स्यात् यष्टिग्राहं युध्यन्ते यष्टिग्रा
हम् युद्धायुधयोगित्वेऽन्यादीननपेक्ष्य शीघ्रतावशाद्यष्ट्यादिना युध्यन्त इत्यर्थः ५४ स्वाङ्गेऽध्रुवे कौ कृ उ अस्थिरवा १०२

ङ्ग्वाचिनि द्वितीयान्त उपपदे धातोर्णमुल् स्यात् अक्षिनिकाणं जल्पति निकाणमक्षिजल्पति भ्रूविक्षेपं कथयति
भ्रुवौविक्षेपं कथयति अध्रुवे किम् शिर उत्क्षिप्य कथयति यस्मिन्नङ्गे छिन्नेप्राणी न म्रियते तत् अध्रुवम् ५५ परिक्लि
श्यमानेच कौ कृ उ पीडितशोङ्गवाचिनि द्वितीयान्त उपपदे धातोर्णमुल् स्यात् उरःप्रतिपेषं युध्यन्ते कृत्स्नम् उरःपीडं प
नो युध्यन्त इत्यर्थः ध्रुवत्वात्पूर्वसूत्रेण न सिद्ध्यति ५६ विशिपतिपदिस्कन्दां व्याप्यमानासेव्यमानयोः कौ कृ उ विश पत्‌
ल्‌ पद स्कन्दिर इत्येतेभ्यो द्वितीयान्त उपपदे णमुल् स्यात् व्याप्यमाने आसेव्यमाने वा अर्थे गम्ये गेहादिद्रव्याणां विश्यादिक्रि
याभिः साकल्येन सम्बन्धो व्याप्तिः क्रियायाः पौनःपुन्यमासेवा गेहादिद्रव्याणां विश्यादिक्रियाभिः साकल्येन सम्बन्धो
व्याप्तिः क्रियायाः पौनःपुन्यमासेवा गेहानुप्रवेशमास्ते गेहेगेहमनुप्रपातम् गेहमनुप्रपातमनुप्रपातम् गेहानुप्र
पादम् गेहंगेहमनुप्रपादम् गेहमनुस्कन्दमनुस्कन्दम् नित्यवीप्सयोरिति द्वित्वं न भवति समासेन स्वभावतस्तयोरु
क्तत्वात् असमासे तु गेहस्य णमुलन्तस्य च व्याप्त्यर्थेण द्वित्वम् ५७ अस्यतितृषोः क्रियान्तरे कालेषु कौ कृ उ असु ञि
तृष् इत्येताभ्यां क्रियाव्यवधायकेऽर्थे वर्तमानाभ्यां कालवाचिषु द्वितीयान्तेषूपपदेषु णमुल् स्यात् द्व्यहात्यासं गाः पा
ययति द्व्यहमत्यासम् द्व्यहतर्षं गाः पाययति द्व्यहंतर्षम् अपपाययित्वा द्व्यहमतिक्रम्य पाययतीत्यर्थः अस्यतितृषोः
किम् द्व्यहमुपोष्य भुङ्क्ते क्रियान्तरे किम् अहरत्यस्य इषून् गतः कालेषु किम् योजनमत्यस्य गाः पाययति ५८
नाम्न्यादिशिग्रहोः कौ कृ उ आदिश ग्रह इत्येताभ्यां नामन् इत्येतस्मिन्द्वितीयान्त उपपदे णमुल् स्यात् दिशश्चाङ्पू
र्वः नामादेशमाचष्टे नामग्राहमाह्वयति ५९ अव्ययेऽयथाभिप्रेताख्याने कृञः क्त्वाणमुलौ कौ कृ उ डुकृञ् इत्ये
तस्मादव्यय उपपदे अयथाभिलषिताख्याने गम्ये क्त्वाणमुलौ भवतः ब्राह्मण पुत्रस्ते जातः किं तर्हि वृषल नीचैः
कृत्वाचष्टे नीचैः कृत्वा नीचैःकारम् उच्चैर्नामप्रियमाख्येयम् कन्या ते जाता किं तर्हि उच्चैः कृत्वाचष्टे उच्चैः कृत्वा उच्चैः

कारम् नीचैर्नीचैरप्रियमाख्येयम् अयथाभिप्रेताख्याने किम् उच्चैः कृत्वाचष्टे पुत्रस्ते जातः ६० तिर्यच्यपवर्गे कौ क्त उ कृ
स्तृ·प· कृञ् इत्येतस्मात्तिर्यक्शब्द उपपदे क्त्वाणमुलौ भवतः समाप्तावगम्यमानायाम् तिर्यक्कृत्य गतः तिर्यक्कारम् समा
९३ प्य गत इत्यर्थः अपवर्गे किम् तिर्यक्कृत्वा काष्ठं गतः अयुक्तोऽयं निर्देशः तिरश्चीति भवितव्यम् सौत्रो निर्देशः इति भाष्ये ६१
103 स्वाङ्गे तस्प्रत्यये कृभ्वोः कौ क्त उ कृञ् भू इत्येताभ्यां तस्प्रत्ययान्ते स्वाङ्गवाचक उपपदे क्त्वाणमुलौ भवतः मुखतःकृ
त्यागतः मुखतःकृत्वा मुखतःकारम् पृष्ठतोभूय तिष्ठति पृष्ठतोभूत्वा पृष्ठतोभावम् स्वाङ्गे किम् सर्वतः कृत्वागतः
तसि इति किम् मुखीभूयापगतः प्रत्यये किम् मुखतस्यतीति मुखतः मुखतः कृत्वागतः भाष्ये तु नेदं व्याख्यातम् ६२
नाधार्थप्रत्यये च्व्यर्थे कौ क्त उ कृञ् भू इत्येताभ्यां नाधार्थप्रत्ययान्ते च्व्यर्थक उपपदे क्त्वाणमुलौ भव
तः अनाना नानाकृत्वा गतः नानाकृत्य गतः नानाकारम् विनाभूय विनाभूत्वा विनाभावम् धार्थे द्विधाकृत्य द्विधा
कृत्वा द्विधाकारम् द्वैधंकृत्य द्वैधंकृत्वा द्वैधंकारम् द्विधाभूय द्विधाभूय द्विधाभूत्वा द्विधाभावम् प्रत्ययग्रहणं किम् हि
रुक्कृत्वा पृथग्भूत्वा च्व्यर्थ इति किम् नानाकृत्वा ६३ तूष्णीमि भुवः कौ क्त उ भू इत्येतस्मात्तूष्णींशब्द उपपदे क्त्वाणमु
लौ भवतः तूष्णींभूय तिष्ठति तूष्णींभूत्वा तूष्णींभावम् भूग्रहणं कृञो निवृत्त्यर्थम् भाष्ये तु नेदं व्याख्यातम् ६४ अन्वच्या
नुलोम्ये कौ क्त उ भू इत्येतस्माद्धातोरन्वगित्येतस्मिन्नुपपदे क्त्वाणमुलौ भवतः अनुकूलत्वे गम्यमाने अन्वग्भूय आ
स्ते अन्वग्भूत्वा अन्वग्भावम् आनुलोम्ये किम् अग्रतो भूत्वा तिष्ठति ६५ शकधृषज्ञाग्लाघटरभलभक्रमसहार्हास्त्य
र्थेषु तुमुन् कौ क्त उ शक् ञिधृषा ज्ञा ग्लै घट रभ डुलभष् क्रम षह अर्ह अस भू विद इत्येतेषु धातुषूपप
देषु धातोस्तुमुन् स्यात् शक्नोति भोक्तुम् धृष्णोति भोक्तुम् जानाति भोक्तुम् ग्लायति भोक्तुम् आरभते भोक्तुम् ल
भते भोक्तुम् प्रक्रमते भोक्तुम् उत्सहते भोक्तुम् अर्हति भोक्तुम् अस्त्यर्थेषु अस्ति भोक्तुम् भवति भोक्तुम् विद्यते ९३

भोक्तुम् इत्यादिसूत्रद्वयं भाष्ये न व्याख्यातम् ६६ पर्याप्तिवचनेष्वलमर्थेषु कौ कृ ३ पर्याप्तिवचनेष्वलमर्थेषु विशि
ष्टेषूपपदेषु धातोस्तुमुन् स्यात् पर्याप्तो भोक्तुम् अलं भोक्तुम् पारयति भोक्तुम् पर्याप्तिवचनेषु किम् अलं भु
क्त्वा अलमर्थेषु किम् पर्याप्तं भुङ्क्ते ६७ कर्तरि कृत् कौ कृ सर्व्वः कृत्प्रत्ययः कर्तरि कारके भवति कारकः कर्ता
नन्दनः ग्राही कर्तरि कृद्वचनमनादेशे स्वार्थे विज्ञानात् १ तत्र ल्युडादिप्रतिषेधो नानावाक्यत्वात् २ तद्धि बहुलेष्वेव कारक
ग्रहणम् ३ तद्व्भव्याद्यर्थम् ४ अपि देवदत्तेपाल्ल कृद्भिः समावेश वचनेत्वापकसमावेशस्य ५ एव कारक ग्रहणं व वार्थे ६
तद्व्भव्याद्यर्थम् ६८ भव्यगेयप्रवचनीयोपस्थानीयजन्याप्लाव्यापात्या वा कौ कृ भव्यादयः शब्दाः कर्तरि कारके वा नि
पात्यन्ते पक्षे तयोरेवेति भावकर्मणोः भू यत् भवतीति भव्यः भव्यमनेनेति वा गै यत् गेयो माणवकः साम्नाम्
गेयानि सामानि माणवकेन वच् अनीयर् प्रवचनीयो गुरुः प्रवचनीयो गुरुणा स्था उपस्थानीयः शिष्यो गुरोः
उपस्थानीयः शिष्येण गुरुः जनी एयत् जन्यः जन्यमनेन प्लुङ् एयत् आप्लाव्यः आप्ला
व्यमनेन पत्लृ एयत् आपात्यः आपात्यमनेन भाष्ये न इदं व्याख्यातम् ६९ लः कर्मणि च भावे चाकर्मकेभ्यः कौ
ति स्वा लकाराः सकर्मकेभ्यो धातुभ्यः कर्मणि कर्तरि च भवन्ति अकर्मकेभ्यो भावे कर्तरि च कर्मणि गम्यते भवता
ग्रामो देवदत्तेन कर्तरि गच्छति ग्रामं देवदत्तः अकर्मकेभ्यो भावे आस्यते देवदत्तेन कर्तरि ७० तयोरेव कृत्यक्तखलर्थाः कृत्य
त्ययः खलर्थकाश्च प्रत्ययाः सकर्मकेभ्यः कर्मणि अकर्मकेभ्यो भावे भवन्ति कृत्याभावे आसितव्यं भवता शयित
व्यम् कृत्याः कर्मणि कर्तव्यः कटो भवता भोक्तव्य ओदनो भवता क्तो भावे आसितं भवता शयितं भवता क्तः कर्म
णि कर्तव्यः कटो भवता भोक्तव्य ओदनो भवता क्तो भावे आसितं भवता शायितं भवता क्तः कर्मणि कृतः कटो भ
वता भुक्त ओदनः खलर्थो भावे ईषदाढ्यंभवं भवता दुराढ्यंभवम् खलर्थः कर्मणि ईषत्करः कटो भवता दुष्क

सू॰ प॰ १०४

104

रः करः इत्यादिसूत्रसमर्के माध्येतनवाख्यातम् ७१ आदिकर्म्मणि क्तः कर्त्तरि च कौ कृ आदिकर्म्मणि उक्तो यः क्तः स कर्त्त-
रि भवति चकाराद्भावकर्म्मणोः श्लिषशीङ्स्थासवसजनरुहजीर्य्यतिभ्यश्च कौ कृ गत्यर्थेभ्यो यान्तेभ्यः अकर्म्मकेभ्यः श्लि-
षादिभ्यः अयं क्तः स कर्त्तरि भवति चकाराद्भावकर्म्मणोः गतो ग्रामं देवदत्तः गतं देवदत्तेन गतो ग्रामो देवदत्तेन अकर्म्मके-
भ्यः ग्लानो भवान् ग्लानं भवता आसितो भवान् आसितं भवता श्लिष श्लिष्टो गुरुं भवान् श्लिष्टो गुरुर्भवता शीङ्
अतिशयितो गुरुं भवान् अतिशयितो गुरुर्भवता अतिशयितं भवता ष्ठा उपस्थितो गुरुं भवान् उपस्थितो गुरुर्भवता
उपस्थितं भवता आस उपासितो गुरुं भवान् उपासितो गुरुर्भवता उपासितं भवता वस अनूषितो गुरुर्भवता अनूषि-
तं भवता जन अनुजातो माणवको माणविकां अनुजाता माणविका माणवकेन अनुजातं माणवकेन रुह आरूढो
वृक्षं भवान् आरूढो वृक्षो भवता आरूढं भवता जृष् अनुजीर्णो वृषलीं देवदत्तः अनुजीर्णो वृषली देवदत्तेन अनुजी-
र्णं देवदत्तेन ७२ दाशगोघ्नौ संप्रदाने कौ कृ उ दाश गोघ्न इत्येतौ संप्रदानकारके निपात्येते दाशृ दाशन्ति तस्मै दाशः
अच्प्रत्ययः आगताय तस्मै ददाति गां घ्नन्ति गोघ्नोऽतिथिः टक्प्रत्ययः ७४ भीमादयोऽपादाने कौ कृ उ भयादिप्रत्यया-
न्ता भीमादयः शब्दा अपादाने साधवो वेद्याः भीमः भीष्मः अग्रिमसूत्रेण पञ्चदशानामेव वचनम् भीम भीष्म भयानक
वह वरु प्रस्कन्दन प्रपतन समुद्र स्रुव स्रुक् दृष्टिः रक्षः शङ्कु सङ्क मूर्त्ति खलति आकृतिगणोऽयम् ७५
ताभ्यामन्यत्रोणादयः कौ कृ उ उणादयः प्रत्ययाः संप्रदानापादानाभ्यामन्यस्मिन् कारके भवन्ति कृषितोऽसौ भ-
वति कृषिः तनोऽसौ भवति तन्तुः हन्तेतदिति वर्त्म चरितैतदिति चर्म ७६ क्तोऽधिकरणे च ध्रौव्यगतिप्रत्यवसा-
नार्थेभ्यः कौ कृ अकर्म्मकेभ्यः गत्यर्थेभ्यः भक्षणार्थेभ्यश्च यान्तेभ्यो यः क्तः सोऽधिकरणे भवति चकारादकर्म्मके-
भ्यः कर्त्तृभावयोरपि गत्यर्थेभ्यः कर्त्तृकर्म्मभावेष्वपि भक्षणार्थेभ्यः कर्म्मभावयोरपि ध्रौव्यार्थेभ्यः आसितमिदं त- १०४

स असितः सः आसितस्तेन गत्यर्थेभ्यः गतमिदं तस्य गतो ग्रामं सः गतो ग्रामस्तेन गतं तेन प्रत्यवसानार्थेभ्यः भुक्तमिदं
तस्य भुक्त ओदनस्तेन भुक्तं तेन ७७ लस्य कौ ति म्वा अधिकारो ऽयम् इत ऊर्ध्वमनुक्रमिष्यमाणो लकारस्य स्था
ने वाच्यम् लट् लिट् लुट् लृट् लेट् लोट् लङ् लिङ् लुङ् लृङ् इत्येतेषु दशसु लकारेषु स्थानित्वेन वर्णेषु टितामनु
बन्धविनिर्मुक्तानां सामान्यग्रहणे लः इति दशस्वलकारस्वतिविज्ञावस्था इत्येतत्काः वक्ष्यतितिप्तसझीत्यादि पवति
पवतः पवन्ति इत्यादि लादेशः सर्वप्रसङ्गो ऽविशेषात् १ अर्थवद्ग्रहणात्सिद्धम् २ अर्थवद्ग्रहणात्सिद्धमिति चेन्न वर्णग्र
हणेषु ३ तस्माद्विशिष्टग्रहणम् ४ लादेशो वर्णविधेः पूर्वविप्रतिषिद्धम् ५ क्रियते विशिष्टग्रहणे लस्येति इति भाष्ये
लु अस्येत्येवं निर्देशः कृतः अस्येति सर्वनाम्नाभावाद्यथामिथापीपरामृश्यते इति कैयटः ७८ तिप्तसझिसिप्थस्थ
मिप्वस्मस्तातांझथासाथांध्वमिड्वहिमहिङ् कौ ति म्वा तिप् तस् झि सिप् थस् थ मिप् वस् मस् त आताम् झ
थास् आथाम् ध्वम् इट् वहि महिङ् इत्येते ऽष्टादश आदेशा लस्य स्थाने भवन्ति तिप्सिप्मिपां पकार इत्कार्यार्थः इ
टष्टकार उच्चारणार्थो ऽदितिविशेषणार्थो महिङो ङकारस्तिङिति प्रत्याहारार्थः पवति पवतः पवन्ति पवसि पवथः पवथ
पवामि पवावः पवामः पवते पवेते पवन्ते पवसे पवेथे पवध्वे पवे पवावहे पवामहे पवमन्येषु लविष्टदार्थ्यम्
भाष्ये त्वनेदं व्याख्यातम् ७९ टित आत्मनेपदानां टेरे कौ ति म्वा लट् लिट् लुट् लृट् लेट् लोट् इत्येतेषां टितां लका
राणां स्थाने यान्यात्मनेपदानि तेषां टेः स्थाने एकारादेशः स्यात् पवते पवाते पक्तासाथे पत्स्यते पत्स्येते पवै टि
त एते आत्मनेपदेषानप्रतिषेधः १ आनेमुक्तनायकं तेषेटितज्ञामिधीसीरिवः डारौरस्सुविटदितः प्रकृते तद्गुणक
यम् १ कारिके यम् ८० थासः से कौ ति म्वा थास् इत्येतस्य टितो लकार स्य स्थाने यो थास्तस्य से इत्यादेशः स्यात् पव
से पेविषे पक्तासे पत्स्यसे इत्यादि सूत्रद्वयं भाष्ये त्वनव्याख्यातम् ८१ लिटस्तझयोरेशिरेच् कौ ति म्वा त झ इ

स्येतयोर्लिडादेशयोः क्रमेण एश् इरेच् इत्येतावादेशौ भवतः पेचे पेचिरे ८२ परस्मैपदानां णलतुसुस्थलथुसण
सू.प. ल्वमाः कौ ति स्था लिडादेशानां तिबादीनां नवानां णल् अतुस् उस् थल् अथुस् अ णल् व म इत्येते आ
१०५ देशाः क्रमेण भवन्ति पपाच पेचतुः पेचुः पपक्थ पेचथुः पेच पपाच पपच पेचिव पेचिम णलः णित्करणं स
र्वादेशार्थम् १ अकारस्याणित्करणं सर्वादेशार्थम् २ अकारवचनं समसंख्यार्थम् ३ प्रश्लिष्टनिर्देशोऽयम् अत्र
105 इति सोऽसावनेकाल् इति भाष्यम् ८३ विदो लटो वा कौ ति स्था विद् इत्येतस्माज्ज्ञानार्थात्परेषां लडादेशानां पर
स्मैपदानां णल् इत्येवमादयो नव आदेशाः क्रमेण वा भवन्ति वेद विदतुः विदुः वेत्थ विदथुः विद वेद विद्व
विद्म न च भवति वेत्ति वित्तः विदन्ति वेत्सि वित्थः वित्थ वेद्मि विद्वः विद्मः इत्यादि सूत्रद्वयं भाष्येण व्याख्यातम् ८४
ब्रुवः पञ्चानामादित आहो ब्रुवः कौ ति स्था ब्रूञ् इत्येतस्मात्परेषां लडादेशानां परस्मैपदानामादितः पञ्चानां णल्
इत्येवमादयः पञ्च आदेशाः क्रमेण वा भवन्ति तत्संनियोगेन ब्रूञ् इत्येतस्य आह इत्ययमादेशो भवति आह इत्य
यमादेशो भवति आह आहतुः आहुः आत्थ आहथुः न च भवति ब्रवीति ब्रूतः ब्रुवन्ति ब्रवीषि ब्रूथः पञ्चाना
मिति किम् ब्रूथ ब्रवीमि ब्रूवः ब्रूमः आदितः किं परेषां मा भूत् पुनर्ब्रुव इति परस्मैपदानामादेशो माभूदिति ८५
लोटो लङ्वत् कौ ति स्था लोट् इत्येतस्य लङ् इत्येतस्य लङः इव कार्यं भवति तेन तामादय आदेशाः सलोपश्च
पचताम् पचतम् पचाव पचाम लङ्वदतिदेशे केज्जेसमावस्य प्रतिषेधः १ ८६ एरुः कौ ति स्था लोट् इत्येतस्य
ये आदेशास्तेषामिकारस्य उकारादेशः स्यात् पचतु पचन्तु भाष्येणेदं व्याख्यातम् ८७ सेर्ह्यपिच्च कौ ति स्था
लोट् इत्येतस्य यः सिः इत्यादेशस्तस्य हिः इत्ययमादेशो भवति स च अपिद्भवति स्थानिवद्भावात्प्राप्ते पित्त्वे प्रतिषिध्यते
लुनीहि पुनीहि तदाणुहि राध्नुहि हिस्योत्वप्रतिषेधः १ नवोच्चारणसामर्थ्यात् २ ८८ वाच्छन्दसि कौ वे अ १५

तु वेदेहिरादेशोऽपिवास्यात् पृयोर्ध्यस्य जहृराणमेनः शुशुपि जहृपि प्रीणाहि भाष्येतनेदंव्याख्यातम् ८९ मेर्निः
कौ ति स्मा उत्वलोपयोरपवादः मीऽइत्येतस्य लोडादेशस्य निरित्ययमादेशः स्यात् पचानि पठानि ९० आमेतः कौ
ति स्मा प इत्येतस्य लोट्संबन्धिन आम् इत्ययमादेशः स्यात् पचेताम् पचेताम् पचन्ताम् इत्यादिसूत्रत्रयंभाष्येतन
व्याख्यातम् ९१ सवाभ्यांवामौ कौ ति स्मा आमोऽपवादः सकारवकाराभ्यामुत्तरस्य लोट्संबन्धिन एकारस्य यथासं
ख्यंव अम् इत्येतावादेशौ भवतः पचाव पचध्वम् ९२ आडुत्तमस्यापिच्च कौ ति स्मा लोट्संबन्धिन उत्तमपुरुषस्या
डित्ययमागमो भवति सचोत्तमपुरुषः पिद्भवति करवाणि करवाव करवाम करवै करवावहै ९३ एतऐ कौ ति
स्मा आमोऽपवादः लोट्संबन्धिन उत्तमस्य एकारादेशः स्यात् करवै करवावहै करवामहै एतऐत आडुणप्रतिषेधः १
नवावहिरङ्गलक्षणत्वात् २ ९४ लेटोऽडाटौ कौ वे श्र तृ लेट् इत्येतस्य अडट् आट् इत्येतावागमौ पर्यायेण भवतः जोषि
षत् तारिषत् मन्दिषत् पताति दिद्युत् उदधिं च्यावयाति इत्यादिसूत्राष्टकंभाष्येतन व्याख्यातम् ९५ आतऐ कौ वे श्र
तृ लेट्संबन्धिन आकारस्य ऐकारादेशो भवति प्रथममध्यमपुरुषात्मनेपदद्विवचनयोः मन्त्रयैते मन्त्रयैथे करवैते क
रवैथे आटस्तु न भवति विधानसामर्थ्यात् ९६ वैतोऽन्यत्र कौ वे श्र तृ आतऐ इत्येतद्विषयादन्यत्र लेट्संबन्धिन एकारस्य
ऐकारादेशो वा स्यात् ग्रहमेव पश्यन्नामीषी समाहानिषाये पृष्टान्तैः पाप्राणश्चामनौ न च भवति दत्तेद पसद्यतरम् अ
न्यत्रेतिकिम् मन्त्रयैते मन्त्रयैथे ९७ इतश्चलोपः परस्मैपदेषु कौ वे श्र तृ इ इत्येतस्य लेट्संबन्धिनः परस्मैपदवि
षयस्य वा लोपः स्यात् जोषिषत् तारिषत् मन्दिषत् न च भवति पताति दिद्युत् उदधिं च्यावयाति परस्मैपदेषु किम्
इङ्वहिमहिङ्गमामहत् ९८ स उत्तमस्य कौ वे श्र तृ स इत्येतस्य लेट्संबन्धिन उत्तमपुरुषान्त्यस्य वा लोपः स्यात्
करवाव करवाम न च भवति करवावः करवामः ९९ नित्यं ङितः कौ ति स्मा स इत्येतस्य ङकारेत्संज्ञक लकार

सू॰ प॰ ९८

106

सम्बन्धिनः परस्मैपदविषयस्योत्तमपुरुषान्त्यस्येधः १ नवोच्चारणसामर्थ्यात् २ ८८ वाछन्दसि कौ वै प्र त वेदेहिआदे
शोऽपिवास्यात् पुपोष्यस्यजहुराणमेनः पुपुषि जहुषि प्रीणीहि प्रीणाहि भाष्येतनैवव्याख्यातम् ८९ मेर्निः
कौ ति म्वा उत्वलोपयोरपवादः मीइत्येतस्यलोडादेशस्य निइत्ययमादेशः स्यात् पचानि पठानि ९० आमेतः
कौ ति म्वा ए इत्येतस्यलोड्सम्बन्धिनआम् इत्ययमादेशः स्यात् पचताम् पचेताम् पचन्ताम् इत्यादिसूत्रत्रये
भाष्येतनव्याख्यातम् ९१ सवाभ्यांवामौ कौ ति म्वा आमोऽपवादः सकारवकाराभ्यामुत्तरस्यलोड्सम्बन्धिनएकार
स्ययथासंख्येन वम् अम् इत्येतावादेशौ भवतः पचाव पचध्वम् ९२ आडुत्तमस्यापिच्च कौ ति म्वा लोड्सम्बन्धिनउत्तम
पुरुषस्य आट् इत्ययमागमोभवति सचोत्तमपुरुषः पिद्भवति करवाणि करवाव करवाम करवै करवावहै कर
वामहै ९३ एतऐ कौ ति म्वा आमोऽपवादः लोड्सम्बन्धिनउत्तमस्यएकारादेशः स्यात् करवै करवावहै क
रवामहै एतऐत्वेआड्गुणप्रतिषेधः १ नवावहिरङ्गलक्षणत्वात् २ ९४ लेटोऽडाटौ कौ वै प्र त लेट् इत्येतस्य
अट् आट् इत्येतावागमौपर्यायेणभवतः जोषिषत् तारिषत् मंदिषत् पताति दिद्युत् उदधिं च्यावयाति इ
त्यादिसूत्राष्टकंभाष्येतनव्याख्यातम् ९५ आतऐ कौ वै प्र त लेट्सम्बन्धिनआकारस्यऐकारादेशोभवति प्रथ
ममध्यमपुरुषात्मनेपदद्विवचनयोः मन्त्रयैते मन्त्रयैथे करवैते करवैथे आडस्त्नभवतिविधानसामर्थ्यात्
९६ वैतोऽन्यत्र कौ वै प्र त आतऐइत्येतद्विषयादन्यत्रलेट्सम्बन्धिनएकारस्यऐकारादेशोवास्यात् ग्रहमेवपश्च
नामीशै समाहानिघ्नाये गृह्यान्तै पात्राणिवान्तै नवभवति द्वन्द्वेदयस्त्वत्तरम् अन्यत्रेतिकिम् मन्त्रयैते मन्त्रयै
थे ९७ इतश्चलोपः परस्मैपदेषु कौ वै प्र त इ इत्येतस्यलेट्सम्बन्धिनः परस्मैपदविषयस्यवालोपः स्यात् जोषिषत्
तारिषत् मन्दिषत् नवभवति पताति दिद्युत् उदधिं च्यावयाति परस्मैपदेषुकिम् इडुवहिमहिडंमाभूत् ९८ स ९८

उत्तमस्य कौ वै अ तु म इत्येतस्य लेट्सम्बन्धिन उत्तमपुरुषान्त्यस्य वा लोपः स्यात् करवाव करवाम न वा भवति कर
वामः ८९ नित्यं ङितः कौ ति भ्वा स इत्येतस्य ङकारेत्संज्ञकलकारसम्बन्धिनः परस्मैपदविषयस्य उत्तमपुरुषान्त्य
स्यानित्यं लोपः स्यात् अपचाव अपचाम ९० इतश्च कौ ति भ्वा इ इत्येतस्य ङित्त्वकारसम्बन्धिनः परस्मैपदविषय
स्य लोपः स्यात् अपचत् पचेत् अपाक्षीत् अपक्ष्यत् परस्मैपदग्रहणं किम् अपचावहि अपचामहि ९१ तस्थस्थ
मिपां तान्तन्तामः कौ ति भ्वा तस् थस् थ मिप् इत्येतेषां ङित्त्वकारसम्बन्धिनां क्रमात् ताम् तम् त अम् इ
त्येते आदेशा भवन्ति अपचताम् अपचतम् अपचत अपचम् पचेताम् पचेतम् पचेत पचेयम् अपाक्ताम् अ
पाक्तम् अपाक्त अपाक्षम् अपक्ष्यताम् अपक्ष्यतम् अपक्ष्यत अपक्ष्यम् ९२ लिङः सीयुट् कौ ति भ्वा लि
ङादेशानां सीयुडित्ययमागमो भवति पचेत पचेयाताम् पचेरन् पक्षीष्ट पक्षीयास्ताम् पक्षीरन् यासुडादेः सीयुट्
प्रतिषेधः १ न वा वाक्यापकर्षात् २ अनादेशस्तु वचनम् ३ न वा प्रधानभावात् तद्विशेषणं लिङ्ग्रहणम् ४ ९३ यासु
ट्परस्मैपदेषूदात्तो ङिच्च कौ ति भ्वा सीयुटोऽपवादः लिङः परस्मैपदानां यासुडित्ययमागमो भवति स चोदात्तो भ
वति लिङादेशानां ङित्त्वं च भवति कुर्यात् कुर्याताम् कुर्युः यासुटो ङित्त्ववचनं विदर्थम् १ उदात्तवचनं च २ आग
मानुदात्तार्थं वा १ ९४ किदाशिषि कौ ति भ्वा आशिषि यो लिङ् तस्य यो यासुट् स कित्स्यात् पूर्वसूत्रे ङित्त्वमा
मेऽनेन प्रत्ययस्यैव कित्त्वं क्रियते न त्वागमस्य फलाभावात् इज्यात् इज्यास्ताम् इज्यासुः कित्त्वात्सम्प्रसारणं जाग
र्यात् जागर्यास्ताम् जागर्यासुः अत्र कित्त्वे न ङित्त्वबाधेन गुणो भवति आशिषि किम् जागृयात् वच्यात् इत्यादिसूत्र
वद्भाष्ये तद्व्याख्यातम् ९५ झस्यरन् कौ ति भ्वा झोऽन्तापवादः झकारस्य लिङादेशस्य रन् इत्ययमा
देशः स्यात् स च उदात्तः पचेरन् कृषीरन् ९६ इटोऽत् कौ ति भ्वा इट् इत्येतस्य लिङादेशस्य अत् इत्ययमादे

शः स्यात् पचेय यजेय कृषीय हृषीय तकारोमव्वस्सावोर्थः १०७ सुट्तिथोः कौ ति भ्वा लिङः सकारस्थकारयोः
सू॰ प॰ सुडागमः स्यात् कृषीष्ट कृषीयास्ताम् कृषीष्ठाः कृषीयास्थाम् सुडायासुडोवाधोनभवति लिङोया
१०७ सुट् तकारथकारयोः सुडितिविषयभेदात् तकारेउकारउच्चारणार्थः १०८ झेर्जुस् कौ ति भ्वा झोऽन्तापवादः
ङि इत्येतस्य लिङादेशस्य जुस् इत्ययमादेशः स्यात् पचेयुः १०९ सिजभ्यस्तविदिभ्यश्च कौ ति भ्वा सिजादेशात् अ
107 भ्यस्तसंज्ञकात् ज्ञानार्थाद्विदेश्च परस्य ङितः संबन्धिनो झि इत्येतस्य जुस् इत्ययमादेशः स्यात् अकार्षुः अहार्षुः अ
भ्यस्ताह अबिभयुः अजिह्रयुः अजागरुः विद अविदुः ११० आतः कौ ति भ्वा पूर्वसूत्रेणाद्धि नियमोऽयम् सि
चो लुकि आकारान्तादेव झि इत्येतस्य जुस् इत्ययमादेशः स्यात् अदुः अधुः जुस्य कारग्रहणं नियमार्थमिति वेत्तिः लग्रह
णम् १ ज्ञापकमिति वेत्यपयलक्षणप्रतिषेधः २ एवकारकरणेव ३ उत्तरसूत्रे इति शेषः लङ्ग्रहणेव ४ नैषदोषः
तुल्यजातीयस्य नियमः कश्च तत्यजातीयः योद्वाभ्यामनन्तरः आतश्च सिचश्च इति भाष्यम् १११ लङः शाकटायन
स्यैव कौ ति अ आकारान्तात्परस्य लङादेशस्य झेर्जुस् स्यात् शाकटायनस्याचार्यस्य मतेना अयुः अवुः अन्येषां मते
न अयान् अवान् ननु ङित इत्यनुवर्तते तत्र लङे वाकारान्तादनन्तरः संभवति नान्यत्र तत्किं लङ्ग्रहणेन एवा
न्तर्हि लङेव योलङ् तस्य यथा स्यात् लङ्भावेन योलङ् तस्य जुस्मा भूदिति यान्तु वान्तु बिभ्यतु जाग्रतु विद
न्तु एवकार उत्तरार्थः इत्यादि सूत्रत्रये भाष्येन व्याख्यातम् ११२ द्विषश्च कौ ति अ द्विष इत्येतस्मात्परस्य लङादेशा
स्य झेर्जुस्स्यात् शाकटायनस्य मतेन अद्विषुः अन्येषां मतेन अद्विषन् ११३ तिङ्शित्सार्वधातुकम् संज्ञाप्रदे
शाः ७ ३ ८४ कौ ति भ्वा तिङः शकारेत्संज्ञकाश्च प्रत्ययाः सार्वधातुकसंज्ञका भवन्ति नयति रोदिति स्वपिति
पवमानः यजमानः ११४ आर्द्धधातुकं शेषः संज्ञाप्रदेशः ७ ३ ८४ कौ ति भ्वा तिङः शितश्च अन्ये प्रत्यया धातोरि १०७

सूत्रार्थे विहिता आर्द्धधातुकसंज्ञका भवन्ति लविता लवितुम् लवितव्यम् धातोरिति किम् वृक्षत्वम् वृक्षता
आर्द्धधातुकसंज्ञायां धातुग्रहणम् १ क्रियमाणेऽपि धातुग्रहणे स्वादिप्रतिषेधः २ ११५ लिट्च कौ ति स्वा लिडा
देशास्तिङ् आर्द्धधातुकसंज्ञक एव भवति न तु सार्वधातुकसंज्ञकः पेचिथ शेकिथ जग्ले मम्ले इत्यादि सूत्रत्रये भाष्ये
न व्याख्यातम् ११६ लिङाशिषि कौ ति स्वा आशिषि यो लिङ् तदादेशास्तिङ् आर्द्धधातुकसंज्ञक एव भवति न तु
सार्वधातुकसंज्ञकः लविषीष्ट लविषीष्टाः पविषीष्ट पविषीष्टाः आशिषि किम् लुनीयात् ११७ छन्दस्युभय
था कौ वै स्र तु तिङः शितः अन्येव प्रत्यया धात्वधिकारे का छन्दसि सार्वधातुकोभयसंज्ञका भवन्ति उपस्थेयाम
पूमणम् सार्वधातुकत्वाद्विङः सलोपः आर्द्धधातुकत्वादेतम् वर्धन्तु त्वा सुष्टुतयः वर्धयन्तु इति प्राप्ते आर्द्धधातुकत्वा
ण्णिलोपः शेषस्य सार्वधातुकम् स्वस्तये तादृशम् क्तिनः सार्वधातुकत्वादसन्धेर्भावो न भवति इति ११८ सूत्राणि
भाष्ये ३ ४ १ व्याख्यातानि इति सूत्रपाठे तृतीयाध्यायस्य चतुर्थः पादः अध्यायश्च ङ्याप्प्रातिपदिकात् कौ स्त्र श्र ४
अधिकारोऽयम् आपञ्चमाध्यायपरिसमाप्तेः इतऊर्ध्वं यदनुक्रमिष्यामस्तत् ङ्यन्तादाबन्तात् प्रातिपदिकाच्चेत्यधिकृतम् ङी
प् ङीष् ङीन् इत्येतेषां सामान्येन ग्रहणं ङी इति टाप् डाप् चाप् इत्येतेषां सामान्येन ग्रहणमाविति वक्ष्यति स्वौज
सित्यादि गौरी कुमारी शार्ङ्गरवी अजा बहुराजा कारीषगन्ध्या दृषत् दृषद् आप् प्रातिपदिकग्रहणमङ्गभपद
संज्ञार्थम् १ यच्चयोश्च लगर्थम् २ ह्रस्वाः ह्रस्वावर्णस्वरयत्नत्वाणे व प्रत्ययविधौ तन्त्रे प्रत्ययार्थम् ३ ङ्याब्ग्रहणम
नर्थके प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणात् इति भाष्यम् प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रह
णम् १ ज्ञापकसिद्धं न सर्वत्र २ परिभाषे इमे २ स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङस्
ओसाम्ङ्योस्सुप् कौ स्त्र श्र ४ ङ्यन्तात् आबन्तात् प्रातिपदिकाच्च स्वादयः प्रत्यया भवन्ति सु उकार इत्

गौरी औ गौर्य्यौ जस् जकारइत् गौर्य्यः अम् गौरीम् औट् टकारइत् सुट्प्रत्याहारार्थः गौर्य्यौ गौरीभ्याम् गौरी
सू. प. भ्यः ङसि इकारङकारौ इतौ गौर्य्याः गौरीभ्याम् गौरीभ्यः ङस् ङकारइत् गौर्य्याः ओस् गौर्य्योः आम् गौरी
९८ णाम् ङि ङकारइत् गौर्य्याम् ओस् गौर्य्योः सुप् पकारः सुप्प्रत्याहारार्थः गौरीषु एवं कुमारी कुमार्य्यौ शार्ङ्ग
रवी शार्ङ्गरव्यौ इत्यादि खट्वा खट्वे खट्वाम् खट्वा खट्वया खट्वाभ्याम् खट्वाभिः खट्वायै खट्वाभ्याम् खट्वाभ्यः खट्वा
108 याः खट्वाभ्याम् खट्वाभ्यः खट्वायाः खट्वयोः खट्वानाम् खट्वायाम् खट्वयोः खट्वासु एवं वङ्गराजा कारीषग
न्ध्या इत्यादि दृषत् दृषद् दृषदौ दृषदः इत्यादि इत्संज्ञकाविशेषणार्थाः भाष्यतनेदं व्याख्यातम् ॥ ३ स्त्रि
याम् कौ स स्त्री अधिकारोऽयम् इतउर्ध्वं यदनुक्रमिष्यामः स्त्रीलिङ्गे तद्वेदितव्यम् वदतिप्रजापतिर्ह्याविति प्रजा
स्त्रियामिति स्त्र्यर्थोभिधाने वेहावादयो द्विवचनबहुवचनानेकप्रत्ययानुपपत्तिः १ स्त्र्यर्थस्य च प्रातिपदिकार्थत्वात् स्त्रि
यामिति लिङ्गानुपपत्तिः २ स्त्रीसमानाधिकरणादिति चेद्भूतादिष्वतिप्रसङ्गः ३ षट्संज्ञकेभ्यश्च प्रतिषेधः ४ सि
द्धन्तु स्त्रियाः प्रातिपदिकविशेषणत्वात् स्वार्थे टाबादयः ५ स्त्रीविषये आपोऽप्रसिद्धिरकारान्तादर्शनात् ६ सर्वेषा
न्तु स्वरवर्णेऽनुपूर्वी ज्ञानार्थ उपदेशः ७ स्तनकेशवती स्त्री स्याल्लोमशः पुरुषः स्मृतः उभयोरन्तरं यच्च तदभावे
नपुंसकम् १ लिङ्गात्स्त्रीपुंसयोर्ज्ञाने भ्रुकुंसे टाप् प्रसज्यते नत्वं खरकुटीः पश्य खट्वावृक्षौ न सिध्यतः २ नापुंसकं
भवेत्तस्मिंस्तदभावे नपुंसकम् असत्तु मृगतृष्णावद्गन्धर्वनगरं यथा ३ आदित्यगतिवत्सन्न वस्त्रान्तर्हितवच्च तत्
तु तयोस्तु तत्कृतं दृष्टा यथाकाशे तु ज्योतिषः ४ अन्योन्यसंश्रयं त्वेतत्प्रत्यक्षेण विरुध्यते नैवं सर्वलिङ्गानि
दृष्ट्वा कोऽध्यवसास्यति ५ संस्त्यानप्रसवौ लिङ्गमास्थेयौ स्वकृतान्ततः संस्त्याने स्त्यायतेर्ड्रट् स्त्री सूतेः सप् प्रस
वे पुमान् ६ तस्योक्तौ लोकतो नाम गुणो वा लुपि युक्तवत् साङ्ग्षट्कारिकाइमाः ७ अजाद्यतष्टाप् कौ स ९८

स्त्री अज इत्येवमादिभ्यः अकारान्तेभ्यश्च प्रातिपदिकेभ्यः स्त्रियां टाप्प्रत्ययः स्यात् अजा एडका पाचिका पाठिका
अजादिग्रहणं ङीपो ङीषश्च बाधनार्थम् तपरकरणं किम् कीलालपाः अजा एडका कोकिला चटका अश्वा
मूषिका बाला होडा पाका वत्सा मन्दा विलाता पूर्वापहाणा अपरापहाणा संभस्त्राजिनशणपिण्डेभ्यः
फलात् सदच्काण्डप्रान्तशतैकेभ्यः पुष्पात् शूद्रा चामहत्पूर्वा जातिः क्रुञ्चा उष्णिहा देवविशा ज्येष्ठा कनि
ष्ठा मध्यमा पुंयोगेऽपि मूलान्नञः दंष्ट्रा एते अजादयः शूद्रा चामहत्पूर्वा १ शूद्रा अमहत्पूर्वा किम् महाशू
द्री आभीरजातिवचनोऽयं महाशूद्रशब्दः अमहत्पूर्वग्रहणं स्त्रीप्रत्ययेष्वतदन्तविधिं ज्ञापयति जातिः २ जातिश्चेद
भिधीयते तदा टाबेव विधिः प्रतिषेधश्च इत्यर्थः जातिः किम् शूद्रस्य स्त्री शूद्री महती शूद्रा महाशूद्रा शूद्रा चा
महत्पूर्वा जातिः १ कौ स स्त्री ५ ऋन्नेभ्यो ङीप् कौ स स्त्री ऋकारान्तेभ्यः नकारान्तेभ्यश्च प्रातिपदिकेभ्यः स्त्रि
यां ङीप्प्रत्ययः स्यात् कर्त्री हर्त्री दण्डिनी वेदवादिनी भाष्ये तु नेदं व्याख्यातम् ६ उगितश्च कौ स स्त्री उ ऋ लृ इत्ये
तदित्संज्ञकेभ्यः प्रातिपदिकेभ्यः स्त्रियां ङीप् स्यात् भवती महती पचन्ती धातोरुगितः प्रतिषेधः १ उखास्रत्
पर्णधत् अञ्चतेश्चोपसंख्यानम् २ प्राची प्रतीची उगित्त्वञ्चतिग्रहणात् सिद्धमधातोः इति भाष्यम् ७ वनो र च
कौ स स्त्री ङ्वनिप् क्वनिप् वनिप् इत्येतदन्तेभ्यः प्रातिपदिकेभ्यः स्त्रियां ङीप् स्यात् रेफश्चान्तादेशः सुत्वरी पी
वरी शर्वरी ऋन्नेभ्य इति ङीप् सिद्धः रादेशमात्रं तत्सन्नियोगेन विधीयते वनो न हशः १ कौ स स्त्री हशन्ताद्धातो
र्विहितो यो वन् तदन्तान् ङीब्रेफादेशौ न भवतः सहयुध्वा अवावा बहुलं छन्दसि २ कौ वे अ व ङीप्रेफादेशश्च
मजरीरिषः यज्वनीरिषः रविधाने बहुव्रीहेरुपसंख्यानं प्रतिषिद्धत्वात् ३ अनो बहुव्रीहेः प्रतिषेधो पधालोपिनो
वा वचनम् ४ बहुव्रीहौ वा ३ कौ स स्त्री ८ पादोऽन्यतरस्याम् कौ स स्त्री पाद इत्येतदन्तात्प्रातिपदिकात् स्त्रि

सू॰प॰ ९६ 109

योवाऽडीश्स्यात् द्विपदी द्विपात् त्रिपदी त्रिपात् इत्यादिसूत्रद्वयं भाष्येऽनव्याख्यातम् ९६ डाहवि कौ स स्त्री पा
द इत्येतदन्तात्प्रातिपदिकात् ऋविवाव्यायोस्त्रियोस्त्रियां डाप् स्यात् द्विपदा ऋक् त्रिपदा ऋक् ऋचि किम् द्विप
दी स्त्री ९ नषट्स्वस्रादिभ्यः कौ स स्त्री षट्संज्ञकेभ्यः स्वस्रादिभ्यश्च स्त्रीप्रत्ययो न स्यात् पञ्च सप्त
नव दश स्वसा स्वसारौ दुहिता दुहितरौ स्वसृ दुहितृ ननान्दा यातृ मातृ तिसृ चतसृ इति स्वस्रादिः
षट्संज्ञकेभ्य उभौ न भवत इति वक्तव्यम् १ षट्संज्ञानामन्ते लुप्तेऽपि टाब्न स्यात् कस्मान्न स्यात् प्रत्याहाराच्चापासि
द्धेर्दोषाल्लिङ्गेन तस्मान्नोभौ १ कारिकेयम् अवयवप्रसिद्धेः समुदायप्रसिद्धिर्बलीयसी १ परिभाषेयम् ९ मनः
कौ स स्त्री मन् इत्येतदन्तात्प्रातिपदिकात् अत्रेभ्य इति प्राप्तो ङीप् न स्यात् दामा दामानौ दामानः सीमा सी
मानौ सीमानः अतिमहिमा अतिमहिमानौ अतिमहिमानः इत्यादिसूत्रद्वयं भाष्येऽनव्याख्यातम् ९ अनो
बहुव्रीहेः कौ स स्त्री अन् इत्येतदन्ताद्बहुव्रीहेः समासात् स्त्रियां ङीप् न स्यात् सुपर्वा सुपर्वा सुपर्वाणौ सुपर्वा
णः सुचर्मा सुचर्माणौ सुचर्माणः बहुव्रीहेः किम् अतिक्रान्ता राजानम् अतिराज्ञी ९२ डाबुभाभ्यामन्यत
रस्याम् कौ स स्त्री मन्नन्तात्प्रातिपदिकात् अन्नन्ताच्च बहुव्रीहेः स्त्रियां वा डाप् स्यात् सीमे सीमाः न च भवति
सीमा सीमानौ सीमानः बहुराजे बहुराजाः न च भवति बहुराजा बहुराजानौ अन्यतरस्यां ग्रहणाद्द्वयोरेवैत
स्यापि बहुव्रीहौ विकल्पः बहुधीवरी बहुधीवा ९४ अनुपसर्जनात् कौ स स्त्री अधिकारोऽयम् उत्तरोत्तरे
यदनुक्रमिष्यामोऽनुपसर्जनादित्यधिकृतम् वक्ष्यति टिड्ढाणञ्जिनादि कुरुचरी कुक्कुटी सूकरी अनुपसर्ज
नात् किम् बहुकुरुचरा बहुकुक्कुटा बहुसूकरा अनुपसर्जनग्रहणमनर्थकं प्रातिपदिकेन तदन्तविधिप्रति
षेधात् १ अनुपसर्जनाधिकारे जातेर्ङीष्विधाने स्वपरार्थोऽपसंख्यानम् इति ९६ सूत्राणि भाष्ये ४११ व्याख्या ९६

तानि १५ टिड्ढाणञ्द्वयसज्दघ्नञ्मात्रच्तयप्ठक्ठञ्कञ्क्वरपः कौ स्व स्वी अनुपसर्जनेषु टिदादितद्धितान्तादद्दन्
तात्प्रातिपदिकात्स्त्रियां ङीप् स्यात् टित् कुरुचरी देवी यत्र टित्स्थान्यतद्योजनमस्ति तत्र न ङीप् अस्लौत
टूचेति लिङ्गात् पचमाना ब्राह्मणी पठिता विद्या ढ सौपर्णेयी वैनतेयी अण् औपगवी कुम्भकारी अञ्
औत्सी वैदी द्वयसच् ऊरुद्वयसी दघ्नच् ऊरुदघ्नी मात्रच् ऊरुमात्री तयप् पञ्चतयी ठक् लाक्षिकी ठञ्
लावणिकी कञ् यादृशी क्वरप् इत्वरी ठग्रहणे सानुबन्धकस्योपसंख्यानम् १ अञ्ग्रहणमनर्थकं तदन्ताद्धि
ङीब्विधानम् २ न वा जात्यधिकारात् ३ अनधिकारे हि शुङ्गायोगाद्याख्यायां ङीन्प्रसङ्गः ४ इदमेव कर्तव्यम् तदप्यव
श्यं कर्तव्यम् अक्रियमाणे हि तस्मिन् वैदस्य भगिनी वैदी परत्वाज्जातिलक्षणो ङीष् ङीषेवापद्येत ङीप्पुनः सन्निय
त्वान्ङीन् ङीषं बाधते इति भाष्यम् ख्युन उपसंख्यानम् ५ नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्या
नम् १ इति भाष्यकृतः कौ स्व स्वी नञ् स्त्रैणी स्नञ् पौंस्नी ईकक् याष्टीकी ख्युन् आढ्यंकरणी तरुणी तलु
नी नञ्स्नञीकक्ख्युंस्तरुणतलुनानामुपसंख्यानम् १ इति काशिकाकृतः करपख्युनाम् इति वमत्रे पठः १६
यञश्च कौ स्व स्वी यञ् इत्येतदन्तात्प्रातिपदिकात्स्त्रियां ङीप् स्यात् गार्गी वात्सी अपत्यग्रहणं द्वीपाद्यञः
प्रतिषेधार्थम् १ द्वैप्या नापत्याधिकारपठितः किन्तु प्राग्दीव्यतीयः अनपत्याधिकारस्थात्तु ङी
प् १ कौ स्व स्वी न तर्हि वक्तव्यम् न वक्तव्यमनेन विधीयते कस्तर्हि यञोऽपत्य इति कथन्तर्हि कञ्करयोः यञश्चे
ति इति भाष्यम् १७ प्राचां ष्फ तद्धितः कौ स्व स्वी प्राचामाचार्याणां मतेन यञन्तात्प्रातिपदिकात्स्त्रियां ष्फप्र
त्ययः स्यात् स च तद्धितसंज्ञकः स्यात् गार्ग्यायणी अन्येषां मतेन गार्गी षकारो ङीषर्थः अग्रिमसूत्रस्थं सर्व
त्रग्रहणमिहापकृष्यते तेन आवट्यादिति परमपि चापं बाधित्वा प्राचां मतेन ष्फो भवति आवट्यायनी तद्धित

सू.प.
११०
110

वचनेषितः प्रातिपदिकादेकारार्थम् १ नैतदस्ति प्रयोजनम् षित्करणसामर्थ्यादेवात्रैकारो भविष्यति इति भाष्यम् १८
सर्वत्र लोहितादिकतन्तेभ्यः कौ सू स्त्री लोहितादिभ्यः कतशब्दपर्यन्तेभ्यो नित्यं स्त्रियां ष्फः स्यात् लौहित्यायनी
शांसित्यायनी कतन्तेभ्य इति बहुव्रीहितत्पुरुषयोरेकशेषः तेन शाकल्यायनीति सिद्धम् लोहितादिषु शाकल्यस्यो
पसंख्यानम् १ कण्वात्तु शकलः पूर्वः कतादुत्तर इष्यते पूर्वोत्तरौ तदन्तादी ष्फाणौ तत्र प्रयोजनम् १ कारिकेयम् १९
कौरव्यमाण्डूकाभ्यां च कौ सू स्त्री क्रमेण टाप्ङीषोरपवादः कौरव्य माण्डूक इत्येताभ्यां स्त्रियां ष्फः स्यात् कौ
रव्यायणी माण्डूकायनी कौरव्यमाण्डूकयोरासुरेरुपसंख्यानम् १ आसुरायणी आसुरेरुपसंख्यानम् १ कौ
सू स्त्री छस्येति वक्तव्यम् २ इतश्चेति शैषिकस्याणोऽपवादः आसुरिणा प्रोक्तः आसुरीया कल्पः॥ शैषिकेष्वर्थे
षु स्त्राणि प्रासेछ प्रत्यय इष्यते १ इति काशिका २० वयसि प्रथमे कौ सू स्त्री प्रथमवयोवाचकात् स्त्रियां ङीप् स्या
त् कुमारी किशोरी प्रथमे किम् वृद्धा स्तनन्धयेव शिशुः कथं कन्या कन्यायाः कनीन चेति निर्देशात् भवति व
यस्यचरम इति वक्तव्यम् २ कौ सू स्त्री वधूटी चिरण्टी द्वितीयवयोवचनावेतौ २१ द्विगोः कौ सू स्त्री अदन्ताद्द्वि
समासात् स्त्रियां ङीप् स्यात् पञ्चमूली दशकुमारी कथं त्रिफला अजादिषु पठ्यते भाष्ये त्वनेदं व्याख्यानम् २२ अ
परिमाणविस्ताचितकम्बल्येभ्यो न तद्धितलुकि कौ सू स्त्री अपरिमाणान्ताद्द्विगोः बिस्त आचित कम्बल्य इत्ये
तदन्ताच्च द्विगोस्तद्धितलुकि सति स्त्रियां ङीप् न स्यात् सर्वतो मानं परिमाणम् कालः संख्या च न परिमाणम् द्वि
वर्षी पञ्चभिरश्वैः क्रीता पञ्चाश्वा तेन क्रीतमिति ठञ् अध्यर्धपूर्वद्विगोर्लुगसंज्ञायामिति तस्य लुक् द्विबिस्ता
आचिता द्विकम्बल्या अपरिमाणान्तात् किम् द्व्याढकी। तद्धितलुकीति किम् समाहारे मा भूत् पञ्चाश्वी २३ का
ण्डान्तात् क्षेत्रे कौ सू स्त्री काण्डशब्दान्ताद्द्विगोस्तद्धितलुकि सति क्षेत्रे वाच्ये न ङीप् स्यात् द्वे काण्डे प्रमाणमस्याः ११०

दिकाराद्गादेव भक्तिः द्वैवेकिम् द्विकाण्डी रज्जुः इत्यादिसूत्रद्वये भाष्ये तन्न व्याख्यातम् २४ पुरुषात्प्रमाणेऽन्यतरस्यां
कौ स्व स्त्री प्रमाणेयः पुरुषशब्दस्तदन्ताद्द्विगोस्तद्धितलुकि सति ङीप् वा न स्यात् द्विपुरुषी द्विपुरुषा अपरिमाणमनन्तात्रि
त्वान्निषेधः २५ बहुव्रीहेरूधसो ङीष् कौ स्व स्त्री ऊधस इत्येतदन्ताद्बहुव्रीहेः स्त्रियां ङीष्प्रत्ययः स्यात् घटोध्नी कुण्डोध्नी
न ङितिसमासान्ते कृते ऽनो बहुव्रीहेरिति ङीपो निषेधे डाबुभाभ्यामिति डापि च प्राप्ते ऽनेन ङीष् बहुव्रीहेः किम्
प्राप्तमूधः प्राप्तोधाः कुण्डोध्नी न वा रो लिङ्गाधिकारे १ न वा समासान्ताधिकारे स्त्रीग्रहणात् २ इतरथाहि कविधिप्रसङ्गः ३ २६
संख्याव्ययादेर्ङीप् कौ स्व स्त्री ऊधस् इत्येतदन्तात्संख्यादेरव्ययादेश्च बहुव्रीहेः स्त्रियां ङीप् स्यात् द्व्यूध्नी त्र्यूध्नी आदि
ग्रहणं किम् द्विविधोध्नी अत्रापि यथा स्यात् भाष्ये तन्नेदं व्याख्यानम् २७ दामहायनान्ताच्च कौ स्व स्त्री दामन् हाय
न इत्येतदन्तात्संख्यादेर्बहुव्रीहेः स्त्रियां ङीप् स्यात् द्विदाम्नी डाब्विकल्पे ङीन्निषेधे च प्राप्ते ऽनेन ङीप् त्रिहायणी चतुर्हा
यणी वाला डापि प्राप्ते ऽनेन ङीप् दामहायनान्तात्संख्यादेः १ हायनो वयसि स्मृतः २ इति भाष्यकृतः द्विहायना शाला
नवैष वर्षो वादी ??तमपि वयोवाचिनय च २ इति भाष्यकृतः त्रिहायना चतुर्हायना शाला वयोवाचकस्यैव ङीप् इष्यते
वेष्यते १ कौ स्व स्त्री २८ अन उपधालोपिनः स्त्रियां वा ङीप् स्यात् बहुराज्ञी बहुराज्ञ्यौ पक्षे डाप् ङीन्निषेधौ बहुराजा ब
हुराजे बहुराजानौ अन इति किम् बहुमत्स्या उपधालोपिनः किम् सुपर्वाणौ सुपर्वा सुपर्वे इत्यादिसूत्रद्वयं भाष्ये त
न्न व्याख्यातम् २९ नित्यं संज्ञाछन्दसोः कौ स्व स्त्री अन् इत्येतदन्ताद्बहुव्रीहेः संज्ञायां छन्दसि च नित्यं ङीप् स्यात् सुरा
ज्ञी नाम ग्रामः छन्दसि पञ्चदाम्नी संज्ञाछन्दसोः किम् अवमूर्द्धा ३० केवलमामकभागधेयपापापरसमानार्यकृतसु
मङ्गलभेषजाच्च कौ स्व स्त्री केवल इत्येवमादिभ्यः संज्ञायां छन्दसि च ङीप् स्यात् केवली केवला इति लोके मामकी
मामका इति लोके भागधेयी भागधेया इति लोके पापी पापा इति लोके अपरी अपरा इति लोके समानी समाना इति

सू.प. १११

|||

लोके आर्य्योकृति आर्य्यकृताइतिलोके सुमङ्गली सुमङ्गलाइतिलोके भेषजीभेषजाइतिलोके नियमार्थेयमाइम :
मामकशब्दात्संज्ञाछन्दसोर्वे कुमामूत मामिकावुद्धिरितिइतिभाष्यम् २ रात्रेश्चाजसौ ङौ वे अ व जसविषयादन्य
त्रसंज्ञायांछन्दसिवर्णविशब्दान्ङीप्स्यात् यारात्रीसृष्टारात्रीभिः अजसौकिम् यास्तारात्रयः अजसादिष्वितिवक्तव्यम् १
ङौ वै अ च रात्रिसहोषिता ३२ अन्तर्वत्पतिवतोर्नुक् ङौ स्त्री अन्तर्वत् पतिवत् इत्येतौनिपात्येते तयोःस्त्र
स्त्रियांनुगागमः स्यात् अन्तर्वत्नी पतिवत्नी अत्रेभ्यइतिङीप् अन्तर्वत्पतिवदितिगर्भभर्तृसंयोगे १ इदमामूत पा
तिमतीपृथिवी अन्तास्याःशालायांवठोऽस्ति अन्तःशब्दस्यास्तिसामानाधिकरण्यंनास्ति अतोनमतुप् वाच
छन्दसिनुग्वक्तव्यः २ अन्तर्वती अन्तर्वत्नी पतिवती पतिवत्नी अन्तर्वत्पतिवतोर्नुक्मतुब्वत्वेनिपातनात् गर्भिः
एणाजीवपत्नीवचावचछन्दसिनुग्भवेत १ कारिकेयम् ३३ पत्युर्नोयज्ञसंयोगे ङौ स्त्री पति इत्येतस्यस्त्रियांन
काराऽन्तादेशःस्यात् यज्ञेनसंबन्धेसति अत्रेभ्योङीप् वशिष्ठस्यपत्नी वशिष्ठकर्तृकयज्ञफलभोक्त्रीत्यर्थः य
ज्ञसंयोगेकिम् ग्रामस्यपतिरियम् कथंतर्षजकस्यपत्नीति उपमानात्सिद्धम् पत्नीवपत्नी इतिभाष्यम् ३४ विभा
षासपूर्वस्य ङौ स्त्री पति इत्येतदन्तस्यविद्यमानपूर्वस्यानुपसर्जनस्यस्त्रियांवानकारादेशःस्यात् अत्रेभ्योङीप्
वृद्धपतिः वृद्धपत्नी सपूर्वस्यकिम् पतिरियंग्रामस्य पत्युःसपूर्वाउपसर्जनसमासउपसंख्यानम् १ सिद्धन्तुप
त्युःप्रातिपदिकविशेषणत्वात् २ ३५ नित्यंसपत्न्यादिषु ङौ स्त्री सपत्नी इत्येवमादिषुनित्यंनकारादेशः
स्यात् समानःपतिरस्याः सपत्नी निपातनात्समानस्यसादेशः एकपत्नी समानादिष्वितिवक्तव्यम् १ इतिका
शिका समावार्थेसपत्न्यादिषित्ववक्तम समान एक वीर पिण्ड श्व भ्रातृ भद्र पुत्र दासाच्छन्दसि इतिसमाना
दिः भाष्येनिर्देशत्वेनव्याख्यातम् ३६ पूतक्रतोरैच ङौ स्त्री पूतक्रत इत्येतस्यस्त्रियामैकारादेशःस्यात् ङीप्च |||

पूतक्रतोः स्त्री पूतक्रतायी पूतक्रतादीनां प्रयोगप्रकरणे वचनम् १ इह न भवति पूताः क्रतवो यया सा पूतक्रतुः लि
ङ्ग सन्नियोगेनादेशानां वचने लिङ्गलुकि तन्नत्वप्रसङ्गः २ सर्वत्रागमादेशानां लुकि तन्नत्वप्रसङ्ग इत्येव इति भाष्यकृ
तः सिद्धत्वागमादेशानामङ्गतः स्त्रीप्रकरणवचनात् ३ सिद्धत्वागमादेशानामङ्गतो वचनादित्येव २ लिङ्गलुकि वा प्र
कृति प्रत्यापत्तिवचनम् ४ लुकि प्रत्यापत्तिवचनमित्येव ३ तत्र हि वक्तव्यम् न वक्तव्यम् सन्नियोगशिष्टानामन्यतरापा
ये उभयोरप्यभावः इति भाष्यम् ३७ वृषाकप्यग्निकुसितकुसिदानामुदात्तः कौ स स्त्री वृषाकपि अग्नि कुसित कु
सिद इत्येतेषां स्त्रियामुदात्त ऐकारादेशो ङीप् च स्यात् वृषाकपायी अग्नायी कुसितायी कुसिदायी पुंयोगादेव नेह
वृषाकपिः स्त्री इत्यादिसूत्रद्वये भाष्येऽनन्वाख्यानम् ३८ मनोरौ वा कौ स स्त्री मनु इत्येतस्य औकारादेश उदात्तैका
रादेशश्च वा स्यात् ङीप् च मनोः स्त्री मनावी मनायी मनुः ३९ वर्णादनुदात्तात्तोपधात्तो नः कौ स स्त्री वर्णवाची यो ऽ
नुदात्तान्तस्तकारोपधस्तस्माद्वा ङीप् स्यात् तकारस्य च नकारादेशः स्यात् एता एनी श्येता श्येनी हरिता हरिणी रोहिता
रोहिणी वर्णानां णतिनितान्तानामिति फिषेनाद्युदात्तत्वे वर्णात् किम् प्रकृता अनुदात्तात् किम् श्वेता घृतादिरन्तोदा
त्तः तोपधात् किम् अन्यतो ङीषं वक्ष्यति अत इत्येव शितिः असितपलितयोः प्रतिषेधो वक्तव्यः १ असिता पलिता अ
सितपलितयोश्च १ कौ स स्त्री छन्दसि क्नमेके २ कौ स स्त्री वेदे असितपलितयोस्तकारस्य क्नादेशो भव
ति असिक्नीकानाम् वर्णान्ङीब्विधाने पिशङ्गान्डुपसंख्यानम् ३ पिशङ्गी पिशङ्गा उपसंख्यानम् ३ कौ स स्त्री ४०
अन्यतो ङीष् कौ स स्त्री वर्णवाची यो ऽनुदात्तान्तस्तकारोपधादन्यस्ततः स्त्रियां ङीष् स्यात् सारङ्गी कल्माषी वर्णादि
त्येव खट्वा अनुदात्तादित्येव कृष्णा इत्यादिसूत्रद्वये भाष्येऽनन्वाख्यानम् ४१ षिद्गौरादिभ्यश्च कौ स स्त्री षकारेत्संज्ञ
केभ्यः गौरादिभ्यश्च प्रातिपदिकेभ्यः स्त्रियां ङीष् स्यात् नर्तकी खनकी गौरी मत्सी गौर मत्स मनुष्य शृङ्ग पिल

सू॰प॰ ११२

112

ल हय गवय मुकय ऋष्य नुट तक्ण द्रुण द्रोण हरिण काकण पटर उणक आमलक कुवल बिम्ब बदर कर्क-
र तर्कार शर्कार पुष्कर शिखण्ड सलद शष्कण्ड सनन्द सुषम सुषव अलिन्द गडुल षाण्डश आढक आनन्द
आश्वत्थ सृपाट आपाचिक शष्कुल सूर्म्म सूर्प सूच यूष यूथ सूप यूप मेथा वल्लक धातक सल्लक मालक मालत
सालक वेतस वृस अतस उभय भृङ्ग मह मठ छेद पेश मेद श्वन् तक्षन् अनडुही अनड्वाही एषणः करणे देह देहल
काकादन गवादन तेजन रजन लवण औद्गाहमानि गोतम पारक अयःस्थूण भौरिकि भौलिकि भौलिङ्गि या-
न मेध आलम्बि आलजि आलब्धि अलादि केवाल आपक आरट नट टोट नोट मूलाट शातन पोतन पातन
पाठन आस्तरण अधिकरण अधिकार आग्रहायणी प्रत्यवरोहिणी सेचन सुमङ्गलात्संज्ञायाम् अण्डर सुन्दर म-
ण्डल मन्थर मङ्गल पट पिण्ड षण्ड ऊर्द गूर्द शम सूद आर्द्र हृद पाण्ड भाण्ड लोहाण्ड कदर कन्दर कदल त-
रुण तलुन कल्माष बृहत् महत् सोम सौधर्म रोहिणीनक्षत्रे रेवतीनक्षत्रे विकल निष्फल पुष्कल कटाच्छ्रोणिवचने
पिप्पल्यादयश्च पिप्पली हरीतकी कोशातकी शमी वरी पृथिवी क्रोष्टु मातामह पितामह गौरादिः ४२ जानपदकु-
ण्डगोणस्थलभाजनागकालनीलकुशकामुककबराद्वृत्त्यमत्रावपनाकृत्रिमाश्राणास्थौल्यवर्णानाच्छादनायोविकारमै-
थुनेच्छाकेशवेशेषु कौ सु स्त्री जानपदादिभ्य एकादशभ्यः प्रातिपदिकेभ्यः क्रमाद्वृत्त्यादिष्वेकादशस्वर्थेषु स्त्रियां ङी-
ष् स्यात् जानपदी वृत्तिश्चेत् अन्या जानपदी उदात्तादिपाठादन्तोदात्तम् इति स्वरे विशेषः कुण्डी अमत्रं चेत् अ-
न्या कुण्डा गोणी आवपनं चेत् अन्या गोणा स्थली अकृत्रिमा चेत् अन्या स्थला भाजी श्राणा चेत् अन्या भाजा नागी
स्थूला चेत् अन्या नागा गुणवचनोऽयम् जातिवचनात्तु सामान्यतो ङीष् भवति काली वर्णश्चेत् अन्या काला नीली अना-
च्छादनं चेत् अन्या नीला कुशी अयोविकारश्चेत् अन्या कुशा कामुकी मैथुनेच्छा चेत् अन्या कामुका कबरी केशवेशश्चेत् ११२

अश्माकवराबीलादोषधौ १ कौ स स्त्री नीलीओषधिः प्राणिनि च २ कौ स स्त्री नीलीगौः संज्ञायां वा ३ कौ स स्त्री
नीलीनीला ४२ शोणात्प्राचाम् कौ स स्त्री शोण इत्येतस्मात्प्राचां मतेन स्त्रियां ङीष् स्यात् शोणी अन्येषां मतेन
शोणा भाष्येतनेदं व्याख्यातम् ४४ वोतो गुणवचनात् कौ स स्त्री उकारान्ताद्गुणवचनात् स्त्रियां वा ङीष् स्यात् पट्वी
पटुः मृद्वी मृदुः उतः किम् शुचिः गुणवचनात्किम् आखुः गुणवचनान्ङीषुदात्तार्थम् १ खरुसंयोगोपधप्रति
षेधश्च २ खरुरियं ब्राह्मणी संयोगोपधात् पाण्डुरियम् खरुसंयोगोपधान्न १ कौ स स्त्री सत्वे निविशतेऽपैति
पृथग्जातिषु दृश्यते आधेयश्चाक्रियाजश्च सो सत्वप्रकृतिर्गुणः १ कारिकेयम् उपैत्यन्यज्जहात्यन्यद्दृष्टो द्रव्यान्तरेष्व
पि वाचकः सर्वलिङ्गानां द्रव्यादन्यो गुणस्स्मृतः १ कारिकेयमपरस्य ४५ बह्वादिभ्यश्च कौ स स्त्री बहु इत्येवमादिभ्यः
स्त्रियां वा ङीष् स्यात् बह्वी बहुः पद्धतिः पद्धती बहु पद्धति अञ्चति अङ्कति अंहति शकटि शक्तिः शक्तिः शाहे।
शारि वारि राति राधि शाधि अहि कपि यष्टि मुनि इतः प्राण्यङ्गात् कृदिकारादक्तिनः सर्वतोऽक्तिन्नर्थादित्येके च
ण्ड अराल कृपण कमल विकट विशाल विशंकट भरुज ध्वज चन्द्रभागान्नद्याम् कल्याण उदार पुराण अहन्
क्रोड नख खुर शिखा वाल शफ गुद आकृतिगणोऽयम् तेन भाग गल राग इत्यादिस्त्वत्रयं भाष्येतनव्याख्यातम् ४६
नित्यं छन्दसि कौ वै ष व बह्वादिभ्यश्छन्दसि स्त्रियां नित्यं ङीष् स्यात् बह्वीनामोषधीनाम् नित्यग्रहणमुत्तरार्थम् ४७
भुवश्च कौ वै ष व भू इत्येतदन्ताच्छन्दसि स्त्रियां नित्यं ङीष् स्यात् विभ्वीच प्रभ्वीच उतरस्मनुवर्ततेतो नेह भवति स्वयंभूः
भुवद्रस्तवुङ्न्देशः सौत्रः ४८ पुंयोगादाख्यायाम् कौ स स्त्री या पुमाख्या पुंयोगाद्धेतोः स्त्रियां वर्ततेतन्नतो ङीष् स्यात् गोप
स्य स्त्री गोपी गणकी पुंयोगात्किम् देवदत्ता आख्याग्रहणं किम् परिशिष्टा गोपालिकादीनां प्रतिषेधः १ गोपालि
वा पशुपालिका पालकान्तान्न १ कौ स स्त्री पुंयोगादाख्यायां तद्धितलुग्वचनम् २ विभाषालुग्वक्तव्यः ३ सवन

समासान्तावबनाच्चाकारान्तानुपपत्तिः ४ सूर्य्याद्देवतायांचाप् ५ कौ सू स्त्री सूर्य्यस्य स्त्री सूर्य्या देवतायांकिम् सूरीकुन्ती
सू.म. मानुषीयम् ४९ इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्य्याणामानुक् कौ सू स्त्री इन्द्रादीनामानुगामः
११३ स्यात् ङीष्च इन्द्राणी वरुणानी भवानी शर्वाणी रुद्राणी मृडानी महद्धिमम् हिमानी महदरण्यम् अरण्यानी
113 दुष्टोयवः यवानी यवनानांलिपिः यवनानी मातुलानी आचार्य्यानी पुंयोगेङीषुपूर्वेणसिद्ध आगममात्रंविधीयते
पुंयोगाद्यत्रनास्तितत्रभूत्भयम् हिमारण्ययोर्महत्त्वे १ कौ सू स्त्री यवाद्दोषे २ कौ सू स्त्री यवनाल्लिप्याम् ३ कौ सू
स्त्री उपाध्यायमातुलाभ्यांवा ४ उपाध्यायानी उपाध्याया मातुलानी मातुली मातुलोपाध्याययोरानुग्वा ४ कौ सू
स्त्री मुद्गलाच्छन्दसिलिच्च ५ रथीरभून्मुद्गलानी आचार्य्यादणत्वंच ६ कौ सू स्त्री आचार्य्यानी अर्य्यक्षत्रियाभ्यांवा ७
कौ सू स्त्री अर्य्याणी अर्य्या क्षत्रिया ५० क्रीतात्करणपूर्वात् कौ सू स्त्री क्रीत इत्येतदन्तादनुपसर्जनात्करणपूर्वा
त्प्रातिपदिकात्स्त्रियांङीष्स्यात् वस्त्रक्रीती अत्रवृत्तयेः प्राक्समासः करणपूर्वात्किम् सुक्रीता अतइत्येव धनेनक्री
ता धनक्रीता कर्त्तृकरणेकृताबहुलमितिबहुलग्रहणात्सुबुत्पत्तेरनन्तरंसमासः ५१ क्तादल्पाख्यायाम् कौ सू स्त्री
क इत्येतदन्तात्करणपूर्वात्प्रातिपदिकात्स्त्रियांङीष्स्यात् समुदायेनाल्पत्वेद्योत्ये अभ्रलिप्ती द्यौः अल्पाख्यायांकिम्
चन्दनानुलिप्ताब्राह्मणीभाष्येतुनेदंव्याख्यातम् ५२ बहुव्रीहेश्चान्तोदात्तात् कौ सू स्त्री क्त इत्येतदन्तादन्तोदात्ताद्बहु
व्रीहेः स्त्रियांङीष्स्यात् शङ्खभिन्नी ऊरुभिन्नी बहुव्रीहेःकिम् पादपतिता अन्तोदात्तात्किम् वस्त्रच्छन्ना अन्तोदात्ते
जातप्रतिषेधः १ दन्तजाता जाता न्तान्न १ कौ सू स्त्री पाणिगृहीत्यादीनांविशेषे २ पाणिगृहीतीभार्य्या अन्यापाणि
गृहीता पाणिगृहीतीभार्य्यायाम् २ कौ सू स्त्री बहुलंतणिप्रवृद्धविलूनाद्यर्थम् बहुलंसंज्ञाछन्दसोः १ इतिका
शिका प्रवृद्धविलूनी प्रवृद्धविलूना नायंबहुव्रीहिः किन्तुकर्मधारयः अन्तोदात्तादबहुनञ्सुकालसुखादिपूर्वात् ४ ११३

बहु बहुकृता नञ् अकृता सु सुकृता काल मासजाता सुखादि सुखजाता दुःखजाता जातिपूर्वाद्वा ५ जाति
पूर्वादितिवक्तव्यम् ३ कौ स स्त्री ५३ अस्वाङ्गपूर्वपदाद्वा कौ स स्त्री क्त इत्येतदन्तादन्तोदात्तादस्वाङ्गपूर्वपदादङ
ङीष्स्त्रियांवाङीष्स्यात् शाकजग्धी शाकजग्धा पलाण्डुभक्षिती पलाण्डुभक्षिता सुरापीती सुरापीता भाष्येत
नेदंव्याख्यातम् ५४ स्वाङ्गाच्चोपसर्जनादसंयोगोपधात् कौ स स्त्री असंयोगोपधमुपसर्जनंयत्स्वाङ्गं तदन्तात्प्रातिप
दिकात्स्त्रियांवाङीष्स्यात् चन्द्रमुखी चन्द्रमुखा कान्ता सुकेशी अतिकेशा रथ्या सुस्तनी सुस्तना अतिमा स्वाङ्गा
त्किम् बहुयवा उपसर्जनात्किम् बहुशिखा असंयोगोपधात्किम् सुगुल्फा अङ्गगात्रकण्ठेभ्यइतिवक्तव्यम् १ इति
काशिका कौ स स्त्री मृद्वङ्गी मृद्वङ्गा मृदुगात्री मृदुगात्रा स्निग्धकण्ठी स्निग्धकण्ठा अद्रवम्मूर्तिमत्स्वाङ्गंप्राणि
स्थमविकारजम् अतत्स्थंतत्रदृष्टंचतस्यचेत्तत्तथायुतम् १ पारिभाषिकत्रिविधस्वाङ्गलक्षणकारिकेयम् अद्रवंकिम्
बहुकफा मूर्तिमत्किम् बहुज्ञाना प्राणिस्थंकिम् दीर्घमुखाशाला अविकारजंकिम् बहुशोफा ५५ नासिकोदरौ
ष्ठजङ्घादन्तकर्णशृङ्गाच्च कौ स स्त्री नासिका उदर ओष्ठ जङ्घा दन्त कर्ण शृङ्ग इत्येतत्स्वाङ्गमुपसर्जनंतदन्ता
त्प्रातिपदिकात्स्त्रियांवाङीष्स्यात् तुङ्गनासिकी तुङ्गनासिका तलोदरी तलोदरा बिम्बोष्ठी बिम्बोष्ठा दीर्घजङ्घी
दीर्घजङ्घा समदन्ती समदन्ता चारुकर्णी चारुकर्णा तीक्ष्णशृङ्गी तीक्ष्णशृङ्गा नासिकादीनांविभाषांपुच्छाच्च १
पुच्छाच्च १ कौ स स्त्री कल्याणपुच्छी कल्याणपुच्छा कबरमणिविषशरेभ्योनित्यम् २ कौ स स्त्री कबरपुच्छी म
णिपुच्छी विषपुच्छी शरपुच्छी उपमानात्पक्षाच्चपुच्छाच्च ३ कौ स स्त्री उलूकपक्षीशाला उलूकपुच्छीसेना ना
सिकादिभ्योविभाषायाःसहनञ्विद्यमानपूर्वेभ्यः प्रतिषेधोविप्रतिषेधेन ४ पुरस्तादपवादाअनन्तरान्विधीन्बाधन्तेनो
त्तरान् १ मध्येऽपवादाःपूर्वान्विधीन्बाधन्तेनोत्तरान् २ परिभाषेइमे ५६ नक्रोडादिबह्वचः कौ स स्त्री क्रोडा इत्येव

स्त्री·प्र·
११४
114

मादियत्स्वाङ्गं बह्वच्कं च यत्स्वाङ्गं तदन्तात्प्रातिपदिकान्ङीष् न स्यात् कल्याणक्रोडा कल्याणनखा बह्वचः पृथुजघ
ना क्रोड नख खुर गोखा उखा शिखा बाल शफ गुद क्रोडादिराकृतिगणः तेन भगगलयोर्णा इत्यादिसूत्रवत्तेषा
ये भाष्येतन्न व्याख्यातम् ५७ सहनञ्विद्यमानपूर्वाच्च कौ स स्त्री सह नञ् विद्यमान इत्येवं पूर्वकं यत्स्वाङ्गं तदन्तात्प्रा
तिपदिकान्ङीष् न स्यात् सकेशा अकेशा विद्यमानकेशा ५८ नखमुखात्संज्ञायाम् कौ स स्त्री नख मुख इत्येतौ
यौ स्वाङ्गौ तदन्तात्प्रातिपदिकात्संज्ञाविषये ङीष् न स्यात् शूर्पणखा वज्रणखा गौरमुखा कालमुखा संज्ञायां किम्
ताम्रनखी चन्द्रमुखी ५९ दीर्घजिह्वी च च्छन्दसि कौ वै स च दीर्घजिह्वी इत्येतन्ङीषन्तं वेदे निपात्यते दीर्घजिह्वी वै दे
वानां हव्यमलेट् संज्ञायामित्येव दीर्घजिह्वा ६० दिक्पूर्वपदान्ङीप् कौ स स्त्री दिग्वाचकपूर्वपदकं यत्स्वाङ्गं तद
न्तात्प्रातिपदिकान्ङीषो विषये वा ङीप् स्यात् प्राङ्मुखी प्राङ्मुखा प्राङ्नासिकी प्राङ्नासिका ङीषो निषेधविषय
त्वादिह न भवति प्राग्गुल्फा प्राक्क्रोडा प्राग्जघना दिक्पूर्वपदान्ङीषः न्वदात्ततम् १ ६१ वाहः कौ स स्त्री वाह इत्ये
तदन्तात्प्रातिपदिकात्स्त्रियां ङीष् स्यात् ङीषोऽन्तोदात्तः नत्वङीपः प्रष्ठौही इत्यादिसूत्रद्वयं भाष्येतन्न व्याख्यातम् ६२ स
ख्यशिश्वीति भाषायाम् कौ स स्त्री सखी अशिश्वी इत्येतौ ङीषन्तौ निपात्येते भाषायां विषये सखी ब्राह्मणी अशिश्वी
नास्याः शिशुरस्तीत्यर्थः इतिशाहाहेदेः पिकवित् पुनयन्नामाशिश्वी भाषायां किम् सखा सप्तपदी भव अशिश्वमिव
मामयं शिशुरभिमन्ये ६३ जातेरस्त्रीविषयादयोपधात् कौ स स्त्री जातिवाचिनो नित्यस्त्रीलिङ्गभिन्नात् यकारोपधव
र्जितात्स्त्रियां ङीष् स्यात् कुक्कुटी सूकरी वृषली नारायणी चारायणी कठी कलापी जातेः किम् मुण्डा अस्त्रीविषया
त्किम् मक्षिका अयोपधात्किम् क्षत्रिया अकोपधादित्यपि वक्तव्यम् १ योपधप्रतिषेधे गवयहयमुकयमनुष्यमत्स्या
नामप्रतिषेधः २ कौ स स्त्री गवयी हयी मुकयी मनुषी मत्सी योपधप्रतिषेधे हयगवयमुकयमत्स्यमनुष्याणांप्रतिषे ११४

थः १ इति काशिका आकृतिग्रहणा जातिर्लिङ्गानां च न सर्वभाक् सकृदाख्यातनिर्ग्राह्या गोत्रं च चरणैः सह १ तत्रैव प
जातिलक्षणकारिकेयम् प्राडुर्भावविनाशाभ्यां सत्त्वस्य युगपद्गुणैः असर्वलिङ्गां बह्वर्थां तां कवयो विदुः १ गोत्रं च चर
णानि च इत्यपरस्य जातिलक्षणम् यथा सर्वे जातिलक्षणे न यथा कुमारी भार्य्या इति भावितव्यम् यथोत्तरे न यथा कुमार
भार्य्या इति इति भाष्यम् ६४ पाककर्णपर्णपुष्पफलमूलवालोत्तरपदाच्च कौ स स्त्री पाकाद्युत्तरपदाज्जातिवाचि
नो नित्यस्त्रीलिङ्गात्स्त्रियां ङीष् स्यात् पाक ओदनपाकी कर्ण शुककर्णी पर्ण शालपर्णी पुष्प शङ्खपुष्पी फल
दाशफली मूल दर्भमूली वाल गोवाली सदच्काण्डप्रान्तशतैकेभ्यः पुष्पात्प्रतिषेधो वक्तव्यः १ सत् सत्पुष्पा प्र
क् प्राक्पुष्पा प्रत्यक्पुष्पा काण्ड काण्डपुष्पा प्रान्त प्रान्तपुष्पा शत शतपुष्पा एक एकपुष्पा सम्भस्त्राजिनश
णपिण्डेभ्यः फलात्प्रतिषेधो वक्तव्यः २ सं संफला भस्त्र भस्त्रफला अजिन अजिनफला शण शणफला
पिण्ड पिण्डफला श्वेताच्च ३ श्वेतफला त्रेश्च ४ त्रिफला मूलान्नञः ५ अमूला ६५ इतो मनुष्यजातेः कौ स स्त्री
इ इत्येतदन्तान्मनुष्यजातिवाचिनः स्त्रियां ङीष् स्यात् आवन्ती कुन्ती दाक्षी प्लाक्षी इतः किम् विट् मनुष्यजातेः
किम् तित्तिरिः अत्र जातिग्रहणाद्यकारोपधादपि भवति औदमेयी इतो मनुष्यजातेरित्युपसंख्यानम् १ अजातस्यै
सौतंगमी ६६ ऊङुतः कौ स स्त्री उ इत्येतदन्तान्मनुष्यजातिवाचिनोऽयकारोपधात्स्त्रियामूङ् प्रत्ययः स्यात् कुरूः
ब्रह्मबन्धूः ऊकारो नोङ्धात्वोरिति विशेषणार्थः दीर्घोच्चारणे कयोवायनार्थम् अयोपधात् किम् अध्वर्युर्ब्राह्मणी
ऊङ् प्रकरणेऽप्राणिजातेश्चारज्वादीनाम् १ अप्राणिजातेश्चारज्वादीनामुपसंख्यानम् १ कौ स स्त्री अलाबूः कर्कन्धूः :
अप्राणिजातेः किम् कृकवाकुः अरज्वादीनां किम् रज्जुः हनुः ६७ बाह्वन्तात्संज्ञायाम् कौ स स्त्री बाहु इत्येतदन्ता
त्प्रातिपदिकात्संज्ञायां विषये स्त्रियामूङ् स्यात् भद्रबाहूः स्थूलबाहूः संज्ञायां किम् वृत्तबाहुः इत्यादि सूत्रत्रयं भा

ष्येतन्नव्याख्यानम् ६८ पङ्गोश्च कौ स स्त्री पङ्गु इत्येतस्मात्प्रातिपदिकात्स्त्रियामूङ् स्यात् पङ्गूः श्वशुरस्योकाराकार
सू॰प॰ लोपश्च १ कौ स स्त्री श्वश्रूः ६९ ऊरूत्तरपदादौपम्ये कौ स स्त्री ऊरु इत्येतदुत्तरपदात्प्रातिपादिकादौपम्ये गम्यमाने
११५ स्त्रियामूङ् स्यात् कदलोरूः औपम्ये किम् वृत्तोरुः स्त्री ७० संहितशफलक्षणवामादेश्च कौ स स्त्री संहित शफ
115 लक्षण वाम इत्येतदादिभ्य ऊरूत्तरपदेभ्यः प्रातिपदिकेभ्यः स्त्रियामूङ् स्यात् संहितोरूः शफोरूः लक्षणोरूः वामो
रूः सहितसहाभ्यां चेति वक्तव्यम् १ कौ स स्त्री सहितोरूः सहोरूः ७१ कद्रुकमण्डल्वोश्छन्दसि कौ वे अ॰ व कु
द्रु कमण्डलु इत्येताभ्यां वेदे स्त्रियामूङ् स्यात् कद्रूश्च वै सुपर्णी च मा स्म कमण्डलूं शूद्राय दद्यात् छन्दसि किम् क
द्रुः कमण्डलुः कद्रुकमण्डल्वोः गुग्गुलमधुजतुपतयालूनामिति वक्तव्यम् १ गुग्गुलुमधुजतुपतयालूनामिति वक्त
व्यम् १ कौ वे अ॰ व गुग्गुलूः मधूः जतूः पानयालूः ७२ संज्ञायाम् कौ स स्त्री कद्रु कमण्डलु इत्येताभ्यां संज्ञावि
षये स्त्रियामूङ् स्यात् कद्रूः कमण्डलूः । संज्ञायां किम् कद्रुः कमण्डलुः इत्यादिस्तु वेदविषये भाष्ये तन्नव्याख्यानम् ७३ शार्ङ्गरवा
द्यञो ङीन् कौ स स्त्री शार्ङ्गरव इत्येवमादिभ्योऽञो योऽकारस्तदन्ताच्च प्रातिपदिकात्स्त्रियां ङीन् प्रत्ययः स्यात् शार्ङ्ग
रवी कापटवी अञन्तात् वैदी और्वी जातिग्रहणानुवृत्तेः पुंयोगेऽपेन भवति वैदस्य स्त्री वैदी पुंयोगेऽपीष्यते शा
र्ङ्गरव कापटव । गौग्गुलव ब्राह्मण वैद गौतम कामण्डलेय ब्राह्मणकृतेय आनिचेय आनिधेय आशोकेय वा
त्स्यायन मौञ्जायन कैकस काव्य शैव एहि पर्येहि आश्मरथ्य औदपान अराल चण्डाल वण्डाल वतण्ड
भोगवद्गौरिमतोः संज्ञायां घादिषु नित्यं ह्रस्वार्थम् नृनरयोर्वृद्धिश्च ७४ यङश्चाप् कौ स स्त्री यङ् ष्यङ् इत्येतद
न्तात्प्रातिपदिकात्स्त्रियां चाप् स्यात् आम्बष्ठ्या कारीषगन्ध्या पाचयजश्चाप् १ शार्कराक्षा पौतिमाष्या वायजश्चाप् वक्त
व्यः १ कौ स स्त्री ७५ आवट्याच्च कौ स स्त्री आवट्य इत्येतस्माद्गार्गादियञन्तात्स्त्रियां चाप् स्यात् आवट्या पावोतप ११५

ह्रोः भवति सर्वत्रग्रहणात् आवध्यायनी अनडुपधालोपिनड्यमोऽणिप्रत्ययेविप्रतिषिद्धम् १ आवस्ताथनः फक्स्यापदस्येव १
इति भाष्यकृतः ७९ तद्धिताः सेत्त्वप्रदेशाः १२ ४९ कौ स स्त्री अधिकारो यं पञ्चमाध्यायपरिसमाप्तेः इतऊर्ध्वं यानत्रुक्रा
मिष्यामस्ते तद्धितसंज्ञकास्तेवेदितव्याः वक्ष्यति प्रनालिः युवतिः वक्तव्यनमनुक्ततद्धितपरिग्रहार्थम् शाखिवाजाजौ
इत्यादिसंग्रहयेभाष्येतनयाख्यातम् ७७ यूनस्तिः कौ स स्त्री युवन् इत्येतस्मात्प्रातिपदिकात्स्त्रियांतिप्रत्ययः स्यात् स चत
द्धितसंज्ञः युवतिः ७८ अणिञोरनार्षयोर्गुरूपोत्तमयोः ष्यङ् गोत्रे कौ स त अ अण् इञ् इत्येतौ यौ गोत्रे विहितौ
अनार्षौ तदन्तयोः प्रातिपदिकयोर्गुरूपोत्तमयोः स्त्रियां ष्यङादेशः स्यात् करीषगन्धेरपत्यं स्त्री कारीषगन्ध्या तस्याप
त्यमित्यण् वराहस्यापत्यं स्त्री वाराह्या अतइञ् अणिञोः किम् ऋतभागस्यापत्यं स्त्री आर्तभागी विदादित्वादञ् अ
नार्षयोः किम् वासिष्ठा वैश्वामित्री गुरूपोत्तमयोः किम् औपगवी कापटवी गोत्रे किम् आहिच्छत्री कान्यकुब्जी
ष्यङ्गनादेशे यलोपवचनम् १ हिरण्यवपिः २ आदेशेन लोपवचनम् २ तवाष्यङोलोपनिमित्तत्वात् ४ किमत्रन्याय्यम्
आदेश इत्येव न्याय्यम् इति भाष्यम् प्रकर्षे वर्तते संकृतादात्मानो यो तमे गुरू आग्निविधिः केनते नसान्तकर्षे यथयंतमः १
उदत्तस्य प्रकर्षोऽयं गतशब्दोऽवलुप्यते नाप्यर्थप्रकर्षोऽस्ति यातयोः अप्रकृष्यते २ उइतो यत्नते किञ्चित्त्वया
णांह्रौ किलौडुतौ वतः प्रभृति कर्तव्योवाराह्यायांनसिध्यति ३ भियते स्वस्वरस्तेन विधिस्वामो लव्यते शब्दान्तर
सिद्धं विधाडष्टमस्यन्तरेविष्णु ४ कारिका इमाः अनवयोतयाकार्योवावर्थेकथंदापाममसिद्धम् समापिठापासि
द्धेस्वरार्थस्तार्हिन्त्वयावाहकाथः १ तत्रापि तर्हि ष्यङाउक्तमाह्वीतस्यठापप्राप्नोति उक्तोऽयिहि भवन्त्येते सान्तवया
देशास्कार्य्येन २ अस्यानिवत्तेदोषस्तेहाद्विरचनासिध्यति तयाथन्तविशेषार्थेकर्तव्यं स्याद्विशेषणम् ३ अक्रियैवा
विशेषोऽत्रासान्तवयोविशेषवान् याप्यणयांतेकथंनस्यादेकोऽमेस्याद्विशेषम् ४ तयाषुनर्दीकर्तव्योऽषितिलिङ्ग

सू॰ पा॰
११९
116

प्रसज्यते ङि॰ निर्विक्रियते देशोऽव्यवधानान्न्तङ्ष्यति ५ पोऽनन्तरो नयात्तुः सयोर्यातः सोऽनन्तरः नचेड्भयतः साम्य
मुभयत्र प्रसज्यते ६ पञ्चगाविशेष्येन यदीह यात्तर्यङ्कुः यात्त नावापदितल्पमेतत् उभौ प्रधानपदि नात्र दोषस्तथा प्रमा
यैतन्न वाक्यपतिस्ते ७ यात्तु प्रकरणे सेह न स्यानमिति निश्चयः यातार्थयदिकृतेष्येत त्रैवैकरिष्यते ८ उपदेशे पदे
जन्तेतस्य वेदात मिष्यते उद्देशाद्धि शब्दानो तेन गोत्रं भविष्यति ९ इमाश्रुपिकारिकाः ७९ गोत्रावयवात् कौ सू
न श्र गोत्रावयवाद्धि हित्नयोरणिञोः स्त्रियां ष्यङादेशः स्यात् पौणिक्या हौणिक्या मे खर्ष्या गोत्रावयवादगो
त्रार्थमिति चेतदनिष्टम् १ गोत्रादिति चेद्वचनानर्थकम् २ अगुरूपोत्तमार्थमिति चेत्सर्वेषावयवनात्सर्वप्रसङ्गः ३
सिद्धन्तु रोमादिष्ठपसंख्यानात् ४ केचौड्यादयः येकौड्यादयः सिद्धन्तकुलाख्या म्यो लोके गोत्राभिमताभ्यः १ इति
भारद्वाजीयानाम् ८० क्रौड्यादिभ्यश्च कौ सू न श्र कौडि इत्येवमादिभ्यः स्त्रियां ष्यङादेशः स्यात् कौड्या लाड्या
कौडि लाडि व्याडि आपिशलि आपक्षिति चौपयत वैटयत सैकयत वैल्वयत सौधातकि सूततुङ्गवताम् भोज
क्षत्रिये यौतकि कौटि भौरिकि भौलिकि शाल्मलि शालास्थलि कापिष्ठलि गौकक्ष्य कौड्यादिः इत्यादिसूत्रद्वयंभा
ष्येनन व्याख्यातम् ८१ देवयज्ञिशौचिवृक्षिसात्यमुग्रिकाण्ठेविद्धिभ्योऽन्यतरस्याम् कौ सू न श्र दैवयज्ञि शौचिवृक्षि सा
त्यमुग्रि काण्ठेविद्धि इत्येषां स्त्रियां ष्यङादेशो वा स्यात् पक्षोरतो मनुष्यजातेरिति ङीष् भवति दैवयज्ञ्या दैवयज्ञी
शौचिवृक्ष्या शौचिवृक्षी सात्यमुग्र्यः सात्यमुग्री काण्ठेविद्ध्या काण्ठेविद्धी इति ९७ सूत्राणि भाष्ये ४ १२ व्याख्या
तानि ८२ समर्थानां प्रथमाद्वा कौ सू न श्र पदत्रयाधिकारोऽयम् प्रागदिशो विभक्तिरिति यावत् कृतसन्धिका
र्याणां मध्ये प्रथमोच्चारितशब्दो व्यादेवप्रत्ययो वेदितव्यः वक्ष्यतितस्यापत्यमिति औपगवः समर्थानां किम्
सोऽस्थितिः प्रथमादिति किम् अपत्यवाचकात् षष्ठ्यर्थे माभूत् वाग्रहणं किम् वाक्यमपि यथा स्यात् उपगोरपत्यम् ११९

समर्थः पदविधिरितिपरिभाषया इहन भवति वसुमपगोरपत्यं चैत्रस्य पूर्वसूत्रादन्यतरस्यां ग्रहणमनुवर्तते ते नेनपदे स
मासोऽपि उपगवपत्यम् अकृतव्यूहाः पाणिनीयाः १ परिभाषेयम् ८२ प्राग्दीव्यतोऽण् कौ सू त ग्र अण् इत्ययमधिकार
स्तेनदीव्यतीत्यतः प्राग्वेदितव्यः वक्ष्यति तस्यापत्यमिति औपगवः कापटवः प्राग्वचनं सङ्कादिबाधनार्थम् १ अधिकारात्सिद्ध
मिति चेदपवादविषयेऽण्प्राप्नोति २ नवाक्यविहारवचनात् ३ एकदेशविकृतमनन्यवत् ९ परिभाषेयम् ८४ अश्वपत्या
दिभ्यश्च कौ सू त ग्र अश्वपति इत्येवमादिभ्यः प्रातिपदिकेभ्यः प्राग्दीव्यतीयेऽर्थेषु अण् स्यात् आश्वपतेरपत्या
दि आश्वपतम् शातपतम् अश्वपति ज्ञानपति शतपति धनपति गणपति स्थानपति यज्ञपति राष्ट्रपति कुलपति
गृहपति धान्यपति पन्वपति वसुपति धर्मपति सभापति प्राणपति क्षेत्रपति अश्वापत्यादिः भाष्ये त्वनेदं व्याख्यातम् ८५
दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः कौ सू त ग्र दिति अदिति आदित्य इत्येतेभ्यः पत्युत्तरपदाच्च प्रातिपदिकात्प्राग्दीव्यतीये
ष्वर्थेषु ण्यप्रत्ययः स्यात् दैत्यः आदित्यः आदित्यः पत्युत्तरपदात् प्राजापत्यम् सैनापत्यम् बाह्लातिपितृमतोश्छन्दस्यु
पसंख्यानम् १ वाक्रू वाक्यः मिति मात्यः पितृमत् पैतृमत्यः यमाधेतिवक्तव्यम् २ इतिकाशिका कौ सू व ग्र याम्यः
पृथिव्याञाञौ २ कौ सू त ग्र ञ पार्थिवा अञ् पार्थिवी देवस्य यञञौ ३ देवाद्यञञौ १ कौ सू त ग्र दै व्यम् देवम्
वहिषष्टिलोपश्च यञ्च ४ वहिषष्टिलोपो यञ्च २ कौ सू त ग्र वहिर्भवः वाह्यः ईकक् ५ कौ सू त ग्र वाहीकः ईक
क्छन्दसि ६ वाहीकमस्त्रभद्रस्य स्थाम्नोऽकारः ७ कौ सू त ग्र अश्वत्थामः लोम्नोऽपत्येषु बहुष्वकारः ८ कौ सू
त ग्र उडुलोमाः बहुषु किम् औडुलोमिः सर्वत्र गोरजादिप्रसङ्गे यत् ९ गविभवम् गव्यम् गव्य गौर्देवतास्य गव्यः
गोरजादिप्रसंगे यत् २ कौ सू त ग्र ण्यादयोऽर्थविशेषलक्षणादणोऽपवादात्पूर्वविप्रतिषिद्धम् १० दितेरपत्यम् दैत्यः
वनस्पतीनां समूहः वानस्पत्यम् ८६ उत्सादिभ्योऽञ् कौ सू त ग्र उत्स इत्येवमादिभ्यः प्राग्दीव्यतीयेष्वर्थेषु अञ् प्र

नयः स्यात् औत्सः औदपानः उत्स उदपान विकर विनद महानद महानस महाप्राण तरुण तलुनवष्कयाः से पृ
सू॰प॰ थिवी धेनु पङ्क्ति जगती त्रिष्टुप् जनपद भरत उशीनर ग्रीष्म पीलुकुण उदस्थानदेशे पृषदंश भल्लकीय रथ
११७ न्तर मध्यन्दिन बृहत् महत् सत्वत् कुरु पञ्चाल इन्द्रावसान उष्णिह् ककुभ् सुवर्ण देव ग्रीष्मादच्छन्दसि उत्सादि :
117 ष्वत्र प्रकरणे ग्रीष्मादच्छन्दसि १ ग्रैष्मम् छन्दः बृहतम् नत्तवेदः अच्छन्दसि सितिकिम् ग्रैष्मी त्रिष्टुप् ८७ स्त्रीपुंसा
भ्यां नञ्स्नञौ भवनात् कौ सू त सू स्त्री पुंस इत्येताभ्यां क्रमान्नञ् स्नञ् इत्येतौ प्रत्ययौ भवतः धान्यानां भवने क्षेत्रे
स्विजित्यतः प्राग्वर्येष्वर्थेषु स्त्रीषु भवः स्त्रैणः स्त्रीभ्य आगतम् स्त्रैणम् पुंसु भवः पौंस्नः पुंस आगतम् पौंस्नम्
स्त्रैणम् पुंसु भवः पौंस्नः पुंस आगतम् पौंस्नम् नञ्स्नञौ प्राग्भवनादिति वहत्यर्थे प्रतिषेधः १ वतेःप्रागिति वक्तव्यादु
पसंख्यानम् २ वत्यर्थे नञ्स्नञौ भवत इति यदपोस्त्रियाः पुम्वदिति निर्देशं करोति इति भाष्यम् ८८ द्विगोर्लुगनपत्ये
कौ सू त सू दीव्यतः प्रागर्थेषु द्विगोर्निमित्तं यस्तद्धितोऽनपत्यार्थस्तस्य लुक् स्यात् पञ्चसु कपालेषु संस्कृतः पुरोडाशः
पञ्चकपालः द्विवेदः अनपत्ये किम् द्वैवदत्तिः प्राग्दीव्यतः किम् द्वैपारायणिकः द्विगुनिमित्तमिति किम् पञ्चकपाल
स्येदं पाञ्चकपालम् अजादिग्रहणं कर्तव्यम् १ द्वाभ्यामागतं पञ्चाङ्गरूप्यम् द्विगोर्लुकि तन्निमित्तग्रहणम् २
अर्थविशेषासम्प्रत्यये तन्निमित्तादपि ३ समाहारद्विगोश्च नेष्यते लुक् पञ्चकपाल्याः संस्कृतः पञ्चकपालः ८९ गोत्रेऽलु
गचि कौ सू त सू अजादौ प्राग्दीव्यतीये विवक्षिते यस्कादिभ्यो गोत्रे इति प्रकरणे विहितो लुङ् न स्यात् गार्ग्याणां छात्राः
गार्गीयाः वात्सीयाः आत्रेयीयाः खारायणीयाः गोत्रस्य बहुवचनान्तस्य ग्रहणाद् एकयोः लुक् १ एकवचनद्विवचना
नान्तस्य ग्रहणे बहुषु लोपो यूनि २ ९० यूनि लुक् कौ सू त सू अजादौ प्राग्दीव्यतीये विवक्षिते यूनि प्रत्ययस्य जातस्य प्रत्य
यस्य लुक् स्यात् फाण्टाहृतस्यापत्यम् फाण्टाहृतिः तस्यापत्यं युवा फाण्टाहृतः तस्य छात्रा इति अप्रत्यये विवक्षितेषु ११८

निजातस्याणप्रत्ययस्यलाकि इञेषस्याणभवति फाण्टाहृताः भागवित्तस्यापत्यम् भागवित्तिः तस्यापत्यं युवा भागवित्तिकः तस्य
छात्राः इति छप्रत्यये विवक्षिते ठकोलकि इञे तस्याण् भागवित्ताः तैकस्यापत्यम् तैकायनिः तस्यापत्यं युवा तैकायनीयः तस्य
छात्राः इति छप्रत्यये विवक्षिते अनिजातस्य छप्रत्ययस्य लकि इञे तस्याप्राप्ते वृद्धाच्छो भवति तैकायनीयः अजादौ किम् फा
ण्टाहृतस्य इयम् प्राग्दीव्यतीये किम् भागवित्तायहितम् भागवित्तिकीयम् अनिलक्षवीति वेत्यत्यस्यायं प्रसङ्गः १
सिद्धन्त्वविशेषेणलग्वचने हलि वप्रतिषेधः २ प्रयोजनं सौवीरगोत्रेभ्योणठक्छाः ३ इञ्जणैपा सर्वत्र ४ यत्रछान्ताहि
इञ्प्रयोजनम् ५ अणतैपा सर्वत्र प्रयोजनम् ६ प्राग्दीव्यतो ऽपिकारे पूनो वृद्धवदतिदेशः ७ फक् फिञ् इत्येतयोरनि
जातयोरजादौ प्राग्दीव्यतीये विवक्षिते वा लुक् स्यात् गार्ग्यायणस्य छात्राः गार्गीयाः गार्ग्यायणीयाः फिञः यास्काय
नेन छात्राः यास्कीयाः यास्कायनीयाः भाष्येतने दंव्याख्यातम् ९२ तस्यापत्यम् कौ स्तु त अ षष्ठ्यन्तादपत्यामित्ये
तस्मिन्नर्थे उक्तावक्ष्यमाणाश्च प्रत्यया भवन्ति उपगोरपत्यम् औपगवः मानवः भानवः आश्वपतः दैत्यः स्त्रैणः पौंस्नः त
द्धितार्थे निर्देशो लिङ्गवचनमप्रमाणं तस्याविवक्षितत्वात् १ सर्वनामनिर्देशो विशेषासंप्रत्ययः सामान्यनिर्देशात् २ सामा
न्यचोदनास्तु विशेषेषु ३ अपत्याभिधाने स्त्रीपुंलिङ्गस्याप्रसिद्धिर्नपुंसकत्वात् ४ सिद्धन्तु प्रजनस्याविवक्षितत्वात् ५ तस्ये
दमित्यपत्येऽपि बाधनार्थं कृतं भवेत् उत्सर्गः शेष एवासौ वृद्धान्यस्य प्रयोजनम् १ कारिकेयम् स्त्रैलिङ्गवचनमतन्त्रम् २
परिभाषेयम् ९३ एको गोत्रे कौ स्तु त अ गोत्रे एक एव अपत्यप्रत्ययो भवति औपगवः गार्ग्यः नाडायनः एकेनैव गो
त्रप्रत्ययेन सर्वेषां गोत्राणां पर्यायेणाभिधाने भवति प्रत्ययान्तरं नोत्पद्यते उत्पादयितारस्तु स्वापत्ययोगात्तस्य च विवक्षि
तत्वादेकवचनं गोत्रे १ उपग्वादेर्गोत्रसमुदाये पौत्रप्रभृतौ अपत्यप्रत्ययसमुदायो निवर्त्तते इति तात्पर्यम् युवपर्या ऽपत्य
प्राहुः पौत्रप्रभृतीनां गोत्र इति भावः तत्र प्रत्ययान्ताद्गोत्रे प्रतिषेधो गोत्रे नियतत्वात् २ गार्गि इत्येवमादेरनन्तरापत्यप्रत्य

सू॰प॰ ११८ 118

यान्तान्माभूत् एकोगोत्रइतिनियमस्तुसजातीयतद्गोत्रप्रत्ययनिवर्तकइतिभावः परमप्रकृतेश्चोत्पत्तिः ३ उपगु ३
त्येवमादिरपत्यप्रत्ययरहितापरमप्रकृतिः ततःपौत्रप्रभृतौगोत्रेइष्टाप्रत्ययोत्पत्तिःकाप्यौ अपत्ययोगाभावात्प्राप्नो
ति उत्पत्तौतुवचनबलात्पारंपर्येणापत्ययोगेऽपिप्रत्ययोभवतीतितात्पर्यम् स्त्रियाञ्चानियमः ४ एतद्वार्तिकार्थस्तु
तरवार्तिकमेव पौत्रप्रभृतेरपत्यंस्त्रीगृह्यते उत्पादयितरिवापत्ययुक्तेस्त्रियायुक्तेस्त्रियायुवत्याअभिधानेनप्राप्नोति ५
चकाराःसर्वेऽपत्ययुक्ताइतिपदेऽपि गोत्रप्रत्ययेनयुवप्रत्ययेनवेतिशेषः युवसंज्ञायाबाधात् गोत्राद्यूनिचास्त्रियांप्रवि
धानात् तस्मात्स्त्रियायुवत्यागोत्रसंज्ञैवपर्यवसितया तस्यांवपत्येदस्त्रियांगोत्रप्रत्ययान्तमेतत् इतिभाष्यम् यूनिचा
न्तर्हितेऽप्राप्तिः ६ वतण्डादिनाव्यवहितेपत्येगार्ग्यादौ यूनि अपत्ययोगाभावात् सर्वेषामप्यपत्ययोगात्प्रत्ययान्ताद्गोत्रेप्र
तिषेधार्थमेकोगोत्रे ७ गार्ग्यादिभ्यः प्रत्ययवारणार्थम् नयतत्यनेनेतिक्रियादिनिमित्तकोऽपत्यशब्दः पौत्रप्रभृतिष्वपि
मुख्यएवेतिभावः नियमानुपपत्तिश्च ८ नह्येकस्मिन्ननेकप्रत्ययप्राप्तिः ९ अपत्यान्तरेशब्दान्तरात्प्रत्ययान्तरप्राप्तिः १०
अतस्तन्निवारणार्थंसूत्रमितिभावः प्रत्ययान्तात्प्रतिषेधोवक्तव्यः ११ गार्गि इत्येवमादेरनन्तरापत्यप्रत्ययान्तादित्यर्थः
नियमस्तुतस्माज्जातद्गोत्रप्रत्ययान्ताद्गोत्रप्रत्ययस्यैवनिवर्तकः संज्ञाकारिभ्योवाप्रत्ययोत्पत्तिः १२ कुलव्यपदेशहेतव
आदिपुरुषाः संज्ञाकारिणः गोत्राद्यजीतिच १३ संज्ञाकारिग्रहणेकृतेगार्ग्यायणादिसिद्धयेइतिभावः तद्वजात्यादि
तिनिवृत्त्यर्थम् १४ संज्ञाकारिग्रहणम् संज्ञाकारिग्रहणंकर्तव्यम् प्रत्ययान्ताद्वाप्रतिषेधोवक्तव्यः उभयेनकर्त
व्यम् एकोऽप्रत्ययोभवतीत्येव यदिचेदानींप्रत्ययान्तादपिप्रत्ययःस्यात् नैकोऽपत्येप्रत्ययःकृतःस्यात् इतिभा
ष्यम् अपत्यंसमुदायश्चेन्नियमोऽत्रसमीहितः तस्मिन्नस्तुबहवः प्राप्ताःनियमोऽसम्भविष्यति १ कारिकेयम् १४
गोत्राद्यूनास्त्रियाम् कौ सू त अ यून्यपत्येविवक्षितेगोत्रप्रत्ययान्तादेवप्रत्ययःस्यात् नतुपरमप्रकृतेरनन्तरयुवभ्यः ११८

गार्ग्यायणः वात्स्यायनः दाक्षायणः औपगविः अस्त्रियाम् इतिभिन्नंवाक्यम् स्त्रियान्तुयुवसंज्ञानस्यात् किमर्थमिदं
दाक्षी युवसंज्ञानिषेधात्स्त्रीगोत्रप्रत्ययेनाभिधीयते भाष्येतुपृथक्देशाख्यानम् इति १२ सूत्राणिभाष्ये ४।१२ आख्या
तानि ९५ अत इञ् कौ सु त अ अ इत्येतदन्तात्प्रातिपदिकात्षष्ठ्यन्तादपत्येऽर्थेइञ्स्यात् दाक्षिः प्लाक्षिः इञो ह
ह्राहह्राभ्यां फिञ्फिनौविप्रतिषेधेन १ तद्राजस्य २ ९६ बाह्वादिभ्यश्च कौ सु त अ बाहु इत्येवमादिभ्यःषष्ठ्यन्ते
भ्योऽपत्येऽर्थेइञ्स्यात् बाहविः औपबाहविः बाहु उपबाहु उपबाकु निबाकु शिवाकु वटाकु उपबिन्दु वृषली
वृकला चूडा बलाका मूषिका कुशला छगला ध्रुवका धुवकासुमित्रा दुर्मित्रा पुष्करसद् अनुहरत् देवश
र्म्मन् अग्निशर्म्मन् भद्रशर्म्मन् सुशर्म्मन् कुनामन् सुनामन् पञ्चन् सप्तन् अष्टन् अमितौजसःसलोपश्च
सुधावत् उदञ्चु शिरस् माष शराविन् मरीची क्षेमवृद्धिन् शृङ्खलतोदिन् खरनादिन् नगरमर्दिन् प्राकारम
र्दिन् लोमन् अजीगर्त कृष्ण युधिष्ठिर अर्जुन साम्ब गद प्रद्युम्न राम उदङ्कु उदकःसंज्ञायाम् सम्भूयोऽम्भसोःस
लोपश्च आकृतिगणोऽयम् तेनसात्वकिःजाङ्घिः ऐन्द्रशर्म्मिःआजधेनविः बाह्वादिप्रभृतिषुयेषांदर्शनंगोत्रभा
वेलौकिकेततोऽन्यत्रतेषांप्रतिषेधः १ सम्बन्धिशब्दप्रत्ययानान्त्वतत्सदृशात्प्रतिषेधः २ सम्बन्धिशब्दानान्तत्सदृश
त्प्रतिषेधः १ इतिभाष्यकृतः मातृष्वसा अम्मामातृस्वसा ९७ सुधातुरकङ्च कौ सु त अ सुधातृ इत्येतस्मादप
त्येइञ्स्यात् अकङ् इत्ययमादेशश्चतत्संनियोगेन सुधातुरपत्यम् सौधातकिः सुधातृव्यासयोरितिवक्तव्यम् १
सुधातृव्यासवरुडनिषादचण्डालबिम्बानामितिवक्तव्यम् १ इतिभाष्याकृतः व्यासवरुडनिषादचण्डालबिम्बानांचे
तिवक्तव्यम् १ कौ सु त अ वैयासकिः वारुडकिः नैषादकिः बैम्बकिः ९८ गोत्रेकुञ्जादिभ्यश्च्फञ् कौ सु त अ कु
ञ्ज इत्येवमादिभ्यःषष्ठ्यन्तेभ्योगोत्रेऽपत्येच्फञ्प्रत्ययःस्यात् कौञ्जायन्यः कौञ्जायन्यौ कौञ्जायनाः गोत्रेकिम् कौञ्जिः

च कारोविशेषणार्थः ञकारोवृद्ध्यर्थः स्वरविधौयोगविभागात्परमपिजित्स्वरेबाधित्वाचित्स्वरः कुञ्ज ब्रध्न शङ्ख भ
स्त॰प॰ ११९ स्मन् गण लोमन् शठ शाक शुण्डा शुभ विपाश स्कन्द स्कम्भ कुञ्जादिः ९९ नडादिभ्यः फक् कौ सु त स्र
नड इत्येवमादिभ्यः षष्ठ्यन्तेभ्योगोत्रेऽपत्येफक्स्यात् नाडायनः चारायणः नड चर बक मुञ्ज इतिक इतिश
119 उपक एक लमक शलङ्कु शलङ्कञ्च सप्तल वाजप्य तिक अग्निशर्मन्वृषगणे प्राण नर सायक दास मित्र
द्वीप पिङ्गर पिङ्गल किङ्कर किङ्कल कातर कातल काश्यप काश्य काव्य अज अमुष्य कृष्णरणौब्राह्मणवा
सिष्ठे अमित्र लिगु चित्र कुमार क्रोष्टुक्रोष्टञ्च लोह दुर्ग स्तम्भ शिंशपाग्र तृण शकट सुमनस् सुमत
मिमत ऋच् ८ जलन्धर अध्वर युगन्धर हंसक दण्डिन् हस्तिन् पिण्ड पञ्चाल चमसिन् सुकृत्यस्थिरक ब्रा
ह्मण चटक बदर अश्वल खरप लङ्क इन्ध अस्त्र कामुक ब्रह्मदत्त उडुम्बर शोण अलोह दण्डप नडादिः इत्या
दिसूत्रपञ्चकंभाष्येतत्रव्याख्यातम् १०० हरितादिभ्योऽञः कौ सु त स्र हरित इत्येवमादिभ्योऽञन्तेभ्योऽपत्येफक्
स्यात् हारितस्यापत्यम् हारितायनः इत्यत्रगोत्राधिकारेऽपिसामर्थ्याद्युवापत्येप्रत्ययः नहिगोत्रादयंगोत्रप्रत्य
यः एकोगोत्रइतिनियमात् हरितादिर्विदाद्यन्तर्गणः १०१ यञिञोश्च कौ सु त स्र यञ् इञ् इत्येतौगोत्रेयौजातौ
तदन्तात्युवापत्येफक्स्यात् गार्ग्यायणः दाक्षायणः गोत्रेकिम् द्वैप्यम् सौतंगमिः १०२ शरद्वच्छुनकदर्भाद्भृगुवत्सा
त्साग्रायणेषु कौ सु त स्रा शरद्वत् शुनक दर्भ इत्येतेभ्यः क्रमाद्भृगु वत्स आग्रायण इत्येतेषुवाच्येषुगोत्रेऽपत्ये
फक्स्यात् शारद्वतायनोभार्गवश्चेत् शारद्वतोऽन्यः शौनकायनोवात्स्यश्चेत् शौनकोऽन्यः दार्भायणः आग्रायण
श्चेत् दार्भिरन्यः १०३ द्रोणपर्वतजीवन्तादन्यतरस्याम् कौ सु त स्र द्रोण पर्वत जीवन्त इत्येतेभ्योगोत्रेऽपत्येवाफ
क्स्यात् द्रौणायनः द्रौणिः अत्रानादिरिहद्रोणः भादतप्रसिद्धेऽनन्तरापत्येऽप्यस्याभिद्रौणायनइतिप्रयोगस्तत्र ११९

वारात पार्वतायनः पार्वतिः जैवन्तायनः जैवन्तिः १०४ अनृष्यानन्तर्ये विदादिभ्योऽञ् कौ स त अ विद इत्येव-
मादिभ्यो गोत्रेऽपत्येऽञ् स्यात् येत्र विदादौ ऋषिभिन्नाः शब्दास्तेभ्योऽनन्तरापत्येऽञ् स्यात् वैदः और्वः अनृषिसु
पुत्रस्यान्तरम् पौत्रः दुहितुरयम् दौहित्रः गोत्रे किम् वैदिः बाह्वादित्वादनन्तरापत्येऽइञ् विद उर्व कश्यप कुशिक
भरद्वाज उपमन्यु किलात किन्दर्भ विश्वानर ऋष्टिषेण ऋतभाग हर्यश्व प्रियक आपस्तम्ब कूचवार शरद्वत्
शुनक धेनु गोपवन शिग्रु बिन्दु भोगक भाजन शमिक अश्वावतान श्यामाक ।श्यावलि। श्यामक।। श्याप
र्णी हरित किन्दास वह्यस्क अर्कलूष वध्योग विष्णु वृद्ध प्रतिबोध रथीतर रथन्तर गविष्ठिर निषादः शबर अ
लस मठर मृडाकु सृपाकु मृदु पुनर्भू पुत्र दुहितृ ननान्दृ परस्त्री परशुं च विदादिः अनृष्यानन्तर्ये चवनमन
र्थकं सत्यागोत्राधिकारात् १ १०५ गर्गादिभ्यो यञ् कौ स त अ गर्ग इत्येवमादिभ्यो गोत्रेऽपत्ये यञ् स्यात् गार्ग्यः वा
त्स्यः गर्ग वत्स वाजासे संस्कृति अज व्याघ्रपात् विदभृत् प्राचीनयोग अगस्ति पुलस्ति चमस रेभ अग्निवेशः शङ्ख
शट शक एक धूम अवट मनस् धनञ्जय वृक्ष विश्वावसु जरमाण लोहित संशित बभ्रु वल्गु मण्डु गण्डु
शङ्कु लिगु गुहलु मन्तु मङ्क्षु अलिगु जिगीषु मनु तन्तु मनायी सूनु कथक कन्थक ऋक्ष वृक्ष तनु तरुक्ष
तलुक्ष तण्ड वतण्ड कपि कत कुरुकत अनडुह् कण्व शकल गोकक्ष अगस्त्य कुण्डिनी यज्ञवल्क पर्णव
ल्क अभयजात विरोहित वृषगण रहूगण शण्डिल वणक चुलुक मुद्गल मुसल जमदग्नि पराशर जातू
कर्ण महित मन्त्रित अश्मरथ शर्कराक्ष पूतिमाष स्थूरा अररक एलाक पिङ्गल कृष्ण गोलन्द उलूकः ति
तिक्ष भीषज् भिषज भडित भण्डित दल्भ चेकित चिकित्सित देवहू इन्द्रहू एकलू पिप्पलू बृहदग्निः सुलो
हिन् सुलाभिन् उक्थ कुटी गु गर्गादिः इत्यादि सूत्रत्रयं भाष्येण न व्याख्यातम् १०६ मधुबभ्र्वोर्ब्राह्मणकौशिकयोः

कौ सू त ग्र मधु बभ्रु इत्येताभ्यां क्रमेण ब्राह्मणे कौशिके च वाच्ये गोत्रे ऽपत्ये यञ् स्यात् माधव्यो ब्राह्मणश्चेत् माधवो ऽन्या :
सू.प. बाभ्रव्यः कौशिकश्चेत् बाभ्रवो ऽन्यः गर्गादिपाठफलन्तु लोहितादित्वात् ष्फः बाभ्रव्यायणी १०७ कपिबोधादाङ्गिरसे
१२० कौ सू त ग्र कपि बोध इत्येताभ्यामाङ्गिरसे वाच्ये गोत्रे ऽपत्ये यञ् स्यात् काप्यः बौध्यः आङ्गिरसे किम् कापेयः बौधिः
120 कपिशब्दस्य गर्गादिपाठफलन्तु लोहितादित्वात् ष्फः काप्यायनी १०८ वतण्डाच्च कौ सू त ग्र वतण्ड इत्येतस्मादा
ङ्गिरसे वाच्ये गोत्रे ऽपत्ये यञ् स्यात् वातण्ड्यः अनाङ्गिरसे तु गर्गादौ पाठाद्यञ् वातण्ड्यः शिवादौ च पाठादण् वातण्डः
किमर्थमिदमुच्यते न गर्गादिभ्यो यञित्येव सिद्धम् लुक् स्त्रियामिति यदि पुनस्तत्रैवोच्येत नैवं शक्यम् आङ्गिरसग्र
हणं विज्ञायेत इति भाष्यम् १०९ लुक् स्त्रियाम् कौ सू त ग्र वतण्ड इत्येतस्माद्यञो लुक् स्यात् आङ्गिरस्यां स्त्रियां वाच्या
याम् वतण्डी शार्ङ्गरवादित्वान् ङीन् आङ्गिरस्येव वातण्ड्यायनी वातण्डी इत्यादि सूत्रवर्यं भाष्ये तन्नाख्यातम् १९०
अश्वादिभ्यः फञ् कौ सू ता ग्र अश्व इत्येवमादिभ्यो गोत्रे ऽपत्ये फञ् स्यात् आश्वायनः आश्मायनः ये ऽत्र गोत्रप्रत्ययान्ता :
यञन्ते तेभ्यः सामर्थ्याद्यूनि भवति अश्व अश्मन् शङ्ख शूद्रक विद पुट रोहिण खर्जूर खञ्जार बस्त पिञ्जूल भडिल
भण्डिल भडित भण्डित प्रकृत रामोद क्षान्त काश तीक्ष्ण गोलाङ्क अर्क स्वर स्फुट चक्र श्रविष्ठ पविन्द पविन
गोमिन् श्याम धूम धूम्र वाग्मिन् विश्वानर कुट शप आत्रेये जन जड खड ग्रीष्म अर्ह कित विशंप विशाल गिरि च
पल चुप दासक वैल्व प्राच्य धर्म्म आनडुह्य पुंसिजात अर्जुनप्रहृत सुमनस दुर्म्मनस् मनस् प्रान्त ध्वन आत्रेय
भरद्वाजे भरद्वाजात्रेये उत्स आतव कितवा वद धिम्म पाद शिव खदिर अश्वादिः १११ भर्गात्त्रैगर्ते कौ सू त ग्र भर्ग इ
त्येतस्मात्त्रैगर्ते वाच्ये फञ् स्यात् भार्गायणस्त्रैगर्तश्चेत् भार्गिरन्यः इत उत्तरं गोत्राधिकारो निवृत्तः ११२ शिवादिभ्यो ऽण् कौ
सू त ग्र शिव इत्येवमादिभ्यो ऽपत्ये ऽण् स्यात् शैवः प्रौष्ठः उदीचामिञ् वाधितापवादो ऽयम् ग्रहणादणेव आर्ष्टिषेणः

शिव प्रोष्ठ प्रोष्ठिक चण्ड जम्भ भूरि दण्ड कुठार ककुभ् अनभिम्लान कोहित सुख सन्धि मुनि ककुत्स्थ कहोड क
हूय रोध कपिञ्जल खञ्जनावतण्ड तृणकर्ण क्षीरहृद जलहृद परिल पथिक पिष्ट हैहय पार्षिका गोपिका कपि
लिका वधिरिका मञ्जीरक मञ्जिरक वृष्णिक खञ्जाल कर्म्मार रेख लेख आलेखन विश्रवण रवण वर्तनाक्ष ग्रीवाक्ष
विटप पिटका पिटाक तृक्षाक नभाक ऊर्णनाभ जरत्कारु पृथा उत्क्षेप पुरोहितिका सुरोहितिका सुरोहिका आर्यश्वे
त सुपिष्ट मसूरकर्ण खर्जूरकर्ण खदूरक तक्षन् ऋष्टिषेण गङ्गा विपाश् यस्क लह्य द्रुह्य अयःस्थूण तृण कर्ण
पर्ण भलन्दन विरूपाक्ष भूमि इला सपत्नी द्व्यचो नद्याः त्रिवेणी त्रिवणं च शिवादिराकृतिगणः ११२ अवृद्धाभ्यो नदीमा
नुषीभ्यस्तन्नामिकाभ्यः कौ सू त अ नदी मानुषी इत्येतन्नामधेयेभ्यो ऽवृद्धसंज्ञकेभ्यो ऽपत्ये ऽण् स्यात् यमुनाया अपत्यम्
यामुनः नार्म्मदः मानुषीभ्यः चिन्तिताया अपत्यम् चैन्तित शैक्षितः अवृद्धाभ्यः किम् चान्द्रभागेयः वासवदत्तेयः नदीमा
नुषीभ्यः किम् सौपर्णेयः वैनतेयः तन्नामिकाभ्यः किम् शौभनेयः भाष्ये तु नेदं व्याख्यातम् ११३ ऋष्यन्धकवृष्णिकुरुभ्यश्च
कौ सू त अ ऋषि अन्धक वृष्णि कुरु इत्येतद्वाचकेभ्यः प्रातिपदिकेभ्यो ऽपत्ये ऽण् स्यात् ऋषयो मन्त्रद्रष्टारो वसिष्ठादयः
वासिष्ठः वैश्वामित्रः अन्धकावंशाख्याः श्वाफल्कः राधसः वृष्णयो वंशाख्याः वासुदेवः आनिरुद्धः कुरवो वंशाख्याः ना
कुलः साहदेवः ऋषिभ्यो ऽणो ढक्ढकौ विप्रतिषेधेन १ द्व्यचो ढक्ढकठञो २ विप्रतिषेधेनेत्येव नवर्ष्यणः पुनर्वचने
तत्प्रयोजनमप्यनिवृत्त्यर्थम् ३ तस्मात् वृष्णिभ्यो ऽरिषयाने ऽन्धादिभ्यः प्रतिषेधः ४ ढकः पुनर्वचनमपनिवृत्त्यर्थम् ५ तस्मा
त्तन्नामिकाण्यवचः ६ ऋष्यन्धकवृष्णिकुरुभ्यः सेनान्तासयः ७ विप्रतिषेधेनेत्येव जातेरथिविवक्षा भीमसेन इति वक्तव्यम् ८
सेनान्तेभ्य इति ११४ मातुरुत्संख्यासम्भद्रपूर्वायाः कौ सू त अ मातृ इत्येतस्मात् संख्यापूर्वात् सम्पूर्वात् भद्रपूर्वाच्चापत्ये ऽ
ण् स्यात् उकारश्चान्तादेशो मातृशब्दस्य संख्या द्व्योर्मात्रोरपत्यम् द्वैमातुरः षाण्मातुरः साम्मातुरः भाद्रमातुरः

स्त्र.प.
१२१
121

संख्येत्यादि किम् सौमात्रः स्त्रीलिङ्गनिर्देशो ऽर्थोपेक्षः तेन धान्यमातुर्ग्रहणं न भवति सौमात्रः ११५ कन्यायाः कनीन च
कौ स त अ कन्या इत्येतस्मादपत्ये ऽण् स्यात् तत्सन्नियोगेन कन्या इत्येतस्य कनीन इत्ययमादेशश्च कन्याया अपत्यम्
कानीनो व्यासः कर्णश्च ११७ विकर्णशुङ्गच्छगलाद्वत्सभरद्वाजात्रिषु कौ स त अ विकर्ण शुङ्ग छगल इत्येतेभ्यः
क्रमेणैव वत्स भरद्वाज अत्रिष्वेवाभिधेयेषु अपत्ये ऽण् स्यात् वैकर्णो वात्स्यश्चेत् वैकर्णिरन्यः शौङ्गो भारद्वाजश्चेत् शौ
ङ्गिरन्यः छागलस्त्वात्रेयश्चेत् छागलिरन्यः इत्यादि सूत्रत्रयं भाष्ये ऽत्र व्याख्यातम् ११८ पीलाया वा कौ स त अ पीला
इत्येतस्मादपत्ये ऽण् वा स्यात् पैलः पैलेयः ११९ ठक् च मण्डूकात् कौ स त मण्डूक इत्येतस्मादपत्ये ठक् स्यात् चकार
दण् च वा स्यात् माण्डूकेयः माण्डूकिः १२० स्त्रीभ्यो ढक् कौ स त अ स्त्रीप्रत्ययान्तेभ्यः प्रातिपदिकेभ्यो ऽपत्ये ढक् स्यात्
सौपर्णेयः वैनतेयः वडवाया वृषे वाच्ये १ ढक् वाडवेयो वीजाश्वः विशेषविहितेनाप्यनेन ढको ऽपत्यमर्थो बाध्यते अपत्ये
तु अण् वाडवः अण् क्रुञ्चाकोकिलात्स्मृतः २ क्रौञ्चः कौकिलाः आरक् पुंसि ततो ऽन्यत्र ३ मूषिकायाः पुमान् मूषिकारः
गोधाया ढ्रग्विधीयते ४ ढ्रक् गोधायाः पुमान् गौधेयः वडवायास्तु वृषे वाच्ये ऽण् क्रुञ्चाकोकिलात्स्मृतः आरक् पुंसि ततो ऽन्यत्र
गोधाया ढ्रग्विधीयते ५ कारिकेयम् १२१ द्व्यचः कौ स त अ द्व्यचौ यस्मिंस्ततः स्त्रीप्रत्ययान्तादपत्ये ढक् स्यात् दत्ताया
अपत्यम् दात्तेयः गौप्तेयः द्व्यचः किम् यामुनः इत्यादि सूत्रसप्तकं भाष्ये ऽत्र व्याख्यातम् १२२ इतश्चानिञः कौ स त अ इ
दित्येतदन्तादनिञन्तात् द्व्यचः प्रातिपदिकादपत्ये ढक् स्यात् आत्रेयः नैधेयः इतः किम् दाक्षिः अनिञः किम् दाक्षायणः
द्व्यचः किम् मारीचः १२३ शुभ्रादिभ्यश्च कौ स त अ शुभ्र इत्येवमादिभ्यो ऽपत्ये ढक् स्यात् शौभ्रेयः वैष्टपुरेयः शुभ्र विष्ट
पुर ब्रह्मकृत शतद्वार शलाथल शलाकाभ्रू लेखाभ्रू विकास रोहिणी रुक्मिणी धर्मिणी दिश् शालूक अजबस्ति श
कान्धि विमातृ विधवा शुक विश देवतर शकुनि शुक्र उग्र शतल बन्धकी सकण्डु विस्ति अतिथि गोदन्त कुशाम्ब ग १२१

कद्रु प्रातहर पवष्टुरिक सुनामान् लक्ष्मणश्यामयोर्वासिष्ठे गोधा कृकलास अणीव प्रवाहण भारत भरम
मृकण्डु कर्पूर इतर अन्यतर आलीढ सुदत्त सुदत्ता सुवत्तम् सुदामन् कद्रु तुद अकशाप कुमारिका कुठारि
का किशोरिका अम्बिका जिह्माशिन् परिधि वायुदत्त शकल शलाका खड्डूर कुवेरिका अशोका गन्धपिङ्ग
ला खडोन्मत्ता अनुदृष्टि जरतिन् बलीवर्दिन् विग्र बीज जीव श्वन् अश्मन् अश्व अजिर शुभ्रादिराकृतिगणः १२८
विकर्णकुषीतकात्काश्यपे कौ सु त अ विकर्ण कुषीतक इत्येताभ्यां काश्यपे वाच्येऽपत्ये ढक् स्यात् वैकर्णेयः
काश्यपश्चेत् वैकर्णिरन्यः कौ षीतकेयः काश्यपश्चेत् कौषीतकिरन्यः १२२५ भ्रुवो वुक्च कौ सु त अ भ्रु इत्येत
स्मादपत्ये ढक् स्यात् तत्संनियोगेन वुगागमश्च भ्रौवेयः १२६ कल्याण्यादीनामिनङ् च कौ सु त अ कल्याणी इत्ये
वमादिभ्योऽपत्ये ढक् स्यात् तत्संनियोगेन तेषामिनङादेशश्च काल्याणिनेयः सौभागिनेयः कल्याणी सुभगा दुर्भ
गा बन्धकी अनुदृष्टि अनुसृष्टि जरती बलीवर्दी ज्येष्ठा कनिष्ठा मध्यमा परस्त्री कल्याण्यादिः १२७ कुलटाया वा
कौ सु त अ कुलटा इत्येतस्मादपत्ये ढक् स्यात् तत्संनियोगेन इनङादेशश्च वा कौलटिनेयः कौलटेयः सतीभि
द्वक्यत्रकुलटा याति व्यभिचारार्थं कुलान्यटति तत्र ढ्रग्ढ्राभ्यां वेति ढ्रक् कौलटेरः १२९ चटकाया ऐरक् कौ सु त अ
चटका इत्येतस्मादपत्ये ऐरक् प्रत्ययः स्यात् चाटकैरः चटकायाः पुंलिङ्गनिर्देशः १ चटकाद्वेतिवक्तव्यम् १ इतिका
शिका वकस्येतिवाच्यम् १ कौ सु त अ चटकस्यापत्यम् चाटकैरः स्त्रियामपत्ये लुक् २ कौ सु त अ चटकस्याप
त्यं स्त्री चटका १२९ गोधाया ढ्रक् कौ सु त अ गोधा इत्येतस्मादपत्ये ढ्रक् स्यात् गौधेरः शुभ्रादिषु पठ्यते तेन ढ
क् गौधेयः भाष्यमतेनेदं व्याख्यातम् २३ आरगुदीचाम् कौ सु त अ गोधा इत्येतस्मादपत्ये आरक् स्यात् गौधारः
उदीचां ग्रहणं पूजार्थम् वचनसामर्थ्यादेव ढ्रकासमावेशो भविष्यति आरग्वचनमनर्थकं रकासिद्धत्वात् १

स्तृ॰ प॰
१२२

अन्येभ्योऽपत्येभवतीति किमेतस्यत्तायनेप्रयोजनम् नाडारः पाण्डारइत्येतात्सिद्धम् इतिभाष्यम् १३१ क्षुद्राभ्योवा कौ सू
त्र क्षुद्राभ्यो पत्येवाढ्रक्स्यात् काणेरः दासेरः पक्षेठक् काणेयः दासेयः काः क्षुद्रानाम अनियतपुंस्काश्चाङ्गही
नावा इतिभाष्यम् १३२ पितृष्वसुश्छण् कौ सू त अ पितृष्वसृ इत्येतस्मादपत्येछण्स्यात् पैतृष्वस्रीयः भाष्येतेनेद
व्याख्यातम् १३३ ढकिलोपः कौ सू त अ पितृष्वसृ इत्येतस्यापत्येढकिपरेलोपःस्यात् पैतृष्वसेयः पक्षेदेवन्नापपति
भवतिपितृष्वसठेगिति इतिभाष्यम् १३४ मातृष्वसुश्च कौ सू त अ मातृष्वसृ इत्येतस्मादपिपितृष्वसृशब्दस्यपठक्त
ङ्भवति मातृष्वस्रीयः मातृष्वसेयः पवेवक्ष्यामि पितृष्वसुश्छपाठकिलोपः ततोमातृष्वसुश्च इतिभाष्यम् १३५
चतुष्पाद्भ्योढञ् कौ सू त अ चतुष्पाजातिवाचिभ्योऽपत्येढञ्स्यात् कामण्डलेयः शैतिबाहेयः इत्यादिसूत्रद्वयंभाष्येतेन
व्याख्यातम् १३६ गृष्ट्यादिभ्यश्च कौ सू त अ गृष्टिइत्येवमादिभ्योऽपत्येढक्स्यात् गार्ष्टेयः हार्ष्टेयः गृष्टि हृष्टि वालि विश्रि कु
द्रि अजवास्ति मित्रयु गृष्ट्यादिः १३७ राजश्वशुराद्यत् कौ सू त अ राजन् श्वशुर इत्येताभ्यामपत्येयत्स्यात् राजन्यः श्वशुर्यः रा
ज्ञोऽपत्येजातिग्रहणम् १ राज्ञोजातावेवेतिवाच्यम् कौ सू त अ शूद्रादावुत्पन्नोराजनः १३८ क्षत्राद्घः कौ सू त अ क्षत्र इ
त्येतस्मादपत्येघःस्यात् क्षत्रियोजातिश्चेत् क्षात्रिरन्यः इत्यादिसूत्रसप्तकंभाष्येतेनव्याख्यातम् १३९ कुलात्खः कौ सू
त अ कुल इत्येतस्मादपत्येखः स्यात् कुलीनः उत्तरसूत्रेऽपूर्वपदादितिषेधादत्रकुलान्तादपिखः आढ्यकुलीनः १४०
अपूर्वपदादन्यतरस्यांयड्ढकञौ कौ सू त अ कुल इत्येतस्मादविद्यमानपूर्वपदादपत्येऽर्थेयत् वाहुकुल्यः वाहुकुले
यकः वहुकुलीनः १४१ महाकुलादञ्खञौ कौ सू त अ महाकुल इत्येतस्मादपत्येऽञ् खञ् इत्येतौप्रत्ययौवाभवतः
माहाकुलः माहाकुल इत्येतस्मादपत्येऽञ् खञ् इत्येतौप्रत्ययौवाभवतः माहाकुलः माहाकुलीनः पक्षेखः महा
कुलीनः १४२ दुष्कुलाड्ढक् कौ सू त अ दुष्कुल इत्येतस्मादपत्येवाढक्स्यात् दौष्कुलेयः पक्षेखः दुष्कुलीनः १४३ १२२

स्वसुश्छः कौ स त त्र स्वसृ इत्येतस्मादपत्ये छः स्यात् स्वस्रीयः १७४ भ्रातुर्व्यच्च कौ स त त्र भ्रातृ इत्येतस्मादपत्ये व्यत्स्या
त् वकाराच्छश्च भ्रातृव्यः भ्रात्रीयः तकारः स्वरार्थः १७५ व्यन्सपत्ने कौ स त त्र भ्रातृ इत्येतस्मात् शत्रौ वाच्येऽपत्ये व्य
न्स्यात् भ्रातृव्यः कण्टकः कथं पाप्मना भ्रातृव्येणेति उपमानात्सिद्धम् इति भाष्यम् १७६ रेवत्यादिभ्यष्ठक् कौ स
त त्र रेवती इत्येवमादिभ्योऽपत्ये ठक् स्यात् रेवतिकः आश्वपालिकः रेवती अश्वपाली मणिपाली द्वारपाली वृ
कवञ्चिन् वृकबन्धु वृकग्राह कर्णग्राह दण्डग्राह ककुदाक्ष चामरग्राह रेवत्यादिः भाष्ये तु नेदं व्याख्यातम् १७७
गोत्रस्त्रियाः कुत्सने ण च कौ स त त्र गोत्रे या स्त्री तद्वाचिनः शब्दादपत्येऽर्थे कुत्सने गम्यमाने णः स्यात् चकाराट्ठक्
गार्ग्या अपत्यम् गार्गो जाल्मः गार्गिकः स्त्रियाः किम् औपगविः कुत्सने किम् गार्गेयो माणवकः फिनर्थं तु ण
कारः इति भाष्यम् १७८ वृद्धाट्ठक् सौवीरेषु बहुलम् कौ स त त्र वृद्धसंज्ञकात्सौवीरगोत्रादपत्ये कुत्सायां बहुलं
ठक् स्यात् भागवित्तेरपत्यम् भागवित्तिकः पक्षे फक् भागवित्तायनः सौवीरेषु किम् औपगविर्जाल्मः कुत्सने इत्ये
व भागवित्तायनो माणवकः इत्यादि सूत्रद्वयं भाष्ये तु पृथक् न व्याख्यातम् १७९ फेश्छ च कौ स त त्र फिञ् इत्येत
दन्तात्सौवीरगोत्रादपत्ये छः स्यात् चकाराट्ठक् कुत्सने गम्ये यमुन्दस्यापत्यम् यामुन्दायनिः तिकादिभ्यः फिञ् तस्याप
त्यं वा यामुन्दायनीयः यामुन्दायनिकः कुत्सने किम् यामुन्दायनिः राष्ट्रविपार्ष इत्यादिना णो लुक् १८० फा
ण्टाहृतिमिमताभ्यां णफिञौ कौ स त त्र फाण्टाहृति मिमत इत्येताभ्यां णफिञौ कौ स त त्र फाण्टाहृति
मिमत इत्येताभ्यां सौवीरगोत्रे वर्तमानाभ्यामपत्येऽर्थे ण फिञः इत्येतौ प्रत्ययौ भवतः फाण्टाहृतः फाण्टाहृताय
निः मैमतः मैमतायनिः फाण्टाहृतेः प्रत्ययस्य णकारणानर्थक्यं वृद्धत्वात्फान्ति यदि कस्य इति भाष्यम् १८१ कुर्वा
दिभ्यो ण्यः कौ स त त्र कुरु इत्येवमादिभ्योऽपत्येऽर्थे ण्यः स्यात् कौरव्यो कौरव्याः ब्राह्मणाः कुरु गर्गर मंगुष अज

मार रथकार वावदूक सम्राज् क्षत्रिये कविविमति कापिञ्जलादि वाक्र वामरथ पितृमत् इन्द्रलाजी एजि वातकि
सू.प. दामोष्णीषि गणकारि कैशोरि कुट शलाका मर धुर परका शुभ्र अश्म दर्भ केशिनी वेनाच्छन्दसि शूर्पणाय श्या
१२३ वनाय श्यावरथ श्यावपुत्र सत्यंकार वडभीकार पथिकार मूढ शकन्ध्वाशङ्कु शाक शाकिन् शालीन कर्तृ ह
123 र्तृ इन पिण्डी वामरथस्य कण्वादिवत्स्वरवर्जं कण्वादिः वामरथस्य कण्वादिवत्स्वरवर्जम् १ लुगादिकमतिदिश्यते
वामरथ्याः स्वरस्तु प्रत्ययस्यैव नत्वातिदेशिकमाद्युदात्तत्वम् १५२ सेनान्तलक्षणकारिभ्यश्च कौ सू त श्च सेन इत्येत
दन्तात् लक्षण इत्येतस्मात्कारिवाचकेभ्यश्चापत्येऽर्थे ण्यः स्यात् हारिषेण्यः लाक्षण्यः कारि शिल्पी तान्तुवाय्यः
नापित्यः भाष्यतन्नेनेदमाख्यातम् १५३ उदीचामिञ् कौ सू त श्च सेन इत्येतदन्तात् लक्षण इत्येतस्मात्कारिवाचके
भ्यश्चापत्येऽर्थे इञ् स्यात् उदीचामाचार्याणां मते हारिषेणिः लाक्षणिः कौम्भकारिः अन्येषां मते हारिषेण्यः
लाक्षण्यः कौम्भकार्यः उदीचामिञ्विधौ तक्ष्णोऽण् वचनम् १ तक्ष्णोऽण उपसंख्यानम् १ कौ सू त श्च ताक्ष्णः
ताक्षण्यः शिवादिषु तिवेण्विधिः २ सिद्धे तदीवोवाणवचनात् ३ १५४ तिकादिभ्यः फिञ् कौ सू त श्च तिक
इत्येवमादिभ्योऽपत्येऽर्थे फिञ् स्यात् तैकायनिः कैतवायनिः तिक कितव संज्ञा बाला उरस् शाठ्य सैन्धव यमु
न्द रूप्य ग्राम्य नील अमित्र गौकक्ष्य कुरु देवरथ तैतल औरस कौरव्य भौरिकि भौलिकि चौपयत चैटयत
शीकयत क्षैतयत ध्वाजवत चन्द्रमस् शुभ गङ्गा वरेण्य सुयामन् आरद्ध वह्यका खल्यका वृष लोमक उ
दञ्च यञ्ज तिकादिः भाष्यतन्नेदमाख्यातम् १५५ कौशल्यकार्मार्याभ्यां च कौ सू त श्च कौशल्य कार्मार्य इत्ये
ताभ्यामपत्येऽर्थे फिञ् स्यात् कौशलस्यापत्यम् कौशल्यायनिः कर्मारस्यापत्यं कार्मार्यायणिः परमप्रकृतेरा
पत्ये प्रत्ययः अस्य यस्त्रियोगेन च कौशल्यकार्मार्य इति प्रकृतिरूपं निपात्यते फिञ्प्रकरणे दगुकोशलकर्मारच्छा १२३

गहषाण्योर्युक्तवेतिवक्तव्यम् २ दगु दागव्यायनिः कोशला कौशल्यायनिः कर्म्मार कार्म्मार्यायणिः छाग छाग्यायनिः वृष
वार्ष्यायणिः युट्चादिष्टस्येति वक्तव्यम् २ छागवृषयोरपि १ कौ सु त स्र १५६ अणो द्व्यचः कौ सु त स्र अण् इत्येतदन्ता
द्द्व्यचः कात्प्रातिपदिकादपत्येऽर्थे फिञ् स्यात् कार्त्रायणिः अणः किम् दाक्षायणः द्व्यचः किम् औपगविः इत्यादि सूत्रद्वये भा
ष्ये तन्नव्याख्यातम् १५७ उदीचां वृद्धादगोत्रात् कौ सु त स्र वृद्धसंज्ञकं यत्प्रातिपदिकमगोत्रं तस्मादपत्येऽर्थे फिञ् स्यात्
उदीचां मते आम्रगुप्तायनिः अन्येषां मते आम्रगुप्तिः वृद्धात्किम् याज्ञदत्तिः अगोत्रात्किम् औपगविः १५८ वाकिनादी
नां कुक् च कौ सु त स्र वाकिन इत्येवमादिभ्योऽपत्येऽर्थे फिञ् वा स्यात् तत्संनियोगेन तेषां कुगागमश्च वाकिनकायनिः
वाकिनिः वाकिन गौधेर कार्कष काक लंका चर्म्मिवर्म्मिणोर्नलोपश्च वाकिनादिः कुटिप्रत्ययादेराकृतिगणत्वप्रतिपत्तिरनादि
त्वात् १ चर्म्मान्तेन लोपवचनम् २ कुद्वादिष्टस्येति वक्तव्यम् ३ चर्म्मिवर्म्मिणोर्नलोपश्च ४ चार्म्मिकायणिः वार्म्मिकायणिः
कारिभाइजो गोत्रात् फिञ् विप्रतिषेधेन ५ नापितायनिः १५९ पुत्रान्तादन्यतरस्याम् कौ सु त स्र पुत्र इत्येतदन्ताद्वृद्धप्रा
तिपदिकमगोत्रं ततः फिञि परे पुत्रान्तस्य कुगागमो वा स्यात् गार्गीपुत्रकायणिः गार्गीपुत्रायणिः गार्गीपुत्रायणिः
गार्गीपुत्रिः इत्यादि सूत्रद्वये भाष्ये तन्नव्याख्यातम् १६० प्राचामवृद्धात्फिन् बहुलम् कौ सु त स्र वृद्धसंज्ञकभिन्नात्प्राति
पदिकादपत्येऽर्थे फिन् वा स्यात् ग्लुचुकायनिः प्राचां ग्रहणं पूजार्थम् अवृद्धात्किम् राजदन्तिः १६१ मनोर्जातावञ्यतौ
षुक् च कौ सु त स्र मनु इत्येतस्मादपत्येऽर्थेऽञ् यत् इत्येतौ प्रत्ययौ भवतः षुगागमश्च भवति समुदायेन चेज्जातिर्गम्यते
मानुषः मनुष्यः अपत्ये कुत्सिते मूढे मनोरौत्सर्गिकः स्मृतः नकारस्य च मूर्द्धन्यस्तेन सिध्यति माणवः १ कारिकेयम् १६२
अपत्यं पौत्रप्रभृति गोत्रम् संज्ञाप्रदेशाः ४ १ ७८ कौ सु त स्र पौत्रादि यदपत्यं तद्गोत्रसंज्ञं स्यात् गर्गस्यापत्यं पौत्रप्रभृत्यपत्यं
गार्ग्यः पौत्रप्रभृतेर्गोत्रसंज्ञार्थं यस्यापत्यं तस्य पौत्रप्रतिसंज्ञाकरणम् १ विवक्षितमिति शेषः गार्ग्योऽपि हि किं विद्यति

योत्रः जीवद्वंश्येवक्तव्यमितम् २ भ्रमस्वकुत्सायांगोत्रसंज्ञेतिवाच्यम् १ कौ स त म्र भ्रूनस्वकुत्सायामितिसूत्रमन्येषा
सू॰प॰ मितिवचनम् इतिकैय्यटः १६३ जीवतितुवंश्येयुवा संज्ञाप्रदेशाः ४ १ १६४ कौ स त म्र वंश्येपित्रादौजीवतिपौत्रादे
१२४ र्यदपत्यंतद्युवसंज्ञमेवस्यात् नतुगोत्रसंज्ञम् गार्ग्यायणः वात्स्यायनः जीवतितुवंश्येयुवेतिपौत्रप्रभृत्येपेदेव १
तद्वदेवइत्यर्थम् २ हृद्दस्यचयूजायाम् ३ कौ स त म्र आपत्योवागोत्रम् ४ परमप्रकृतेस्त्वापत्यः ५ आपत्याजीवद्वं
श्यापत्यार्थेद्वितीयः प्रत्ययोवक्तव्यः ६ युवसंज्ञस्यभवतीतिवक्तव्यम् ७ सवाऽस्त्रियाम् ८ एकोगोत्रग्रहणंनर्थकं
च ९ वहुवचनलोपियुवसिद्धम् १० सूत्रेयुत्वहृद्दस्यचयुजायामितिकेचिद्वार्तिकदर्शनात्प्रात्किप्तम् इतिकैय्यटः १६४
भ्रातरिचज्यायसि कौ स त म्र वंश्येपित्रादौमृतेऽपिज्येष्ठेभ्रातरिजीवतिसतिपौत्रादेःकनिष्ठमपत्यंयुवसंज्ञंस्यात् गा
र्ग्यायणः वात्स्यायन भाष्येतुनेदंव्याख्यातम् १६५ वान्यास्मिन्सपिण्डेस्थविरतरेजीवति कौ स त म्र सप्तमपुरुषावध
यः सपिण्डाः भ्रातुरन्यास्मिन्सपिण्डेस्थविरतरेजीवतिसतिपौत्रादेरपत्यंजीवदेवयुवसंज्ञंवास्यात् गर्गस्यापत्यंयुवा गा
र्ग्यायणः गार्ग्यः स्थविरतरइतितरपोनिर्देशः स्थानवयसोरुत्कर्षार्थः तेनस्थानेनवयसावन्यूनेगार्ग्यइत्येवभवति
जीवतीतिकिम् मृतेमृतोवागार्ग्यएव युवसंज्ञायागोत्रसंज्ञायाः प्रतिषेधोवक्तव्यः १ गोत्रयूनोःसमावेशेकोदो
षस्तत्कृतेभवेत् यस्कादिषुनदोषोऽस्तिनयूनीत्यनुवर्तनात् १ दोषोऽत्रिविदपञ्चालानिहृत्तेऽयूनिनेत्यपि कएवा
दिषुनदोषोऽस्तिविहितान्नितःपरम् २ एकोगोत्रेप्रतिपदंगोत्राप्यनिवर्तत्स्मरेत् राजन्याहुरूमनुष्याच्चसंज्ञापकं
लौकिकंपरम् ३ कारिकाइमाः १६६ हृद्दस्यचयूजायाम् कौ १०।०। गोत्रस्ययुवसंज्ञावास्यात् यूजायांगम्यमानायां
म् तत्रभवान्गार्ग्यायणः गार्ग्योवा यूजायांकिम् गार्ग्यः इत्यादिसूत्रद्वयंभाष्येतुनव्याख्यातम् १६७ यूनश्चकु
त्सायाम् कौ।०कुत्सायांगम्यमानायांयूनोयुवसंज्ञावास्यात् पदेयुवसंज्ञातिषेधाद्गोत्रसंज्ञैवभवति गार्ग्योजाल्मः १२४

गार्ग्यायणो जाल्मः कुत्सायां किम् गार्ग्यायणः १६८ जनपदशब्दात्क्षत्रियादञ् कौ सू त स्र जनपदवाचकः सन् यः
क्षत्रियवाचकः शब्दस्तस्मादपत्ये ऽर्थे ऽञ्स्यात् पाञ्चालः ऐक्ष्वाकः जनपदशब्दात्किम् द्रुह्योरपत्यम् द्रौह्यवः क्षत्रियात्कि
म् ब्राह्मणस्य पञ्चालस्यापत्यम् पाञ्चालिः क्षत्रियादेकराजात्संघप्रतिषेधार्थम् १ क्षत्रियसमानशब्दाज्जनपदात्तस्य राज
न्यपत्यवत् २ कौ सू त स्र पञ्चालानां राजा पाञ्चालः पूरोरण्वक्तव्यः ३ कौ सू त स्र पूरोरपत्यं राजा वा पौरवः पाण्डोर्ड्यण् ४
कौ सू त स्र पाण्ड्यः पाण्डोर्जनपदशब्दात्क्षत्रियात् ड्यण्वक्तव्यः १ इति काशिका १६९ साल्वेयगान्धारिभ्यां च कौ सू
त स्र साल्वेय गान्धारि इत्येताभ्यां जनपदक्षत्रियाभ्यां वाचिभ्यामपत्ये ऽर्थे ऽञ्स्यात् साल्वेयः गान्धारः तस्य राजनीत्येव
साल्वेयो राजा वृद्धेदिति ञ्यङो बाधनार्थं सूत्रम् भाष्ये त्वनेदं व्याख्यातम् १७० द्व्यञ्मगधकलिङ्गसूरमसादण् कौ
सू त स्र जनपदक्षत्रियवाचिभ्यो द्व्यच्केभ्यः मगध कलिङ्ग सूरमस इत्येतेभ्यश्चापत्ये ऽण् स्यात् द्व्यच् आङ्गः मौह्मः
मागधः कालिङ्गः सौरमसः तस्य राजन्यप्येवम् अणो ञ्यङ् ण्यो विप्रतिषेधेन १ ञ्यङः कुरुनादिभ्यो ण्यः २ १७१
वृद्धेत्कोसलाजादाञ्ञ्यङ् कौ सू त स्र जनपदक्षत्रियवाचिभ्यो वृद्धसंज्ञकेभ्यः इकारान्तेभ्यः कोसल अजाद इत्येताभ्यां चा
पत्ये ऽर्थे ञ्यङ् स्यात् वृद्ध आम्बष्ठ्यः इत् आवन्त्यः कौसल्यः आजाद्यः इदिति तपरकरणं किम् कौमारः इत्यादि सूत्रवत्तद्भाष्ये
भाष्ये त्वनया व्याख्यातम् १७२ कुरुनादिभ्यो ण्यः कौ सू त स्र कुरु इत्येतस्मान्नकारादिभ्यश्च जनपदक्षत्रियवाचिभ्यो ऽपत्ये ण्यः
स्यात् कौरव्यः नादिभ्यः नैषध्यः नैचिक्यः तस्य राजन्यप्येवम् ११७३ साल्वावयवप्रत्यग्रथकलकूटाश्मकादिञ् कौ सू
त स्र जनपदावयववाचिभ्यः प्रत्यग्रथ कलकूट अश्मक इत्येतेभ्यश्चापत्ये इञ् स्यात् साल्वावयव औदुम्बरिः यौगन्ध
रिः भौलिङ्गिः प्रात्यग्रथिः कालकूटिः आश्मकिः तस्य राजन्यप्येवम् १७४ ते तद्राजाः संज्ञाप्रदेशः २ ४ ६२ कौ सू
त स्र अञ् इत्येवमादयः प्रत्ययास्तद्राजसंज्ञका भवन्ति पञ्चापञ्चालाः इक्ष्वाकवः अङ्गाः वङ्गाः १७५ कम्बोजाल्लुक् कौ

सू त अ कम्बोज इत्येतस्मात्परस्य तद्राजसंज्ञकस्य लुक् स्यात् कम्बोजाः कम्बोजौ कम्बोजादिभ्यो लुग्वचनं चोलाद्यर्थम् १ क
सू॰प॰ म्बोजः चोलाः तस्य राजन्यप्येवम् कम्बोजादिभ्य इति वक्तव्यम् १ कौ सू त अ कम्बोज चोल केरल शक यवन कम्बोजादिः
१२५ १७६ स्त्रियामवन्तिकुन्तिकुरुभ्यश्च कौ सू त अ अवन्ति कुन्ति कुरु इत्येतेभ्यः स्त्रियां तद्राजस्य लुक् स्यात् अवन्ती कु
न्ती उभयत्र ङ्यङोर्लुक् कुरूः एषस्य लुक् स्त्रियां किम् आवन्त्यः कौन्त्यः कौ त्व भाष्ये त्वनेदं व्याख्यातम् १७७ अतश्च
125 कौ सू त अ अ इत्येतस्य तद्राजस्य स्त्रियां लुक् स्यात् शूरसेनी मद्री अत इति तदन्तग्रहणमवन्त्यादिभ्यो लुग्वचनात् १
पञ्चादिभ्यो लुग्वक्तव्यः २ १७८ न प्राच्यभर्गादियौधेयादिभ्यः कौ सू त अ प्राच्येभ्यः भर्गादिभ्यः यौधेयादिभ्यश्चोत्पन्न
स्य तद्राजस्य लुक् न स्यात् पाञ्चाली वैदेही आङ्गी भार्गी कारुषी यौधेयी शौक्रेयी भर्ग करुष केकय कश्मीर
साल्व सुस्थाल उरस् कौरव्य भर्गादिः यौधेय शौक्रेय शौभ्रेय ज्यावाणेय धौर्तेय धार्तेय त्रिगर्त भरत उशीनर
यौधेयादिः भाष्ये त्वनेदं व्याख्यातम् इति ३९ सूत्राणि भाष्ये ४ १७ व्याख्यातानि इति सूत्रपाठे वृत्तौ चतुर्थाध्यायस्य प्रथमः पादः १
तेन रक्तं रागात् कौ सू त वा तृतीयान्ताद्रागविशेषवाचिनो रक्तमित्येतस्मिन्नर्थे अणादयो वक्ष्यमाणाः प्रत्यया भवन्ति क
षायेण रक्तं वस्त्रम् काषायम् कौसुम्भम् रागात्किम् देवदत्तेन रक्तं वस्त्रं रक्तादीनामर्थाभिधाने प्रत्ययविधानादुपाध्या
नर्थकम् इति भाष्यम् २ लाक्षारोचनाट्ठक् कौ सू त वा लाक्षा रोचना इत्येताभ्यां रक्तेऽर्थे ठक् स्यात् लाक्षिकम् रौ
चनिकम् ठक्प्रकरणे शकलकर्दमाभ्यामुपसंख्यानम् १ शकलकर्दमाभ्यामुपसंख्यानम् १ कौ सू त वा शाकलि
कम् कार्दमिकम् शकलकर्दमाभ्यामणपीष्यते १ इति काशिका कौ सू त वा शाकलः कार्दमाः नील्या अन् २
कौ सू त वा नील्या रक्तम् नीलम् पीतात्कन् २ कौ सू त वा पीतकम् पीतकशब्दो वा प्रकृत्यन्तरं तस्माल्लुग्वक्तव्यः ४
हारिद्रामहारजनाभ्यामञ् ५ कौ सू त वा हारिद्रम् माहारजनम् २ नक्षत्रेण युक्तः कालः कौ सू त वा तृतीयान्ता १२५

नक्षत्रवाचिनो युक्त इत्येतस्मिन्नर्थे ऽणादयः प्रत्यया भवन्ति पुष्येण युक्तम् पौषमहः पौषी रात्रिः नक्षत्रेणेति किम् चन्द्रम
सा युक्ता रात्रिः कालः किम् पुष्येण युक्तास्य चन्द्रमाः नक्षत्रेण चन्द्रमसो योगात् तद्युक्तात्काले प्रत्ययविधानम् १ नक्षत्रयु
क्तचन्द्रवाचिनः पुष्यशब्दात् पुष्ययुक्तादिशब्दादित्यर्थः नक्षत्रान्तरपदलोपः २ लिङ्गवचनान्यप्यतिदेश ३ पुष्यसमीपगते चन्द्रम
सि पुष्यशब्दो वर्तते इति भाष्यम् ४ लबविशेषे कौ सू त वा पूर्वसूत्रविहितस्य प्रत्ययस्य लुप् स्यात् नक्षत्रयुक्तस्य
कालस्य विशेषो यदि न गम्यते अद्य पुष्याः अविशेषे किम् पौषमहः पौषी रात्रिः कः पुनः कालो नक्षत्रेण युज्यते
अहोरात्रः इति भाष्यम् ५ संज्ञायां श्रवणाश्वत्थाभ्यां कौ सू त वा श्रवण अश्वत्थ इत्येताभ्यामुत्पन्नस्य प्रत्यय
स्य संज्ञायां विषये नक्षत्रयुक्तकालस्य विशेषे वा लुप् स्यात् श्रवणा रात्रिः विभाषा फाल्गुनीतिष्ये सूत्रे श्रवणा इति नि
र्देशात् लुपि युक्तवद्भावो न भवति अश्वत्थो मुहूर्तः संज्ञायां किम् श्रावणी रात्रिः आश्वत्थो मुहूर्तः ६ द्वन्द्वाच्छः कौ
सू त वा तृतीयान्तान्नक्षत्रद्वन्द्वात् युक्ते काले छः स्यात् विशेषे सति अपि तु राधानुराधीया रात्री तिष्यपुनर्वसवीय
महः अविशेषे अपि राधानुराधीयम् अपि तिष्यपुनर्वसवीयम् लुपं परत्वाच्छो नाधते भाष्ये तनेदं व्याख्यातम् ७ दृष्टं
साम कौ सू त वा तृतीयान्ताद् दृष्टमित्येतस्मिन्नर्थे ऽणादयः प्रत्यया भवन्ति यद् दृष्टं साम चेत् तद्भवति वसिष्ठेन दृष्टम्
वासिष्ठं साम ८ कलेर्ढक् कौ सू त वा कलि इत्येतस्मात् तृतीयान्ताड् ढक् स्यात् कलिना दृष्टम् कालेयं साम दृष्टे
साम कलेर्ढग्वक्तव्यः १ सर्वत्राग्निकलिभ्यां ढक् १ इत्यपरस्य सर्वत्र प्रदीव्यतीयेष्वर्थेष्वित्यर्थः आग्नेयम् कालेयम्
अग्निकलिभ्यां ढग्वक्तव्यः १ कौ सू त अ दृष्टे सामनि जाते च अण् डिद्द्विर्वा वक्तव्यः २ दृष्टे सामनि अण्वा डिद्भवतीति व
क्तव्यम् १ इति काशिका औशनसम् औशनम् अस्मिन्नर्थे ऽण् डिद्वा वक्तव्यः १ कौ सू त वा जाते चार्थे योऽयमणवाधि
तः पुनरपरं विधीयते स वा डिद्भवतीति वक्तव्यम् २ इति काशिका शातभिषजि जातः शातभिषजः शातभिषः जाता

ये प्रतिप्रसूतो गणवाडिद्वक्तव्यः २ कौ। सा। त। पूणे तीयादीकक् ३। तीयादीकक् स्वार्थे वा वक्तव्यः ३। इति काशिका। द्वैती-
सू.प. यीकम्। द्वितीयम्। तार्तीयीकम्। तृतीयम्। तीयादीकक् स्वार्थे वा वाच्यः ३। कौ। सा। त। प्रागि। न विद्यायाः ४। कौ। सा। त।
१२६ प्रागि। गोत्रादङ्कवदिष्यते। ५। इति काशिका। औपगवकम्। गोत्रवदणादितिवन्न। दृष्टे सामनि जाते वा यथाणि द्विर्वा विधी-
126 यते। कीयादीकक् न विद्याया गोत्रादङ्कवदिष्यते १ कारिकेयम् ४ वामदेवाड्ड्यड्ड्यौ कौ। सा। त। वा। वामदेव। इत्येतस्मात्
ड्यत्। ड्य। इत्येतौ प्रत्ययौ भवतः। वामदेवेन दृष्टम्। वामदेव्यम्। वामदेव्यं साम। स्वरे विशेषः। सिद्धे यस्येति लोपेन किमर्थं यय
तौ डितौ। ग्रहणमातदर्थम्। वामदेव्यस्य नञ्स्वरे १ कारिकेयम् अननुबन्धकग्रहणे न सानुबन्धकस्य ग्रहणम् १ तदनु-
बन्धकग्रहणे नातदनुबन्धकस्य ग्रहणम् २ परिभाषेयमे १० परिवृतो रथः। कौ। सा। त। वा। तृतीयान्तात् परिवृत इत्येत-
स्मिन्नर्थे अणादम्। वस्त्रेण परिवृतः कायः। समन्ताद्वेष्टितः परिवृत उच्यते। तेनेह न। छात्रैः परिवृतः। परिवृतो रथ
इति तदेकान्तग्रहणं कर्तव्यम् ११। पाण्डुकम्बलादिनिः। कौ। सा। त। वा। पाण्डुकम्बल। इत्येतस्मात् तृतीयान्तात् परिवृत इत्ये-
तस्मिन्नर्थे इनिः प्रत्ययः स्यात्। पाण्डुकम्बलीनो पाण्डुकम्बलो राजास्तरणकम्बलः। इति नैवमर्थं योगेन सिद्धम् इति भाष्यम् १२
द्वैपवैयाघ्रादञ्। कौ। सा। त। वा। द्वैप। वैयाघ्र। इत्येताभ्यां तृतीयान्ताभ्यां परिवृत इत्येतस्मिन्नर्थे अञ् स्यात्। द्वैपो रथः वैयाघ्रो
रथः। भाष्येऽत्र नेदं व्याख्यातम् १३ कौमारापूर्ववचने। कौ। सा। त। वा। कौमार। इत्येतत् अण्प्रत्ययान्तं निपात्यते अपूर्वत्वे। अपू-
र्वपतिं कुमारीं पतिरुपपन्नः। कौमारः पतिः। द्वितीयान्तादुपयमनकर्तरि प्रत्ययः। अपूर्वपतिः कुमारी पतिमुपपन्ना। कौमारी भा-
र्या। प्रथमान्तात् स्वार्थे प्रत्ययः। कौमारापूर्ववचन इत्युभयतः स्त्रिया अपूर्वत्वे १ कौमारी भार्या। प्रथमान्तात् स्वार्थे प्रत्ययः। कौ-
मारापूर्ववचने कुमार्य्याम् अणिधीयते। अपूर्वत्वं यदा तस्याः कुमार्य्या भवतीति वा १ कारिकेयम् १४ तत्रोद्धृतममत्रेभ्यः
कौ। सा। त। वा। सप्तम्यन्तेभ्यः पात्रवाचिभ्य उद्धृतमित्येतस्मिन्नर्थे यथाविहितमणादयः प्रत्यया भवन्ति शरावे उद्धृतः शारावो १२६

भक्तो। व्रिहिष्ट्योदनः अप्रमत्रेभ्यः किम्। पाणिउद्धृतः इत्यादि सूत्रसमकं भाष्येत्नव्याख्यातम् १५ स्थण्डिलाच्छयितरि व्रते कौ स्त त वा
स्थण्डिल इत्येतस्मात्सप्तम्यन्ताच्छयनकर्तरि अण् स्यात्। समुदायेन व्रतं गम्यते स्थाण्डिलेशायितेनियमोऽस्य। स्थाण्डिलो भि
क्षुः। व्रते किम्। स्थण्डिले शेते। १६। संस्कृतं भक्षाः। कौ। स्त। त। वा। सप्तम्यन्तात्संस्कृतमित्येतस्मिन्नर्थे अणादयः प्रत्यया भवन्ति
यत्संस्कृतं भक्षाश्चेते भवन्ति। खरविशदमभ्यवहार्यं भक्षम्। भ्राष्ट्रे संस्कृताः। भ्राष्ट्रा यवाः। भक्षाः किम्। पुष्पपुटे संस्कृता मा
ला गुणः। १७ शूलोखाद्यत्। कौ। स्त। त। वा। शूल। उखा। इत्येताभ्यां यत् स्यात्। शूले संस्कृतम्। शूल्यं मांसम्। उख्यम्। उखा पात्रविशेषः
उख्यम्। १८ दध्नष्ठक्। कौ। स्त। त। वा। दधि। इत्येतस्मात् ठक् स्यात्। दधि संस्कृतम्। १९। उद। श्वितोऽन्यतरस्याम्। कौ। स्त। त। वा
उदश्वित्। इत्येतस्मात् ठक् स्यात्। उदश्विति संस्कृतम्। औदश्वित्कम्। पक्षेऽण्। औदश्वितम्। २०। क्षीराड्ढञ्। कौ। स्त। त। वा। क्षीर
इत्येतस्मात् ढञ् स्यात्। क्षीरे संस्कृतम्। क्षैरेयी यवागूः २१ सास्मिन्पौर्णमासीति संज्ञायाम्। कौ। स्त। त। वा। प्रथमान्तात्पौर्णमा
सीवाचकादस्मिन्निति सप्तम्यर्थे अणादयो वक्ष्यमाणाः प्रत्यया भवन्ति। पौषी पौर्णमासी अस्मिन् पौषः। सास्मिन्पौर्णमासीति सं
ज्ञाग्रहणम् १ अक्रियमाणे हि मासार्धमासयोरिति वक्तव्यं स्यात् १ संवत्सरपर्वणीति च वक्तव्यं स्यात्। २। तत्र हि वक्तव्यम्। इतिकर
णः क्रियते। ततश्चेद्विवक्षा। इति भाष्यम्। संज्ञाग्रहणं छन्दे। नार्षमिति वार्तिकमारभ्यम्। इति कैय्यटः २२ आग्रहायण्यश्वत्थाट्ठक्। कौ
स्त। त। वा। आग्रहायणी। अश्वत्थ। इत्येताभ्यां ठक् स्यात्। आग्रहायणी पौर्णमासी अस्मिन्। आग्रहायणिको मासादिः आश्वत्थिको मा
सादिः। इत्यादि सूत्रद्वये भाष्येत्नव्याख्यातम् २३। विभाषा फाल्गुनीश्रवणाकार्त्तिकीचैत्रीभ्यः। कौ। स्त। त। वा। फाल्गुनी। श्रवणा। का
र्त्तिकी। चैत्री। इत्येतेभ्यो वा ठक् स्यात्। फाल्गुनी पौर्णमासी अस्मिन्। फाल्गुनो मासादिः। श्रवणिकः। श्रावणः। कार्त्तिकिकः। कार्त्ति
कः। २४। सास्य देवता। कौ। स्त। त। वा। प्रथमान्तादेवमेतोऽपाधिकारस्येति षष्ठ्यर्थे अणादयो वक्ष्यमाणाः प्रत्यया भवन्ति। इन्द्रो दे
वता अस्य। ऐन्द्रं हविः। सेति प्रकृते संज्ञानिवृत्त्यर्थं पुनः सेति २५। कस्येत्। कौ। स्त। त। वा। क। इत्येतस्य इत्ययमादेशो भवति।

सू.पा.
१२७
127

अप्प्रत्ययसन्नियोगेन कौ॰ब्रह्मादेवताऽस्य। कायेहविः। यस्येतिलोपः कस्मान्नभवति। इकारोच्चारणसामर्थ्यात् इतिभा
ष्यम् २९ शुक्राद्घन्। कौ। स्वा। त। वा। शुक्र। इत्येतस्मात् घन् स्यात्। शुक्रोदेवताऽस्य। शुक्रियंहविः। भाष्येतु नेदंव्याख्यातम् २७
अपोनपादपांनप्तृभ्यां घः। कौ। स्वा। त। उवा। अपोनप्तृ। अपांनप्तृ। इत्येताभ्यां घः स्यात्। अपोनपात्देवताऽस्यस्य। अपोनप्त्रिये
अपोनपात्देवताऽस्य। अपोनप्त्रियम् प्रत्ययसन्नियोगे ऋकारान्तत्वमुच्यते। इतिभाष्यम् ३० छच। कौ। स्वा। त। वा। अपोन
प्तृ। अपांनप्तृ। इत्येभ्यांछः स्यात् अपोनपाद्देवताऽस्य। अपोनप्त्रीयंहविः। अपांनप्त्रीयम्। योगविभागोयथासंख्यनिवृत्त्यर्थ
श्चप्रकरणे पैङ्गाक्षीपुत्रादिभ्य उपसंख्यानम् १ पैङ्गाक्षीपुत्रीयम्। तार्णबिन्दवीयम्। शतरुद्राद्घश्च १ शतरुद्राद्घश्च २ कौ।
स्वा। त। वा। शतरुद्राच्छेषश्च १। इतिकाशिक शतरुद्रीयंहविः। शतरुद्रियंहविः ३१ महेन्द्राद्घाणौ च। कौ। स्वा। त। वा। महेन्द्र
इत्येतस्मात्। घ। अण। इत्येतौ प्रत्ययौ भवतः। चकाराच्छः। महेन्द्रोदेवताऽस्य महेन्द्रियम्। माहेन्द्रंहविः। इत्यादिसूत्रप्रपञ्च
कं भाष्ये तु नव्याख्यातम् ३· सोमाट्ट्यण्। कौ। स्वा। त। वा। सोम। इत्येतस्मात् ट्यण् स्यात्। सोमोदेवताऽस्य। सौम्यंहविः। टकारोङी
बर्थः। सौमी ऋक् ३१। वाय्वृतुपित्रुषसो यत्। कौ। स्वा। त। वा वायु। ऋतु। पितृ। उषस्। इत्येतेभ्यो यत् स्यात्। वायुर्देवताऽस्य। वाय
व्यंहविः। ऋतव्यम्। पित्र्यम्। उषस्यम् ३२ द्यावापृथिवीशुनासीरमरुत्वदग्नीषोमवास्तोष्पतिगृहमेधाच्छ च। कौ। स्वा। त।
वा। द्यावापृथि। वी। शुनासीर। मरुत्वत्। अग्नीषोम। वास्तोष्पति। गृहमेध। इत्येतेभ्यश्छः स्यात्। चकाराद्यत्। द्यावापृथिव्यौ
देवतेऽस्य द्यावापृथिवीयंहविः। द्यावापृथिव्यम्। शुनासीरीयम् शुनासीर्यम् मरुत्वतीयम्। मरुत्वत्यम्। अग्नीषोमी
यम्। अग्नीषोम्यम्। वास्तोष्पतीयम्। वास्तोष्पत्यम् गृहमेधीयम्। गृहमेध्यम ३३ अग्नेर्ढक्। कौ। स्वा। ता। वा। अग्नि। इत्येत
स्मात् ढक् स्यात्। अग्निर्देवताऽस्य। आग्नेयंहविः ३४ कालेभ्यो भववत् कौ। स्वा। त। वा। कालविशेषवाचिभ्यः सास्यदेवताइत्ये
तस्मिन्विषये भववत्प्रत्ययो भवति मासिकम्। प्रावृषेण्यम्। कालेभ्यो भववदित्यनन्तयमार्थप्रसङ्गः १। यः कालेभ्यो भवेतस्य· १२७

विधाने प्रातिपदिकमात्रात्प्रसङ्गः २ सिद्धन्तु भयनिर्देशात् २ नकर्तव्यः। भववदिति वतिनिर्देशोऽयम् २५ महाराजप्रो
ष्ठपदाभ्यां ठञ्। कौ। स्था। ता। वा। महाराज। प्रोष्ठपद। इत्येताभ्यां ठञ् स्यात्। महाराजो देवताऽस्य। माहाराजिकम्। प्रौष्ठ
पदिकं। ठञ् प्रकरणे तदस्मिन्वर्ततइति नवयज्ञादिभ्य उपसंख्यानम् १। तदस्मिन्वर्ततइति नवयज्ञादिभ्य उपसंख्यान
म् १ कौ। स्था। ता। वा। नवयज्ञोऽस्मिन्वर्तते। नावयज्ञिकः कालः पाकयज्ञिकः। पूर्णमासादण् २ कौ। स्था। तवा। पूर्णमा
सो। स्यां वर्तते। पौर्णमासी तिथिः २६ पितृव्यमातुलमातामहपितामहाः कौ। स्था। ता। वा। पितृव्य। मातुल। मातामह। पि
तामह। इत्येते शब्दा निपात्यन्ते। पितुर्भ्राता। पितृव्यः। यत्। मातुर्भ्राता। मातुलः। डुलच्। मातुः पिता। मातामहः। डामहच्।
पितुः पिता। पितामहः। डामहच्। पितृमातृभ्यां भ्रातरि व्यत्डुलचौ १। पितुर्भ्रातरि व्यत् १ कौ। स्था। ता। वा। मातरि षिच्च २
कौ। स्था। त। वा। मातामही। पितामही। महोवाच्छन्दस्यानडोऽवग्रहदर्शनात् ४ अवेर्दुग्धे सोढदूसमरीसचः ५ कौ। स्था
ता। वा। अवेर्दुग्धम्। अविसोढम्। अविदूसम्। अविमरीसम्। सकारपाठसामर्थ्यान्न षत्वम्। तिलान्निष्फलात्पिञ्जपेजौ ६
कौ। स्था। तवा। तिलपिञ्जः। तिलपेजः। वन्ध्यास्तिलत्वमर्थः। पिञ्जश्छन्दसि डिच्च ७ कौ। स्था। त। वा। तिलपिञ्जः २७ तस्य समूहः
कौ। स्था। त। वा। षष्ठ्यन्तात्समूहः। काकम्। वाकम्। वायसम्। भाष्येत्वनेदं व्याख्यातम् २८ भिक्षादिभ्योऽण्। कौ। स्था। त। वा
भिक्षा। इत्येवमादिभ्योऽण् स्यात्। भिक्षाणां समूहः। भैक्षम्। गार्भिणम्। युवतीनां समूहः। यौवनम्। गणपाठसामर्थ्या
त्र युवत्। अण्ग्रहणं वाधकवाधनार्थम्। भिक्षा। गर्भिणी। क्षेत्र। करीष। अङ्गार। चर्मन्। सहस्र। युवति। पदाति। पद्धति
अथर्वन्। दक्षिणा। भूत। विषय। श्रोत्र। भिक्षादिः। भिक्षादिषु युवतिग्रहणमनर्थकं पुंवद्भावस्य सिद्धत्वात् तस्य विधौ १। ह
स्तादिभ्यः ख्यणः १। इति काशिका हस्त्यखण्डः। तरुखण्डः। पादापल एः २९ गोत्रोक्षोष्ट्रोरभ्रराजराजन्यराजपुत्रवत्स
मनुष्याजाद्वुञ्। कौ। स्था। ता। वा। गोत्र। उक्षन्। उष्ट्र। उरभ्र। राजन्। राजन्य। राजपुत्र। वत्स। मनुष्य। अज। इत्येतेभ्यो वुञ्

स्यात्। अपत्याधिकारादन्यत्रे लौकिकमपत्यमात्रे गोत्रम् औपगवानां समूहः। औपगवकम्। औक्षकम्। औरभ्रकम्। राजकं
सू॰प॰ राजन्यकम्। राजपुत्रकम्। वत्सकम्। मानुष्यकम्। आजकम्। वृद्धाच्चेति वक्तव्यम् १ कौ स त वा वार्द्धकम्। अजोवुञ्वि-
१२८ प्रतिषिद्धम् २ पूर्वविप्रतिषेधोऽयम् औपगवकम्। ठञ्कञ्विप्रतिषेधात्। आपूपिकम्। शाष्कुलिकम् ४० केदाराद्यञ्च कौ
स त वा कौदाराद्यञ्चेति तस्मान्ञ्यञ् स्यात्। चकाराद्वुञ्। केदाराणां समूहः। कैदार्य्यम्। कौदारकम्। गणिकायाश्च १ गा
णिक्यम् गणिकाया यञिति वक्तव्यम् १ कौ॰। स त वा कवचिनश्च। इत्येतस्मात्समूहेऽर्थे ठञ् स्यात्। कवचिनां समूहः
कावचिकम्। चकारात्केदारादपि। कौदारिकम्। भाष्ये तु नेदं व्याख्यातम् ४२ ब्राह्मणमाणववाडवाद्यन् ब्राह्मणानां समूहः ब्राह्मण्यम् माण-
व्यम्। वाडव्यम्। यन्प्रकरणे पृष्ठादुपसंख्यानम् १ पृष्ठादुपसंख्यानम् १ कौ स त व पृष्ठानां समूहः। पृष्ठ्यः वातादू
लोच १ इति काशिका वातूलः वात्या ४३ ग्रामजनबन्धुसहायेभ्यस्तल् कौ स त व ग्राम जन बन्धु। सहाय। इत्येते
भ्यः तल् स्यात्। ग्रामाणां समूहः। ग्रामता जनता। बन्धुता सहायता। गज सहायाभ्यां चेति वक्तव्यम् १ कौ स त वा ग
जाच्चेति वक्तव्यम् १ इति काशिका गजता अह्नः खः २ अह्नां समूहः। अहीनः क्रतौ ३ इह मा भूत् आह्नः। खण्डिकादि
त्वादञ्। अह्नः क्रतौ २ कौ स त वा पार्श्वाः सण् ४ णस्तु वक्तव्यः ५ पश्वाणस्तु वक्तव्यः ३ कौ स त वा पर्शूनां स
मूहः। पार्श्वम् ४४ अनुदात्तादेरञ् कौ स त व अनुदात्तादेः प्रातिपदिकात् अञ् स्यात् कपोतानां समूहः कापो
तम्। मायूरम्। भाष्ये तु नेदं व्याख्यातम् ४५ खण्डिकादिभ्यश्च कौ स त वा खण्डिका। वडव क्षुद्रकमालवात्सेना
संज्ञायाम् भिक्षुक। शुक। उलूक। श्वन् अहन् युगवरत्र हलबन्ध खण्डिकादिः अत्र प्रकरणे क्षुद्रकमाल
वात्सेनासंज्ञायाम् १ क्षौद्रकमालवी सेना अञ्सिद्धिरनुदात्तादेः कोऽर्थः क्षुद्रकमालवात् गोत्राद्वुञ् न च तत् गोत्रं तद
न्तात्समर्थः १ ज्ञापकं स्यात् तदन्तात्तेन यथा चापिशलेर्विधिः सेनायां नियमार्थं वा यथा बाध्येत वाञ्ञ् २ कारिकेऽइमे १२८

चरणेभ्योधर्म्मवत् कौ सू त वा शणवोवाविभ्यः षष्ठ्यन्तेभ्यः समूहेऽर्थेधर्म्मवत्प्रत्ययाभवन्ति काठकम् कालापकम्
इत्यादिसूत्रत्रयंभाष्येतनव्याख्यातम् ४७ अत्रविहस्तिधेनोष्ठक् कौ सू त वाअचित्तार्थेभ्यः। हस्ति। धेनु। इत्येताभ्यांवसम
हेऽर्थेठक्स्यात् अचित ग्राषूपिकम्। शाष्कुलिकम् हस्ति। हास्तिकम्। धेनुकम् धेनोरनञिइतिवक्तव्यम् १ इतिका
शिका अनञीतिकिम् आधेनवम् ४८ केशाश्वाभ्यांयञ्छावन्यतरस्याम् कौ सू वाकेश। अश्व। इत्येताभ्यांयञ्छावन्यत
रस्याम् कौ सू म वा। केश। अश्व। इत्येताभ्यांक्रमेणयञ् छइत्येतौप्रत्ययौवाभवतः। केशानांसमूहः। कैशम् अश्वीये
आश्वम् ४९ पाशादिभ्योयः कौ सू त वापाश। इत्येवमादिभ्योयः स्यात् पाशानांसमूहः। पाश्यापाश। तृण। धूम।
वातअङ्गार। पाटल। पोता। गलपिटक पिटाक। शाकट। हल। नटा वन पाशादिः ५० खलगोरथात् कौ सू त वाखल
ल। गो। रथ। इत्येतेभ्योयःस्यात् खलानांसमूहः। खल्या गव्यारथ्य ५१ इनित्रकट्यचश्च कौ सू तव खल। गो। रथ। इत्ये
तेभ्यः क्रमेण। इनि। त्र। कट्यच। इत्येतेप्रत्ययाभवन्ति खलानांसमूहः। खलिनीगोत्रा। रथकट्या खलादिभ्यइनिः १ कौसू त
वा खलिनी। डाकिनी खलिनी डाकिनी कुटुम्बिनी। कुमिणी। अङ्गिनी विनी। रथिनी। कुण्डलिनी खलादिः कमला
दिभ्यःखण्डः १ इतिकाशिका कमलखण्डम्। अम्भोजखण्डम् कमल। अम्भोज। पद्मिनी। कुमुद। सरोज। पद्म। नलिनी
कैरविणी कमलादिराकृतिगणः नरकरितुरङ्गाणांस्कन्धच् थ इतिकाशिका। नरस्कन्धः। करिस्कन्धः। तुरङ्गस्कन्धः। दूर्वादिभ्यः
काण्डः ३। इतिकाशिका। दूर्वाकाण्डम्। तृणकाण्डम्। कर्म्मकाण्डम् ५२ विषयोदेशे। कौ। सू। त। वा। षष्ठ्यन्ताद्विषयइत्ये
तस्मिन्नर्थेदेशेवाच्येअण्णादयोवक्ष्यमाणाः। प्रत्ययाभवन्तिशिबीनांविषयोदेशः। शैबः। विषयः परिशीलितइत्यते विषयाभि
धानेजनपदेलुबहुवचनान्तात् १ गान्धार्य्यादिभ्योवा २ राजन्यादिभ्योवावुञ् ३ वैल्ववनादिभ्योनित्यम् ४ नवाभिधेय
स्य निवासविषयत्वान्निवासविवक्षायांलुबविषयविवक्षायांप्रत्ययः ५। ५३ राजन्यादिभ्योवुञ् कौ। सू। त। वा। राजन्य। इत्येवमा

दिभ्यो वुञ्स्यात्। राजन्यानां विषयो देशः। राजन्यकः। राजन्य। आनृत। बाभ्रव्य। शालङ्कायन। देवयात। अब्रीड। वरत्रा। जालन्धरायण
सू॰प॰ राजायन। तेल। आत्मकामेय। अम्बरीषपुत्र। वसाति। कैल्वबन। शैलूष। उडुम्बर। तीव्र। बैल्वज। आर्जुनायन। संप्रिय। दाक्षि
१२५ ऊर्णनाभ। राजन्यादिराकृतिगणः। इत्यादि सूत्रद्वयं भाष्ये तु न व्याख्यातम् ५४ भौरिक्याद्यैषुकार्यादिभ्यो विधल्भक्तलौ। कौ
मु। त। वा। भौरिकि। इत्येवमादिभ्यः। ऐषुकारि। इत्येवमादिभ्यश्च क्रमेण विधल्। भक्तल् इत्येतौ प्रत्ययौ भवतः। भौरिकीणां वि
षयो देशः। भौरिकिविधम्। ऐषुकारिभक्तम्। सारसायनभक्तम्। भौरिकि। भौलिकि। चौपयत। चैटयत। वाणिजक। वालि
काज्य। सैकयत। वैकयत। भौरिक्यादिः। ऐषुकारि। सारस्यायन। चान्द्रायण। द्व्याक्षायण। त्र्याक्षायण। औडायन। जौलाय
न। खाडायन। दासमित्रि। दासमित्रायण। शौद्रायण। दाक्षायण। शायण्डायन। तार्क्ष्यायण। शौभ्रायण। सौवीर। सौ
वीरायण। शयण्ड। शौण्ड। शयाण्ड। वैश्वमानव। वैश्वधेनव। नड। तुण्डदेव। विश्वदेव। सापिण्डि। ऐषुकार्यादिः। भाष्ये
तु नेदं व्याख्यातम् ५५ सोऽस्यादिरिति च्छन्दसः प्रगाथेषु। कौ। मु। त। वा। प्रथमान्तादस्येति षष्ठ्यर्थे ऽण् स्यात्। यत्प्रथमान्
तं छन्दश्चेत्तदादिर्भवति। यो ऽसौ षष्ठ्यर्थः प्रगाथश्चेत्स भवति। पङ्क्तिरादिरस्य। पाङ्क्तः प्रगाथः। जागतः। आदिः किम्। अन
ष्टुप्मध्यमस्य प्रगाथस्य। छन्दसः किम्। उदुत्यशब्द आदिरस्य प्रगाथस्य। प्रगाथेषु किम्। पङ्क्तिरादिरस्यानुवाकस्य। छन्द
सः प्रत्ययविधानेन पुंसकात्स्वार्थ उपसंख्यानम् १ नपुंसके स्वार्थ इत्यर्थः। त्रिष्टुबेव। त्रैष्टुभम्। जगत्येव। जागतम्। स्वार्थ उपसं
ख्यानम् १ कौ। मु। त। वा ५६ संग्रामे प्रयोजनयोद्धृभ्यः। कौ। मु। त। वा। प्रथमान्तेभ्यः प्रयोजनवाचिभ्यः योद्धृवाचिभ्यश्च अ
स्येति षष्ठ्यर्थे संग्रामे ऽभिधेये ऽण् स्यात्। सुभद्रा प्रयोजनमस्य। सौभद्रः संग्रामः। भरता योद्धारो ऽस्य संग्रामस्य। भारतः संग्रा
मः। संग्रामे किम्। सुभद्रा प्रयोजनमस्य दानस्य। प्रयोजनयोद्धृभ्यः किम्। सुभद्रा प्रेक्षिका अस्य संग्रामस्य इत्यादि सूत्रत्रयं भा
ष्ये तु न व्याख्यातम् ५७ तदस्यां प्रहरणमिति क्रीडायां णः। कौ। मु। त। वा। प्रथमान्तात्प्रहरणवाचकादस्यामिति सप्त १२५

म्यर्थे णप्रत्ययः स्यात् क्रीडा चेत्सप्तम्यर्थः दण्डः प्रहरणमस्यां क्रीडायाम्। दाण्डा। प्रहरणे किम्। मालाभूषणमस्याम्
क्रीडायां किम्। खड्गः प्रहरणमस्यां सेनायाम् ५८ घञः सास्यां क्रियेति ञः। कौ। सू। त। वा। घञन्तप्रत्ययान्तात्क्रि। यावा
चकात्प्रथमान्तात्स्त्रीलिङ्गे सप्तम्यर्थे ञप्रत्ययः। स्यात्। श्येनपातोऽस्यां वर्तते। श्यैनम्पाता मृगया। तैलम्पाता स्वधा। घञः
किम्। श्येनपतनमस्याम्। क्रियेति किम्। प्राकारोऽस्याम् सास्यांग्रहणं क्रीडायामित्येतन्निवृत्त्यर्थम् तेन दाण्डपाताति
थिरित्यादिर्भवति ५९ तदधीते तद्वेद। कौ। सू। त। वा। द्वितीयान्तात् अधीते इत्येतस्मिन्नर्थे द्वितीयान्तात् वेद इत्येतस्मिन्नर्थे च
अणादयो वक्ष्यमाणः प्रत्ययो भवति व्याकरणमधीते वेद वा। वैयाकरणः। भवति हि कश्चित्संपाठं पठति न वेत्ति। कश्चिच्च
वेत्ति न संपाठं पठति इति भाष्याम् ६० क्रतूक्थादिसूत्रान्ताट्ठक् कौ सू त वा क्रतुविशेषवाचिभ्यः। उक्थादिभ्यः। सू
त्र इत्येतदन्तेभ्यश्च ठक् स्यात्। अग्निष्टोममधीते वेद वा। आग्निष्टोमिकः। औक्थिकः लौकायतिकः। सांग्रहसूत्रिकः। उ
क्थ। लोकायत। न्याय। न्यास। पुनरुक्त। निरुक्त। निमित्त। द्विपद। ज्योतिष। अनुपद। अनुकल्प। यज्ञ। धर्म। चर्चा। क्रमे
तर। श्लक्ष्ण। संहिता। पदक्रम। संघट्ट। वृत्ति। परिषद। संग्रह। गण। गुण। आयुर्वेद। उक्थादिः। तस्येदं प्रत्ययाल्लुक २
तस्येदं प्रत्ययस्य च २ नच्चोर्थात् उक्थशब्दाद्गणे नेष्यते १ कौ। सू। त। वा। विद्यालक्षणकल्पसूत्रान्तादकल्पादे
रिकक् स्मृतः २ इकगित्यण्ठगित्यर्थः। विद्या। वायसविद्यिकः लक्षण। आश्वलक्षणिकः। कल्प। पाराशरकल्पिकः।
सूत्र। सांग्रहसूत्रिकः। आकल्पादेः किम्। काल्पसूत्रः। विद्यालक्षणकल्पान्तादिति वक्तव्यम् १ इति काशिका विद्याल
क्षणकल्पान्तादिति वक्तव्ये इति वक्तव्यम् २ कौ। सू। त। वा। सूत्रान्तादकल्पादेरिष्यते २ इति काशिका सूत्रान्तादक
ल्पादेरेवेष्यते ३ कौ। सू। त। वा। विद्या चानङ्गक्षत्रधर्मत्रिपूर्वा ४ विद्या चानङ्गक्षत्रधर्मसंसर्गत्रिपूर्वा ३ इति का
शिका। आङ्गविद्यः। क्षात्रविद्य धार्मविद्यः। सांसर्गविद्यः। त्रैविद्यः। अङ्गक्षत्रधर्मत्रिपूर्वधर्म त्रिपूर्वा द्वियान्तात्रेति

वक्तव्यम् ४ कौ। सू। त। वा। आख्यानाख्यायिकेतिहासपुराणेभ्यष्ठग्वक्तव्यः ५। आख्यान। यावक्रीतिकः। आख्यायिका।
सू॰प॰ वासवदत्तिकः। इतिहास। ऐतिहासिकः। पुराण। पौराणिकः। आख्यानाख्यायिकेतिहासपुराणेभ्यश्च ५। कौ। त। वा। स
१३० र्वसादेर्द्विगोश्च लः। ६। सर्ववेदः। सर्वतन्त्रः। सादेः। सर्ववार्तिकः। द्विगोः। द्विवेदः। सर्वसादेर्द्विगोश्च लक्। ४। इति
130 काशिका। सर्वादेः सादेश्च ल। क्। ६। कौ। सू। त। वा। द्विगोः। द्विवेदः। सर्वसादेर्द्विगोश्च लक् ४। इति काशिका। सर्वा
देः सादेश्च ल। क्। ६। कौ। सू। त। वा। द्विगोश्च ७ कौ। सू। त। वा। अनुसूर्लक्षलक्षणे। ७। अनुसूर्नाम ग्रन्थः। तमधीते
आनुसुकः। लक्ष। लाक्षिकः। लक्षण। लाक्षणिकः। इकन् पदोत्तरपदात् ८ कौ। सू। त। वा। पूर्वपदिकः। उत्तरपदिकः
इकोनुवक्तव्ये पदोत्तरपदात् ५। इति काशिका। पदोत्तरपदिकः। शतषष्टेः षिकन् पथः ९ कौ। सू। त। वा। शतप
थिकः। शतपथिकी। षष्टिपथिकः। षष्टिपथिकी शतषष्टेः षिकन् पथो बहुलम् ६ इति काशिका। पद्तेऽएत
प्रणतपथः। षाष्टपथः ९१ क्रमादिभ्यो वुन्। कौ। सू। त। वा। क्रम। इत्येवमादिभ्यो वुन् स्यात्। क्रममधीते वेद वा। क्रम
कः। क्रम। पद। शिक्षा। मिमांसा। सामन्। क्रमादिः। भाष्ये तनेदं व्याख्यातम् ९२ अनुब्राह्मणादिनिः। कौ। सू। त
वा। अनुब्राह्मण। इत्येतस्मात् इति प्रत्ययः स्यात्। अनुब्राह्मणमधीते वेद वा। अनुब्राह्मणी। अनुब्राह्मणिनौ। मत्व
र्थीयेन इनिना सिद्धेऽणो निवृत्त्यर्थं सूत्रम्। अयं योगः शक्योऽकर्तुम्। इति भाष्यम् ९३ वसन्तादिभ्यष्ठक्। कौ। सू।
त वा वसन्त। इत्येवमादिभ्यः ठक् स्यात्। वसन्तमधीते वेद वा। वासन्तिकः। वसन्त। ग्रीष्म। वर्षा। शरद्। हेमन्त। शिशिर
प्रथम। गुण। चरम। अनुगुण। अथर्वन्। आथर्वण। वसन्तादिः। वसन्तसहचरितमध्ययनं वसन्ताध्ययनमिति। इति
भाष्यम् ९४ प्रोक्ताल्लुक्। कौ। सू। त। वा। प्रोक्तप्रत्ययान्तादध्येतृवेदित्रोरुत्पन्नस्य प्रत्ययस्य लुक् स्यात्। पाणिनिना प्रो
क्तं पाणिनीयम्। तदधीते वेद वा पाणिनीया ब्राह्मणी। अणो लुकि ङीप् न भवति। अयुक्तोऽयं निर्देशः। प्रोक्तादिति म उः

वितथम्। सौत्रो निर्देशः इति भाष्यम् ६५ सूत्राच्च कोपधात्। कौ। सू। ना। वा। सूत्रवाचिनः ककारोपधाद् ध्येतृवेदित्रोरुत्पन्नस्य प्रत्यय
स्य लुक् स्यात्। अष्टकं पाणिनेः सूत्रम्। तदधीयते विदुर्वा। अष्टकाश्छात्राः। कोपधात् किम्। वात्तष्टयः। अप्रोक्तार्थ आरम्भः। संख्याप्रकृ
तेरिति वक्तव्यम् १ इह माभूत्। महावार्त्तिकं सूत्रमधीते। माहावार्त्तिकः ६६ छन्दोब्राह्मणानि च तद्विषयाणि। कौ। सू। ना। वा। छ
न्दांसि। ब्राह्मणानि च प्रोक्तप्रत्ययान्तानि अध्येतृवेदितृप्रत्ययं विना न प्रयोक्तव्यानि। कठेन प्रोक्तमधीयते विदुर्वा। कठाः। मौदाः। पैप्प
लादाः। ब्राह्मणानि। ताण्डिनः। भाल्लविनः। ब्राह्मणग्रहणं ब्राह्मणविशेषग्रहणार्थम्। इह तद्विषयत्वं माभूत्। याज्ञवल्कानि
ब्राह्मणानि। अनन्तरसमुच्चयार्थश्चकारः। कल्पे। काश्यपिनः। कौशिकिनः। सूत्रे। पाराशरिणो भिक्षवः। शैलालिनो नटाः
कर्म्मन्दिनः। कृशाश्विनः। छन्दोब्राह्मणानीति किम्। पाणिनीयं व्याकरणम्। पैङ्गी कल्पः। अन्यत्राभिधेयस्यानित्यत्वात् छन्दो
ब्राह्मणानां तद्विषयवचनम् १ सिद्धन्तु प्रोक्ताधिकारे तद्विषयवचनात् २। सर्वेषां याज्ञवल्कादिभ्यः प्रतिषेधः ३। इति बो।
प्रोक्तान्तद्विषयः ४। ६७ तदस्मिन्नस्तीति देशे तन्नाम्नि कौ। सू। ना। वा। तदिति प्रथमान्तादस्त्युपाधिकाधिकादस्मिन्निति सप्तम्य
र्थे अणादयो वक्ष्यमाणाः प्रत्ययाः उदुम्बरः। बैल्वः। पार्वकः। माथुरीयं निहत्यर्थे सूत्रम् ६८। तेन निर्वृत्तम् कौ। सू। ना। वा। तृतीया
न्तान्निर्वृत्त इत्येतस्मिन्नर्थे अणादयो वक्ष्यमाणाः प्रत्यया भवन्ति। देशश्चेत्तन्नामा भवति। कुशाम्बेन निर्वृत्ता। कौशाम्बी नगरी ६९। त
स्य निवासः। कौ। सू। ना। वा। षष्ठ्यन्तान्निवास इत्येतस्मिन्नर्थे अणादयो वक्ष्यमाणाः प्रत्यया भवन्ति। देशश्चेत्तन्नामा भवति। उष्ट्राणां
निवासो देशः। औष्ट्रः। औष्ट्रुः पौषः ७० अदूरभवश्च। कौ सू न वा षष्ठ्यन्तादूरभव इत्येतस्मिन्नर्थे अणादयो वक्ष्यमाणाः प्र
त्यया भवन्ति। देशश्चेत्तन्नामा भवति। विदिशाया अदूरभवं नगरम्। वैदिशम्। अस्मिन्। निर्वृत्तम्। निवासः। इत्येतेषु योऽर्थोऽस्मि
काराश्चैव ध्यन्ते। इत्येवमारभ्य आगमिमेषु सूत्रेषु चत्वारोऽर्थाः सम्बध्यन्ते ७१ ओरञ्। कौ। सू। ना। वा। उ। इत्येतदन्तात्प्रातिपदि
कात् अस्मिन्निमादिषु चतुर्ष्वर्थेषु अञ् प्रत्ययः स्यात् कक्षतु। काक्षतवम्। आरडवम्। कार्कटेलवम् औरञ्विधाने याम

तद्विप्रतिषिद्धम् १ इत्नमती ७२ मतोश्च बह्वजङ्गात्। कौ। सू। त। चा। बह्वच् अङ्गं यस्य मतुपस्तदन्तादञ् स्यात्। चतु
सू॰प॰ र्ष्वर्थेषु। ऐषुकावतम्। सैधलतवतम्। बह्वजङ्गात्किम्। आहिमतम्। अङ्गग्रहणं बह्वजिति विशेषणं यथा स्यात्।
१३१ मतन्तविशेषणं मा भूत्। मालावतां निवासः। मालावतम् ७३ बह्वचः कूपेषु कौ। सू। त। चा। बह्वचः प्रातिपदिकात्कू
पेषु वाच्येषु अञ् स्यात्। चतुर्ष्वर्थेषु। दैर्घवरत्रः कूपः इत्यादि द्वादश सूत्राणि भाष्येन व्याख्यातानि ७४ उदक्च विपाशः
13॥ कौ। सू। त। चा। विपाशः उत्तरकूले ये कूपास्तेषु वाच्येषु प्रातिपदिकात् अञ् स्यात्। चतुर्ष्वर्थेषु। इत्नेन निर्हृतः कूपः। दान्तः
उदक्किम्। दान्तः। दक्षिणतः कूपेषु अणेव। अणञोः स्वरे भेदः ७५ संकलादिभ्यश्च। कौ। सू। त। चा। संकल इत्येवमा
दिभ्योऽञ् स्यात्। चतुर्ष्वर्थेषु। सांकलम्। पौष्कलम्। संकल। पुष्कल। उत्तम। उडुम। उद्वेप। उत्पुट। कुम्भ। निधान।
सुदत्त। सुदत। सुभूत। सुशत। सुनेत्र। सुमङ्गल। सुपिङ्गल। सूत्र। सिकता। पूतिक। पूलास। कूलास। पलाश। निवेश। गम्भीर
इत। श्वन्। अहन्। लोमन्। वेमन्। वरुण। बहुल। सद्योज। अभिषिक्त। गोभृत्। राजभृत्। भल्ल। मल्ल। माल। संकलादिः ७६
स्त्रीषु सौवीरसाल्वप्राक्षु। कौ। सू। त। चा। सौवीर। साल्व। प्राक्। इत्येतेषु देशेषु स्त्रीलिङ्गेषु वाच्येषु प्रातिपदिकादञ् स्या
त्। चतुर्ष्वर्थेषु। सौवीरे। दत्तामित्रेण निर्हृता। दात्तामित्री नगरी। साल्वेषु वैधूमाग्री। प्राचि। काकन्दी ७७ सुवास्त्वादि
भ्योऽण्। कौ। सू। त। चा। सुवास्तु इत्येवमादिभ्योऽण् स्यात्। चतुर्ष्वर्थेषु। सौवास्तवम्। वार्णवम्। अण्ग्रहणं न
द्योमतुपो बाधनार्थम्। सौवास्तवी नगरी। औरञः कूपलक्षणस्य चाञो बाधनार्थं सूत्रम्। सुवास्तु। वर्णु। भण्डु। खण्डु। से
वालिन्। कर्पूरिन्। कर्पूरिन्। शिखण्डिन्। गर्त। कर्कश। शाकटीकर्ण। कृष्णकर्ण। कर्क। कर्कन्धुमती। गोह। अ
हिसक्थ। सुवास्त्वादिः ७८ रोणी। कौ। सू। त। चा। रोणी। इत्येतस्मात् अण् स्यात्। चतुर्ष्वर्थेषु। रौणः। तदन्तादपि।
आजकरौणः। कूपलक्षणस्याञो बाधनार्थं सूत्रम् ७९ कोपधाच्च। कौ। सू। त। चा। कू। इत्येतदुपधात्प्रातिपदिकादञ् १३।

एतस्मात्। चतुर्ष्वर्थेषु। कर्णेछिद्रकेण निर्वृत्तः। काणेछिद्रकः कूपः। कृकवाकुना निर्वृत्तम्। कार्कवाकवम्। औरजः कूपाज
श्ववाथनार्थं सूत्रम्। ८० वुञ्छण्कठजिलसेनिरढञ्ण्ययफक्फिञिञ्ञ्यकक्ठकोऽरीहणकृशाश्वर्श्यकुमुदकाशतृणप्रे
क्षाश्मसखिसंकाशबलपक्षकर्णसुतंगमप्रगदिन्वराहकुमुदादिभ्यः। कौ। स। न। वा। वुञ्। छण्। क। ठच्। इल। स। इनि
र। ढञ्। ण्य। य। फक्। फिञ्। इञ्। ञ्य। कक्। ठक्। इत्येते सप्तदश प्रत्यया अरीहण। कृशाश्व। ऋश्य। कुमुद। काश। तृण। प्रेक्षा। अ
श्मन्। सखि। संकाश। बल। पक्ष। कर्ण। सुतंगम। प्रगदिन्। वराह। कुमुद। इत्येतदादिकेभ्यः सप्तदश प्रातिपदिकगणेभ्यो भव
न्ति। चतुर्ष्वर्थेषु। अरीहणादिभ्यो वुञ्। आरीहणकम्। कृशाश्वादिभ्यश्छण्। कार्शाश्वीयम्। ऋश्यादिभ्यः कः। ऋश्यकम्।
कुमुदादिभ्यष्ठच्। कुमुदिकम्। काशादिभ्य इलः। काशिलः। तृणादिभ्यः सः। तृणसम्। प्रेक्षादिभ्य इनिः। प्रेक्षी। अश्मादिभ्यो
रः। अश्मरम्। सख्यादिभ्यो ढञ्। साखेयम्। संकाशादिभ्यो ण्यः। सांकाश्यम्। बलादिभ्यो यः। बल्यम्। पक्षादिभ्यः फक्।
पाक्षायणः। कर्णादिभ्यः फिञ्। कार्णायनिः। सुतंगमादिभ्य इञ्। सौतंगमिः। प्रगद्यादिभ्यो ञ्यः। प्रागद्यः। वराहादिभ्यः कक्।
वाराहकः। कुमुदादिभ्यष्ठक्। कौमुदिकम्। अरीहण। द्रुघण। द्रुहण। भगल। उलन्द। किरण। सांपरायण। क्रौष्ट्रा
यण। औष्ट्रायण। त्रैगर्तायन। मैत्रायण। भास्त्रायण। वैमतायन। गौमतायन। सौमतायन। सौसायन। धौमतायन। सौ
मायन। ऐन्द्रायण। कौन्द्रायण। खाडायन। शाण्डिल्यायन। रायस्पोष। विपथ। विपाश। उद्दण्ड। उदञ्चन। खाण्डवीर।
ण। वीरण। काशकृत्स्न। जाम्बवत। शिंशपा। रैवत। बिल्व। सुयज्ञ। शिरीष। बधिर। जम्बु। खदिर। सुशर्मन्। दलतृ। भलन्द
न। खण्डु। कनल। यज्ञदत्त। अरीहणादिः ॥१॥ कृशाश्व। अरिष्ट। अरिशस। वेश्मन्। विशाल। लोमश। रोमश। रोमक। लो
मक। शबल। कूयवर्चल। सुवर्चल। सुकर। सूकर। प्रतर। सदृश। पुरग। पुराग। सुख। धूम। अजिन। विनत। अवन
तविकुद्यास। पराशर। अरुस्। मौद्गल्य। सूकर। कृशाश्वादिः ॥२॥ ऋश्य। न्यग्रोध। शिरा। निलीन। निवास। निवात। नियान

सू.प.
१३२
132

निवन्ध। विवद्ध। परिगूढ। उपगूढ। असनि। सित। मत। पेश्मन्। उत्तराश्मन्। अश्मन्। स्थूल। बाहु। खदिर। शर्करा। अनडुह
अरड्डु। परिवंशावण। वीरण। खण्डादण्ड। परिहृत्त। कर्दम। अंशु। ऋश्यादिः ३। कुमुद। शर्करा। न्यग्रोध। इक्कट। संकट
कंकट। गर्त। वीज। परिवाप। निर्यास। शकट। कव। मधु। शिरीष। अश्वत्थ। बल्वज। यवाष। कूप। विकङ्कत। दशग्राम। कुमु
दादि ४। काश। पाश। अश्वत्थ। पलाश। पीयूक्षा। चरण। वास। नड। वन। कर्दम। कच्छूल। कङ्कट। गुहा। विस। तृण। क
र्पूर। वर्बर। मधुर। ग्रह। कपित्थ। जतु। सीपाल। काशादिः ५। तृण। नड। मूल। वन। पर्ण। वराण। विल। पुल। फल। अर्जु
न। अर्ण। सुवर्ण। वल। चरण। बुस। तृणादिः ६। प्रेक्षा। हलका। बन्धुका। ध्रुवका। क्षिपका। न्यग्रोध। इक्कट। कङ्कट। सं
कट। कट। कूप। बुक। पुक। पुट। मह। परिवाप। यवाष। ध्रुवका। गर्त। कूपक। हिरण्य। प्रेक्षादिः ७ अश्मन्। यूथ। ऊष
मीन। नद। दर्भ। वृन्द। गुद। खण्ड। नग। शिखा। कोट। पाम। कन्द। कान्द। कुल। गह्व। गुड। कुण्डल। पीन। गुह। अ
श्मादिः ८। सखि। अग्निदत्त। वायुदत्त। सखिदत्त। गोपिल। भल्ल। पाल। चक्र। चक्रवाक। छगल। अशोक। करवी
रवसव। वीर। पूर। वज्र। कुशीरक। सीहर। सरक। सरस। समर। समल। सुरस। रोह। तमाल। कदल। सपल। सख्या
दिः ९। संकाश। कंपिल। कश्मीर। समीर। सूरसेन। सरक। सूर। सुपथिन्। मथव। यूथ। अंश। अङ्ग। नासा। पलित। अनु
नाश। अश्मन्। कूट। मलिन। दश। कुम्भ। शीर्ष। विरत। समल। सीर। पञ्जर। मन्थ। नल। रोमन्। लोमन्। पुलिन।
सुपरि। कटिप। सकर्णक। वृष्टि। तीर्थ। अगस्ति। विकर। नासिका। संकाशादिः १०। बल। बुल। नल। दल। वट। लकु
ल। उरल। पुल। मूल। उल। डुल। वन। कुल। बलादिः ११ पक्ष। तुन्द। तुष। कुण्ड। अण्ड। कम्बलिका। वलिक। चित्र। अस्ति
पथिन्पन्थच। कुम्भ। सीरक। सरक। सकल। सरस। समल। अतिश्वन्। रोमन्। लोमन्। हस्तिन्। मकर। लोमक।
शीर्ष। निवात। पाकसिंहक। अङ्कुश। सुवर्णक। हंसक। हिंसक। कुत्स। बिल। खिल। यमल। हस्त। कला। सक १३२

णीक। पत्रादिः ।।७२।। कर्ण। वसिष्ठ। अर्क। अर्कलूष। द्रुपकद। आनडुह्य। पाञ्चजन्य। स्फिज्। कुम्भी। कुन्ती। जित्वन्। जीवन्त।
कुलिश। आण्डीवत्। जव। जैत्र। आनक। कर्णादिः ।।७३।। सुतंगम। मुनिचित्त। विप्रचित्त। महाचित्त। महापुत्र। स्वन। श्वेत। खडी
डाक। शुक्र। विश। बीजवापिन्। अर्जुन। श्वन्। अजिर। जीव। खण्डिः ताकर्म। विग्रह। सुतंगमादिः ।७४। प्रगदिन्। मग
दिन्। मदादिन्। कविल। खण्डित। गदित। चूडार। मडार। मन्दार। कोविदार। प्रगद्यादिः ।।७५।। वराह। पलाश। शिरीष
पिनद्ध। निबद्ध। बलाह। स्थूल। विदग्ध। विजग्ध। विभग्न निमग्न। बाहु। खदिर। शर्करा। वराहादिः ।।७६। कुमुदगोम
थ। रथकार। दशग्राम। अश्वत्थ। शाल्मलि। शिरीष। मुनिस्थल। कुण्डल। कूट। मधुकर्ण। घासकुन्द। शुचिकर्ण।
कुमुदादिः ७७ ८१। जनपदे लुप्। कौ। सौ। तद्वा। ग्रामसमूहो जनपदः। तस्मिन्वाच्ये चातुरर्थिकस्य प्रत्ययस्य लुप्स्या
त्। पञ्चालानां निवासो जनपदः। पञ्चालाः। कुरवः। मत्स्याः। अङ्गाः। मगधाः। सुह्माः ८२ वरणादिभ्यश्च। कौ।
सौ। तद्वा। वरणा। इत्येवमादिभ्यश्चातुरर्थिकस्य लुप्स्यात्। वरणानामदूरभवं नगरम्। वरणा। शृङ्गी। शाल्मलि। शु
ण्डी। शयाण्डी। पर्णी। ताम्रपर्णी। गोद। आलिङ्ग्यायन। जानपदी। जम्बू। पुष्कर। चम्पा। पम्पा। वल्गु। उज्जयनी। गया।
मथुरा। तक्षशिला। उरसा। गोमती। वलभी। वरणादिः ८३ शर्कराया वा। कौ। सौ। तद्वा। शर्करा। इत्येतस्माच्चा
तुरर्थिकस्य वा लुप्स्यात्। कुमुदादौ वराहादौ च पाठसामर्थ्यात् ठच् छ। ककौ। पाक्षिकश्रवणे सिद्धे वाग्रहणात्पक्षेऽण
पि भवति। शर्करा। लुपोऽभावे। शार्करम्। शर्करिकम्। शार्करिकम्। शर्करीयम् ८४। ठक्छौ च। कौ। सौ। तद्वा।
शर्करा। इत्येतस्माट्ठक्छौ। च। इत्येतौ प्रत्ययौ भवतः। चातुरर्थिकेष्वर्थेषु। शार्करिकम्। शर्करीयम् ८५ नद्यां मतुप्। कौ। सौ।
तद्वा। नद्यां वाच्यायां मतुप्स्यात्। चातुरर्थिकेष्वर्थेषु। देशश्चेत्तन्नामा भवति उडुम्बरावती। मशकावती। नद्यां मतुब्
वर्णे मत्वर्थेऽपि विधानात्। निर्वृत्ताद्यर्थे च २ ८६ मध्वादिभ्यश्च। कौ। सौ। तद्वा। मधु। इत्येवमादिभ्यो मतुप्स्यात्। चातु

षु अर्थेषु। देशश्चेतन्नामा भवति उडुम्बरावती। मशकावती। नद्यांमतुबवर्णेमत्वर्थेः। एवियानात्।१। निर्हेतार्थेश्च २ ८६। म
सू॰ प॰ ध्वादिभ्यश्च। कौ। सू। त। वा। मधु। इत्येवमादिभ्यो मतुप्स्यात्। चतुर्ष्वर्थेषु। मधुमती। विसवती। मधु। विस। स्थाणु। वेणु। क
१३२ र्कन्धु। शमी। करीर। हिम। किशरा। शर्याणा। मरुत्। वार्दाली। शर। इष्टका। आसुति। शक्ति। आसन्दी। शाकल। शलाका।
आमिषी। इक्षु। रोमन्। रुष्टि। रुष्या। तक्षशिला। खड। वट। वेट। मध्वादिः। भाष्येतेनेदं व्याख्यातम् ८७। कुमुदनडवे
133 तसेभ्यो ड्मतुप्। कौ। सू। त। वा। कुमुद। नड। वेतस। इत्येतेभ्यो ड्मतुप्प्रत्ययः स्यात्। चतुर्ष्वर्थेषु। कुमुद्वान्। नड्वान्।
वेतस्वान्। महिषाच्चेति वक्तव्यम्।१। कौ। सू। त। वा। महिष्मान्देशः ८८ नडशादाड्ड्वलच्। कौ। सू। त। वा। नड। शा
द। इत्येताभ्यां ड्वलच् प्रत्ययः स्यात्। चतुर्ष्वर्थेषु। नड्वलम्। इत्यादिसूत्रत्रयं भाष्येतेनव्याख्यातम् ८९ शिखाया वल
च्। कौ। सू। त। वा। शिखा। इत्येतस्माद्वलच् स्यात्। चतुर्ष्वर्थेषु। शिखावलः ९० उत्करादिभ्यश्छः। कौ। सू। त। वा।
उत्कर। इत्येवमादिभ्यः छः स्यात्। चतुर्ष्वर्थेषु। उत्करीयः। उत्कर। संफल। शफर। पिप्पल। पिप्पलीमूल। अश्मन्। सुव
र्ण। खलाजिन। तिक। कितव। अणक। त्रैवण। पिचुक। अश्वत्थ। काश। क्षुद्र। भस्त्रा। शाल। जन्या। अजिर। चर्मन्। उत्क्रो
श। क्षान्त। खदिर। शूर्पणाय। श्यावनाय। नैवाकव। तृण। वृक्ष। शाक। पलाश। विजिगीषा। अनेक। आतप। फ
ल। संपर। अर्क। गर्त। अग्नि। वैराणक। इडा। अरण्य। निशान्त। पर्ण। नीचायक। शंकर। अवरोहित। क्षार। विशाल। वे
त्र। अरीहण। खण्ड। वातागर। मन्त्रणार्ह। इन्द्रवृक्ष। नितान्तवृक्ष। आर्द्रवृक्ष। उत्करादिः ९१ नडादीनां कुक्च। कौ। सू
त। वा। नड। इत्येवमादीनां कुगागमो भवति छः प्रत्ययश्च। चतुर्ष्वर्थेषु। नडकीयम्। नड। प्लक्ष। बिल्व। वेणु। वेत्र। वेतस
इक्षु। काष्ठ। कपोत। तृण। क्रुञ्चा ह्रस्वत्वञ्च। तक्षन्नलोपश्च। नडादिः। कुक्प्रत्ययादेरादेशानुपपत्तिरनादित्वात् १
पूर्वान्ते ह्रस्वत्वम् २। सिद्धन्त्वादिष्टस्य कुक्वचनात्।३। क्रुञ्चा ह्रस्वत्वं च।४। कौ। सू। त। वा। क्रुञ्चकीयः इति ९२ सूत्राणि १३२

भाष्ये ४।२।२। व्याख्यातानि ९२ शेषे। कौ। सा। न। शे। अपत्यादिचतुरर्थ्यन्तादन्यो ऽर्थः शेषः। तस्मिन्नर्थे इत ऊर्ध्वं वक्ष्यमाणाः प्र-
णादयः। प्रत्यया वोध्याः। चक्षुषा गृह्यते। चाक्षुषं रूपम्। श्रावणः शब्दः। रासनो रसः। स्पार्शनः स्पर्शः। दृषदि पिष्टाः। दार्षदाः
सक्तवः। उलूखले क्षुण्णः। औलूखलो यावकः। अश्वैरुह्यते। आश्वो रथः। चतुर्भिरुह्यते। चातुरं शकटं। चतुर्दश्यां दृश्यते।
चातुर्दशं रक्षः। वक्ष्यति च। राष्ट्रावारपाराद्घखौ इति। राष्ट्रियः। अवारपारीणः। शेषवचनं घादीनामपत्यादिष्वप्रसङ्गार्थम्।१।
तस्येदं वचनात्प्रसङ्गः।२। विप्रतिषेधात्सिद्धम्।३। न वा परत्वाद्घादीनाम्।४। अणपवादत्वाद्वा एतद्विषये घादिप्रसङ्गः।५। भाष्ये
निर्देशेनैव प्रत्याख्यातम् ९३। राष्ट्रावारपाराद्घखौ। कौ। सा। न। शे। राष्ट्र। अवारपार। इत्येताभ्यां क्रमात् घ। ख। इत्येतौ प्रत्ययौ भवतः
राष्ट्रियः। अवारपारीणः। प्रकृतिविशेषोपादानेन तावत्प्रत्यया विधीयन्ते। तेषां जातादयो ऽर्थविशेषाः समर्थविभक्तयश्चा-
ग्रे वक्ष्यन्ते। अवारपारादिगृहीतादपीति वक्तव्यम्।१। अवारीणः। विपरीताच्च।२। पारावारीणः। अवारपारादिगृहीताद्विप-
रीताच्चेति वक्तव्यम्।२। कौ। सा। न। शे। ९४। ग्रामाद्यखञौ। कौ। सा। न। शे। ग्राम। इत्येतस्मात् य। खञ्। इत्येतौ प्रत्ययौ भवतः। ग्राम्यः
ग्रामीणः। भाष्ये तन्नेदं व्याख्यातम् ९५। कत्त्र्यादिभ्यो ढकञ्। कौ। सा। न। शे। कत्त्रि। इत्येवमादिभ्यो ढकञ् स्यात्। कात्त्रेयक :
कत्त्रि। उम्भि। पुष्कर। पुष्कल। मोदन। कुम्भी। कुण्डिन। नगरी। माहिष्मती। वर्मती। उख्या। ग्राम। कुड्यायाः यलोपश्च। कत्त्र्या-
दिः। ग्रामाच्चेति वक्तव्यम्।१। ग्रामेयकः ९६। कुलकुक्षिग्रीवाभ्यः श्वास्यलंकारेषु। कौ। सा। न। शे। कुल। कुक्षि। ग्रीवा। इत्येते-
भ्यः क्रमात् श्वा। असि। अलंकार। इत्येतेषु वाच्येषु ढकञ् स्यात्। कौलेयकः कुक्कुरश्चेत्। कौलो ऽन्यः। कौक्षेयको ऽसिश्चेत्
कौक्षो ऽन्यः। ग्रैवेयको ऽलंकारश्चेत्। कौलेयकः कुक्कुरश्चेत्। कौलो ऽन्यः। कौक्षेयको ऽसिश्चेत्। कौक्षो अयं योगः शक्यो ऽ
वक्तुम्। इति भाष्यम् ९७। नद्यादिभ्यो ढक्। कौ। सा। न। शे। नदी इत्येवमादिभ्यो ढक् स्यात्। नादेयम्। नदी। मही। वाराण-
सी। श्रावस्ती। कौशाम्बी। वनकौशाम्बी। काशपरी। काशफरी। खादिरी। पूर्वनगरी। पाठा। माया। शाल्वा। दार्वा। सेत

की। वडवाया वृषे। नद्यादिः। इत्यादिसूत्रद्वयं भाष्ये न व्याख्यातम्। ९८। दाक्षिणापश्चात्पुरसस्त्यक्। कौ। सू। त। शै। दाक्षिणा पश्चा
सू॰ प॰ त्। पुरस् इत्येतेभ्यः त्यक् स्यात्। दाक्षिणात्यः। पाश्चात्यः। पौरस्त्यः ९९ कापिश्याः ष्फक्। कौ। सू। त। शै। कापिशी। इत्येत
१३४ स्मात् ष्फक् स्यात्। कापिशायनम् मधु। षकारो ङीषर्थः। कापिशायिनी द्राक्षा। वाल्हूर्दिपर्दिभ्यश्चेति वक्तव्यम्। १। वाल्हा
यनी। और्दायनी। पार्दायनी। १००। रङ्कोरमनुष्येऽण् च। कौ। सू। त। शै। रङ्कु इत्येतस्मान्मनुष्यभिन्ने वाच्येऽण् स्यात्। चकारा
134 त् ष्फक् च। राङ्कवो गौः। राङ्कवायणः। अमनुष्ये किम्। राङ्कवको मनुष्यः। रङ्कुवायणः। अमनुष्ये किम्। राङ्कवको मनुष्यः।
रङ्कोरमनुष्यग्रहणमनर्थकं मनुष्यतत्स्थयोर्वुञ्विधानात्। १। अमनुष्ये मनुष्यस्य फग्गणोऽसाधकमिति वेन्नानिष्ट
त्वात्। २। तत्र वुञेवेति भावः। अण्ग्रहणं वकाव्ञादिभ्यो बाधविधानात्। ३। अनर्थकमिति शेषः। १०१। द्युप्रागपागुदक्प्रतीचो
यत्। कौ। सू। त। शै। दिव्। प्राच्। अपाच्। उदच्। प्रतीच्। इत्येतेभ्यो यत्। दिव्यम्। प्राच्यम्। अपाच्यम्। उदीच्यम्। प्रतीच्यम्। इ
त्यादिसूत्रत्रयं भाष्ये न व्याख्यातम्। १०२। कन्थायाष्ठक्। कौ। सू। त। शै। कन्था। इत्येतस्मात् ठक् स्यात्। कान्थिकः १०३। वर्णौ
वुक्। कौ। सू। त। शै। कन्था। इत्येतस्माद्वर्णुनदसमीपदेशविषयाच्छेषे वा विनो वुक् स्यात्। यथा हि जाते हिमवत्स कान्थकम्। १४।
अव्ययात्त्यप्। कौ। सू। त। शै। अव्ययसंज्ञकात् त्यप् स्यात्। अमात्यः। इहत्यः। अमेहक्वतसित्रेभ्य एव त्यब्विधिर्योऽव्ययात् स्मृतः। ।।
अमा। अमात्यः। इह। इहत्यः। क्व। क्वत्यः। तसि। ततस्त्यः। त्र। तत्रत्यः। परिगणने किम्। औपरिष्टः। अमेहक्वतसित्रेभ्य एव। १।
कौ। सू। त। शै। इतरथा ह्यौनराहौपरिष्टपारतानां प्रतिषेधो वक्तव्यः। २। त्यब्नेर्ध्रुवे। ३। कौ। सू। त। शै। नित्यः। निसो गते। ४। कौ
सू। त। शै। निर्गतो वर्णाश्रमेभ्यः। निष्ट्यः चाण्डालादिः। अरण्याण्णः। ५। कौ। सू। त। शै। आरण्याः सुमनसः। दूरादेत्यः। ६। कौ
सू। त। शै। दूरेत्यः पाथिकः। उत्तरादाहञ्। ७। कौ। सू। त। शै। औत्तराहः। अव्ययात्त्यपो विष्ट्योपसंख्यानेऽच्छन्दसि। ८। आविष्ट्यो
वर्द्धते वारुः। आविष्ट्योपसंख्यानेऽच्छन्दसि १। कौ। वे। अ। व। अव्ययतीरूप्योत्तरपदोदीच्यग्रामकोपदविधौ हिदाव्छो विन्न १३४

तिषेयेन ९। अव्यय। आरातीयः। तीरोत्तरपदः। वायसतीरीयः। रूप्योत्तरपदेत्रञ्ञापवादोयोपधाद्वुञ्। माणिरूप्यकः। उदीच्यग्रा॰
म। वाउवकर्षीयः। कोपध। औलूकीयः। तेभ्यष्टञ् ञिठौ। १०। विप्रतिषेधेनेत्येव। नवादिभ्यइत्यर्थः नवाष्टञादीनांञापवादत्वा
तद्विषयेचाभावादितरेषाम्। ११। कोपधादणः पुनर्वचनमन्यनिवृत्त्यर्थम्। १२। तस्माद्दन्तोदात्तेकोपधाप्रतिषेधः १३। ञ्ञा॰
दौर्देशेकालाट्ठञ् ञित्यातञ्भवतिविप्रतिषेधेन। १४। दाक्षिकर्षुकः। मासिकम्। नतदन्ताद्दणञ्ञादिप्रतिषेधेन १५। सौवातः
अव्ययात् त्यप्सुलौञ्ञाञ्भवतोविप्रतिषेधेन। १६। प्रातस्तनम्। शारीवयवायतञ्ञाञ्भवतिषेधेन। १७। पयम्। वर्गान्ताञ्ञा॰
शाह्वेयत्स्यै। ञ्ञाञ्भवतोविप्रतिषेधेन। १८। वासुदेववर्ग्यः। वासुदेववर्गीणः। वृद्धत्वोत्तोदात्ताद्वुञ्ञाञ्भवतिविप्रतिषेधेन। २०
आपणिकः। विधायोनिसम्बन्धेभ्योवुञ्ञाञ्भवतिविप्रतिषेधेन। २१। आञ्ञावार्ष्यकम्। मातुलकम्। ऋतष्ठञ्ञाञ्भवतिवि
प्रतिषेधेन। २२। शास्तृकम्। भ्रातृकम्। रूप्यमयेटोञ्ञाञ्भवतोविप्रतिषेधेन २३ वायुदत्तरूप्यम्। वायुदत्तमयम्। अविना
द्वृद्धञ्ञाञ्भवतिविप्रतिषेधेन। २२। शास्तृकम्। भ्रातृकम्। रूप्यमत्र। २४। यायसिकः। गोत्रक्षत्रियाख्येभ्योबहुलंवुञ्ञाञ्भव
तिविप्रतिषेधेन। २५। गार्गकः। मालवकः। णिनिरन्तेवासिब्राह्मणेभ्यश्छञ्ञाञ्भवतिविप्रतिषेधेन। २६। आरुणिनः। शाम
यनिनः। पत्त्रपूर्वादञ्ञाञ्भवतिविप्रतियेन। २७। वामी। वामम्। द्वन्द्वाद्वुन्वैरमैथुनिकयोश्छञ्ञाञ्भवतिषिप्रतिषेधेन। २८
काकोलूकिका। श्वावरमहेका। गोत्रचरणाद्वुञ्ञाञ्भवतिविप्रतिषेधेन। २९। गार्गकम्। पैप्पलादकम्। काण्वादीञोऽ
रित्वयेः। ३०। वुञ्विप्रतिषेधेनेत्येव। काण्वकम्। दाक्षकम्। ठञ्ञिठाभ्यामोर्देशेठञ्। ३१। नापितवास्तुकः। ववा
ठञोऽनवकाशत्वात्। ३२। योपधप्रस्थादीनांवुञ्ठञ्ञिठाभ्यांभवति। विप्रतिषेधेन। ३३। दाशरूप्यकः। यातानप्रस्थकः
वोष्ठञोवुञ्भवतिविप्रतिषेधेन। ३४। आप्रातिमायवकः। नगपदानामकाणोष्ठञोभवतिविप्रतिषेधेन। ३५। जेहव
कः। ऐक्ष्वाकः। नवावुञपवादत्वादणः। ३६। कोपधादणोऽकेकान्ताच्छः। ३७। ब्राह्मणकीयः। यत्रवुञश्छोभवति

वितिषेधेन। १२८। आह्नकीयः। नवाह्नस्य पुनर्वचनेऽपवादनिवृत्त्यर्थम्। ३॥ १०५। ऐषमोह्यः। श्वसोऽन्यतरस्याम्। कौ। सू।
त। शै। ऐषमस्। ह्यस्। श्वस्। इत्येतेभ्यस्त्यप् वा स्यात्। पक्षे ट्युलौ। ऐषमस्त्यम्। ऐषमस्तनम्। ह्यस्त्यम्। ह्यस्तनम्। श्वस्त्यं
श्वस्तनम्। इत्यादीन्येकोनविंशतिसूत्राणि भाष्येऽनवाख्यातानि १०६। तीररूप्योत्तरपदादञ्ञौ। कौ। सू। त। शै। तीर।
रूप्य। इत्येतदुत्तरपदाभ्यां प्रातिपदिकाभ्यां क्रमात् अञ् ञ। ञ इत्येतौ प्रत्ययौ भवतः। पाल्वलतीरम्। शैवरूप्यम्। १०७। दि
क्पूर्वपदादसंज्ञायां ञः। कौ। सू। त। शै। असंज्ञाविषयाद्दिग्वाचिपूर्वपदात्प्रातिपदिकात् ञः स्यात्। पौर्वशालः। दाक्षि
णशालः। असंज्ञायां किम्। पूर्वेषुकामशमः। दिक्संज्ञायामिति समासः। प्राचां ग्रामनगराणामित्युत्तरपदवृद्धिः।
पदग्रहणं स्वरूपाग्रहणार्थम् १०८ मद्रेभ्योऽञ्। कौ। सू। त। शै। मद्र इत्येतस्माद्दिक्पूर्वपदात्। अञ् स्यात्। पौर्वमद्रः
दिशोऽमद्राणामिति पर्युदासादुत्तरपदवृद्धिर्न। किन्त्वादिवृद्धिरेव १०९ उदीच्यग्रामाद्बह्वचोऽन्तोदात्तात्। कौ।
सू। त। शै। उदीच्यग्रामवाचिनो बह्वचोऽन्तोदात्तात्प्रातिपदिकादञ् स्यात्। शैवपुरम्। उदीच्यग्रामात् किम्। माथुरम्। बह्वचः किं
धाजे। अन्तोदात्तात्किम्। शार्कृशीयानम्। लित्स्वरेणाद्युदात्तः। ११०। प्रस्थोत्तरपदपलद्यादिकोपधादण्। कौ। सू। त। शै।
प्रस्थोत्तरपदात्। पलद्यादेः। ककारोपधाच्च उदीच्यग्रामवाचिनोऽण् स्यात्। माहिकिप्रस्थः। पालदः। पारिषदः। कोपधात्
नैलीनकः। पलदी। परिषद्। रोमक। वाहीक। कलकीट। बहुकीट। जालकीट। कमलकीकर। कमलभिदा। गो॰
ष्ठी। नैकती। परिखा। शूरसेन। गोमती। पटच्चर। उदपान। यकृल्लोम। पलद्यादि। १११। कण्वादिभ्यो गोत्रे। कौ। सू। त। शै।
गोत्रप्रत्ययान्तेभ्यः कण्वादिभ्योऽण् स्यात्। काण्वाः। गौकक्षाः। गोत्रे किम्। कण्वो देवताऽस्य काण्वः। तस्येदम्। काण्वी
यम्। कण्वादिर्गर्गादिगणान्तर्गणः ११२ इञश्च। कौ। सू। त। शै। गोत्रे य इञ् विहितस्तदन्तादण् स्यात्। दाक्षाः। प्लाक्षाः। म्ला
क्षाः। गोत्रे किम्। सौतङ्गमेरिदम्। सौतङ्गमीयम्। ११३। न द्व्यचः प्राच्यभरतेषु। कौ। सू। त। शै। प्राच्यगोत्रात्। भरतगोत्रा १३५

वृद्धवृद्धकादिञ्प्रत्ययान्तात् अण्एन स्यात्। वैह्नीयाः। पौष्पीयाः। भरतगोत्रे। काशीयाः। ह्रस्वः किम्। पात्रागाराः। प्राच्यभरतेषु।
किम्। दाक्षाः। भरतानां प्राच्यत्वेऽपि पृथग्ग्रहणात् अन्यत्र प्राच्यग्रहणे भरतानामग्रहणार्थम्। ११४। वृद्धाच्छः कौ। स्वा। त। शे। वृद्ध
संज्ञकात् प्रातिपदिकात् छः स्यात्। गार्गीयः। शालीयः। ११५। भवतष्ठक्छसौ। कौ। स्वा। त। शे। भवत्। इत्येतस्माद्वृद्धसंज्ञकात्
ठक्। छस्। इत्येतौ प्रत्ययौ भवतः। भावत्कः। भवदीयः। वृद्धादित्येव। भावतः। शतृप्रत्ययान्तादणेव। ११६। काश्यादिभ्यष्ठञ्ञि
ठौ। कौ। स्वा। त। शे। काशि। इत्येवमादिभ्यः। ठञ्। ञिठ। इत्येतौ प्रत्ययौ भवतः। ठञ्। काशिकी। ञिठ। काशिका। इकार उच्चार
णार्थः। काशि। वेदि। सांयाति। संवाह। अच्युत। मोदमान। शकुलाद। हस्तिकर्षू। कुनामन्। हिरण्य। करण। गोवास
न। भारङ्गी। अरिन्दम। अरित्र। देवदत्त। दशग्राम। शौवावतान। युवराज। देवराज। मोदनसिन्धुमित्र। दासमित्र। सुधामित्र।
सोममित्र। छागमित्र। सधमित्र। आपदादिपूर्वपदात्कालान्तात्। आपदाद्युधानत्। काश्यादिः। ११७ वाहीकग्रामेभ्यश्च
कौ। स्वा। त। शे। वाहीकग्रामवाचिभ्यो वृद्धसंज्ञकेभ्यः ठञ्। ञिठ। इत्येतौ प्रत्ययौ भवतः। शाकलिका ११८ विभाषोशीनरेषु
कौ। स्वा। त। शे। उशीनरेषु ये ग्रामास्तद्वाचिभ्यो वृद्धे। भ्यः ठञ्। ञिठ। इत्येतौ प्रत्ययौ वा भवतः सौदर्शनिकी। सौदर्शनिका
पक्षे छः। सौदर्शनीया। ११९। ओर्देशे ठञ्। कौ। स्वा। त। शे। उ। इत्येतदन्ताद्देशवाचिनष्ठञ् स्यात्। नैषादकर्षुकः। शावरज
म्बुकः। देशे किम्। पटोश्छात्राः। पाटवाः। ञिठ निवृत्त्यर्थं ठञ्ग्रहणम् १२०। वृद्धात्प्राचाम्। कौ। स्वा। त। शे। उ। इत्येतदन्तात्
प्राग्देशवाचिनो वृद्धादेव ठञ् स्यात्। आढकजम्बुकः। शाकजम्बुकः। वृद्धादेवेति किम्। मल्लवास्तु। माल्लवास्तवम् १२१
धन्वयोपधाद्वुञ्। कौ। स्वा। त। शे। धन्ववाचिनः। इत्येतउपधाच्च वृद्धाद्देशवाचिनो वुञ् स्यात्। ऐरावतकः। योपधात्। सां
काश्यकः। १२२। प्रस्थपुरवहान्ताच्च। कौ। स्वा। त। शे। प्रस्थ। पुर। वह। इत्येतदन्ताद्वृद्धाद्देशवाचिनो वुञ् स्यात्। मालाप्रस्थकः
नान्दीपुरकः। पैलवहकः। पुरान्तग्रहणमप्रागर्थम्। प्राग्देशे तु तरसूत्रेण सिद्धम् १२३। रोपधेतोः प्राचाम्। कौ। स्वा। त।

पे ३। हत्येतदुपधात्। ईत्र्तीतदन्ताच्च प्राग्देशवाचिनो वुञ्स्यात्। पाटलिपुत्रकः। ईतः। काकन्दी। काकन्दकः। माकन्दी। माक
सू॰प॰ न्दकः। प्राचां किम्। दात्तामित्रीयः। तपरत्वं स्पष्टार्थम्। १२४ जनपदतदवध्योश्च। कौ। स्या। त। शे। जनपदवाचिनः। जनपदावधि
१३६ कावाचिनश्च वृद्धाद्वुञ्स्यात्। आदर्शकः। जनपदावधेः। त्रैगर्तकः। जनपदतदवध्योर्ग्रहणे विषाने ऽ षयवमात्रात्प्रसंगः। ।तद
वधिरिति षष्ठीतत्पुरुषे ऽ जनपदादपि स्यादिति भावः। जनपदादिति वेद्वचनानर्थकम्। २। कर्मधारयाश्रयेणैतत्। इद
न्तर्हि प्रयोजनम्। जनपदावधेर्वुञेव यथा स्यात्। पदन्यत्प्राप्नोति तन्माभूत्। किंचान्यत्प्राप्नोति। छः। इतिभाष्यम्। १२५
अवृद्धादपि बहुवचनविषयात्। कौ। स्या। त। शे। अवृद्धाद्वाच्च जनपदतदवधिवाचिनो बहुवचनविषयात् वुञ्स्यात्। अ
वृद्धाज्जनपदात्। अङ्गाः। आङ्गकाः वृद्धाज्जनपदात्। दार्वकाः। अवृद्धजनपदावधेः। आजमीढकः वृद्धाज्जनपदावधेः। का
लञ्जराः। कालञ्जरकाः। विषयग्रहणं किम्। एकशेषेण बहुत्वे मा भूत्। वर्तनी च भवो वार्तनः। इत्यादि सूत्रच तुष्टयभाष्येण न
याख्यातम्। १२६। कच्छाग्निवक्त्रवर्तोत्तरपदात्। कौ। स्या। त। शे। कच्छ। अग्नि। वक्त्र। वर्त। इत्येतदुत्तरपदाद्देशवाचिनो वृद्धादवृद्धा
द्वाच्च वुञ्स्यात्। दारुकच्छकः। कौ। ऐन्द्राग्नकः। सैन्धुवक्त्रकः। बाहुवर्तकः। १२७ धूमादिभ्यश्च। कौ। स्या। त। शे। धूम। इत्येवमादिभ्यो
देशवाचिभ्यो वुञ्स्यात्। धौमकः। धूम। षण्ड। शशादन। अर्जुनाव। माहकस्थली। आनकस्थली। माहिषस्थली। मानस्थली। म
डकस्थली। समुण्डस्थली। दाण्डायनस्थली। राजस्थली। विदेह। राजगृह। सात्रासाह। पूष्य। मित्रवर्ध। भण्डाली। मदकूल। आ
जीकूल। द्याहाव। संस्फीय। बर्बर। वर्च्य। गर्ता। आनर्त। माठर। पाथेय। घोषपल्ली। आराज्ञी। धार्तराज्ञी। आवय। तीर्थ। कूला
त्सौवीरेषु। समुद्रान्नावि मनुष्ये च। कुक्षि। अन्तरीप। द्वीप। अरुण। उज्जयनी। पट्टार। दक्षिणापथ। साकेत। धूमादिः १२८। नगरा
त्कुत्सनप्रावीण्ययोः। कौ। स्या। त। शे। नगर। इत्येतस्मात्कुत्सने प्रावीण्ये च गम्यमाने वुञ्स्यात्। नागरकश्चौरः। नागरकः शि
ल्पी वा। कुत्सनप्रावीण्ययोः किम्। नागरो ब्राह्मणः। १२९। अरण्यान्मनुष्ये। कौ। स्या। त। शे। अरण्य। इत्येतस्मान्मनुष्ये ऽ १३६
136

मि येये वुञ् स्यात्। आरण्यको मनुष्यः। मनुष्ये किम्। आरण्याः पशवः। पथ्यध्यायन्यायविहारमनुष्यहस्तिष्विति वक्तव्यम्। १
कौ। सू। त। शै। आरण्यकः पन्थाः। आरण्यकोऽध्यायः। आरण्यको न्यायः। आरण्यको विहारः। आरण्यको मनुष्यः। आरण्यको
हस्ती। वा गोमयेषु। ५। कौ। सू। त। शै। आरण्यकाः। आरण्या गोमयाः। १२८। विभाषा कुरुयुगन्धराभ्याम्। कौ। सू। त। शै। कुरु। यु
गन्धर इत्येताभ्यां वुञ् वा स्यात्। कौरवकः। कौरवः। यौगन्धरकः। यौगन्धरः। कुरुयुगन्धराभ्यां वावचनं मनुष्यतत्स्थयोर्वुञ् निया
नम्। १। विप्रतिषेधे नेति शेषः। न बिल्वपि कुरुशब्दे विभाषा प्रयोजयति। अनेन तु कच्छादिषु पाठादण् भविष्यति। सैषा युग
न्धरार्था विभाषा। इति भाष्यम्। १२९। मद्रवृज्योः कन्। कौ। सू। त। शै। मद्र। वृजि। इत्येताभ्यां कन् स्यात्। मद्रकः। वृजिकः।
इत्यादि सूत्रद्वयं भाष्येऽनव्याख्यातम्। १३१। कोपधादण्। कौ। सू। त। शै। क इत्येतदुपधाद्देशवाचिनोऽण् स्यात्। ऐक्ष्वाक
वः। अण्ग्रहणमुवर्णान्तादपि भवति १३२ कच्छादिभ्यश्च। कौ। सू। त। शै। कच्छ। इत्येवमादिभ्योऽण् स्यात्। काच्छः।
कच्छ। सिन्धुः। वर्ण। गन्धार। मधुमत्। कम्बोज। कश्मीर। साल्व। कुरु। अनुषण्ड। द्वीप। अनूप। अजवाह। विजापक। कलूतर
रङ्कु। कच्छादिः। साल्वनो कच्छादिषु पाठोऽण्विधानार्थः।।। नवाऽपदातिगोयवाग्रहणमवधारणार्थम् २ १३३। मनु
ष्यतत्स्थयोर्वुञ्। कौ। सू। त। शै। कच्छ। इत्येवमादिभ्यो देशवाचिभ्यो मनुष्यतत्स्थेवगम्यमाने वुञ् स्यात्। काच्छको मनुष्यः
काच्छकं हसितम्। मनुष्यतत्स्थयोः किम्। काच्छो गौः। इत्यादि सूत्रत्रयं भाष्येऽनव्याख्यातम्। १३४। अपदातौ साल्वात्।
कौ। सू। त। शै। साल्व इत्येतस्मान्मनुष्यतत्स्थयोर्वोभयोरपदातावेव वुञ् स्यात्। साल्वको मनुष्यः। साल्वकं हसितम्। अ
पदातौ किम्। साल्वः पदातिः। १३५। गोयवाग्वोश्च। कौ। सू। त। शै। साल्व इत्येतस्माद्गवि यवाग्वां च विषये वुञ् स्यात्। साल्व
को गौः। साल्विका यवागूः। साल्वमन्यत् १३६। गर्तोत्तरपदाच्छः। कौ। सू। त। शै। गर्त इत्येतदुत्तरपदाद्देशवाचिनश्छः
स्यात्। वृकगर्तीयम्। शृगालगर्तीयम्। उत्तरपदग्रहणं बहुच्पूर्वान्मा भूदिति। वाडगर्तम्। गर्तोत्तरपदाच्छविधेर्जन•

सू॰प॰ १२७ 137

पदाद्युत्विप्रतिषिद्धम्।। पूर्वविप्रतिषेधोऽयम् उक्तमेवावयवग्रहणस्य प्रयोजनम्। जनपदाज्जनपदावधेश्चेत्येव यथा स्यात्। इ
तिभाष्यम्।१३८। गहादिभ्यश्च। कौ।स्रा।त।शै।गह। इत्येवमादिभ्यः छः स्यात्। गहीयः। अन्तस्थीयः। गह। अन्तस्थ। सम।
विषम। मध्यमध्यमं चाण् चरणे। उत्तम। अङ्ग। वङ्ग। मगध। पूर्वपक्ष। अपरपक्ष। अधमशाख। उत्तमशाख। एकशाख। समा
नशाख। समानग्राम। एकग्राम। एकवृक्ष। एकपलाश। इष्वग्र। इष्वनीक। अवस्यन्दन। कामप्रस्थ। खाडायन। कावेर
णि। सौमित्रि। शैशिरि। आसुत। दैवशर्मि। श्रौति। आहिंसि। आमित्रि। व्याडि। बैजि। आध्याश्वि। आनृशंसि। शौङ्गि। आग्निश
र्मि। भौजि। वाराटकि। वाल्मीकि। क्षैमवृद्धि। आश्वत्थि। औद्गाहमानि। ऐकबिन्दवि। दन्ताग्र। हंस। तन्वग्र। उत्तर। अनन्तर।
मुखपार्श्वतसोर्लोपः। जनपरयोः कुक् च। देवस्य च। वेणुकादिभ्यश्छण्। गहादिः प्रकृतिगणः। गहादिषु पृथिवीमध्यस्य मध्य
मभावोऽविक्रमः।। चरणसम्बन्धेन निवासलक्षणोऽण् एव क्रमः।२।१३९। प्राचां कटादेः। कौ।स्रा।त।शै।कट। इत्येतदादेः प्रा
ग्देशवाचिनः प्रातिपदिकात् छः स्यात्। कटनगरीयम्। कटघोषीयम्। कटपल्वलीयम्। इत्यादि सूत्रद्वयं भाष्येऽत्र न व्याख्यातम्। १८
राज्ञः क च। कौ।स्रा।त।शै। राजन्। इत्येतस्य ककारश्चान्तादेशः स्यात्। छप्रत्ययश्च। राजकीयम्।१४०। वृद्धादकेकान्तखोपधात्।
कौ।स्रा।त।शै। अक। इक। इत्येतदन्तात् खकारोपधाच्च वृद्धाद्देशवाचिनश्छः स्यात्। अक। आरीहणकीयम्। इक। आश्वत्थिकी
यम्। खोपधात्। पारिखीयः। ईकान्तात् आश्वत्थिकीयम्। खोपधात् पारिखीयः। ईकान्तादपीति वक्तव्यम्।। शैणिकीयः। अकेका
न्तग्रहणे कोपधग्रहणं सौसुकार्थम्।। इति भाष्यकृतः। सौसुकीयम्।१४१। कन्थापलदनगरग्रामह्रदोत्तरपदात्। कौ।
स्रा।त।शै। कन्था। पलद। नगर। ग्राम। ह्रद। इत्येतदुत्तरपदाद्देशवाचिनो वृद्धाद् छः स्यात्। दाक्षिकन्थीयम्। दाक्षिपलदीयम्। दाक्षि
नगरीयम्। दाक्षिग्रामीयम्। दाक्षिह्रदीयम्। इत्यादि सूत्रवृत्तद्वयं भाष्येऽत्र न व्याख्यातम्।१४२। पर्वताच्च। कौ।स्रा।त।शै। पर्वत।
इत्येतस्मान्मनुष्यभिधेये वा छः स्यात्। पार्वतीयानि। पार्वतानि फलानि। अमनुष्ये किम्। पार्वतीयो मनुष्यः।१४३। कृकणप १२०

स्योऽङ्गरद्वाजे। कौ। स्ता। त। शै। कृकण। पर्ण। इत्येताभ्यां भरद्वाजदेशवाचिभ्यां छः। स्यात्। ४५ कृकणीयम्। पर्णीयम्। भरद्वाजे
किम्। कार्कणम्। पार्णम्। इति ५४ सूत्राणि भाष्ये ४।२।२ व्याख्यातानि। इति सूत्रपाठे चतुर्थाध्यायस्य द्वितीयः पादः १
युष्मदस्मदोरन्यतरस्यां खञ्च २ । कौ। स्ता। त। शै। युष्मद्। अस्मद्। इत्येताभ्यां खञ्। छः। इत्येतौ प्रत्ययौ वा भवतः। यौष्माकीणः
युष्मदीयः आस्माकीनः। अस्मदीयः। औत्सर्गिकेऽणि। यौष्माकः। आस्माकः। युष्मदस्मदोः प्रत्ययविधाने योगवि
भागः संव्याख्यातानुदेशप्रतिषेधार्थः।१। तस्मिन्नणि च युष्माकास्माकौ। कौ। स्ता। त। शै। युष्मद्। अस्मद्। इत्येतयोः खञि च
णि च परे युष्माक। अस्माक। इत्येतावादेशौ क्रमाद्भवतः। यौष्माकीणः। आस्माकीनः। अणि। यौष्माकः। आस्माकः। त
स्मिन्नणि चेति किम्। युष्मदीयः। अस्मदीयः। आदेशविधाने च योगविभागः संव्याख्यातानुदेशप्रतिषेधार्थः।१। तवकम
मकावेकवचने।२।३। तवकममकावेकवचने। कौ। स्ता। त। शै। युष्मद्। अस्मद्। इत्येतयोरेकार्थवाचिनोः खञि च अणि परे तवक
ममक। इत्येतावादेशौ क्रमाद्भवतः। तावकीनः। तावकः। मामकीनः। मामकः। एकार्थग्रहणं कर्तव्यम्।१। न कर्तव्यम्। ने
दं पारिभाषिकस्यैकवचनस्य ग्रहणम्। किं तर्हि अन्वर्थग्रहणम्। इति भाष्यम् ४ अर्द्धाद्यत्। कौ। स्ता। त। शै। अर्द्ध। इत्येतस्मात्
यत् स्यात्। अर्द्ध्यम्। अर्द्धाद्यद्विधाने सपूर्वाट्ठञ्।१। वालेयार्द्धिकाः। गौतमार्द्धिकः। सपूर्वाट्ठञ् वक्तव्यः।१। इति काशि
का। दिक्पूर्वपदाद्यच्च।२। चकाराट्ठञ् ५। परावराधमोत्तमपूर्वाच्च। कौ। स्ता। त। शै। पर। अवर। अधम। उत्तम। इत्येवंपूर्वादर
र्द्धाद्यत् स्यात्। परार्द्ध्यम्। अवरार्द्ध्यम्। अधमार्द्ध्यम्। उत्तमार्द्ध्यम्। इत्यादि सूत्रदशकं भाष्ये तेन व्याख्यातम् ६। दिक्पूर्वपदाट्ठ
ञ्च। कौ। स्ता। त। शै। दिक्पूर्वपदादर्द्धाट्ठञ् स्यात्। चकाराद्यत्। पौर्वार्द्धिकम्। पौर्वार्द्ध्यम्। पदग्रहणं स्वरूपाग्रहणार्थम् ७।
ग्रामजनपदैकदेशादञ्ठञौ। कौ। स्ता। त। शै। ग्रामैकदेशवाचिनो जनपदैकदेशवाचिनश्च दिक्पूर्वपदादर्द्धान्तात् प्रातिपदि
कात् अञ्। ठञ्। इत्येतौ प्रत्ययौ भवतः। इमेऽस्माकं ग्रामस्य पौर्वार्द्धाः। पौर्वार्द्धिकाः। इमे। अस्माकं जनपदस्य पौर्वार्द्धाः। पौर्वा

ड्रिकः ।८। मध्यान्मः ।कौ। सू।त।शे। मध्य। इत्येतस्मान्मः स्यात्। मध्यमः। आदेश्चेति वक्तव्यम्।१। इति काशिका। आदिमः। अवोध
सोर्लोपश्च।२। इति काशिका। अवमम्। अधमम्।९। असांप्रतिके। कौ। सू।त।शे। मध्य। इत्येतस्मात्। अ इत्येष प्रत्ययः। स्यात्। मा
ध्ये जातादौ। मध्यमीमांसकः। उत्कर्षापकर्षहीन इत्यर्थः १० द्वीपादनुसमुद्रं यञ्। कौ। सू।त।शे। द्वीप। इत्येतस्मात्समुद्रसमीप
द्वीपविषयाद्यञ् स्यात्। द्वैप्यम्। अनुसमुद्रे किम्। द्वैपमन्यत्।११। कालाट्ठञ्। कौ। सू।त।शे। कालविशेषवाचिनष्ठञ् स्यात्। मासि
कः। सांवत्सरिकः। यथाकथंचिद्गुणवृत्त्यापि वर्तमानात्प्रत्यय इष्यते।१। इति काशिका। कादम्बपौष्पिकम्।१२। श्राद्धे शरदः।
कौ। सू।त।शे। शरद्। इत्येतस्मात्कालवाचिनष्ठञ् स्यात्। श्राद्धे ऽभिधेये। शारदिकं श्राद्धम्। श्राद्धे किम्। शारदमन्यत्। ऋत
ण् १३ विभाषा रोगातपयोः। कौ। सू।त।शे। शरद्। इत्येतस्माद्रोगे आतपे च वा ठञ् स्यात्। शारदिकः। शारदो वा रोगः। शारदि
कः शारदो वा आतपः। रोगातपयोः किम्। अन्यत्शारदम् १४ निशाप्रदोषाभ्यां च। कौ। सू।त।शे। निशा। प्रदोष। इत्येताभ्यां
कालवाचिभ्यां वा ठञ् स्यात्। नैशिकम्। नैशम्। प्रादोषिकम्। प्रादोषम्।१५। श्वसस्तुट् च। कौ। सू।त।शे। श्वस्। इत्येतस्मात्काल
वाचिनष्ठञ् स्यात्। ठञस्तुडागमः। शौवस्तिकम्। श्वसस्तुट् सादेशानुपपत्तिरनादित्वात्।१। सर्वो नेक प्रतिषेधः।२। सिद्ध
तादिष्टं स्यात्तु वचनात्।३। चसन्नियोगाद्वा ४। आदेशस्येति शेषः १६ सन्धिवेलाद्यृतुनक्षत्रेभ्यो ऽण्। कौ। सू।त।शे सन्धि
वेलादिभ्यः। ऋतुवाचिभ्यः। नक्षत्रवाचिभ्यश्च कालवृत्तिभ्यो ऽण् स्यात्। सान्धिवेलम्। सान्ध्यम्। ऋतुभ्यः। शैशिरम्। नक्ष
त्रेभ्यः। पौषम्। पुनरण्ग्रहणं ठञा बाधितम्। सन्धिवेला। सन्ध्या। अमावास्या। त्रयोदशी चतुर्दशी। पञ्चदशी। पौर्णमासी
प्रतिपत्। संवत्सरात्फलपर्वणोः। सन्ध्येवेलादिः। इत्यादि सूत्रषट्कं भाष्येतनयाख्यातम्।१७। प्रावृष एण्यः। कौ। सू।त।शे।
प्रावृष्। इत्येतस्मात्कालवाचिन एण्यः स्यात्। प्रावृषेण्यो मेघः।१८। वर्षाभ्यष्ठक्। कौ। सू।त।शे। वर्षा। इत्येतस्माट्ठक् स्यात्।
वार्षिकं वासः।१९। छन्दसि ठञ्। कौ। वै। ग्रा। च। वर्षा। इत्येतस्माद्वेदे ठञ् स्याद्वेदे ठञ् स्यात्। नभश्च नभस्यश्च वार्षिकावृतू। ठक् १३८

ठञोः स्वरे विशेषः २०। वसन्ताच्च। कौ। वै। अ। वा। वसन्त। इत्येतस्माच्छन्दसि ठञ् स्यात्। मधुश्च माधवश्च वासन्तिकावृतू २१।
हेमन्ताच्च। कौ। वै। अ। च। हेमन्त। इत्येतस्माच्छन्दसि ठञ् स्यात्। सहश्च सहस्यश्च हैमन्तिकावृतू। योगविभाग उत्तरार्थः। २२
सर्वत्राण् तलोपश्च। कौ। स्वा। त। चौ। हेमन्त। इत्येतस्माल्लोके वेदे च सर्वत्र अण् स्यात्। तत्संनियोगेन तकारलोपश्च। हैमनं वासः
वकारात् हेमन्तात् अणि। हेमन्तम्। इति लोके। वेदे तु। हैमन्तम्। हैमन्तिकं। हेमन्तस्याणि तलोपवचनमनर्थकं हेमन्शब्दः प्रकृत्यन्तरत्वा
त्। १। सर्वत्राणित्येव कर्तव्यमिति भावः। अलोपदर्शनाच्च। २। हेमन्तीपङ्क्तिरिति। हेमन्तस्याण्वचनमणि तलोपवचन
मनर्थकं हेमन्शब्दः प्रकृत्यन्तरत्वात्। २। इत्यपरस्य। २३। सायं चिरं प्राह्णे प्रगेऽव्ययेभ्यष्ट्युट्युलौ तुट् च। कौ। स्वा। त। शै। सायम्। चिरम्।
प्राह्णे। प्रगे। इत्येतेभ्योऽव्ययेभ्यश्च कालवाचिभ्यः ट्यु। ट्युल्। इत्येतौ प्रत्ययौ भवतः। तयोश्च तुडागमो भवति। सायन्तनम्। चिर
न्तनम्। प्राह्णेतनम्। प्रगेतनम्। अव्ययेभ्यः। दोषातनम्। दिवातनम्। ट्युट्युलोः स्वरे विशेषः। चिरपरुत्परारिभ्यस्त्नो व
क्तव्यः। १। कौ। स्वा। त। शै। चिरत्नम्। परुत्नम्। परारित्नम्। प्रगस्य छन्दसि गलोपश्च २। प्रत्नम्। अग्रादिपश्चाड्डिमच्। ३। कौ। स्वा।
त। शै। अग्र। अग्रिमम्। आदि। आदिमम्। पश्चात्। पश्चिमम्। अग्रपश्चाड्डिमच्। ४। इति काशिका। अन्ताच्च। ५। कौ। स्वा। त। शै।
अन्तिमम्। सायंचिरयोर्मकारान्तत्वं प्रत्यये निपातितम्। ५। सायमोऽहेमलोपः। ६। इति भाष्यकृतः। सायाह्नः। अव्ययानादे
वासिद्धे सूत्रे सायं प्राह्णे न पठितव्यः। घञन्तस्य सायशब्दस्यावसानमात्रवाची। न तु कालविशेषवाचीति भावः। तदेव। २। सायन्तने
सायेवासमस्तांचेति वक्तव्यम्। ३। सायम्। साये। भाष्यप्रामाण्यान्मलोपेऽव्ययताभावः। प्राह्णप्रगयोरेकारान्तत्वम्। ६। त
स्मादेशानुपपत्तिरनादित्वात् ७। पूर्वान्ते विसर्जनीयः। ८। सिद्धं त्वादिष्टस्य तद्वचनात्। ९। वक्तेर्नियोगाद्वा। १०। २४। विभा
षा पूर्वाह्णापराह्णाभ्याम्। कौ। स्वा। त। पै। पूर्वाह्ण। अपराह्ण। इत्येताभ्यां ट्युट्युलौ वा भवतः। तयोश्च तुट्। पूर्वाह्णेतनम्
अपराह्णेतनम्। पक्षे ठञ्। पौर्वाह्णिकम्। आपराह्णिकम्। पूर्वाह्णापराह्णाभ्यां सप्तम्यन्तवचने सप्तमीश्रवणार्थम्। १। अ

स्तु॰प॰
१३९
139

लेख्ववनेन्ताषकमिति वेदव्यात्सममीप्रसङ्गः ॥ १ ॥ नवृमोऽलुव्ववनेन्ताषकं भवत्यत्र सप्तमीति । किन्तर्हि भवति सवन्नाडुत्प
तिरिति । इति भाष्यम् २५ । तत्रजातः । कौ । सू । त । शै । सप्तम्यन्ताज्जातइत्येतस्मिन्नर्थेऽणादयः प्रत्यया भवन्ति । स्त्रुघ्नेजातः । स्रौ
घ्नः । माथुरः । औत्सः । राष्ट्रियः । अवारपारीणः । ग्राम्यः । ग्राम्यः । ग्रामीणः । तत्रजातादिषु वचनं नियमार्थम् ॥ २६ । प्रावृष
ष्ठप् । कौ । सू । त । शै । प्रावृष् इत्येतस्माज्जातेऽर्थे ठप् स्यात् । प्रावृषि जातः । प्रावृषिकः । इत्यादि सूत्राष्टकं भाष्येत नव्याख्यातम् २७
संज्ञायां शरदो वुञ् । कौ । सू । त । शै । शरद् इत्येतस्माज्जातेऽर्थे संज्ञाविषये वुञ् स्यात् । शरदि जातः । शारदाः कादर्भे विशेषाः । संज्ञा
यां किम् । शारदम् । २८ । पूर्वाह्णापराह्णार्द्रामूलप्रदोषावस्कराद्वुन् । कौ । सू । त । शै । पूर्वाह्ण । आर्द्रा । मूल । प्रदोष । अवस्क
र । इत्येतेभ्यो जातेऽर्थे संज्ञायां वुन् स्यात् । पूर्वाह्णकः । अपराह्णकः । आर्द्रकः । मूलकः । प्रदोषकः । अवस्करकः । असंज्ञाया
न्तु ठञादयो भवन्ति । २९ । पथः पन्थ च । कौ । सू । त । शै । पथिन् इत्येतस्माज्जातेऽर्थे वुन् स्यात् । पथिन् इत्येतस्य पन्थ इत्येव आदे
शश्च । पथिजातः । पन्थकः । ३० । अमावास्याया वा । कौ । सू । त । शै । अमावास्या इत्येतस्माज्जातेऽर्थे वुन् वा स्यात् । अमावास्यायां जातः
अमावास्यकः । पक्षेऽण् । आमावास्यः । ३१ । अ च । कौ । सू । त । शै । अमावास्या इत्येतस्माज्जातेऽर्थे अ इत्येष प्रत्ययः स्यात् । वकाराद्वै
कल्पिको वुन् । अमावास्यः । अमावास्यकः । आमावास्यः । ३२ । सिन्ध्वपकराभ्यां कन् । कौ । सू । त । शै । सिन्धु । अपकर । इत्येताभ्यां
जातेऽर्थे कन् स्यात् । सिन्धुकः । अपकरकः । ३३ । अणञौ च । कौ । सू । त । शै । सिन्धु । अपकर । इत्येताभ्यां जातेऽर्थे क्रमात् अण्
अञ् । इत्येतौ प्रत्ययौ भवतः । सैन्धवः । आपकरः । ३४ । श्रविष्ठाफल्गुन्यनुराधास्वातितिष्यपुनर्वसुहस्तविशाखाषाढाबहुला
ल्लुक् । कौ । सू । त । शै । श्रविष्ठा । फल्गुनी । अनुराधा । स्वाति । तिष्य । पुनर्वसु । हस्त । विशाखा । अषाढा । बहुल । इत्येतेभ्यो जातेऽर्थे
ऽणो लुक् स्यात् । श्रविष्ठासु जातः श्रविष्ठः । फल्गुनः । अनुराधः । स्वातिः । तिष्यः । पुनर्वसुः । हस्तः । विशाखः । आषाढः । ब
हुलः । लुक्प्रकरणे चित्रारेवतीरोहिणीभ्यः स्त्रियामुपसंख्यानम् ॥ चित्रारेवतीरोहिणीभ्यः स्त्रियामुपसंख्यानम् ॥ कौ । सू १३९

त। शै। चित्रायां जाता। चित्रा। अण् ओल्लुकि नञ्ङीप्। रेवती। रोहिणी। गौरादित्वान् ङीष्। फल्गुन्यषाढाभ्यां टानौ वक्तव्यौ। ३। कौ। स्या।
त। शै। ३। फल्गुनी। अन्। अषाढा। श्रविष्ठाषाढाभ्यां छण्। ३। कौ। स्या। त। शै। श्राविष्ठीयः। आषाढीयः। नक्षत्रेभ्यो बहुलं ल
ग्वचनात्। ४। सू ५। स्थानान्तगोशालखरशालाच्च। कौ। स्या। त। शै। स्थानान्तात्। गोशाल। खरशाल। इत्येतेभ्यो जातार्थे प्रत्यय
स्य लुक् स्यात्। अश्वस्थानः। उष्ट्रस्थानः। गोशालः। खरशालः। इत्यादि सूत्रचतुष्टये भाष्ये तन्न व्याख्यातम्। ३६। वत्सशालाऽ
भिजिदश्वयुक्छतभिषजो वा। कौ। स्या। त। शै। वत्सशाला। अभिजित्। अश्वयुज्। शतभिषज्। इत्येतेभ्यो जातार्थे प्रत्ययस्य वा ल
क् स्यात्। वत्सशालः। वात्सशालः। अभिजित्। आभिजितः। अश्वयुक्। आश्वयुजः। शतभिषक्। शातभिषजः। बहुलग्रहणे
प्रपञ्चोऽयम्। सू ७। नक्षत्रेभ्यो बहुलम्। कौ। स्या। त। शै। नक्षत्रवाचिभ्यो जातार्थे प्रत्ययस्य बहुलं लुक् स्यात्। रोहिणः। रौहि
णः। रोहिणः। रौहिणः। मृगशिराः। मार्गशीर्षः। ३८। कृतलब्धक्रीतकुशलाः। कौ। स्या। त। शै। कृत। लब्ध। क्रीत। कुशल
इत्येतेष्वर्थेषु सप्तम्यन्ताद्यथाविहितमणादयः प्रत्यया भवन्ति। स्रुघ्ने कृतः। स्रुघ्ने लब्धः। स्रुघ्ने क्रीतः। स्रुघ्ने कुशलो वा। स्रौ
घ्नः। माथुरः। राष्ट्रियः। ३९ प्रायभवः। कौ। स्या। त। शै। सप्तम्यन्तात् प्रायभव इत्येतस्मिन्नर्थेऽणादयः प्रत्यया भवन्ति। स्रुघ्ने प्रायेण
बाहुल्येन भवति। स्रौघ्नः। माथुरः। राष्ट्रियः। प्रायभवग्रहणमनर्थकं तत्रभवेन कृतत्वात्। १। अनित्यभवः प्रायभव इति चेन्न क्र
संशयेन बाहुल्यम्। २। ४०। उपजानूपकर्णोपनीवेष्ठक्। कौ। स्या। त। शै। उपजानु। उपकर्ण। उपनीवि। इत्येतेभ्यः सप्तम्यन्तेभ्यः प्रायभ
वेऽर्थे ठक् स्यात्। औपजानुकः। औपकर्णिकः। औपनीविकः। इत्यादि सूत्रद्वये भाष्ये तन्न व्याख्यातम्। ४१। संभूते। कौ। स्या। त। शै।
सप्तम्यन्तात् संभूत इत्येतस्मिन्नर्थे यथाविहितं प्रत्यया भवन्ति। स्रुघ्ने संभवति। स्रौघ्नः। माथुरः। राष्ट्रियः। ४२। कोशाड्ढञ्। कौ।
स्या। त। शै। कोशा। इत्येतस्मात् सप्तम्यन्तात् संभूतेऽर्थे ढञ् स्यात्। कोशे संभूतम्। कौशेयं वस्त्रम्। विकारे कोशाड्ढञ्। १। को
शस्य विकारः। कौशेयम्। संभूते ह्यर्थानुपपत्तिः। २। यद्येवं तर्हि क्रमावनाभियात्रात्र भवेद्वेवं भस्त्रस्यापि न भविष्यति इति

भाष्यम्।४३। कालात्साधुपुष्प्यत्पच्यमानेषु। कौ।स्तु।त।शे। कालविशेषवाचिभ्यः सप्तम्यन्तेभ्यः। साधु। पुष्प्यत्। पच्यमान। इत्येतेष्व
सू.प. र्थेषु यथाविहितमणादयः प्रत्यया भवन्ति। हेमन्ते साधुः। हैमनः। वसन्ते पुष्प्यति। वासन्ती। शरदि पच्यन्ते। शारदाः। इत्यादि सूत्रप
१४० ञ्चकं भाष्येतन व्याख्यातम्। ४४। उप्ते च। कौ।स्तु।त।शे। कालवाचिभ्यः। सप्तम्यन्तेभ्य उप्त इत्येतस्मिन्नर्थे यथाविहितमणादयः प्रत्य
या भवन्ति। हेमन्ते उप्ताः। हैमन्ता यवाः। ४५। आश्वयुज्या वुञ्। कौ।स्तु।त।शे। आश्वयुजी। इत्येतस्मादुप्तेऽर्थे वुञ् स्यात्। आश्वयु
ज्यामुप्ताः। आश्वयुजका माषाः। ४६। ग्रीष्मवसन्तादन्यतरस्याम्। कौ।स्तु।त।शे। ग्रीष्म। वसन्त। इत्येताभ्यां सप्तम्यन्ताभ्यामुप्ते
ऽर्थे वुञ् वा स्यात्। ग्रैष्मकं। ग्रैष्मम्। वासन्तकम्। वासन्तम्। ४७। देयमृणे। कौ।स्तु।त।शे। सप्तम्यन्तात्कालवाचिनो देयमित्येतस्मि
न्नर्थे उक्तो वक्ष्यमाणश्च प्रत्यया भवन्ति। देये चेदृणं भवति। मासे देयमृणम्। मासिकम्। ऋणे किम्। मासे देया भिक्षा। ४८। कला
प्यश्वत्थयवबुसाद्वुन्। कौ।स्तु।त।शे। कलापिन्। अश्वत्थ। यवबुस। इत्येतेभ्यः कालवाचिभ्यो वुन् स्यात्। कलापिनि काले देयमृणम्
कलापकम्। अश्वत्थफलोत्पत्तिकाले देयमृणम्। अश्वत्थकम्। यवबुसोत्पत्तिकाले देयमृणम्। यवबुसकम्। कलापिसहचरितः
कालः। कलापी कालः इति भाष्यम्। ४९। ग्रीष्मावरसमाद्वुञ्। कौ।स्तु।त।शे। ग्रीष्म। अवरसम। इत्येताभ्यां सप्तम्यन्ताभ्यां वुञ् स्यात्
ग्रीष्मे देयमृणम्। ग्रैष्मकम्। आवरसमकम्। इत्यादि सूत्रचतुष्टयं भाष्येतन व्याख्यातम्। ५०। संवत्सराग्रहायणीभ्यां ठञ् च। कौ
स्तु।त।शे। संवत्सर। आग्रहायणी। इत्येताभ्यां ठञ् स्यात्। चकाराद्वुञ्। संवत्सरे देयमृणम्। सांवत्सरिकम्। सांवत्सरकम्। आग्रहा
यणिकम्। आग्रहायणकम्। ५१। व्याहरति मृगः। कौ।स्तु।त।शे। सप्तम्यन्तात्कालवाचिनो व्याहरतीत्येतस्मिन्नर्थे यथावि।हि
तमणादयः प्रत्यया भवन्ति। यो व्याहरति स चेन्मृगः। निशायां व्याहरति। नैशो मृगः। नैशिकः। प्रादोषः प्रादोषिकः। मृगः किम्
निशायां व्याहरत्युलूकः। ५२। तदस्य सोढम्। कौ।स्तु।त।शे। प्रथमान्तात्कालवाचिनोऽस्येति षष्ठ्यर्थे यथाविहितमणादयः। प्रत्य
या भवन्ति। प्रथमान्तार्थः सोढं चेद्भवति। निशा सहचरितमध्ययने निशा। तत्सोढं सह्यमस्य शिष्यस्य। नैशिकः। प्रादोषः। प्रादो ७०

षिकः। ५३। तत्रभवः। कौ। सू। त। शै। सप्तमीसमर्थान्ङ्याद्भवइत्येतस्मिन्नर्थेयथा। विहितमणादयःप्रत्ययाभवन्ति। भवत्यर्थःसत्तानतुज
न्म। स्रुघ्नेभवः। स्रौघ्नः। माथुरः। राष्ट्रियः। तत्रप्रकरणेपुनस्तत्रवचनंकालनिवृत्त्यर्थम्।। ५४। दिगादिभ्योयत्। कौ। सू। त। शै। दिग्
इत्येवमादिभ्योभवेऽर्थेयत्स्यात्। दिशिभवम्। दिश्यम्। वर्ग्यम्। दिश्। वर्ग। पूगगण। पक्ष। धाय्य। मित्र। मेधा। अन्तर। पथि
न्। रहस्। अलीक। उखा। साक्षिन्। देश। आदि। अन्त। मुख। जघन। मेघ। यूथ। उदकात्संज्ञायाम्। न्याय। वंश। वेश। काल
आकाश। दिगादिः॥ इत्यादिसूत्रवृत्त्यर्थंभाष्येतुनव्याख्यातम् ५५। शरीरावयवाच्च। कौ। सू। त। शै। शरीरावयववाचिनोभ
वेऽर्थेयत्। दन्तेषुभवः। दन्त्यः। कर्ण्यः। ओष्ठ्यः। ५६। दृतिकुक्षिकलशिवस्त्यस्त्यहेर्ढञ्। कौ। सू। त। शै। दृति। कुक्षि। कल
शि। वस्ति। अस्ति। अहि। इत्येतेभ्योभवेऽर्थेढञ्स्यात्। दार्तेयम्। कौक्षेयम्। कालशेयम्। वास्तेयम्। आस्तेयम्। आस्तेये
आहेयम् ५७। ग्रीवाभ्योऽणच। कौ। सू। त। शै। ग्रीवा। इत्येतस्माद्भवेऽर्थेअण्स्यात्। चकाराड्ढञ्। ग्रीवासुभवम्। ग्रैवम्। ग्रैवेयम्। ग्रै
वेयम्। ५८। गम्भीराञ्ञ्यः। कौ। सू। त। शै। गम्भीर। इत्येतस्माद्भवेऽर्थेञ्यःस्यात्। गाम्भीरेभवम्। गाम्भीर्यम्। ञ्यप्रकरणेपरि
मुखादिभ्यउपसंख्यानम्।। अग्रिमसूत्रविषयकमेतत्। पारिमुख्यम्। पारिहनव्यम्। परिमुख। परिहनु। पर्योष्ठ। पर्युलू
खल। परिसीर। उपसीर। उपस्थूण। उपकलाप। अनुपथ। अनुपद। अनुगङ्ग। अनुतिल। अनुसीत। अनुसाय। अनुसीर
अनुमाष। अनुयव। अनुयूप। अनुवंश। प्रतिशाख। परिमुखादिः। अव्ययीभावादित्यनेउपकूलादिभ्यःप्रतिषेधः।२। ब
हिर्देवपञ्चजनेभ्यश्चेतिवक्तव्यम्।। इतिकाशिका। बाह्यम्। दैव्यम्। पाञ्चजन्यम्। चतुर्म्मासाद्यज्ञेण्योवक्तव्यः।२। इतिकाशि
का। बाह्यम्। दैव्यम्। पाञ्चजन्यम्। चतुर्म्मासाद्यज्ञेण्योवक्तव्यः।२। चातुर्मास्यायज्ञाः। चातुर्मासोऽग्निः। ५९। अव्ययीभावाच्च
कौ। सू। त। शै। अव्ययीभावसमासाद्भवेऽर्थेञ्यःस्यात्। परिमुखभवम्। पारिमुख्यम्। परिमुखादिभ्यएव।। कौ। सू। त। शै
भाष्येतुनैतद्व्याख्यातम् ६०। अन्तःपूर्वपदाट्ठञ्। कौ। सू। त। शै। अन्तः। इत्येतत्पूर्वपदादव्ययीभावाद्भवेऽर्थेठञ्स्यात्।

स्त्र.प.

१४१

141

आन्तर्वेश्मिकम्। आन्तर्गेहिकम्। समानशब्दाद्यञ्प्रत्ययो भवतीति वक्तव्यम्।१। इति काशिका। सामानिकम्। तदादेश्च।२। इति काशिका।
सामानग्रामिकम्। अध्यात्मादिभ्यश्च ३। इति काशिका। अध्यात्मादेष्ठञिष्यते।१। कौ। सू। त। शे। आध्यात्मिकम्। आधिदैविकम्। आधिभौ
तिकम्। अध्यात्म। अधिदेव। अधिभूत। अध्यात्मादिराकृतिगणः। ऊर्ध्वंदमाच्चेति वक्तव्यः।४। इति काशिका। और्ध्वंदमिकः। ऊर्ध्वस्य मक
रान्तत्वे निपातनात्। ऊर्ध्वदेहाच्च।५। इति काशिका। और्ध्वदेहिकम्। लोकोत्तरपदाच्च।६। इति काशिका। ऐहलौ। किकम्। पारलौ
किकम्। मुखपार्श्वतसोरीयः २। कौ। सू। त। शे। मुखपार्श्वशब्दाभ्यां तसन्ताभ्यामीयप्रत्ययो वक्तव्यः।७। इति काशिका। मुखति
यम्। पार्श्वतीयम्। जनपरयोः कुक्च।८। इति काशिका। जनकीयम्। परकीयम्। कुग्जनस्य परस्य च।३। कौ। सू। त। शे। मध्यश
ब्दादीयः।९। इति काशिका। मध्यीयः। मण्मीयौ प्रत्ययौ।१०। इति काशिका। माध्यमम्। मध्यमीयम्। मध्यमध्यंदिनञ्चास्मात् ११
इति काशिका। मध्ये भवम्। माध्यन्दिनम्। स्थाम्नो लुग्वक्तव्यः।१२। इति काशिका। अश्वत्थामा। भवार्थे तल्लुग्वक्तव्यः।४। कौ। सू
त। अ। अजिनान्ताच्च १३। इति काशिका। वृकाजिनः। सिंहाजिनः। समानस्य तदादेश्च अध्यात्मादिषु चेष्यते। ऊर्ध्वंदमाच्च लोकोत्तर
पदस्य।१। मुखपार्श्वतसोरीयः। कुग्जनस्य परस्य च। ईयः कार्योऽथ मध्यस्य मण्मीयौ प्रत्ययौ तथा।२। मध्यो मध्यंदिनण्चास्मा
त्स्थाम्नो लुगजिनात्तथा। बाह्यो दैव्यः पाञ्चजन्यः गाम्भीराञ्ञ्य इष्यते।३। कारिका इमाः।८१। ग्रामात्पर्यनुपूर्वात्। कौ। सू। त
शे। परि। अनु। इत्येवं पूर्वो यो ग्रामशब्दः तदन्तादव्ययीभावाद्भवेऽर्थे ठञ् स्यात्। पारिग्रामिकः। आनुग्रामिकः। इत्यादि सूत्रपञ्चके
भाष्येत्र व्याख्यातम्।८२। जिह्वामूलाङ्गुलेश्छः। कौ। सू। त। शे। जिह्वामूल। अङ्गुलि। इत्येताभ्यां भवेऽर्थे छः स्यात्। जिह्वामू
लीयम्। वर्। गान्ताच्च। कौ। सू। त। शे। वर्ग। इत्येतदन्तात्प्रातिपदिकाद्भवेऽर्थे छः स्यात्। कवर्गीयः। चवर्गीयः।८४। अशब्दे यत्खा
वन्यतरस्याम्। कौ। सू। त। शे। वर्ग। इत्येतदन्तात्प्रातिपदिकाच्छब्दभिन्नेऽभिधेये भवेऽर्थे यत्। खा। इत्येतौ प्रत्ययौ वा मतः। अङ्गेन वर्ग्यः
अङ्गेन वर्गीणः। पक्षे छः। अङ्गेन वर्गीयः। अशब्दे किम्। कवर्गीयो वर्णः।८५। कर्णललाटात्कनलङ्कारे। कौ। सू। त। शे। कर्ण ।१४१।

ललाट। इत्येताभ्यामलङ्कारे वाच्ये भवेऽथिकन् स्यात्। कर्णिका। ललाटिका। अलङ्कारे किम्। ललाटम्। ६६। तस्य व्याख्यान इति च
व्याख्यातव्यनाम्नः। कौ। स्ता। त। शे। षष्ठ्यन्ताद् व्याख्यातव्यनाम्नो व्याख्यान इत्यस्मिन्नर्थे तत्र भवे चार्थे यथाविहितमणादयः प्रत्य
या भवन्ति। सुपां व्याख्यानः। सौपो ग्रन्थः। तिङः। कार्तः। सुप्सु भवम्। सौपम्। कार्तम्। व्याख्यातव्यनाम्नः किम्। पाटलिपुत्रस्य
व्याख्यानी कोसला। भवव्याख्यानयोर्युगपदधिकारोऽपवादविधानार्थः। १। भवे पन्ने पुल्लिङ्गवचनम्। २। अग्निष्टोमे भवे मन्त्रः। अ
ग्निष्टोमः। राजसूयः। वाजपेयः। कल्पे च व्याख्याने २। अग्निष्टोमस्य व्याख्यानं कल्पः। अग्निष्टोमः। वाजपेयः। ६७। बह्वचोऽन्तोदा
त्ताट्ठञ्। कौ। स्ता। त। शे। बह्वचो व्याख्यातव्यनाम्नोऽन्तोदात्तात् प्रातिपदिकाद् भवे व्याख्याने च ठञ् स्यात्। षात्वणत्विकम्। बह्वचः किम्।
सौपम्। अन्तोदात्तात् किम्। संहितम्। गतिस्वरेणाद्युदात्तोऽयम्। भाष्ये तु नेदं व्याख्यातम्। ६८। क्रतुयज्ञेभ्यश्च। कौ। स्ता। त। शे। क्र
तुवाचिभ्यो यज्ञवाचिभ्यश्च भवे व्याख्याने च ठञ् स्यात्। सोमसाध्यो यागः क्रतुः। आग्निष्टोमिकः। वाजपेयिकः। यज्ञग्रहणमसो
मसाध्ययागपरिग्रहार्थम्। पाञ्चौदनिकः। दाशौदनिकः। पाकयज्ञिकः। ६९। अध्यायेष्वेवर्षेः। कौ। स्ता। त। शे। ऋषिः प्रवरः
तन्नामधेयेभ्यो भवे व्याख्याने चार्थेऽध्यायेष्वेवाचेषु ठञ् स्यात्। वासिष्ठिकोऽध्यायः। वैश्वामित्रिकः। अध्यायेषु किम्। वासिष्ठी
ऋक्। इत्यादि सूत्रत्रये भाष्ये तु न व्याख्यातम्। ७०। पौरोडाशपुरोडाशात् ष्ठन्। कौ। स्ता। त। शे। पौरोडाश। पुरोडाश। इत्येता
भ्यो भवे व्याख्याने च ष्ठन् स्यात्। पौरोडाशो मन्त्रस्तस्य व्याख्यानस्तत्र भवो वा। पौरोडाशिकः। पौरोडाशिकी। पुरोडाशः पि
ष्टपिण्डः। तत्सहचरितो ग्रन्थो लक्षणया पुरोडाशः। तत्र भवो व्याख्यानस्तत्र भवो वा। पुरोडाशिकः। पुरोडाशिकी। ७१। छन्दसो
सो यदणौ। कौ। स्ता। त। शे। छन्दस्। इत्येतस्माद् भवे व्याख्याने च यत्। अण्। इत्येतौ प्रत्ययौ भवतः। छन्दस्यः। छान्दसः। ७२। द्व्य
ज्ऋद्ब्राह्मणर्क्प्रथमाध्वरपुरश्चरणनामाख्याताट्ठक्। कौ। स्ता। त। शे। द्व्यच्। ऋत्। ब्राह्मण। ऋच्। प्रथम। अध्वर। पुरश्चरण। नाम
आख्यात। इत्येतेभ्यो भवे व्याख्याने च ठक् स्यात्। द्व्यच्। ऐष्टिकः। पाशुकः। ऋत्। चातुर्होतृकः। ब्राह्मणिकः। आर्चिकः। प्राथमि

सू.प.
१६२

कः। आथर्विकः। पौरश्चरणिकः। नामिकः। आख्यातिकः। नामाख्यातग्रहणं संघातविगृहीतार्थम्। कौ। सू। त। शे। नामाख्याति
कः। नामिकः। आख्यातिकः ७३ ऋगयनादिभ्यः। कौ। सू। त। शे। ऋगयन इत्येवमादिभ्यो भवे व्याख्याने वा अण् एतस्मात्।
आर्गयनः। ऋगयन। पदव्याख्यान। छन्दोमान। छन्दोभाषा। छन्दोविचिति। न्याय। पुनरुक्त। निरुक्त। व्याकरण। निगम
वास्तुविद्या। क्षत्रविद्या। अङ्गविद्या। विद्या। उत्पात। उत्पाद। उद्याव। संवत्सर। मुहूर्त। उपनिषद। निमित्त। शिक्षा। भिक्षा। ऋ
गयनादिः। इत्येषोकादशसूत्राणि भाष्येण व्याख्यातानि। ७४। तत आगतः। कौ। सू। त। शे। पञ्चम्यन्तादागत इत्येतस्मिन्न
र्थेऽणादयः प्रत्यया भवन्ति स्रुघ्नादागतः स्रौघ्नः। माथुरः। राष्ट्रियः ७५ ठगायस्थानेभ्यः। कौ। सू। त। शे। आयस्थाने
वाविभ्य आगत इत्येतस्मिन्नर्थे ठक् स्यात्। शुल्कशालाया आगतः। शौल्कशालिकः। नागरिकम्। आपणिकम् ७६
शुण्डिकादिभ्योऽण्। कौ। सू। त। शे। शुण्डि इत्येवमादिभ्य जायस्थानेभ्य आगत इत्येतस्मिन्नर्थेऽण् एतस्मात्। शुण्डि
कादागतः। शौण्डिकः। अण् ग्रहणं बाधकबाधनार्थम्। औदपानः। शुण्डिक। कृकण। स्थण्डिल। उदपान। उपल। तीर्थ।
भूमि। तृण। पर्ण। शुण्डिकादिः। ७७। विद्यायोनिसम्बन्धेभ्यो वुञ्। कौ। सू। त। शे। विद्यासम्बन्धवाचिभ्यो योनिसम्बन्धवा
चिभ्यश्च आगत इत्येतस्मिन्नर्थे वुञ् स्यात्। उपाध्यायादागतम्। औपाध्यायकम्। योनिसम्बन्धेभ्यः। पैतामहकम् ७८
ऋतष्ठञ्। कौ। सू। त। शे। ऋ इत्येतदन्तेभ्यो विद्यायोनिसम्बन्धवाचिभ्य आगत इत्येतस्मिन्नर्थे ठञ् स्यात्। हौतृकम्। पोतृ
कम्। योनिसम्बन्धेभ्यः। मातृकम्। भ्रातृकम्। विद्यायोनिसम्बन्धेभ्यः किम्। सावित्रम्। ७९। पितुर्यच्च। कौ। सू। त। शे।
पितृ इत्येतस्मादागत इत्येतस्मिन्नर्थे यत् स्यात्। चकाराद् ठञ्। पित्र्यम्। पैतृकम्। ८०। गोत्रादङ्कवत्। कौ। सू। त। शे।
अपत्यप्रत्ययान्तादागत इत्येतस्मिन्नर्थे अङ्कवत् प्रत्यया भवन्ति। औपगवेभ्य आगतम्। औपगवकम्। कापटवकम्। ना
डायनकम्। चारायणकम्। अङ्कग्रहणेन इदमर्थसामान्यं लक्ष्यते। तस्माद्वुञ्जयतिदिष्टेन नवणेव ८१। हेतुमनुष्येभ्यो १६२

ऽन्यतरस्यां रूप्यः। कौ। सू। त। शे। हेतुवाचिभ्यो मनुष्यवाचिभ्यश्च आगत इत्येतस्मिन्नर्थे रूप्यप्रत्ययो वा स्यात्। समादागतम्। समरूप्यं
मनुष्येभ्यः। देवदत्तरूप्यम् ८२ मयट् च। कौ। सू। त। शे। हेतुभ्यो मनुष्येभ्यश्च आगत इत्येतस्मिन्नर्थे मयट् स्यात्। सममयम्। समम
यी। मनुष्येभ्यः। देवदत्तमयम्। देवदत्तमयी ८३ प्रभवति। कौ। सू। त। शे। पञ्चम्यन्तात्प्रभवतीत्येतस्मिन्नर्थे यथाविहितमणादयः
प्रत्यया भवन्ति। हिमवतः प्रभवति। हैमवती गङ्गा। ततः प्रथमं प्रकाशत इत्यर्थः ८४ विदूराञ्ञ्यः। कौ। सू। त। शे। विदूरा
दित्येतस्मात्प्रभवतीत्येतस्मिन्नर्थे ञ्यः स्यात्। विदूरात्प्रभवति। वैदूर्यो मणिः। बालवायो विदूरं च प्रकृत्यन्तरमेव वा। नैवैतत्रे
ति वैदूर्या जितरीवडयावरेत्॥ कार्त्तिकेयम् ८५ तद्गच्छति पथिदूतयोः। कौ। सू। त। शे। द्वितीयान्ताद्गच्छतीत्येतस्मिन्नर्थे यथा
विहितमणादयः प्रत्यया भवन्ति। यो गच्छति स चेत्पन्था दूतो वा ९। सुघ्नं गच्छति। स्रौघ्नः पन्थाः। स्रौघ्नो दूतः। माथुरः। राष्ट्रिय
पथिदूतयोः किम्। सुघ्नं गच्छति सार्थः। भाष्ये तन्नेदं व्याख्यातम् ८६। अभिनिष्क्रामति द्वारम्। कौ। सू। त। शे। द्वितीयान्ता
द् अभिनिष्क्रामतीत्येतस्मिन्नर्थे यथाविहितमणादयः प्रत्यया भवन्ति। यदभिनिष्क्रामति द्वारं चेत्तद्भवति। सुघ्नमभिनिष्क्रामति
स्रौघ्नं कान्यकुब्जद्वारम्। माथुरम्। राष्ट्रियम्। अचेतनेष्वपि चेतनावदुपचाराद् दृश्यन्ते इति भाष्यम् ८७। अधिकृत्य कृते ग्रन्थे। कौ।
सू। त। शे। द्वितीयान्तादधिकृत्य कृत इत्येतस्मिन्नर्थे यथाविहितमणादयः प्रत्यया भवन्ति। योऽसौ कृतो ग्रन्थश्चेत्स भवति। सु
भद्रामधिकृत्य कृतो ग्रन्थः। सौभद्रः। माथुरः। राष्ट्रियः। ग्रन्थे किम्। सुभद्रामधिकृत्य कृतः। प्रासादः। लुबाख्यायिकाभ्यो व
हुलम्॥ कौ। सू। त। शे। वासवदत्तामधिकृत्य कृतो ग्रन्थः। वासवदत्ता। सुमनोत्तरा। न च भवति। भैमरथी ८८ शिशुक्रन्दयम
सभद्वन्द्वेन्द्रजननादिभ्यश्छः। कौ। सू। त। शे। शिशुक्रन्द। यमसभ। द्वन्द्व। इन्द्रजननादि। इत्येतेभ्यो द्वितीयान्तेभ्योऽधिकृत्य
कृत इत्येतस्मिन्नर्थे छः स्यात्। शिशुक्रन्दीयः। यमसभीयः। द्वन्द्वात्। अग्निकाश्यपीयः। वाक्यपदीयम्। इन्द्रजननादिभ्यः। इ
न्द्रजननीयः। प्रद्युम्नागमनीयः। इन्द्रजननादिराकृतिगणः एव। द्वन्द्वे देवासुरादिभ्यः प्रतिषेधो वक्तव्यः॥ कौ। सू। त। शे। दे

वासुरम्। देवासुरी। रात्तोसुरम्। रात्तोःसुरी। ८९। सोऽस्यनिवासः। कौ। सू। त। शे। प्रथमान्तादस्येतिषष्ठ्यर्थे यथाविहितामणा
दयः प्रत्ययाभवन्ति। यः प्रथमान्तार्थो निवासश्चेत्स भवति। स्रुघ्नो निवासोऽस्य। स्रौघ्नः। माथुरः। राष्ट्रियः। ९०। अभिजनश्च। कौ
सूप. १८३ सू। त। शे। प्रथमान्तादस्येति षष्ठ्यर्थेऽणादयः प्रत्ययाप्रत्ययाभवन्ति यः प्रथमान्तार्थोऽभिजनश्चेत्सभवति। स्रुघ्नोऽभिजनोऽस्य
स्रौघ्नः। माथुरः। राष्ट्रियः। निवासो नाम यत्र संप्रत्युष्यते। अभिजनो नाम यत्र पूर्वैरुषितम्। इति भाष्यम्। ९१। आयुधजीवि
भ्यश्छः पर्वते। कौ। सू। त। शे। प्रथमान्तात्पर्वतवाचिनोऽस्येति षष्ठ्यर्थे आयुधजीविनोऽभिधातेछः स्यात्। हृद्गोलः पर्वतो
भिजनएषामायुधजीविनोऽभिधातेछः स्यात्। हृद्गोलः पर्वतोऽभिधातेछः स्यात्। हृद्गोलः पर्वतोऽभिजनएषामायुधजीवि
नाम्। हृद्गोलीयाः। अन्धकवर्तीयाः। रोहितगिरीयाः। आयुधजीविभ्यः किम्। ऋक्षोदः। पर्वतोऽभिजनएषाम्। आक्षोदाः
ब्राह्मणाः। पर्वते किम्। सांकाश्यका आयुधजीविनः। इत्यादिसूत्रसप्तकं भाष्ये तन्न व्याख्यातम्। ९२। शण्डिकादिभ्योञ्यः।
कौ। सू। त। शे। शण्डिक इत्येवमादिभ्यः प्रथमान्तेभ्योऽस्येति षष्ठ्यर्थे ञ्यः स्यात्। यः प्रथमान्तार्थः। स चेदभिजनः। शाण्डिको ऽ
भिजनोऽस्य। शाण्डिक्यः। शाण्डिक। सर्वसेन। सर्वकेश। शाक। शट। रक। शङ्ख। बोध। शण्डिकादिः ९३। सिन्धुतक्षशिला
दिभ्योऽणञौ। कौ। सू। त। शे। सिन्धु इत्येवमादिभ्यः। तक्षशिल इत्येवमादिभ्यः। तक्षशिल इत्येवमादिभ्यश्च प्रथमान्तेभ्यो ऽ
स्येति षष्ठ्यर्थे अण्। अञ्। इत्येतौ प्रत्ययौ क्रमाद्भवतः। सिन्धुरभिजनोऽस्य। सैन्धवः। ताक्षशिलः। वात्सोद्धरणः। सिन्धु। वर्णु
मधुमत्। कम्बोज। साल्व। कश्मीर। गन्धार। किष्किन्धा। उरसा। दरद्। गन्दिका। सिन्ध्वादिः। तक्षशिला। वत्सोद्धरण। कैर्मे
दुर। ग्रामणी। छगल। क्रोष्टुकर्ण। सिंहकर्ण। संकुचित। किंनर। काण्डधार। पर्वत। अवसान। बर्बर। कंस। तक्षशिलादिः १७
तूदीशलातुरवर्म्मतीकूचवाराड्ढक्छण्ढञ्यकः। कौ। सू। त। शे। तूदी। शलातुर। वर्म्मती। कूचवार इत्येतेभ्यः प्रथमान्ते
भ्योऽस्येति षष्ठ्यर्थे ढक्। छण्। ढञ्। यक्। इत्येते प्रत्ययाः क्रमाद्भवन्ति। तूदी अभिजनोऽस्य। तौदेयः। शालातुरीयः। वार्म्म १८३

नेयः । कौचवार्य्यः ९५ भक्तिः । कौ । सू । ता । शे । प्रथमान्तादस्येतिषष्ठ्यर्थेऽणादयः प्रत्यया भवन्ति । यः प्रथमान्तार्थो भक्तिश्चेत्स
भवति । भज्यते सेव्यत इति भक्तिः । स्रुघ्नो भक्तिरस्य । स्रौघ्नः । माथुरः । राष्ट्रियः । ९६ । अचित्ताददेशकालाट्ठक् । कौ । सू । ता । शे ।
प्रथमान्ताद्देशकालभिन्नादचित्तवाचिनोऽस्येतिषष्ठ्यर्थे ठक् स्यात् । यः प्रथमान्तार्थः स चेद्भक्तिः । अपूपा भक्तिरस्य ।
आपूपिकः । शाष्कुलिकः । अचित्तात्किम् । दैवदत्तः । अदेशात्किम् । स्रौघ्नः । अकालात्किम् । ग्रैष्मः ९७ । महाराजाट्ठञ् । कौ
सू । ता । शे । महाराज इत्येतस्मात्प्रथमान्तादस्येतिषष्ठ्यर्थे ठञ् स्यात् । यः प्रथमान्तार्थः स चेद्भक्तिः । महाराजो भक्तिरस्य । मा
हाराजिकः ९८ । वासुदेवार्जुनाभ्यां वुन् । कौ । सू । ता । शे । वासुदेव । अर्जुन । इत्येताभ्यां प्रथमान्ताभ्यामस्येतिषष्ठ्यर्थे वुन् स्यात् ।
यः प्रथमान्तार्थः स चेद्भक्तिः । वासुदेवो भक्तिरस्य । वासुदेवकः । अर्जुनकः । अथवा नैषा क्षत्रियाख्या । संज्ञैषा । इति भाष्यम् । ९९
गोत्रक्षत्रियाख्येभ्यो बहुलं वुञ् । कौ । सू । ता । शे । गोत्राख्येभ्यः क्षत्रियाख्येभ्यश्च प्रथमान्तेभ्योऽस्येतिषष्ठ्यर्थे वुञ् स्यात् । यः प्र
थमान्तार्थः स चेद्भक्तिः । ग्लुचुकायनिर्भक्तिरस्य । ग्लौचुकायनकः । औपगवकः । क्षत्रियाख्येभ्यः । नाकुलकः । सा
हदेवकः । आख्याग्रहणं रूढपरिग्रहार्थम् । बहुलग्रहणात्क्वचिन्न । पाणिनो भक्तिरस्य । पाणिनीयः । भाष्येऽत्र ने
देयाख्यानम् १०० जनपदिनां जनपदवत्सर्वं जनपदेन समानशब्दानां बहुवचने । कौ । सू । ता । शे । जनपदस्वामिवाचिनो ब
हुवचने जनपदवाचिना समानश्रुतेर्जनपदवत्सर्वं प्रत्ययः प्रकृतिश्च स्यात् । सोऽस्य भक्तिरित्येतस्मिन्विषये । जनपदत
दवध्योश्चेत्यादिना विहिताः प्रत्यया अतिदिश्यन्ते अङ्गाः क्षत्रिया भक्तिरस्य । आङ्गकः । जनपदिनां किम् । पञ्चाला ब्रा
ह्मणा भक्तिरस्य । पाञ्चालः । सर्वं किम् । माद्रो भक्तिरस्य । मद्रकः । वार्ज्यो भक्तिरस्य । वाजिकः । जनपदेन समानशब्दानां
किम् । पौरवो राजा भक्तिरस्य । पौरवीयः । बहुवचने किम् । आङ्गो भक्तिरस्य आङ्गौ वा भक्तिरस्य । आङ्गकः । इहापि यथा
स्यात् । सर्ववचनं प्रकृतिनिर्ह्रासार्थम् ॥ १०१ ॥ तेन प्रोक्तम् । कौ । सू । ता । शे । तृतीयान्तात्प्रोक्तमित्येतस्मिन्नर्थे यथावि

सू.प.
१४४

हितमण्णादयः प्रत्यया भवन्ति ऋषिणा प्रोक्तम् आर्षम्। पाणिनीयम्। आपिशलम्। प्रोक्तग्रहणमनर्थकं तत्रादर्शनात् १
ग्रन्थे च दर्शनात् २। छन्दोऽर्थमिति चेत्तुल्यम्। ३। न तर्हीदानीमिदं वक्तव्यम्। वक्तव्यं च। किं प्रयोजनम्। यत्तेन प्रोक्तं न
च तेन कृतम्। माथुरी वृत्तिः। इति भाष्यम्। १०२। तित्तिरिवरतन्तुखण्डिकोखाच्छण्। कौ। स्था। त। शे। तित्तिरि। वरतन्तु
खण्डिक। उख। इत्येतेभ्यः प्रोक्तेऽर्थे छण् स्यात्। तित्तिरिणा प्रोक्तमधीयते। तैत्तिरीयाः। वारतन्तवीयाः। खाण्डिकी
याः। औखीयाः। छन्दसि चायमिष्यते। १। इति काशिका। तित्तिरिणा प्रोक्ताः श्लोकाः। अत्र न भवति इत्यादि सूत्रह
ये भाष्ये तु न व्याख्यातम्। १०३। काश्यपकौशिकाभ्यामृषिभ्यां णिनिः। कौ। स्था। त। शे। काश्यप। कौशिक। इत्येताभ्यां
मुनिवाचिभ्यां प्रोक्तेऽर्थे णिनिः स्यात्। काश्यपेन प्रोक्तमधीयते। काश्यपिनः। कौशिकिनः। ऋषिभ्यां किम्। काश्यप
गोत्रेण प्रोक्तम्। काश्यपीयम्। १०४। कलापिवैशम्पायनान्तेवासिभ्यश्च। कौ। स्था। त। शे। कलापिशिष्यवाचिभ्यो वैशम्पा
यनशिष्यवाचिभ्यश्च प्रोक्तेऽर्थे णिनिः स्यात्। कलापान्तेवासिभ्यस्तावत्। हरिद्रुणा प्रोक्तमधीयते। हारिद्रविणः
तौम्बुरविणः औलपिनः। छगलिनो ढिनुकं वक्ष्यति। वैशम्पायनान्तेवासिभ्यो नवभ्यः। आलम्बिना प्रोक्तमधीय
ते। आलम्बिनः। पालङ्गिनः। कामलिनः। आर्चाभिनः। आरुणिनः। ताण्डिनः। श्यामायनिनः। कठाद्धुकं वक्ष्यति। क
लापिनस्त्वाणम्। प्रत्यक्षकारिग्रहणं कर्तव्यम्।। शिष्यशिष्यान्मा भूत्। छन्दोग्रहणं वेतरथा ह्यतिप्रसङ्गः २ तित्तिरि
वरतन्त्विति सूत्रविषयकमेतत्।। कलापिखाडायनग्रहणं ज्ञापकं वैशम्पायनान्तेवासिषु प्रत्यक्षकारिग्रहणस्य। इति भा
ष्यम्। १०५। पुराणप्रोक्तेषु ब्राह्मणकल्पेषु। कौ। स्था। त। शे। तृतीयान्तात्प्रोक्तमित्येतस्मिन्नर्थे णिनिः स्यात्। यत्प्रोक्ता
चिरंतनमुनिप्रोक्ताश्चेद्ब्राह्मणकल्पास्ते भवन्ति। ब्राह्मणेषु। भाल्लविनः। शाट्यायनिनः। कल्पेषु। पैङ्गीकल्पः। आरु
णपराजी। पुराणप्रोक्तेषु किम्। याज्ञवल्क्यानि ब्राह्मणानि। आश्मरथ्यः। कल्पः। याज्ञवल्क्यादिभ्यः प्रतिषेधस्तुल्यका १४४

लक्षणात्।१। याज्ञवल्क्यानि ब्राह्मणानि। सौलभानि। कृते ग्रन्थे माक्षिकादिभ्योऽण् २। तद्विशेषेभ्यश्च ४।१०६। शौनकादिभ्यश्छन्दसि। कौ। वे
त्र। व। शौनक। इत्येवमादिभ्यश्छन्दसि वाच्ये प्रोक्तमित्येतस्मिन्नर्थे णिनिः स्यात्। शौनकेन प्रोक्तमधीयते। शौनकिनः। वाजसनेयिनः। छ
न्दसि वाच्ये प्रोक्तमित्येतस्मिन्नर्थे णिनिः स्यात्। शौनकेन प्रोक्तमधीयते। शौनकिनः। वाजसनेयिनः। छन्दसि किम्। शौनकीयः श्लो
कः। शौनक। वाजसनेय। शार्ङ्गरव। शापेय। शाष्पेय। खाडायन। स्तम्भ। स्कन्ध। देवदर्शन। रज्जुभार। रज्जुकण्ठ। कठशाठ। कषा
य। तल। दण्ड। पुरुषांसक। अश्वपेज। शौनकादिः॥ इत्यादीनि वक्तव्ये शसूत्राणि भाष्ये तन्त्रव्याख्यातानि १०७। कठचरकाल्लु
क्। कौ। स्या। त। शे। कठ। चरक। इत्येताभ्यां परस्य प्रोक्तप्रत्ययस्य लुक् स्यात्। कठेन प्रोक्तमधीयते। कठाः। णिनेर्लुक्। चर
काः। अणो लुक्। छन्दसीत्येव। काठाः। चारकाः श्लोकाः १०८ कलापिनोऽण्। कौ। स्या। शे। कलापिन्। इत्येतस्मात्प्रोक्ता
र्थे अण् स्यात्। कलापिना प्रोक्तमधीयते। कालापाः। अण्ग्रहणमधिकविधानार्थम्। तेन माथुरीहत्तिः। सौलभानि ब्राह्म
णानि इत्यादि सिद्धम्। १०९। छगलिनो ढिनुक्। कौ। स्या। त। शे। छगलिन्। इत्येतस्मात्तृतीयान्तात्प्रोक्तमित्येतस्मिन्नर्थे ढिनु
क् स्यात्। छगलिना प्रोक्तमधीयते। छागलेयिनः ११०। पाराशर्यशिलालिभ्यां भिक्षुनटसूत्रयोर्वृब्ययोः प्रोक्ते ऽर्थे णिनिः
स्यात्। पाराशर्येण प्रोक्तमधीयते। पाराशरिणो भिक्षवः। शिलालिना प्रोक्तमधीयते। शैलालिनो नटाः। भिक्षुनटसूत्र
योः किम्। पाराशरम्। शैलालम्।१११। कर्मन्दकृशाश्वादिनिः। कौ। स्या। त। शे। कर्मन्द। कृशाश्व। इत्येताभ्यां क्रमाद्भिक्षुनट
सूत्रयोर्वृब्ययोः प्रोक्ते ऽर्थे इनिः। स्यात्। कर्मन्देन प्रोक्तमधीयते। कर्मन्दिनो भिक्षवः। कृशाश्विनो नटाः ११२। तेनैकदिक्।
कौ। स्या। त। शे। तृतीयान्तादेकदिगित्येतस्मिन्नर्थे ऽणादयः प्रत्यया भवन्ति। सुदाम्ना अद्रिणा एकदिक्। सौदामनी। हैम
वती ११३ तसिश्च। कौ। स्या। त। शे। तृतीयान्तादेकदिगित्येतस्मिन्नर्थे तसिप्रत्ययः स्यात्। सुदामतः। हिमवतः। ११४। उर
सो यच्च। कौ। स्या। त। शे। उरस्। इत्येतस्मात्तृतीयान्तादेकदिगित्येतस्मिन्नर्थे यत्। स्यात्। चकारात्तसिः। उरसा एकदिक्। उ

वस्मः। उरस्लः ।११५। उपज्ञाते। कौ। सू। त। शै। तृतीयान्तादुपज्ञात इत्येतस्मिन्नर्थे यथाविहितमणादयः प्रत्यया भवन्ति। पाणि·
स्तू॰ प॰ निना उपयज्ञातम्। पाणिनीयं व्याकरणम्। विनोपदेशेन ज्ञातमित्यर्थः ।११६। कृते ग्रन्थे। कौ। सू। त। शै। तृतीयान्तात्कृत इत्ये
१४५ तस्मिन्नर्थे अणादयः प्रत्यया भवन्ति। यत्तत्कृतं ग्रन्थश्चेत्स भवति। वररुचिना कृतः। वाररुचो ग्रन्थः। ग्रन्थे किम्। वररु·
145 चिना कृतः प्रासादः ।११७। संज्ञायाम्। कौ। सू। त। शै। तृतीयान्तात्कृत इत्येतस्मिन्नर्थे ऽणादयः प्रत्यया भवन्ति। समुदा
येन चेत्संज्ञा गम्यते। माक्षिकाभिः कृतम्। माक्षिकम्। गार्मुतम्। सारघं। पौत्तिकम्। ११८। कुलालादिभ्यो वुञ्। कौ। सू। त
शै। कुलाल। इत्येवमादिभ्यः कृतेऽर्थे संज्ञायां वुञ् स्यात्। कौलालकम्। वारुडकम्। कुलाल। वरुड। चण्डाल। निषाद।
कर्म्मार। सेना। सिरिन्ध्र। सैरिन्ध्र। देवराज। परिषत्। वधू। मधु। रुरु। रुद्र। अनडुह। ब्रह्मन्। कुम्भकार। श्वपाक। कुलाला
दिः ।११९। क्षुद्राभ्रमरवटरपादपादञ्। कौ। सू। त। शै। क्षुद्रा। भ्रमर। वटर। पादप। इत्येतेभ्यः संज्ञायां कृतेऽर्थे अञ् स्या
त्। क्षुद्राभिः कृतम्। भ्रामरम्। वाटरम्। पादपम्। इति ११९ सूत्राणि भाष्ये। ४। ३। १। व्याख्यातानि १२०। तस्येदम्। कौ।
सू। त। शै। षष्ठ्यन्तादिदमित्येतस्मिन्नर्थे यथाविहितमणादयः प्रत्यया भवन्ति। उपगोरिदम्। औपगवम्। कापटवम्। मा
थुरः। राष्ट्रियः। आवारपारीणः। तस्येदमित्यसंनिहिते ऽप्यामि ।१। सिद्धन्तु यथायोगं षष्ठीतत्र २। सर्वेषामनन्तरादिभ्यः प्रति
षेधो वक्तव्यः ।३। सिद्धन्तु परिगणनात्। ४। स्वग्रामजनपदमनुष्येभ्यः ।५। ग्राम। स्रौघ्नः। माथुरः। जनपद। जाङ्गकः। वा
ङ्कः। मनुष्य। दैवदत्तः। पत्त्राद्वाह्ये ६। कौ। सू। त। शै। पत्त्रं वाहनम्। अश्वस्येदं वहनीयम्। आश्वम्। औष्ट्रम्। पत्त्राध्वर्युपरिषदश्च
ञ्। रथाद्यथाङ्गे ।७। रथ्यं चक्रम्। अञ्। आश्वरथम्। षहेस्तरणिरूवा ।८। कौ। सू। त। शै। तृजूप्रत्ययान्ताद्वहधातोर
ण्। तद्वहतिरूवा। संवोढुः स्वम्। सांवहित्रम्। आग्नीधः। शरणे रणमेव ।९। कौ। सू। त। शै। आग्नीध्रं होतर्गृहम्। समिधामाधाने षे
ण्यण् ।१०। कौ। सू। त। शै। सामिधेन्यो मन्त्रः। सामिधेनी ऋक्। चरणाद्धर्माम्नाययोः ।११। कौ। सू। त। शै। कठानां धर्म आ· १४५

ग्लायो वा। काठकम्। पैप्पलादकम्। गोत्रचरणाद्वुञ्। २२। रथाद्यत्। कौ। स्था। न। शै। रथ। इत्येतस्मात्। षष्ठ्यन्तादिदमित्येतस्मिन्नर्थे यत्स्या
त्। रथ्यमिदम्। रथ्यं चक्रम्। उत्तमरथ्यम्। इत्यादि सूत्रवचनं भाष्येतन व्याख्यातम्। रथ। इत्येतस्माद्वाहनपूर्वात् इदमर्थे अञ्
स्यात्। आश्वरथम्। औष्ट्ररथं चक्रम्। २३। पत्राध्वर्युपरिषदश्च। कौ। स्था। न। शै। वाहनवाचिनः। अध्वर्यु। परिषद्। इत्येताभ्यां च ष
ष्ठ्यन्ताभ्यामिदमर्थे ऽञ् स्यात्। अश्वस्येदं वहनीयम्। आश्वम्। औष्ट्रम्। आध्वर्यवम्। पारिषदम्। २४। हलसीराट्ठक्। कौ।
स्था। न। शै। हल। सीर। इत्येताभ्यामिदमर्थे ठक् स्यात्। हालिकम्। सैरिकम्। २५। द्वन्द्वाद्वुन्वैरमैथुनिकयोः। कौ। स्था। न। शै।
द्वन्द्वसमासात्। षष्ठ्यन्तादिदमर्थे वैरमैथुनिकयोर्वाच्ययोर्वुन् स्यात्। वैरे। काकोलूकिका। मैथुनिकायाम्। कुत्सकुशिकिका
वैरे देवासुरादिभ्यः प्रतिषेधः ॥ दैवासुरम्। राक्षोऽसुरम्। द्वन्द्वे देवासुरादिभ्यः प्रतिषेधः ॥ कौ। स्था। न। शै। २६। गोत्रचरणाद्वु
ञ्। कौ। स्था। न। शै। गोत्रवाचिभ्यश्चरणवाचिभ्यश्च इदमर्थे वुञ् स्यात्। गोत्र। ग्लौचुकायनकम्। औपगवकम्। चरणात्। काठ
कम्। कालापकम्। भाष्येतनेदं व्याख्यातम्। २७। सङ्घाङ्कलक्षणेष्वञ्यञिञामण्। कौ। स्था। न। शै। अञ्। यञ्। इञ्। इत्येतदन्तादिद
मर्थे सङ्घाङ्क। लक्षणेषु वाच्येषु अण् स्यात्। अञन्तात्। वैदः सङ्घः। वैदोऽङ्कः। वैदं लक्षणम्। यञन्तात्। गार्गः सङ्घोऽङ्को
वा। गार्गं लक्षणं। इञन्तात्। दाक्षः सङ्घोऽङ्को वा। दाक्षं लक्षणम्। सङ्घादिषु घोषग्रहणं कर्तव्यम् ॥ गार्गो घोषः। वात्सो घो
षः। घोषग्रहणमपि कर्तव्यम् ॥ कौ। स्था। न। शै। सङ्घादिषु प्रत्ययस्याणित्करणमनर्थकं वृद्धत्वात् प्रातिपदिकस्य २। लिङ्गपुंस्त्व
द्भाव प्रतिषेधार्थं तु णकारः कर्तव्यः। इति भाष्यम्। २८। शाकलाद्वा। कौ। स्था। न। शै। शाकल। इत्येतस्मात् षष्ठ्यन्तादिदमि
त्येतस्मिन्नर्थे सङ्घादिषु वाच्येषु अण् वा स्यात्। पक्षे वुञ्। शाकलानां सङ्घोऽङ्को घोषो वा। शाकलः। शाकलकः। शाक
लम्। शाकलकं लक्षणम्। इत्यादि सूत्रद्वये भाष्येतन व्याख्यातम्। २९। छन्दोगौक्थिकयाज्ञिकबह्वृचनटाञ्ञ्यः। कौ। स्था
न। शै। छन्दोग। औक्थिक। याज्ञिक। बाह्वृच्यम्। नाट्यम्। ३०। न दण्डमाणवान्तेवासिषु। कौ। स्था। न। शै। दण्डप्रधान

माणवेषु शिष्येषु च वाच्येषु गोत्रवरणं द्रुज्ञ न स्यात्। कौकालादराडमाणवाः। कौकालाश्रन्तेवासिनः। १३। रैवतिकादिभ्यश्छः
सू॰ प॰ कौ। सू। त। शे। रैवतिक। इत्येवमादिभ्यः षष्ठ्यन्तेभ्य इदमर्थे छः। स्यात्। रैवतिकीयः। रैवतिक। स्वापिशि। क्षैमहृद्धि। गौरग्रीवि।
१४८ औदमेघि। औदवापि। वैजवापि। रैवतिकादिः। कौपिञ्जलहास्तिपदादण्। ।। कौ। सू। त। शे। गो। ब्रवुजित्प्रासेऽण्। विधिः अपा
णिनीयः सूत्रेषु पाठ इत्याह। इति कैयटः। १२२। कौपिञ्जलहास्तिपदादण्। कौ। कौपिञ्जल। हास्तिपद। इत्येताभ्यां षष्ठ्यन्ताभ्या
मिदमर्थे अण् स्यात्। कौपिञ्जलः। हास्तिपदः। भाष्ये तन्ने दं व्याख्यातम्। १२३। आथर्वणिकस्येकलोपश्च। कौ। सू। त। शे। आ
थर्वणिक। इत्येतस्मात् षष्ठ्यन्तादिदमर्थे अण् स्यात्। तस्मान्नियोगेन इक इत्येतस्य लोपश्च भवति आथर्वणो धर्म आम्नायो
वा अणेत्थवक्तव्यः। ।। कौपिञ्जलहास्तिपदादित्यस्यापाणिनीयत्वात्। इति कैयटः। तेन प्रोक्तमिति प्रकृत्य ऋषिभ्यो लुग्वक्त
व्यः। ।। इति भाष्यकृतः। वसिष्ठोऽनुवाकः। विश्वामित्रोऽनुवाकः। अथर्वणो वा। २। लुगित्येव। अथर्वा। अथर्वणः। अथर्वणा
प्रोक्तं यद् आथर्वणिकानां धर्म आम्नायो वा न तत्र्यः आथर्वणिक शब्दात न प्रत्ययोऽनभिधानात् एवं च सूत्रेन कार्य्यमिति फ
लितम्। १२४। तस्य विकारः। कौ। सू। त। षष्ठ्यन्ताद्विकार इत्येतस्मिन्नर्थेऽण् स्यात्। भस्मनो विकारः। भास्मनः। ता
र्निकः। तस्य प्रकरणे तस्य पुनर्वचनं शैषिकनिवृत्त्यर्थम्। ।। तस्य प्रकरणे तस्येति वा यत्नार्थे कृते भवेत्। उत्सर्गः शेषए
वासा विहनकिञ्चिदुच्यते। ।। कैयटे यम्। १२५। अवयवे च प्राण्योषधिवृक्षेभ्यः। कौ। सू। त। प्राग्दी। प्राणि। ओषधि। वृक्ष
इत्येतद्वाचिभ्यः षष्ठ्यन्तेभ्योऽवयव इत्येतस्मिन्नर्थे यथाविहितमणादयः प्रत्यया भवन्ति। चकाराद्विकारेऽपि। प्राणिभ्योऽ
ञेव स्यात्। कपोतस्यावयवो विकारो वा। कापोतः। ओषधि। मौर्वं काण्डं भस्म वा वृक्ष कारीरं काण्डं भस्म वा इहापि विका
रावयवयोर्युगपद् विकारोऽयषादपि नार्थः। ।। १२६। बिल्वादिभ्योऽण्। कौ। सू। त। प्राग्दी बिल्व। इत्येवमादिभ्यो विकारेऽव
यवे च अण् स्यात्। बिल्वस्यावयवो विकारो वा बैल्वः। बिल्व। व्रीहि। काण्ड। मुद्ग। मसूर। गोधूम। इक्षु। वेणु। गवेधुका। कर्पा १४८

सी। पाटली। कर्कन्धू। कुटीर। बिल्वादिः। बिल्वादिषु गवेधुकाग्रहणं मयट्प्रतिषेधार्थम्॥ १३७। कोपधाच्च। कौ। स्ता। त। प्राग्दी। कु। इ
त्येतदुपधात्प्रातिपदिकाद्विकारेऽवयवे च अण् स्यात्। तर्कु। तार्कवम्। मधुक। माधुकम्। इत्यादि सूत्रद्वयं भाष्येऽत्र न व्याख्याते १३८
त्रपुजतुनोः षुक्। कौ। स्ता। त। प्राग्दी। त्रपु। जतु। इत्येताभ्यां विकारेऽर्थे अण् स्यात्। तत्सन्नियोगेन तयोः षुगागमश्च भवति। त्र
पुणो विकारः। त्रापुषम्। जातुषम्। १३९। ओरञ्। कौ। स्ता। त। प्राग्दी। उ। इत्येतदन्ताद्विकारेऽवयवे च अञ् स्यात्। देवदारु। दैव
दारवम्। भाद्रदारवम्। १४०। अनुदात्तादेश्च। कौ। स्ता। त। प्राग्दी। अनुदात्तादेः प्रातिपदिकाद्विकारेऽवयवे च अञ् स्यात्। दाधित्थम्।
अनुदात्तादेरञो विधानसामर्थ्यादुदात्तान्ङीषडुपसंख्यानम्॥ न वा समर्थं स्यादनुदात्तादित्वात्। २ इह च प्रसज्येत। वा वो विकारस्त्वचो
विकारः। इत्येतद्विसमर्थमनुदात्तादि। इह च न स्यात्त्वैषो विकार इति। तस्मात्त्रैवंशकम्। न वेदेवमुपसंख्यानं कर्तव्यम्। न क
र्तव्यम्। आचार्यप्रवृत्तिर्ज्ञापयति। यावद्द्वितीयस्य स्वरस्य प्रादुर्भावस्तावत्येव पूर्वे स्थानिघात इति। पदयोर्बिल्वादिषु गार्भि
णीशब्दस्य पाठं करोति इति भाष्यम् १४१ पलाशादिभ्यो वा। कौ। स्ता। त। प्राग्दी। पलाश। इत्येवमादिभ्यो विकारेऽवयवे च अ
ञ् वा स्यात्। पालाशम्। पक्षेऽण्। स्वरे भेदः। पलाश। खदिर। शिंशपा। स्यन्दन। पूलाक। करीर। शिरीष। यवास। विकङ्कत॥
पलाशादिः। इत्यादि सूत्रद्वयं भाष्येऽत्र न व्याख्यातम्। १४२। शम्याः ष्लञ्॥ कौ। स्ता। त। प्राग्दी। शमी। इत्येतस्माद्विकारेऽवयवे च
ष्लञ् स्यात्। शामीलं भस्म। शामीली स्रुक्। १४३। मयड्वैतयोर्भाषायामभक्ष्याच्छादनयोः। वौ। स्ता। त। प्राग्दी। प्रातिपदिका
द्भाषायां वा मयट् स्यात्। भक्ष्याच्छादनवर्जितयोर्विकारावयवयोरर्थयोः। अश्ममयम्। आश्मनम्। भाषायां किम्। बैल्वः
खादिरो वा यूपः स्यात्। अभक्ष्येत्यादि किम्। मौद्गः सूपः। कार्पासमाच्छादनम्। मयड्वैतयोर्वेवनमायवादविषयेऽनित्यार्थे १
एतयोरित्यर्थनिर्देशः २। १४४। नित्यं वृद्धशरादिभ्यः। कौ। स्ता। त। प्राग्दी। वृद्धसंज्ञकेभ्यः। शरादिभ्यश्च भाषायामभक्ष्याच्छा
दनवर्जितयोर्विकारावयवयोरर्थयोर्नित्यं मयट् स्यात्। आम्रमयम्। शालमयम्। शरादिभ्यः। शरमयम्। शर। दर्भ। मृत्।

कुटी। तृण। सोम। वल्वज। शरादिः इत्याद्येकादश सूत्राणि भाष्येऽनन्याख्यातानि। १४५। गोश्च पुरीषे। कौ। स्वा। त। प्राग्दी। गो। इत्ये
सू·प· १४७ 147 तस्मात्पुरीषे वाच्ये द्वयमर्थे मयट् स्यात्। गोः पुरीषम्। गोमयम्। पुरीषे किम्। गव्यं पयः। १४६। पिष्टाच्च। कौ। स्वा। त। प्राग्दी। पिष्ट इत्ये
तस्माद्विकारे नित्यं मयट् स्यात्। पिष्टमयं भस्म १४७। संज्ञायां कन्। कौ। स्वा। त। प्राग्दी। पिष्ट इत्येतस्माद्विकारेऽर्थे संज्ञायां कन्
स्यात्। पिष्टकोऽपूपः। १४८। व्रीहेः पुरोडाशे। कौ। स्वा। त। प्राग्दी। व्रीहि इत्येतस्मात्पुरोडाशरूपे विकारे मयट् स्यात्। व्रीहिमयः
पुरोडाशः। व्रैहमन्यत्। १४९। असंज्ञायां तिलयवाभ्याम्। कौ। स्वा। त। प्राग्दी। तिल। यव। इत्येताभ्यामसंज्ञाविषये विकारा
वयवयोरर्थयोर्मयट् स्यात्। तिलमयम्। यवमयम्। असंज्ञायां किम्। तैलम्। यावकः १५० द्व्यचश्छन्दसि। कौ। वे। अ। च
द्व्यचः प्रातिपदिकाद्विकारावयवयोरर्थयोश्छन्दसि मयट् स्यात्। यस्य पर्णमयी जुहूर्भवति। दर्भमयं वासो भवति। १५१। नो
त्वद्वर्ध्रविल्वात्। कौ। वे। अ। च। उकारवतः प्रातिपदिकात्। वर्ध्र। विल्व। इत्येताभ्यां च वेदे मयट् न स्यात्। उत्वत्। मुञ्ज। मौञ्जं शि
क्यम्। मुद्ग। मौद्गश्चरुः। वार्ध्री बालरज्जुः ग्रथिता भवति। वैल्वो ब्रह्मवर्चसकामेन कार्यः १५२। तालादिभ्योऽण्। कौ। स्वा। त। प्राग्दी
ताल। इत्येवमादिभ्यो विकारावयवयोरर्थयोरण् स्यात्। तालं धनुः। तालाद्धनुषि। बार्हिण। इन्द्रालिश। इन्द्रादृश। इन्द्रायु
ध। चय। श्यामाक। पीयूक्षा। तालादिः। १५३। जातरूपेभ्यः परिमाणे। कौ। स्वा। त। प्राग्दी। जातरूपवाचिभ्यः प्रातिपदिकेभ्यः
परिमाणरूपे विकारेऽण् स्यात्। हाटको निष्कः। हाटकं कार्षापणम्। परिमाणे किम्। हाटकमयी यष्टिः १५४। प्रा
णिरजतादिभ्योऽञ्। कौ। स्वा। त। प्राग्दी। प्राणिवाचिभ्यः। रजत। इत्येवमादिभ्यश्च विकारावयवयोरर्थयोरञ् स्यात्। प्राणि
कापोतम्। कायूरम्। राजतादिभ्यः। राजतम्। रजत। सीस। लोह। उडम्बर। नीप। दारु। रोहीतक। विभीतक। पीतदारु। ती
व्रदारु। त्रिकण्टक। कण्टकार। रजतादिः १५५। ञितश्च तत्प्रत्ययात्। कौ। स्वा। त। प्राग्दी। ञ। इत्येतदित्संज्ञको यो विकाराव
यवार्थः प्रत्ययस्तदन्ताद्विकारावयवयोरर्थयोरञ् स्यात्। श्रौ रञ्। दैवदारवम्। तस्य विकारोऽवयवो वा। दैवदारवम्। शामी १४७

लम्। कापोतम्। औष्ट्रकम्। रौणेयम्। कांसम्। पारशवम्। जितः। कम्। वैल्वमयम्। तत्स्यन्यथा किम्। वैदमयम्। विकारावयवयोर्विका
रावयुक्तता न्मयड्प्रतिषेधार्थे जितश्चातत्स्यमयादजो विधानम्। २। नवाद्यशोऽव्यवयवे समुदायशब्दो विकारे च प्रकृतिशब्दस्तस्मान्मय-
डभावः।३। विकारावयवशब्दाच्च सङ्ग इति चेत्तत्तेनानभिधानात्। ३। अभिधाने ह्यन्यतोऽपि मयट्प्रसंगः ४। तस्मात्तत्स्यन्यथान्ता-
ल्लुग्वचनम् ४। अन्यत्र गोमयाद्धुवयात्फलाद्बलग्वक्तव्यः।५। तस्मादस्त्वनेनानभिधानादित्येव। इति भाष्यम्। १५८। क्रीतव
त्परिमाणात्। कौ। स्या। त। प्राग्दी। परिमाणवाचिनः क्रीतेऽर्थे ठञादयः प्रत्यया वक्ष्यन्ते ते विकारेऽपि भवन्ति। निष्केण क्रीतम्।
नैष्किकम्। एवं निष्कस्य विकारः नैष्किकः। संख्या यत्र परिमाणम्। शतस्य विकारोऽवयवो वा। शत्यः। शतिकः। वतिः सर्वसाद
दृश्यार्थः। अध्यर्द्धपूर्वद्विगोर्लुगसंज्ञायामित्येवमादिकमप्यतिदिश्यते। द्विसहस्रः। द्विसहस्रः। द्विसाहस्रः। द्विनिष्कः। द्विनैष्कि
कः। क्रीतवत्परिमाणाद्रङ्क्च।१। अणो ह्यद्वान्मयट्।२। विप्रतिषिद्धेनेति शेषः। ओरञोऽनुदात्तादेरञश्च।३। मयडित्येव। मयटः प्रा
णिरजतिप्रतिषेधेन।४। न वाऽनवकाशत्वादपवादो मयट्।५। तस्मान्मयड्विधाने प्राणिप्रतिषेधः।६।१५७। उष्ट्राद्वुञ्। कौ। स्या। त। प्रा
ग्दी। उष्ट्र। इत्येतस्माद्विकारावयवयोरर्थयोर्वुञ् स्यात्। उष्ट्रस्य विकारोऽवयवो वा। औष्ट्रकः। इत्यादिसूत्रषट्कं भाष्ये न व्याख्यातम् १५८
उमोर्णयोर्वा। कौ। स्या। त। प्राग्दी। उमा। ऊर्णा। इत्येताभ्यां विकारावयवयोर्वुञ् वा स्यात्। औमम्। औमकम्। और्णम्। और्णकम्
१५९। एण्या ढञ्। कौ। स्या। त। प्राग्दी। एणी। इत्येतस्माद्विकारावयवयोर्ढञ् स्यात्। ऐणेयं मांसम्। एणस्य तु ऐणम्। शाणिलक्षणो २
ञ् १६०। गोपयसोर्यत्। कौ। स्या। त। कौ। स्या। त। प्राग्दी। गो। पयस्। इत्येताभ्यां विकारावयवयोर्यत् स्यात्। गव्यम्। पयस्यम्। १६१।
द्रोश्च। कौ। स्या। त। प्राग्दी। द्रु। इत्येतस्माद्विकारावयवयोर्यत् स्यात्। द्रव्यम्। १६२। माने वयः। कौ। स्या। त। प्राग्दी। द्रु। इत्येतस्मान्मा
ने विकारविशेषे वयः स्यात्। द्रुवयम्। १६३। फले लुक्। कौ। स्या। त। प्राग्दी। फले वाच्ये विकारावयवार्थप्रत्ययस्य लुक् स्यात्।
आमलक्याः फलम्। आमलकम्। वदरम्। फले लुग्वचनानर्थकं प्रकृत्यन्तरत्वात्।१। एकान्तदर्शनात्प्रसंगः इति चेद्दृष्टो लुग्वच

स्.प.
१९८
148

नम्।२।१९४। प्लक्षादिभ्योऽण्। कौ।स्व।त।प्राग्दी।प्लक्ष। इत्येवमादिभ्यः फले विकारावयवत्वेन विवक्षिते अण् स्यात्। विधानसाम
र्थ्यात्तस्य लुङ्न भवति। प्लाक्षम्। नैयग्रोधम्। प्लक्ष। न्यग्रोध। अश्वत्थ। इङ्गुदी। शिग्रु। रुरु। कदल। बृहती। प्लक्षादिः। इत्यादिसूत्रद्वये
भाष्येनैव न व्याख्यातम्। १९५। जम्ब्वा वा। कौ।स्व।त।प्राग्दी। जम्बू। इत्येतस्मात्स्मात्फले विकारावयवत्वेन विवक्षिते अण्वा स्यात्।
जाम्बवानि फलानि। जम्बूनि वा। १९६। लुप् च। कौ।स्व।त।प्राग्दी। जम्बु। इत्येतस्मात् फले विकारावयवप्रत्ययस्य वा लुप् स्यात्। जम्बुः
फलम्। जम्बूः। जम्बु। जाम्बवम्। लुप्प्रकरणे फलपाकशुषामुपसंख्यानम्।१। व्रीहयः। यवाः। माषाः। मुद्गाः। फलपाकशुषामुपसं
ख्यानम्।१। कौ।स्व।त।प्राग्दी। पुष्पमूलेषु बहुलम्।२। कौ।स्व।त।प्राग्दी। मल्लिकायाः पुष्पम्। मल्लिका। विदार्या मूलम्। विदा
री। न च भवति। पाटलानि पुष्पाणि। साल्वानि मूलानि। १९७। हरीतक्यादिभ्यश्च। कौ।स्व।त। हरीतक्याः फलानि। हरीतक्यः।
हरीतकी। कोशातकी। नखरजनी। नखशाकण्डी। दाडी। दोडी। श्वेतपाकी। अर्जुनपाकी। द्राक्षा। काला। ध्वाक्षा। गर्भीका। क
ण्टकारिका। पिप्पली। चिञ्चा। शेफालिका। हरीतक्यादिः। इत्यादिसूत्रद्वयं भाष्येनैव न व्याख्यातम्। १९८। कंसीयपरशव्ययोर्यञञौ
लुक् च। कौ।स्व।त।प्राग्दी। कंसीय। परशव्य। इत्येताभ्यां विकारे यथाक्रमेण यञ् अञ्। इत्येतौ प्रत्ययौ भवतः। कंसीयपरशव्ययोश्छा
वयवयोः छयतोश्च लुग्भवति। कंसीयस्य विकारः। कांस्यम्। परशव्यस्य विकारः। पारशवः। इति ४५ सूत्राणि भाष्ये।४।३।२।
व्याख्यातानि। इति सूत्रपाठे चतुर्थाध्यायस्य तृतीयः पादः॥१। प्राग्वहतेष्ठक्। कौ।स्व।त।द। तद्वहति रथयुगप्रसङ्गमिति
सूत्रात्प्रागर्थेषु ठक् इत्येषोऽधिकृतो वेदितव्यः। वक्ष्यति तेन दीव्यतीत्यादि। अक्षैर्दीव्यति। आक्षिकः। ठक्प्रकरणे तदाहेति
माशब्दादिभ्य उपसंख्यानम्।१। माशब्द इत्याह। माशब्दिकः। नैत्यशब्दिकः। तदाहेति माशब्दादिभ्य उपसंख्यानम्।१। कौ।स्व।त
ठ। प्रभूतमाह। प्राभूतिकः। प्रभूत। पर्याप्त। प्रभूतादिः। पृच्छतौ सुस्नातादिभ्यः।२। कौ।स्व।त।ठ। सुस्नातं पृच्छति। सौस्ना
तिकः। सुस्नात। सुखरात्रि। सुखशयन। सुस्नातादिः। गच्छतौ परदारादिभ्यः।३। कौ।स्व।त।ठ। परदारान् गच्छति। पारदारि १९८

कः। परदार। गुरुतल्प। परदारादिः। २। तेन दीव्यति खनति जयति जितम्। कौ। सू। त। द। तृतीयान्ताद्दीव्यति। खनति। जयति
जितम्। इत्येतेष्वर्थेषु ठक् स्यात्। अक्षैर्दीव्यति। आक्षिकः। अभ्र्या खनति। आभ्रिकः। अक्षैर्जयति। आक्षिकः। अक्षैर्जितम्।
आक्षिकं। इत्यादिरत्र समस्तकं भाष्ये न व्याख्यातम्। ३। संस्कृतम्। कौ। सू। त। द। तृतीयान्तात्संस्कृतमित्येतस्मिन्नर्थे ठक् स्या
त्। दध्ना संस्कृतम्। दाधिकम्। मारिचिकम्। ४। कुलत्थकोपधादण्। कौ। सू। त। ट। कुलत्थ। इत्येतस्मात्। कः। इत्येतदुपधाच्च त
तृतीयान्तात्संस्कृ। तमित्येतस्मिन्नर्थे अण् स्यात्। कुलत्थैः संस्कृतम्। कौलत्थम्। कोपधात्। तैत्तिडीकम्। ५। तरति। कौ। सू
त। ट। तृतीयान्तात्तरतीत्येतस्मिन्नर्थे ठक् स्यात्। उडुपेन तरति। औडुपिकः। ६। गोपुच्छाट्ठञ्। कौ। सू। त। ट। गोपुच्छ। इत्येत
स्मात्तरतीत्येतस्मिन्नर्थे ठञ् स्यात्। गोपुच्छेन तरति। गौपुच्छिकः। ७। नौद्व्यचष्ठन्। कौ। सू। त। ठ। नौ। इत्येतस्मात्। द्व्यच्काच्च प्रा
तिपदिकात्तरतीत्येतस्मिन्नर्थे ठन् स्यात्। नावा तरति। नाविका। द्व्यचः। घटिकः। प्लविकः। बाहुका स्त्री। ८। चरति। कौ। सू
त। ठ। तृतीयान्ताच्चरतीत्येतस्मिन्नर्थे ठक् स्यात्। दध्ना चरति। दाधिकः। हास्तिकः। ९। आकर्षात्ष्ठल्। कौ। सू। त। ठ। आकर्ष। इत्ये
तस्माच्चरतीत्येतस्मिन्नर्थे ष्ठल् स्यात्। आकर्षेण चरति। आकर्षिकः। आकर्षिकी। आकर्षात्पर्पादेर्भस्त्रादिभ्यः कुसीदसूत्राच्च।
आवसथात्किसरादेः षितः षडेते ठगधिकारे। १। कारिकेयम्। १०। पर्पादिभ्यः ष्ठन्। कौ। सू। त। ट। पर्प। इत्येवमादिभ्यश्चर
तीत्येतस्मिन्नर्थे ष्ठन् स्यात्। पर्पेण चरति। पर्पिकः। पर्पिकी। पर्प। अश्व। अश्वत्थ। रथ। जाल। न्यास। व्याल। पादः पच्च। प
र्प्यादिः। इत्यादिरत्र समस्तकं भाष्ये न व्याख्यातम्। ११। श्वगणाट्ठञ्च। कौ। सू। त। ट। श्वगण। इत्येतस्माच्चरतीत्येतस्मिन्नर्थे ठ
ञ् स्यात्। चकारात्ष्ठन्। श्वगणेन चरति। श्वागणिकः। श्वागणिकी। ष्ठन्। श्वगणिकः। श्वागणिकी। १२। वेतनादिभ्यो जीवति
कौ। सू। त। द। वेतन। इत्येवमादिभ्यस्तृतीयान्तेभ्यो जीवतीत्येतस्मिन्नर्थे ठञ् स्यात्। वेतनेन जी। वति। वैतनिकः। धानुर्दण्डि
कः। धानुष्कः। दाण्डिकः। वेतन। वाहन। अर्द्धवाहन। धनुर्दण्ड। जाल। वेश। उपवेश। प्रेषण। उपवस्ति। सुख। शय्या। शक्ति

सू॰ प॰
१५५
159

उपनिषद। उपदेश। स्फिज। पाद। उपस्थ। उपस्थान। उपहस्त। वेतनादिः॥१२॥ वस्नक्रयविक्रयाट्ठन्॥ कौ। सू। ता। ट। वस्न। क्रयविक्रय।
इत्येताभ्यां तृतीयान्ताभ्यां जीवतीत्येतस्मिन्नर्थे ठन् स्यात्। वस्नेन जीवति। वास्निकः। क्रयविक्रयिकः। क्रयविक्रयग्रहणं संघातविगृही-
तार्थम्॥१॥ इति काशिका। क्रयिकः। विक्रयिकः॥१३॥ आयुधाच्छ च। कौ। सू। ता। ठ। आयुध। इत्येतस्माज्जीवतीत्येतस्मिन्नर्थे छः स्यात्
चकाराट्ठन्। आयुधेन जीवति। आयुधीयः। आयुधिकः॥१४॥ हरत्युत्सङ्गादिभ्यः। कौ। सू। ता। ठ। उत्सङ्ग। इत्येवमादिभ्यस्तृतीयान्ते-
भ्यो हरतीत्येतस्मिन्नर्थे ठक् स्यात्। उत्सङ्गेन हरति। औत्सङ्गिकः। उत्सङ्ग। उडुप। उत्पुत। उत्पन्न। उत्पुट। पिटक। पिटाक। उत्स-
ङ्गादिः॥१५॥ भस्त्रादिभ्यः ष्ठन्। कौ। सू। ता। ठ। भस्त्रा। इत्येवमादिभ्यस्तृतीयान्तेभ्यो हरतीत्येतस्मिन्नर्थे ष्ठन् स्यात्। भस्त्रया हरति
भस्त्रिकः। भस्त्रिकी। भस्त्रा। भरट। भरण। शीर्षभार। शीर्षेभार। अंसभार। अंसेभार। भस्त्रादिः॥१६॥ विभाषा विवधात्। कौ। सू
ता। ट। विवध। इत्येतस्मात्तृतीयान्ताद्धरतीत्येतस्मिन्नर्थे ष्ठन् वा स्यात्। विवधिकः। विवधिकी। पक्षे ठक्। वैवधिकः। वीवधाच्चेति
वक्तव्यम्॥१॥ वीवधिकः। वीवधिकी। वैवधिकः। वीवधादपि॥१॥ कौ। सू। ता। ट। विभाषा विवधवीवधात्। इत्येष सूत्रपाठः काया १८
अण् कुटिलिकायाः। कौ। सू। ता। ठ। कुटिलिका। इत्येतस्मात्तृतीयान्ताद्धरतीत्येतस्मिन्नर्थे अण् स्यात्। कुटिलिका व्याधानां गति
विशेषः कर्मारोपकरणभूतं लोहं च। तया हरति मृगानङ्गारान्वा। कौ। टिलिको व्याधानां गतिविशेषः कर्मारोपकरणभूतं
लोहं च। तया हरति मृगानङ्गारान्वा। कौ। टिलिको व्याधः। कर्मारश्च। इत्यादि सूत्रद्वये भाष्ये तु न व्याख्यातम्॥१९॥ निर्वृत्तेऽ
क्षद्यूतादिभ्यः। कौ। सू। ता। ट। अक्षद्यूत। इत्येवमादिभ्यस्तृतीयान्तेभ्यो निर्वृत्त इत्येतस्मिन्नर्थे ठक् स्यात्। अक्षद्यूतेन निर्वृत्तम्।
आक्षद्यूतिकं वैरम्। अक्षद्यूत। जानुप्रहृत। जङ्घाप्रहृत। पादस्वेदन। कण्ठकमर्दन। गतानुगत। गतागत। यातोपयात।
अनुगत। अक्षद्यूतादिः॥२०॥ त्रेर्मम्नित्यम्। कौ। सू। ता। ट। क्त्रिप्रत्ययान्तान्निर्वृत्तेऽर्थे नित्यं मप् स्यात्। ठक्त्रः। ड्वितः क्त्रिः। कृतेनि-
र्वृत्तम्। कृत्रिमम्। पाक्त्रिमम्। उप्त्रिमम्। महाविभाषा निर्वृत्तार्थे नित्यमिति। त्रेर्मम्नित्यवचने विषयार्थम्॥१॥ केवलमनेन वा १५५

कोमामभूदितिभावः। नत्वयथाधिकारन्तद्विषयताप्रसङ्गः।।१।। इत्यनयस्य। पक्ष्मानिर्हृतमिति वा कोनिर्हृतम्। पाक्तिः क्रियते इत्यादिवाक्ये
त्वप्रसज्येत इति भावः। एवन्तर्हि भाव इति प्रकृत्य इमप्रबृक्तयः।।२।। कुहिमामूमिः। सेकिमोऽसिः। भावप्रत्ययान्तादिमब्वक्तव्यः।।१।। कौ।
सू।त।ट। ततो वक्तव्यः त्रेष्ठमप्भवति। ततो नित्यं अन्तादिमविति इति भाष्यम्। त्रेरिति पूर्वेण सिद्धे नियमार्थं वचनम्। तेन निर्हृतेनावह्रा
कानिवर्त्यते। ततो नित्यमिमनेनोपचारान्तरविषयस्यापि वाक्यस्य निहतिः क्रियात इति द्विप्रयाता विप्रत्ययस्य सिद्धानि। इति कैयटः।२।
अपमित्ययाचिताभ्यां कक्कनौ। कौ। सू। त। ठ। अपमित्य। याचित इत्येताभ्यां निर्हृत्तेऽर्थे क्रमात्कक्कनौ। इत्येतौ प्रत्ययौ भवतः। अ
पमित्या निर्हृतम्। आपमित्यकम्। याचितकम्। इत्यादि सूत्रद्वये भाष्येतन व्याख्यातम्।२२। संसृष्टे। कौ। सू। त। ठ। तृतीयान्तात्सं
सृष्ट इत्येतस्मिन्नर्थे ठक् स्यात्। दध्ना संसृष्टम्।२३। चूर्णादिनिः। कौ। सू। त। ठ। चूर्णा इत्येतस्मात्संसृष्टेऽर्थे इनिः स्यात्। चूर्णैः सं
सृष्टाः। चूर्णिनोऽपूपाः। इनिनैतन्मात्वर्थीयेन सिद्धम्। इति भाष्यम्।२४। लवणाल्लुक्। कौ। सू। त। ट। लवण इत्येतस्मात्सं
सृष्टेऽर्थे ठको लुक् स्यात्। लवणेन संसृष्टः। लवणः सूपः। लवणं शाकम्। लवणा यवागूः। लवणाल्लुग्वचनानर्थक्यं रसवाचि
त्वात्।।१।। अथ संसृष्टे वदर्शनात्।२।२५। मुद्गादण्। कौ। सू। त। ठ। मुद्ग इत्येतस्मात्संसृष्टेऽर्थे अण् स्यात्। मौद्गः। ओदनः। इत्यादि सूत्रप
ञ्चकं भाष्ये न व्याख्यातम्।२६। व्यञ्जनैरुपसिक्ते। कौ। सू। त। द। व्यञ्जनवाचिभ्यस्तृतीयान्तेभ्य उपसिक्त इत्येतस्मिन्नर्थे ठक् स्या
त्। दध्ना उपसिक्तम्। दाधिकम्। सौपिकम्। व्यञ्जनैः किम्। उदकेनोपसिक्त ओदनः।२७। ओजस्सहोऽम्भसा वर्त्तते। कौ। सू। त।
ठ। ओजस्। सहस्। अम्भस्। इत्येतेभ्यस्तृतीयान्तेभ्यो वर्त्तते इत्येतस्मिन्नर्थे ठक् स्यात्। ओजसा वर्त्तते। औजसिकः शूरः। साहसिक
श्चरः। आम्भसिको मत्स्यः।२८। तत्प्रत्यनुपूर्वमीपलोमकूलम्। कौ। सू। त। ठ। प्रति। अनु। इत्येवं पूर्वेभ्य ईप। लोम। कूल। इत्येते
भ्यो द्वितीयान्तेभ्यो वर्त्तते इत्येतस्मिन्नर्थे ठक् स्यात्। ईप। प्रातीपिकः। आन्वीपिकः। लोम। प्रातिलोमिकः। प्रातिकूलिकः।
आनुकूलिकः। यद्यपि वृत्तधातुरकर्मकस्तथापि क्रियाविशेषणत्वाद्द्वितीया।२९। परिमुखं च। कौ। सू। त। ट। परिमुखं च।

सू. प.
१५०
150

इत्येतस्माद्द्वितीयान्तादित्येतस्मिन्नर्थे ठक् स्यात्। परिमुखं वर्तते। पारिमुखिकः सेवकः। २१। प्रयच्छति गर्ह्यम्। कौ। सू। त। ट। द्वि
तीयान्तात्प्रयच्छतीत्येतस्मिन्नर्थे ठक् स्यात्। यद्द्वितीयान्तं गर्ह्यं चेत्तद्भवति। द्विगुणार्थं द्विगुणम्। तत्प्रयच्छति। द्वैगुणिकः। गर्ह्ये
किम्। द्विगुणं प्रयच्छामि। प्रयच्छति गर्ह्याय।। वत्स्यैनान्तात्प्रत्ययो विधेयः प्रतिभावः। वृद्धेर्वृधुषिभावो वक्तव्यः।। कौ। सू। त। ठ।
वृद्धेर्वृधुषिभावश्च।। इति काशिका। वार्धुषिकः। तादर्थ्यान्ताच्छब्दो भविष्यति। गर्ह्यार्थे गर्ह्यम्। मेस्याल्लोपो वा। इति भाष्यम्। २२।
कुसीददशैकादशात्ष्ठन्ष्ठचौ। कौ। सू। त। ट। कुसीद। दशैकादश। इत्येताभ्यां प्रयच्छतीत्येतस्मिन्नर्थे क्रमात् ष्ठन्। ष्ठच्। इत्येतौ प्र
त्ययौ भवतः। यत्प्रयच्छति गर्ह्यं चेत्तत्। कुसीदं वृद्धिस्तदर्थं द्रव्यं कुसीदम्। तत्प्रयच्छति। कुसीदिकः। कुसीदिकी। एकाद
शार्थत्वादेकादश। वस्तुतो दश। तत्प्रयच्छति। दशैकादशिकः। दशैकादशिकी। इत्यादि सत्त्वदशकं भाष्ये तन्नयाख्यातम्। २
उञ्छति। कौ। सू। त। ठ। द्वितीयान्तादुञ्छतीत्येतस्मिन्नर्थे ठक् स्यात्। बदराण्युञ्छति। बादरिकः।। २२। रक्षति। कौ। सू। त। ट।
द्वितीयान्ताद्रक्षतीत्येतस्मिन्नर्थे ठक् स्यात्। समाजं रक्षति। सामाजिकः। २४। शब्ददर्दुरं करोति। कौ। सू। त। ठ। शब्द। दर्दुर। इत्ये
ताभ्यां द्वितीयान्ताभ्यां करोतीत्येतस्मिन्नर्थे ठक् स्यात्। शब्दं करोति। शाब्दिकः। दार्दुरिकः। २५। पक्षिमत्स्यमृगान्हन्ति। कौ।
सू। त। ट। पक्षि। मत्स्य। मृग। इत्येतेभ्यो द्वितीयान्तेभ्यो हन्तीत्येतस्मिन्नर्थे ठक् स्यात्। पक्षि। पक्षिणो हन्ति। पाक्षिकः। शा
कुनिकः। मायूरिकः। मत्स्य। मात्स्यिकः। मैनिकः। शाफरिकः। शाकुलिकः। मृग। मार्गिकः। हारिणिकः। सारङ्गिकः। २६
परिपन्थं च तिष्ठति। कौ। सू। त। ट। परिपन्थ। इत्येतस्माद्द्वितीयान्तात्तिष्ठतीत्येतस्मिन्नर्थे हन्तीत्येतस्मिन्नर्थे च ठक् स्यात्। पारि
पन्थिकश्चौरः। पन्थानं वर्जयित्वा आयवान्तिष्ठतीत्यर्थः। २७। माथोत्तरपदपदव्यनुपदं धावति। कौ। सू। त। ट। माथ। इत्येतदु
त्तरपदात्। पदवी। अनुपद। इत्येताभ्यां च धावतीत्येतस्मिन्नर्थे ठक् स्यात्। दण्डमाथं धावति। दाण्डमाथिकः। पादविकः।
आनुपदिकः। २८। आक्रन्दाट्ठञ्च। कौ। सू। त। ट। आक्रन्द। इत्येतस्माद्द्वितीयान्ताद्धावतीत्येतस्मिन्नर्थे ठञ् स्यात्। चकाराट्ठक्। आ १५०

ककान्दिकः। टक्ठञोः स्वरे विशेषो न तु रूपे। ३९। पदोत्तरपदं गृह्णाति। कौ। सू।त।ठ। पद। इत्येतदुत्तरपदं यस्य तस्माद्द्वितीयान्ता
द्गृह्णातीत्येतस्मिन्नर्थे ठक्स्यात्। पूर्वपदं गृह्णाति। कौ। सू।त।ठ। पौर्वपदिकः। औत्तरपदिकः। ४०। प्रतिकण्ठार्थललामञ्च। कौ।
सू।त।ठ। प्रतिकण्ठ। अर्थ। ललाम। इत्येतेभ्यो द्वितीयान्तेभ्यो गृह्णातीत्येतस्मिन्नर्थे ठक्स्यात्। प्रातिकण्ठिकः। आर्थिकः।
लालामिकः। ४१। धर्मं चरति। कौ। सू।त।ठ। धर्म। इत्येतस्माद्द्वितीयान्ताच्चरतीत्येतस्मिन्नर्थे ठक्स्यात्। धर्मं चरति। धा
र्मिकः। अधर्माच्च। १। कौ। सू।त।ठ। आधर्मिकः। ४२। प्रतिपथमेति ठंश्च। कौ। सू।त।ठ। प्रतिपथ। इत्येतस्माद्द्वितीयान्तादेती
त्येतस्मिन्नर्थे ठन्स्यात्। चकाराट्ठक्। प्रतिपथिकः। प्रातिपथिकः। इत्यादि सूत्रसमकं भाष्येन व्याख्यातम्। ४३। समवायान्स
मवैति। कौ। सू।त।ठ। समवायवाचिभ्यो द्वितीयान्तेभ्यः समवैतीत्येतस्मिन्नर्थे ठक्स्यात्। समवायं समवैति। सामवायिकः। सा
मूहिकः। सांनिवेशिकः। ४४। परिषदो ण्यः। कौ। सू।त।ठ। परिषद। इत्येतस्माद्द्वितीयान्तात्समवैतीत्येतस्मिन्नर्थे ण्यः स्यात्।
परिषदं समवै। ४५। सेनाया वा। कौ। सू।त।ठ। सेना। इत्येतस्मात्समवैतीत्येतस्मिन्नर्थे वा ण्यः स्यात्। सेनां समवैति। सैन्यः। सैनि
कः। ४६। संज्ञायां ललाटकुक्कुट्यौ पश्यति। कौ। सू।त।ठ। ललाट। कुक्कुटी। इत्येताभ्यां द्वितीयान्ताभ्यां पश्यतीत्येतस्मिन्नर्थे सं
ज्ञाविषये ठक्स्यात्। ललाटं पश्यति। ललाटिकः सेवकः। कौक्कुटिको भिक्षुः। ४७। तस्य धर्म्यम्। कौ। सू।त।ठ। षष्ठ्यन्ता
द्धर्म्यमित्येतस्मिन्नर्थे ठक्स्यात्। आपणस्य धर्म्यम्। आपणिकम्। आन्तरागारिकम्। ४८। अण्महिष्यादिभ्यः। कौ। सू।
त।ठ। महिषी। इत्येवमादिभ्यो धर्म्यमित्येतस्मिन्नर्थे अण्स्यात्। महिष्या धर्म्यम्। माहिषम्। प्राजापतम्। महिषी। प्रजाप
ति। प्रजावती। प्रलेपिका। विलेपिका। अनुलेपिका। पुरोहित। मणिपाली। अनुचारक। होतृ। यजमान। महिष्यादिः। ४९
ऋतोऽञ्। कौ। सू।त।ठ। ऋ। इत्येतदन्ताद्धर्म्यमित्येतस्मिन्नर्थे अञ्स्यात्। होतुर्धर्म्यम्। हौत्रम्। औद्गात्रम्। नृनराभ्यामञ्चे
ति वक्तव्यम्। १। नुर्नरस्य वा धर्म्यो। नारी। नराच्चेति वक्तव्यम्। १। कौ। सू।त।ठ। विशसितुरिड्लोपश्चाञ्च वक्तव्यः। २। कौ। सू।त।ठ।

स्व॰ प॰
१५८
१५।

विशसितुर्धर्म्यम्। वैशस्तम्। विभाजयितुर्णिलोपश्चाण्वक्तव्यः। ११। कौ। स्वा। त। ठ। विभाजयितुर्धर्म्यम्। वैभाजित्रम्। ५०। अव-
क्रयः। कौ। स्वा। त। ठ। षष्ठ्यन्तादवक्रय इत्येतस्मिन्नर्थे ठक् स्यात्। शुल्कशालाया अवक्रयः। शौल्कशालिकः। आपणि-
कः। इत्यादि सूत्रपञ्चकं भाष्येऽनव्याख्यातम्। ५१। तदस्य पण्यम्। कौ। स्वा। त। ठ। प्रथमान्तादस्येति षष्ठ्यर्थे ठक् स्यात्।
यत्प्रथमान्तं पण्यं चेत्तद्भवति। अपूपाः पण्यमस्य। आपूपिकः। मौदकिकः। ५२। लवणाट्ठञ्। कौ। स्वा। त। ट। लवण इत्ये-
तस्मात्प्रथमान्तात्षष्ठ्यर्थे ठञ् स्यात्। प्रथमान्तार्थः पण्यं चेत्। लवणं पण्यमस्य। लावणिकः। ५३। किसरादिभ्यः ष्ठन्।
कौ। स्वा। त। ठ। किसर इत्येवमादिभ्यः प्रथमान्तेभ्योऽस्येति षष्ठ्यर्थे ष्ठन् स्यात्। प्रथमान्तार्थः पण्यं चेत्। किसरं पण्यमस्य।
किसरिकः। किसरिकी। किसर। नरद। नलद। स्थागल। तगर। गुग्गुलु। उशीर। हरिद्रा। हरिद्रु। पर्णी। किसरादिः। ५४।
शलालुनोऽन्यतरस्याम्। कौ। स्वा। त। ट। शलालु इत्येतस्मात्प्रथमान्तादस्येति षष्ठ्यर्थे ष्ठन् स्यात्। प्रथमान्तार्थः पण्यं चेत्।
शलालु पण्यमस्य। शलालुकः। शलालुकी। पक्षे ठक्। शालालुकः। ५५। शिल्पम्। कौ। स्वा। त। ठ। प्रथमान्तादस्येति ष-
ष्ठ्यर्थे ठक् स्यात्। यत्प्रथमान्तं शिल्पं चेत्तद्भवति। मृदङ्गवादनं शिल्पमस्य। मार्दङ्गिकः। एवमुत्तरपदलोपोऽत्र द्र-
ष्टव्यः इति भाष्यम्। ५६। मड्डुककर्करादणन्यतरस्याम्। कौ। स्वा। त। ट। मड्डुक। कर्कर। इत्येताभ्यां प्रथमान्ताभ्यामस्येति
षष्ठ्यर्थेऽण् वा स्यात्। प्रथमान्तार्थः शिल्पं चेत्। मड्डुकवादनं शिल्पमस्य। माड्डुकः। कार्करः। पक्षे ठक्। माड्डुकिकः।
कार्करिकः। इत्यादि सूत्रत्रयं भाष्येऽनव्याख्यातम्। ५७। प्रहरणम्। कौ। स्वा। त। ट। प्रथमान्तादस्येति षष्ठ्यर्थे ठक् स्यात्।
यत्प्रथमान्तं प्रहरणं चेत्तद्भवति। असिः प्रहरणमस्य। आसिकः। प्रासिकः। ५८। परश्वधाट्ठञ्च। कौ। स्वा। त। ठ। परश्वध।
इत्येतस्मात्प्रथमान्तादस्येति षष्ठ्यर्थे ठञ् स्यात्। परश्वधं प्रहरणमस्य। पारश्वधिकः। चकाराट्ठक्। पारश्वधिकः। स्वरे वि-
शेषः। ५९। शक्तियष्ट्योरीकक्। कौ। स्वा। त। ट। शक्ति। यष्टि। इत्येताभ्यां प्रथमान्ताभ्यामस्येति षष्ठ्यर्थे ईकक् स्यात्। यत्प्र- १५८

मान्ते प्रहरणं चेतत्। शाक्तिः प्रहरणमस्य शाक्तीकः। याष्टीकः। इकण् भवेत्। इति भाष्यम्। ६०। अस्तिनास्तिदिष्टं मतिः। कौ। सू। ता। ठ
अस्ति। नास्ति। दिष्ट। इत्येतेभ्यः प्रथमान्तेभ्योऽस्येति षष्ठ्यर्थे ठक् स्यात्। प्रथमान्तार्थो मतिश्चेत्। आस्तिकः। नास्तिकः। दैष्टिकः
किं यस्यास्ति मतिः स आस्तिकः। किं वातः। चौरेऽपि प्राप्नोति। एवं तर्हि। इति वापो ऽन्वइश्वः। अस्तीत्यस्य मतिः। आस्तिकः
इति भाष्यम्। ६१। शीलम्। कौ। सू। ता। ठ। प्रथमान्तादस्येति षष्ठ्यर्थे ठक् स्यात्। यत्प्रथमान्तं शीलं चेत्तद्भवति अपूपभक्ष
णं शीलमस्य। आपूपिकः। भाष्येतनेदं व्याख्यातम्। ६२। छत्रादिभ्यो णः। कौ। सू। ता। ठ। छत्र इत्येवमादिभ्यः प्रथमान्तेभ्यो
ऽस्येति षष्ठ्यर्थे णः स्यात्। यत्प्रथमान्तं शीलं चेत्तत्। गुरोर्दोषाणामावरणं छत्रम्। तच्छीलमस्य। छात्रः। छत्र। शिक्षा। पुरो
हा। स्था। बुभुक्षा। चुरा। तितिक्षा। उपस्थान। कृषि। कर्मन्। विश्वधा। तपस्। सत्य। अनृत। विशिखा। विशिका। भक्षा। उ
दस्थान। पुरोडा। विक्षा। चुक्षा। मंद्र। छत्रादिः। किं यस्य छत्रधारणं शीलं स छात्रः। किं वातः। राजपुत्रेऽपि प्राप्नोति। एवं तर्ह्युत्त
रपदलोपोऽत्र द्रष्टव्यः। छत्रमिव छत्रम्। इति भाष्यम्। ६३। कर्माध्ययने वृत्तम्। कौ। सू। ता। ठ। प्रथमान्तादस्येति षष्ठ्यर्थे ठक्
स्यात्। अध्ययने वृत्ता या क्रिया सा चेत्प्रथमान्तस्यार्थः। एकमन्यदध्ययने वृत्तमस्य ऐकान्यिकः। इत्यादि सूत्रद्वयं भाष्येण न व्या
ख्यातम्। ६४। बह्वच्पूर्वपदाट्ठच्। कौ। सू। ता। ठ। बह्वच्पूर्वपदात्प्रथमान्तादस्येति षष्ठ्यर्थे ठच् स्यात्। अध्ययने वृत्ता क्रि
या प्रथमान्तार्थश्चेत्। द्वादशान्यानि कर्माणि वृत्तान्यस्य। द्वादशान्यिकः। द्वादश अपपाठा अस्य जाता इत्यर्थः। ६५। हितं
भक्षाः। कौ। सू। ता। ठ। प्रथमान्ताच्चतुर्थ्यर्थे ठक् स्यात्। यत्प्रथमान्तं हितं चेत्तद्भवति तच्च भक्षाः। अपूपभक्षणं हितमस्मै।
आपूपिकः। हितं भक्षा इति चतुर्थी निर्देशः।। एवं च स्यामिहितं भक्षास्तदस्मै। तस्मै दीयते नियुक्तम्। इति भाष्यम्। ६६। त
दस्मै दीयते नियुक्तम्। कौ। सू। ता। ठ। प्रथमान्तादस्मै इत्येतस्मिन् चतुर्थ्यर्थे ठक् स्यात्। यः प्रथमान्तार्थः स चेन्नियुक्तं दीय
ते। अग्रे भोजनं नियतं दीयतेऽस्मै। आग्रभोजनिकः। इत्यादि सूत्रदशकं भाष्येण न व्याख्यातम्। ६७। श्राणामांसौदनाट्टिठ

सू.प.
१५२

न्॥ कौ। सू। ता। ठ। श्राणा। मांसौदन। इत्येताभ्यां प्रथमान्ताभ्यामस्मैइति वतर्थ्ये ऽर्थे टिठन् स्यात्। श्राणा नियुक्तं दीयते ऽस्मै। श्राणिक
मांसौदनिकः। दरीवृधेः। श्राणिकी इकारउच्चारणार्थः। मांसौदनग्रहणे संघातविगृहीतार्थम्।।। कौ। सू। ता। ठञ्। इति काशि
का। मांसौदनिकः। मांसिकः। औदनिकः। ६८। भक्तादणन्यतरस्याम्। कौ। सू। ता। ठ। भक्त। इत्येतस्मात्प्रथमान्तादस्मैइतिव
तर्थ्ये ऽर्थे ऽण् एव वा स्यात्। भक्तं नियुक्तं दीयते ऽस्मै। भाक्तः। पक्षे ठक्। भाक्तिकः। ६९। तत्र नियुक्तः। कौ। सू। ता। ठ। सप्तम्यन्ता
न्नियुक्त इत्येतस्मिन्नर्थे ठक् स्यात्। देवागारे नियुक्तः। दैवागारिकः। ७०। अगारान्ताट्ठन्। कौ। सू। ता। ठ। अगार। इत्येतदन्तात्प्रा
तिपदिकान्नियुक्त इत्येतस्मिन्नर्थे ठन् स्यात्। भाण्डागारे नियुक्तः। भाण्डागारिकः। ७१। अध्यायिन्यदेशकालात्। कौ। सू।
ता। ठ। निषिद्धदेशवाचिनो निषिद्धकालवाचिनश्च सप्तम्यन्तादध्यायिन्यर्थे ठक् स्यात्। श्मशाने ऽधीते श्माशानिकः। आ
कालात्। चतुर्दश्यामधीते चातुर्दशिकः। अदेशकालात् किम्। स्रुघ्ने ऽधीते। पूर्वाह्णे ऽधीते। ७२। कठिनान्तप्रस्तारसंस्
स्थानेषु व्यवहरति। कौ। सू। ता। ठ। कठिन। इत्येतदन्तात्। प्रस्तार। संस्थान। इत्येताभ्यां च सप्तम्यन्ताभ्यां व्यवहरतीत्येतस्मि
न्नर्थे ठक् स्यात्। वंशकठिने व्यवहरति। वांशकठिनिकः। प्रास्तारिकः। सांस्थानिकः। ७३। निकटे वसति। कौ। सू। ता। ठ। नि
कट। इत्येतस्मात्सप्तम्यन्ताद्वसतीत्येतस्मिन्नर्थे ठक् स्यात्। निकटे वसति नैकटिको भिक्षुः। ७४। आवसथात्ष्ठल्।
कौ। सू। ता। ठ। आवसथ। इत्येतस्मात्सप्तम्यन्ताद्वसतीत्येतस्मिन्नर्थे ष्ठल् स्यात्। आवसथे वसति। आवसथिकः। आवस
थिकी। ७५। प्राग्घिताद्यत्। कौ। सू। ता। प्राग्घिता। तस्मै हितमिति सूत्रात्प्राग्यत् इत्येतस्याधिकारो वेदितव्यः। वक्ष्यति। तद्वह
ति रथयुगप्रासङ्गम्। कौ। सू। ता। प्राग्घि। रथ। युग। प्रासङ्ग। इत्येतेभ्यो द्वितीयान्तेभ्यो वहतीत्येतस्मिन्नर्थे यत् स्यात्। रथं वहति
रथ्यः। युग्यः। प्रासङ्ग्यः। षष्ठ्यत्रभिधाने रथशकटहलसीरेभ्यः प्रत्ययविधानानर्थक्यं विहितत्वात्।१। शब्दभेदाद्विधानमि
ति वेदयोः स्वतात्प्रत्ययविधानस्यार्थसामान्यात्सिद्धम्।२। इदन्तर्हि प्रयोजनम्। यो ह्यरथो वहति स हि रथ्यः। यो ह्वयो रथयो १५२

वौढा सद्विरथः। तेन सति लघ्भवति। अनेन सति कस्मान्न भवति। प्राग्दीव्यतश्च उच्यते। इति भाष्यम्। ७७ धुरो यड्ढकौ। कौ। स्। त
प्राग्घि धुर। इत्येतस्माद्द्वितीयान्ताद्वहतीत्येतस्मिन्नर्थे यत्। ढक्। इत्येतौ प्रत्ययौ भवतः। धुर्यः। धौरेयः। इत्यादि सूत्रत्रयं कैमा
ष्येतन व्याख्यातम्। ७८। खः सर्वधुरात्। कौ। स्। त। प्राग्घि। सर्वधुरा इत्येतस्माद्द्वितीयान्ताद्वहतीत्येतस्मिन्नर्थे खः स्यात्। स
र्वधुरां वहति। सर्वधुरीणः। ख इति योगो विभज्यते। उत्तरधुरीणः। दक्षिणधुरीणः। स्त्रीलिङ्गनिर्देशो न्याय्यः। सर्वधुरा
दिति निर्देशस्तु प्रातिपदिकापेक्षः। ७९। एकधुराल्लुक्च। कौ। स्। त। प्राग्घि। एकधुरा इत्येतस्माद्द्वितीयान्ताद्वहतीत्ये
तस्मिन्नर्थे खः स्यात्। तस्य च विधानसामर्थ्यात्तद्धितको लुक्च भवति। एकधुरीणः। एकधुरः। ८०। शकटादण्। कौ। स्
त। प्राग्घि। शकट। इत्येतस्माद्द्वितीयान्ताद्वहतीत्येतस्मिन्नर्थे अण् स्यात्। शकटं वहति। शाकटो गौः। ८१। हलसीराट्ठक्।
कौ। स्। त। प्राग्घि। हल। सीर। इत्येताभ्यां द्वितीयान्ताभ्यां वहतीत्येतस्मिन्नर्थे ठक् स्यात्। हलं वहति। हालिकः। सैरिकः।
८२। संज्ञायां जन्या। कौ। स्। त। प्राग्घि। जन्या। इत्येतन्निपात्यते। समुदायेन चेत्संज्ञा गम्यते। जनीं वधूः। जनीं वहती। जन्या जामा
तुर्वयस्या। जनन्या जनी भावो निपात्यते यश्च प्रत्ययः। १। जन्या इति निपातनानर्थक्यं पञ्चमीनिर्देशात्। २। इदं तर्हि प्रयोज
नम्। सर्वे कालाः प्रत्ययविधयो यथा विज्ञायेत। इति भाष्यम्। ८३। विध्यत्यधनुषा। कौ। स्। त। प्राग्घि द्वितीयान्ताद्विध्यती
त्येतस्मिन्नर्थे यत् स्यात्। न चेत्तत्र धनुः करणम्। पादौ विध्यन्ति। पद्याः शर्कराः। अधनुषा किम्। पादौ विध्यति धनुषा वि
ध्यत्यकरणे नेति वक्तव्यम्। १। इह माभूत्। शर्कराभिर्विध्यति। ८४। धनगणं लब्धा। कौ। स्। त। प्राग्घि। धन। गण। इत्येता
भ्यां लब्धा इत्येतस्मिन्नर्थे यत् स्यात्। धनं लब्धा। धन्यः। गणं लब्धा। गण्यः। इत्यादि सूत्रषट्कं भाष्येतन व्याख्यातम्। ८५। अन्ना
ण्णः। कौ। स्। त। प्राग्घि। अन्न। इत्येतस्माद्द्वितीयान्ताल्लब्धा इत्येतस्मिन्नर्थे णः स्यात्। अन्नं लब्धा। आन्नः। ८६। वशं गतः। कौ।
स्। त। प्राग्घि। वश। इत्येतस्माद्द्वितीयान्ताद्गत इत्येतस्मिन्नर्थे यत् स्यात्। वश्यः। ८७। पदमस्मिन्दृश्यम्। कौ। स्। त। प्राग्घि।

सू॰प॰

१५३

पद। इत्येतस्मात्प्रथमान्ताद्दृश्यमित्येतद्प्राथिकादस्मिन्निति सप्तम्यर्थे यत्स्यात्। पदे दृश्यमस्मिन्। पद्यः कर्दमः। ८८। मूल-
मस्यावर्हि। कौ। स्त्रा। त। प्राग्घि। मूल। इत्येतस्मात्प्रथमान्तादावर्हीत्येवंरूपात्प्राथिकादस्येति षष्ठ्यर्थे यत्स्यात्। मूलमावर्हिरस्य
मूल्या मुद्गादिः। उत्पाटनयोग्यमूला इत्यर्थः। ८९। संज्ञायां धेनुष्या। कौ। स्त्रा। त। प्राग्घि। धेनुष्या इत्येतन्निपात्यते निपात्यते सं-
ज्ञाविषये। धेनुष्या दत्तमुत्तमर्णायोपगतपयस्य। धेनुष्या बन्धके स्थिता गौः। ९०। गृहपतिना संयुक्ते ञ्यः। कौ। स्त्रा। त। प्राग्घि। गृ-
हपति। इत्येतस्मात्तृतीयान्तात्संयुक्त इत्येतस्मिन्नर्थे ञ्यः स्यात्। गृहपतिना संयुक्तः। गार्हपत्यो ऽग्निविशेषः। नन्वदाद्दि-
णाग्निः। तस्मिन्पत्नीसंयाजाः क्रियन्ते। अथवा गृहपतिर्नाम मन्त्रः स यस्मिन्नुच्यते। इति भाष्यम्। ९१। नौवयोधर्मवि-
षमूलसीतातुलाभ्यस्तार्यतुल्यप्राप्यवध्यानाम्यसमसमितसम्मितेषु। कौ। स्त्रा। त। प्राग्घि। नौ। वयस। धर्म। विष। मू-
ल। सीता। तुला। इत्येतेभ्यस्तृतीयान्तेभ्यः क्रमात्तार्य। तुल्य। प्राप्य। वध्य। आनाम्य। सम। समित। सम्मित। इत्येतेष्वर्थे-
षु यत्स्यात्। नावा तार्यं नाव्यं जलम्। वयसा तुल्यः वयस्यः। धर्मेण प्राप्यम्। धर्म्यम्। विषेण वध्यः। विष्यः। मूले-
नानाम्यम्। मूल्यम्। मूलेन समः। मूल्यः। सीतया समितम्। सीत्यं क्षेत्रम्। तुलया सम्मितम्। तुल्यम्। इत्यादीनि षट्त्रिं-
शत्सूत्राणि भाष्येन व्याख्यातानि। ९२। धर्मपथ्यर्थन्यायादनपेते। कौ। स्त्रा। त। प्राग्घि। धर्म। पथि। अर्थ। न्याय। इत्येते-
भ्यः पञ्चम्यन्तेभ्यो ऽनपेत इत्येतस्मिन्नर्थे यत्स्यात्। धर्मादनपेतम्। धर्म्यम्। पथ्यम्। अर्थ्यम्। न्याय्यम्। ९३। छन्द-
सो निर्मिते। कौ। स्त्रा। त। प्राग्घि। छन्दसा। इत्येतस्मात्तृतीयान्तान्निर्मित इत्येतस्मिन्नर्थे यत्स्यात्। छन्दसा निर्मितः। छ-
न्दस्यः। इच्छापर्यायश्छन्दःशब्दः। ९४। उरसो ऽण् च। कौ। स्त्रा। त। प्राग्घि। उरस्। इत्येतस्मात्तृतीयान्तान्निर्मित इत्येत-
स्मिन्नर्थे ऽण् स्यात्। उरसा निर्मितः। औरसः पुत्रः। चकाराद्यत्। उरस्यः। ९५। हृदयस्य प्रियः। कौ। स्त्रा। त। प्राग्घि। हृद-
य। इत्येतस्मात्षष्ठ्यन्तात्प्रिय इत्येतस्मिन्नर्थे यत्स्यात्। हृद्यो देशः। हृद्यं जलम्। ९६। बन्धने चर्षौ। कौ। स्त्रा। त। प्राग्घि।

१५३

हृदया। इत्येतस्मात्षष्ठ्यन्ताद्बन्धन इत्येतस्मिन्नर्थे वेदे वाच्ये यः स्यात्। हृदयस्य बन्धनः। हृद्यो वशीकरणमन्त्रः। ९७। मतजनहलात्क-
रणजल्पकर्षेषु। कौ। सू। त। प्राग्घि। मत। जन। हल। इत्येतेभ्यः। षष्ठ्यन्तेभ्यः क्रमात्। करण। जल्प। कर्ष। इत्येतेष्वर्थेषु यत्स्यात्
मतेर्ज्ञाने। मतस्य करणम्। मत्यम्। जनस्य जल्पा। जन्यः। हलस्य कर्षः। हल्यः। ९८। तत्र साधुः। कौ। सू। त। प्राग्घि। सप्त-
म्यन्तात्साधुरित्येतस्मिन्नर्थे यत्स्यात्। सामसु साधुः। सामन्यः। ९९। प्रतिजनादिभ्यः खञ्। कौ। सू। त। प्राग्घि। प्रतिजन। इत्ये-
वमादिभ्यः सप्तम्यन्तेभ्यः साधुरित्येतस्मिन्नर्थे खञ् स्यात्। प्रतिजने साधु। प्रातिजनीनः। प्रतिजन। इदंयुग। संयुग। समयुग
परकुल। परस्यकुल। अमुष्यकुल। सर्वजन। विश्वजन। महाजन। पञ्चजन। प्रातिजनादिः। १००। भक्ताण्णः। कौ। सू। त। प्रा-
ग्घि। भक्ता इत्येतस्मात्साधुरित्येतस्मिन्नर्थे णः स्यात्। भाक्ताः शालयः। १०१। परिषदो ण्यः। कौ। सू। त। प्राग्घि। परिषद्। इत्ये-
तस्मात्साधुरित्येतस्मिन्नर्थे ण्यः स्यात्। पारिषद्यः। १०२। कथादिभ्यष्ठक्। कौ। सू। त। प्राग्घि। कथा। इत्येवमादिभ्यः साधुरित्ये-
तस्मिन्नर्थे ठक् स्यात्। काथिकः। कथा। विकथा। विश्वकथा। संकथा। वितण्डा। कुष्टविद्। जनवाद। जनेवाद। जनोवाद।
वृत्ति। संग्रह। गुण। गण। आयुर्वेद। कथादि। १०३। गुडादिभ्यष्ठञ्। कौ। सू। त। प्राग्घि। गुड। इत्येवमादिभ्यः साधुरित्येतस्मि-
न्नर्थे ठञ् स्यात्। गौडिक इक्षुः। गुड। कुल्माष। सक्तु। अपूप। मांसौदन। इक्षु। वेणु। संग्राम। संघात। संक्रम। संवाह। प्रवा-
स। निवास। उपवास। गुडादिः। १०४। पथ्यतिथिवसतिस्वपतेर्ढञ्। कौ। सू। त। प्राग्घि। पथिन्। अतिथि। वसति। स्वपति। इत्येते-
भ्यः साधुरित्येतस्मिन्नर्थे ढञ् स्यात्। पथि साधुः। पाथेयः। आतिथेयः। वासतेयम्। स्वापतेयम्। १०५। सभाया यः। कौ। सू। त।
प्राग्घि। सभा इत्येतस्मात्साधुरित्येतस्मिन्नर्थे यः स्यात्। सभायां साधुः। सभ्यः। १०६। ढश्छन्दसि। कौ। वे। अ। वा। सभा इत्येतस्मा-
त्सप्तम्यन्तात्साधुरित्येतस्मिन्नर्थे वेदे ढः स्यात्। सभेयो युवा। स्य यजमानस्य वीरो जायताम्। १०७। समानतीर्थे वासी। कौ। सू।
त। प्राग्घि। समानतीर्थ। इत्येतस्मात्सप्तम्यन्ताद्वासीत्येतस्मिन्नर्थे यत्स्यात्। समाने तीर्थे गुरौ वसति। सतीर्थ्यः। १०८। समाना-

दरे शयितस्त्रो चोदात्तः। कौ। स्या। त। प्राग्घिते समानोदर। इत्येतस्मात्सप्तम्यन्ताच्छयित इत्येतस्मिन्नर्थे यत्स्यात्। ओ इत्येष च उदात्तः
सू.प. स्यात्। समाने उदरे शयितः स्थितः। समानोदर्यः ॥१०८॥ सोदराद्यः। कौ। स्या। त। प्राग्घिते। सोदर। इत्येतस्मात्सप्तम्यन्ताच्छयि
१५४ तइत्येतस्मिन्नर्थे यः स्यात्। सोदर्यो भ्राता ॥१०९॥ भवे छन्दसि। कौ। वे। प्रा। वा। सप्तम्यन्ताद्भव इत्येतस्मिन्नर्थे वेदे यत्स्यात्। मेध्या
यचन मो विद्युत्याय च ॥११०॥ पाथोनदीभ्यां ड्यण्। कौ। वे। प्रा। वा। पाथस्। नदी। इत्येताभ्यां सप्तम्यन्ताभ्यां भव इत्येतस्मिन्नर्थे छन्द
सि ड्यण् स्यात्। पाथ्यो वृषा। नाद्योगिरो मे प्रयच्छति। ॥११२॥ वेशन्तहिमवद्भ्यामण्। कौ। वे। प्रा। वा। वेशन्त। हिमवत्। इत्येताभ्यां
सप्तम्यन्ताभ्यां छन्दसि भव इत्येतस्मिन्नर्थे ऽण्स्यात्। वैशन्तीभ्यः स्वाहा। हैमवतीभ्यः स्वाहा। ॥११३॥ स्रोतसो विभाषा ड्यड्ड्यौ।
कौ। वे। प्रा। वा। स्रोतस्। इत्येतस्मात्सप्तम्यन्ताच्छन्दसि भव इत्येतस्मिन्नर्थे ड्यत्। ड्य। इत्येतौ प्रत्ययौ वा भवतः। स्रोत्यः। स्वरे विशे
षः। पक्षे यत्। स्रोतस्यः। ॥११४॥ सगर्भसयूथसनुताद्यन्। कौ। वे। प्रा। वा। सगर्भ। सयूथ। सनुत। इत्येतेभ्यः सप्तम्यन्तेभ्यश्छन्द
सि भव इत्येतस्मिन्नर्थे यन्स्यात्। अनुभ्राता सगर्भ्यः। अनुसखा सयूथ्यः। यो नः सनुत्यः। ॥११५॥ तुग्राद्घन्। कौ। वे। प्रा। वा। तुग्र। इत्ये
तस्माद्भव इत्यर्थे छन्दसि घन्वा स्यात्। शमे वृषे तत्र भे अग्रियो महे। ततो बहवः। पक्षे यत्। तुग्र्यासः इति अन्य प्रा ग्वायाम् ॥११६॥ अग्राद्य
त्। कौ। वे। प्रा। वा। अग्र। इत्येतस्मात्सप्तम्यन्ताच्छन्दसि भव इत्येतस्मिन्नर्थे यत्स्यात्। अग्रे भवम्। अग्र्यम्। ॥११७॥ घच्छौ। च।
कौ। वे। प्रा। वा। अग्र। इत्येतस्मात्सप्तम्यन्ताच्छन्दसि भव इत्येतस्मिन्नर्थे घाच्छौ इत्येतौ प्रत्ययौ भवतः। अग्रियम्। अग्रीयम्। वा। का
रायत। अग्र्यम्। ॥११८॥ समुद्राभ्राद्घः। कौ। वे। प्रा। वा। समुद्र। अभ्र। इत्येताभ्यां सप्तम्यन्ताभ्यां छन्दसि भव इत्येतस्मिन्नर्थे घः
स्यात्। समुद्रियाणि नदीनाम्। अभ्रियस्येव घोषाः। ॥११९॥ बर्हिषि दत्तम्। कौ। वे। प्रा। वा। बर्हिस्। इत्येतस्मात्सप्तम्यन्ताद्दत्त
मित्येतस्मिन्नर्थे छन्दसि यत्स्यात्। बर्हिष्येषु निधिषु प्रियेषु। ॥१२०॥ दूतस्य भागकर्मणी। कौ। वे। प्रा। वा। दूत। इत्येतस्मात्
षष्ठ्यन्ताच्छन्दसि भागे कर्मणि चार्थे यत्स्यात्। दूतस्य भागः कर्म वा। दूत्यम्। ॥१२१॥ रक्षोयातूनां हननी। कौ। वे। प्रा। वा। र १५४

वसु। जात। इत्येताभ्यां षष्ठ्यन्ताभ्यां छन्दसि हननीत्येतस्मिन्नर्थे यत्स्यात्। यातेश्चाग्रे र्वदन्तस्यानन्तः। यातव्या। १२१ रेवतीजगतीह
विष्याभ्यः प्रशस्ये। कौ। वे। अ। व। रेवती। जगती। हविष्या। इत्येतेभ्यः षष्ठ्यन्तेभ्यश्छन्दसि प्रशंसने ऽर्थे यत्स्यात्। यद्वो जगती जगत्यम्
यद्वो हविष्यम्। १२२। असुरस्य स्वम्। कौ। वे। अ। व। असुर। इत्येतस्मात् षष्ठ्यन्ताच्छन्दसि स्वमित्येतस्मिन्नर्थे यत्स्यात्। असुर्यं
वा एतत्पात्रम्। १२३। मायायामण्। कौ। वे। अ। व। असुर। इत्येतस्मात् षष्ठ्यन्ताच्छन्दसि मायायां स्वविशेषे अण् स्यात्। आसुरी
माया स्वधया कृतासि। १२४। तद्वानासामुपधानो मन्त्र इतीष्टकासु लुक् च मतोः। कौ। वे। अ। व। मतुप्प्रत्ययान्तात्प्रथमा
न्तादासामिति षष्ठ्यर्थे यत्स्यात्। यत्तत्प्रथमान्तमुपधानो मन्त्रश्चेत्स भवति। यत्तदासामिति निर्दिष्टमिष्टकाश्चेत्ता भवन्ति।
वर्चः शब्दो यस्मिन्मन्त्रे स वर्चस्वान्। वर्चस्वानुपधानो मन्त्र आसामिष्टकानाम्। वर्चस्या उपदधाति। तद्वानिति किम्। मन्त्रा
देवसमुदायान्मा भूत्। उपधानः किम्। वर्चस्वानुपस्थानमन्त्र आसाम्। मन्त्रः किम्। अङ्गुलिमानुपधानो हस्त आसाम्
इति शब्दो विवक्षावोधनार्थः। इष्टकासु किम्। वर्चस्वानुपधानो मन्त्र एषां कपालानाम्। १२५। अश्विमानण्। कौ। वे। अ। व
अश्विमत्। इत्येतस्मात्प्रथमान्तात्पूर्वसूत्रविषये ऽण्स्यात्। मतुपो लुक् च। अश्विमानुपधानो मन्त्र आसाम्। आश्विनीरुपद
धाति। १२६। वयस्यासु मूर्ध्नो मतुप्। कौ। वे। अ। व। मूर्द्धन्। इत्येतस्मान्मत्वन्ताद्वयश्शब्दवन्मन्त्रोपधेयास्विष्टकास्ववाच्या
सु वेदे मतुप्स्यात्। प्रथमस्य मतुपो लुक् च। मूर्द्धन्वतीरुपदधाति। वयस्यासु किम्। यत्र मन्त्रे मूर्द्धन्शब्द एव केवलो न तु व
यः शब्दस्तत्र मा भूत्। १२७। मत्वर्थे मासतन्वोः। कौ। वे। अ। व। प्रथमान्तादस्ययाधिकात्। षष्ठ्यर्थे सप्तम्यर्थे च मासत
न्वोर्वा अर्थयोर्वेदे यत्स्यात्। नभांसि विद्यन्ते ऽस्मिन्वा। नभस्यो मासः। सहस्यः। तपस्यः। तन्वाम्। ओजस्यातमयवः। माधव
मासतन्वोरनन्तरार्थे वा। १। इति काशिका। लुगकारेकाररेफाश्च। २। कौ। वे। अ। व। लुक्। मधुः। तपः। नभः। अकार
इषः। ऊर्जः। इकार। शुचिर्मासः। रेफ। शुक्रो मासः। १२८। मधोर्ञ्च। कौ। वे। अ। व। मधु। इत्येतस्मान्मत्वर्थे मासतन्वोर्वेदे ञः

स्यात्। वकारागमः। माधवः। मधव्यः। मधुः। तन्वाम्। मधवा। माधव्या। मधुलम्॥ इत्याद्येकादश सूत्राणि भाष्येऽनव्याख्यातानि॥ ओ-
स्तु॰प॰ ओजसोऽहनि यत्खौ॥ को॰। वे॰। अ॰। वा। ओजस्। इत्येतस्मादहनि वाच्ये छन्दसि मत्वर्थे यत्। खौ। इत्येतौ प्रत्ययौ भवतः। ओजस्यम्। ओ-
१५५ जसीनमहः॥ १३१। वेशोयशआदेर्भगाद्यल्॥ को॰। वे॰। अ॰। वा। वेशस्। यशस्। इत्येतदादेर्भग इत्येतदन्तात् प्रातिपदिकाद्वेदे मत्वर्थे
यल् स्यात्। वेशोभग्यः। यशोभग्यः। वेशः होवलवाची॥ १३२। खच॥ को॰। वे॰। अ॰। वा। वेशोयशआदेर्भगान्तात् प्रातिपदिकाद्वेदे म-
155 त्वर्थे खः स्यात्। वेशोभगीनः। यशोभगीनः॥ १३३। पूर्वैः कृतमिनियौ च॥ को॰। वे॰। अ॰। वा। पूर्व। इत्येतस्मात्तृतीयान्तात् कृत-
मित्येतस्मिन्नर्थे वेदे इनि। य। इत्येतौ प्रत्ययौ भवतः। वकारान्तः॥ याधिभिः पूर्विभिः। पूर्व्यैः। पूर्वौणैः॥ १३४। अद्भिः संस्कृतम्॥
को॰। वे॰। अ॰। वा। अप्। इत्येतस्मात्तृतीयान्तात् संस्कृतमित्येतस्मिन्नर्थे वेदे यत् स्यात्। अप्यं हविः॥ १३५। सहस्रेण संमितौ घः॥ को॰
वे॰। अ॰। वा। सहस्र। इत्येतस्मात्तृतीयान्तात् संमित इत्येतस्मिन्नर्थे वेदे घः स्यात्। अग्निः सहस्रियः। हे सहस्रेण तुल्य इत्यर्थः॥ १३६। मतौ
च॥ को॰। वे॰। अ॰। वा। सहस्र। इत्येतस्मान्मत्वर्थे वेदे घः। स्यात्। सहस्रं विद्यतेऽस्य अस्मिन्वा। सहस्रियः॥ १३७। सोममर्हति यः॥ को॰। वे॰। अ॰
वा। सोम। इत्येतस्माद्द्वितीयान्तादर्हतीत्येतस्मिन्नर्थे वेदे यः स्यात्। सोममर्हति। सोम्यो ब्राह्मणः। यज्ञार्ह इत्यर्थः॥ १३८। मये च॥
को॰। वे॰। अ॰। वा। सोम। इत्येतस्मान्मयडर्थे वेदे यः स्यात्। सोम्यं मधु पिबन्ति। सोममयमित्यर्थः॥ १३९। मधोः॥ को॰। वे॰। अ॰। वा। मधु।
इत्येतस्मान्मयडर्थे वेदे यत् स्यात्। मधव्यान् स्तोमान्॥ १४०। वसोः समूहे च॥ को॰। वे॰। अ॰। वा। वसु। इत्येतस्मान्मयडर्थे समूहेऽर्थे च वे-
दे यत् स्यात्। वसव्यो महान्। वसव्यः। अक्षरसमूह वा विन इत्यर्थः॥ अश्रावयेति चतुरक्षरम्। अस्तु श्रौषडिति चतुरक्षरं ये
यजामह इति पञ्चाक्षरं यजेति द्व्यक्षरं द्व्यक्षरो वषट्कारः एष वै सप्तदशाक्षरश्छन्दस्यः प्रजापतिर्यज्ञमनुविहितः। छन्दसि
वह्निभिर्वसव्यो रूपसंख्यानम्॥ १। अग्निरीशे वसव्यस्योपसंख्यानम्॥ २। वसुशब्दादपि स्वार्थे यत्क्रमः॥ १। इति काशिका। व-
हुभिर्वसव्यैः। स्वार्थविज्ञानात्सिद्धम्॥ इति भाष्यम्। वसोरिति योगविभागः कर्तव्यः। तेन स्वार्थे भविष्यतीत्यर्थः॥ इति कैयट १५५

टा। १४१। न तत्राद्धः। कौ। वे। अ। वा। ल तत्रा इत्येतस्माद्देवार्थे यः स्यात्। न तत्रियेभ्यः स्वाहा। इत्यादि सूत्रवत्क्वं भाष्ये तत्र न व्याख्यातम्
सर्वदेवात्तातिल्। कौ। वे। अ। वा। सर्व। देव। इत्येताभ्यां वेदस्वार्थे तातिल् स्यात्। सर्वतातिः। देवतातिः। १४३। शिवशमरिष्टस्य करे। कौ।
वे। अ। वा। शिव। शम्। अरिष्ट। इत्येतेभ्यः षष्ठ्यन्तेभ्यः करइत्येतस्मिन्नर्थे वेदे तातिल् स्यात्। शिवस्य करः। शिवताति। शंतातिः। अ
रिष्टतातिः १४४। भावे च। कौ। वे। अ। वा। शिव। शम्। अरिष्ट। इत्येतेभ्यो वेदे भावे तातिल् स्यात्। शिवस्य भावः। शिवतातिः। शंताति
अरिष्टतातिः। इति। १४५। सूत्राणि भाष्ये। ४। ४। १२ व्याख्यातानि। इति सूत्रपाठे चतुर्थाध्यायस्य चतुर्थः पादः। अध्यायश्च।। प्रा
क् क्रीताच्छः। कौ। सू। ता। छ। तेन क्रीतमित्यतः प्रागर्थेषु प्रत्ययोऽपि कृतो वेदितव्यः। वत्सानि। तस्मै हितमित्यादि वत्सेभ्यो
हितः। वत्सीयो गोधुक्। प्राग्वचनं कदियानार्थम्। १। अपिक। रा। त्वि इममिति वेदयवाद विषये कप्रसंगः २। न वा कृ। धि
द्वावचनात्। २। २। उगवादिभ्यो यत्। कौ। सू। ता। छ। उ। इत्येतदन्तात्। गो। इत्येवमादिभ्यश्च प्राक् क्रीतीयेष्वर्थेषु यत् स्यात्
शङ्कवे हितम्। शङ्कव्यं दारु। गवादिभ्यः। गव्यम्। हविष्यम्। तो। हविस्। अदतर। विष। बर्हिस्। अष्टका। स्वदा। युग। मेधा।
स्रुच्। नाभि नभं च। शुनः संप्रसारणं वा च दीर्घत्वं तत्संनियोगेन चान्तोदात्तत्वम्। ऊधसोऽनङ्। कूप। खद। दर। खर। असु
र। अध्वन्। क्षर। वेद। बीज। दीप्त। गवादिः। यज्ञज्यावजः। पूर्वविप्रतिषिद्धं स्तनेरूपान्तद्धो प्रयोजनम्। १। स्तनेरण्यं चर्म्म। श्रो
पानस्यैव चर्म्म। दज्जमवत्सजः पूर्वविप्रतिषेधेन। २। छादिषेयं चर्म्म। हविरपूपादिभ्यो विभाषा पायत्। ३। वरत्रास्त्रिण्डुलाः अ
पानस्येव चर्म्म। ४। सत्त्वव्याधानाः। नाभेर्नभभावे प्रत्ययान्तपपतिः प्रकृत्यभावात्। ५। नहि वक्रस्य नाभिर्विकृतिः। सि
न विकारेभ्यश्च। ६। नाभिरिव। नभ्यं वक्रम्। नभ्यान्तेल्लग्रवचनम्। ७। ३। कम्बलाच्च संज्ञायाम्। कौ
हन्तशाखादिषु वचनाद्धखनच्चाः ८। नाभिरिव। नभ्यं वक्रम्। नभ्यान्तेल्लग्रवचनम्। ७। ३। कम्बलाच्च संज्ञायाम्। कौ
सू। ता। छ। कम्बल। इत्येतस्मात् संज्ञाविषये प्राक् क्रीतीयेष्वर्थेषु यत् स्यात्। कम्बल्यमूर्णापलशतम्। संज्ञायां किम्।
कम्बलीया ऊर्णा। अयं योगः शक्योऽवक्तुम्। इति भाष्यम्। ४। विभाषा हविरपूपादिभ्यः। कौ। सू। ता। छ। हविर्विशेषवा

विभ्योऽपूपादिभ्यश्चाकृतीतीयेयथर्थेषु वा यत्स्यात्। आमिक्ष्यम्। आमिक्षीयं दधि। अपूपादिभ्यः। अपूप्यम्। अपूपीयम्। अपूप
सू.प. तण्डुल। अभ्यूष। अवोष। अभ्येष। पृथुक। ओदन। सूप। पूप। किण्व। प्रदीप। मसल। कटक। कर्णवेष्टक। इर्गल। अर्गल
१५९ अन्नविकारेभ्यश्च। यूप। स्थूणा। दीप। अश्व। पत्र। अपूपादिः। ५। तस्मै हितम्। कौ। सू। त। वृ। चतुर्थ्यन्तात् हितमित्येत
स्मिन्नर्थे यथाविहितं छादयः प्रत्यया भवन्ति। वत्सेभ्यो हितः। वत्सीयो गोधुक्। पद्यम्। गव्यम्। अपूप्यम्। अपूपीयम्
भाष्येतनेद्व्याख्यातम्। ६। शरीरावयवाद्यत्। कौ। सू। त। वृ। शरीरावयववाचिनश्चतुर्थ्यन्तात् हितमित्येतस्मिन्नर्थे यत्स्या
म्। दन्त्यम्। ओष्ठ्यम्। कसर्पम्। ललाट्यम्। यत्प्रकरणे रथाच्च।१। रथाय हिता। रथ्या। ७। खलयवमाषतिलवृषब्रह्म
णश्च। कौ। सू। त। वृ। खल। यव। माष। तिल। वृष। ब्रह्मन्। इत्येतेभ्यश्चतुर्थ्यन्तेभ्यो हितमित्येतस्मिन्नर्थे यत्स्यात्। खल्यं
माष्यम्। तिल्यम्। वृष्यम्। ब्रह्मण्यम्। वृषन्शब्दोऽपि नकारान्तोऽस्ति तस्योपसंख्यानं कर्तव्यम्।१। ब्राह्मणशब्दस्याका
रान्तोऽस्ति तस्योपसंख्यानं कर्तव्यम्।२। ब्रह्मन्शब्दस्यादेशो वक्तव्यः।३। ततर्हि वक्तव्यम्। न वक्तव्यम्। समानार्थावेतौ। इति भाष्यम् ८
अजाविभ्यां थ्यन्। कौ। सू। त। वृ। अजा। अवि। इत्येताभ्यां चतुर्थ्यन्ताभ्यां हितमित्येतस्मिन्नर्थे थ्यन् स्यात्। अजथ्या। भाष्येतनेद्व्या
ख्यातम्।९। आत्मन्विश्वजनभोगोत्तरपदात्खः। कौ। सू। त। वृ। आत्मन्। विश्वजन। इत्येताभ्यां भोग इत्येतदुत्तरपदाच्च
हितमित्येतस्मिन्नर्थे खः स्यात्। आत्मनीनम्। विश्वजनीनम्। भोगोत्तरपदात्। मातृभोगीणः। पितृभोगीणः। भोगोत
रपदात्खविधानेऽनिर्देशः पूर्वपदार्थे हितत्वात्।१। भोगीनन् इतिवेद्वावचनम्।२। राजाचार्याभ्यां नित्यम्।३। राजभोगी
नः। आचार्यभोगीनः। आचार्यादणत्वं च।४। कौ। सू। त। वृ। आचार्यभोगीनः। राजाचार्याभ्यां च नित्यं भोगोत्तरपदाभ्यामे
व खः।१। इति काशिका। खविधाने पञ्चजनादुपसंख्यानम्।५। पञ्चजनादुपसंख्यानम्।१। कौ। सू। त। वृ। पाञ्चजनीनम्
समानाधिकरणादिति वक्तव्यम्।६। षष्ठीतत्पुरुषान्माभूत्। पञ्चजनायम्। सर्वजनाट्ठञ्च।७। सर्वजनाय हितः। सार्वजनि १५६

कः। सर्व्वजनीनः। सर्व्वजनाट्ठञ्खश्च।२। कौ।सू।त।ख। समानाधिकरणे इति वक्तव्यम्।८। षष्ठीतत्पुरुषे माभूत्। सर्व्वजनी
यः। महाजनाच्चित्यम्।४। माहाजनिकः। महाजनाट्ठञ्।३। कौ।सू।त।ख। तत्पुरुष इति वक्तव्यम्।१०। बहुव्रीहौ माभूत्। महाज
नीयः। आत्मन्विश्वजनसमानाधिकरणे इति वक्तव्यम्।११। इति भाष्यकृतः। इह माभूत्। विश्वेषां जनाय हितः। विश्वजनीयः। कर्म्म
धारयादेवेष्यते।४। कौ।सू।त।ख।१। सर्व्वपुरुषाभ्यां णढञौ। कौ।सू।त।ख। सर्व्व। पुरुष। इत्येताभ्यां हितमित्येतस्मिन्नर्थे क्रमात्
णढञ् इत्येतौ प्रत्ययौ भवतः। सार्व्वम्। पौरुषेयम्। सर्व्वाण्णस्य वावचनम्।१। णः। सार्व्वम्। पक्षे खः। सर्व्वीयम्। सर्व्वात्स्मा वेति वक्त
व्यम्।१। कौ।सू।त।ख। पुरुषाद्वधे इति वक्तव्यम्।२। पुरुषाद्वधविकारसमूहतेनकृतेष्विति वक्तव्यम्।१। इति भाष्यकृतः। कौ
सू।त।ख। पौरुषेयो वधः। पौरुषेयो विकारः। पौरुषेयः समूहः। पुरुषेण कृतः। पौरुषेयः। भाष्यप्रयोगादेव तेनेत्यस्य हित
मध्ये प्रवेशः।२१। माणवचरकाभ्यां खञ्। कौ।सू।त।ख। माणव। चरक। इत्येताभ्यां चतुर्थ्यन्ताभ्यां हितेऽर्थे खञ् स्यात्। मा
णवीनम्। चारकीणम्। भाष्ये तु नेदं व्याख्यातम्।२२। तदर्थं विकृतेः प्रकृतौ। कौ।सू।त।ख। विकृतिवाचिनश्चतुर्थ्यन्तात्तद
र्थायां प्रकृतौ वाच्यायां यथाविहितं छादयः प्रत्यया भवन्ति। अङ्गारेभ्य एतानि। अङ्गारीयाणि काष्ठानि। प्राकारीया इष्टकाः। शङ्कु
व्यन्तात्। तदर्थं किम्। यानानां सङ्कवः। नात्र तादर्थ्यं विवक्षितम्। विकृतेः किम्। उदकार्थः। कूपः। प्रकृतौ किम्। अस्यर्थः को
शी। तदर्थमिति प्रकृतस्य नाममप्यहञ्।१। नवाप्रयोजनेन कृतत्वात्।२।।३। छदिरुपधिबलेर्ढञ्। कौ।सू।त।ख। छदिस्। उपधि। बलि
इत्येतेभ्यश्चतुर्थ्यन्तेभ्यो विकृत्यर्थायां प्रकृतौ वाच्यायां ढञ् स्यात्। छादिषेयाणि तृणानि। रथाङ्गविशेष उपधिस्तदेव। औपधेयम्।
बालेयास्तण्डुलाः। उपध्यर्थमिति प्रत्ययानुपपत्तिरुपध्यभावात्।१। उपधिशब्दस्य विकृतिवाचिनोऽभावात्। सिद्धन्तु कृदन्तस्य
स्वार्थे ञ्यविधानात्।२। उपधेयशब्दादित्यर्थः। प्रकृतिविकृतिग्रहणं निवर्त्तिष्यते। इति भाष्यम्। अथ मतमेतत्तदेव गुणान्तरयुक्तं
विकार इति। वस्तृषभयोरपि सिद्धम्। इति च भाष्यम्। औपधेयेन न सिद्ध्यति। बबानां स्वार्थिको भविष्यति। इति च भाष्यम्।६।

ऋषभोपानहोर्ञ्यः। कौ। सू। त। बो। ऋषभ। उपानह। इत्येताभ्यां वत्तर्थ्येनाभ्यां विकृत्यर्थायां प्रकृतौ वाच्यायां ञ्यः स्यात्। आर्षभ्यो
सू.प. वत्सः। औपानह्यो मुञ्जः। इत्यादि सूत्रद्वये भाष्ये तु न व्याख्यातम्। १५। चर्मणोऽञ्। कौ। सू। त। बो। चर्मणो या विकृतिस्तदर्थाविनश्य
१५८ तच्छब्दान्ताद्विकृत्यर्थायां प्रकृतौ वाच्यायामञ् स्यात्। वार्ध्रं चर्म। १६। तदस्य तदस्मिन् स्यादिति। कौ। सू। त। बो। प्रथमान्तादस्य पा
157 पिकादस्येति षष्ठ्यर्थेऽस्मिन्निति सप्तम्यर्थे च यथाविहितं छादयः प्रत्यया भवन्ति। प्राकारः स्यादासामिष्टकानाम्। प्राकारी
या इष्टकाः। प्राकारोऽस्मिन् स्यात्। प्राकारीयो देशः। शक्यार्थे लिङिति वक्तव्यम्।१। इह माभूत्। प्राकारो देवदत्तस्य स्यात्। इ
तिकरणः क्रियते। ततश्च विवक्षा। इति भाष्यम्। १७। परिखाया ढञ्। कौ। सू। त। बो। परिखा। इत्येतस्मात्प्रथमान्तादस्येति
षष्ठ्यर्थेऽस्मिन्निति सप्तम्यर्थे च ढञ् स्यात्। पारिखेयी भूमिः। इत्यादि सूत्रद्वये भाष्ये तु न व्याख्यातम्। १८। प्राग्वतेष्ठञ्। कौ। सू। त।
बो। तेन तुल्यं क्रिया चेद्वतिरिति सूत्रात्प्राक् ठञ् इत्येतदधिकृतं वेदितव्यम्। वक्ष्यति पारायणतुरायणेत्यादि। पारायणिकः। तौ
रायणिकः। १९। आर्हादगोपुच्छसंख्यापरिमाणाट्ठक्। कौ। सू। त। बो। तदर्हतीत्येतत्सूत्रमभिव्याप्य ठञधिकारमध्ये ठक् इत्येतदधि
कृतं वेदितव्यम्। गोपुच्छादीन्वर्जयित्वा। वक्ष्यति तेन क्रीतम्। नैष्किकम्। अगोपुच्छेत्यादि किम्। गोपुच्छादीन्वर्जयित्वा। वक्ष्यति।
तेन क्रीतम्। नैष्किकम्। अगोपुच्छेत्यादि किम्। गौपुच्छिकम्। संख्या। साप्ततिकम्। परिमाणे। प्रास्थिकम्। एषु ठञ्। न तु ठक्।
संख्याया इति तन्त्र वक्तव्यम्।१। कौ। न वत्परिमाणादिति सूत्रे इत्यर्थः। ठगादयः प्रागर्हाच्छेदहैतद्विधिः।२। वस्नेव वनाप्तिदमिति
वैस्नासौ इनिकादिषु प्राप्तिः।३। आर्हादेषु भोजनादिषु तिप्रसङ्गः।४। अस्मिन्दीयते अस्मात् इति वृषेवमेतत्सिद्धम्। इति भाष्यम्। ऊ
र्ध्वमाने किलोन्मानं परिमाणं तु सर्वतः। आयामस्तु प्रमाणं स्यात्संख्या बाह्या तु सर्वतः।१। कारिकेयम्। २०। असमासे निष्कादि
भ्यः। कौ। सू। त। बो। निष्क। इत्येवमादिभ्य आर्हीयेष्वर्थेषु असमासे ठक् स्यात्। नैष्किकम्। पाणिकम्। असमासे किम्। परमनैष्कि
कम्। निष्क। पण। पाद। माष। वाह। द्रोण। षष्टि। निष्कादिः। निष्कादिष्वसमासग्रहणं ज्ञापकं पूर्वं च तदन्तप्रतिषेधस्य॥ कुसति १५८

लम्। राजमाषम्। इत उत्तरं तदन्तविधिप्रतिषेधो न भवति। २०। प्राग्वतेः संख्यापूर्वपदानां तदन्तग्रहणमलुकि। ३। पारायण
तुरायण। द्वैपारायणिकः। त्रैपारायणिकः। अलुकीति किम्। द्वाभ्यां शूर्पाभ्यां क्रीतम्। द्विशूर्पम्। द्विशौर्पिकम्। इत
ऊर्ध्वं तु संख्यापूर्वपदानां तदन्तग्रहणं प्राग्वतेरिष्यते तच्चालुकि।। कौ। सू। त। अ। २१। शतान्यठन्यतावशते। कौ। सू। त। अ
तस्माद्ठन्। यत्। इत्येतौ प्रत्ययौ भवतः। अन्यशते वाच्ये आर्हीयेष्वर्थेषु। शतेन क्रीतम्। शत्यम्। शतिकम्। अशते किम्। शतंप
रिमाणमस्य। शतकः संघः। असमासइत्येव। नेह। द्विशतकम्। शतप्रतिषेधेऽन्यशततेऽप्रतिषेधः।। इह प्रतिषेधो माभूत्।
शतेन क्रीतम्। शात्यं शाटकशतम्। अन्यशतते किम्। शतं परिमाणमस्य। शतकं निदानम्। अत्र वास्तवं शब्दात्पर्थे विषयमे
वशततमिति निषेधो भवति। २२। संख्याया अतिशदन्तायाः कन्। कौ। सू। त। अ। ति। शत्। इत्येतदन्तभिन्नायाः संख्यायास्तस्मादा
र्हीयेष्वर्थेषु कन् स्यात्। पञ्चभिः क्रीतः। पञ्चकः पटः। बहुकः। गणकः। अतिशदन्तायाः किम्। साप्ततिकः। चात्वारिंशत्कः
उत्तेश्चेति वक्तव्यम्।। ति प्रतिषेधाड्डतिग्रहणमिति चेदर्थवद्ग्रहणात्सिद्धम्। २३। वतोरिड्वा। कौ। सू। त। अ। वत्वन्तप्रत्ययात्कन
इडागमो वा स्यात्। तावतिकः। तावत्कः। वतोः किम्। बहुकः। तत्कनो ग्रहणं कर्तव्यम्।। २४। विंशतित्रिंशद्भ्यां ड्वुन्नसंज्ञायाम्।
कौ। सू। त। अ। विंशति। त्रिंशत्। इत्येताभ्यामसंज्ञायामार्हीयेष्वर्थेषु ड्वुन् स्यात्। विंशकः। त्रिंशकः। विंशतित्रिंशद्भ्यां कन्न भ
वतीति। ततो ड्वुन्नसंज्ञायामिति। इति भाष्यम्। २५। कंसाट्टिठन्। कौ। सू। त। अ। कंस। इत्येतस्मादार्हीयेष्वर्थेषु टिठन् स्यात्
कंसिकः। टकारो ङीबर्थः। कंसिकी। इकार उच्चारणार्थः। नकारः स्वरार्थः। टिठन्नर्द्धाच्च।। अर्द्धिकः। अर्द्धिकी। अर्द्धाच्चेति व
क्तव्यम्।। कौ। सू। त। अ। कार्षापणाद्वा प्रतिश्च। २। कार्षापणाट्टिठन्वक्तव्यः। ३। कौ। सू। त। अ। कार्षापणिकः। कार्षापणिकी
प्रतिरादेशश्च वा। ३। कौ। सू। त। अ। प्रतिकः। प्रतिकी। २६। शूर्पादञन्यतरस्याम्। कौ। सू। त। अ। शूर्प। इत्येतस्मादार्हीयेष्वर्थेषु
अञ्वा स्यात्। शौर्पम्। शौर्पिकम्। इत्यादि स्पष्टद्वयं भाष्येण व्याख्यातम्। २७। शतमानविंशतिकसहस्रवसनादण्। कौ। सू। त

स्त्र॰प॰ १५८ 158

आ। शतमान। विंशतिक। सहस्र। वसन। इत्येतेभ्य आर्हीयेष्वर्थेष्वण् स्यात्। शातमानम्। वैंशतिकम्। साहस्रम्। वासनम्। २८
अध्यर्द्धशब्दपूर्वद्विगोर्लुगसंज्ञायाम्। कौ। सा। त। आ। अध्यर्द्ध। इत्येवंपूर्वात् प्रातिपदिकात् द्विगोश्च परस्यार्हीयस्य प्रत्ययस्यासंज्ञा
यां लुक् स्यात्। अध्यर्द्धकंसम्। अध्यर्द्धशूर्पम्। द्विगोः। द्विकंसम्। द्विशूर्पम्। असंज्ञायां किम्। पाञ्चलौहितिकम्। इ
हापि द्विगोर्लुकि तन्निमित्तग्रहणं कर्तव्यम्।।१।। अर्थविशेषासंप्रत्ययेऽतन्निमित्तादपि।२। द्विशूर्पीक्रीतम्। द्विशूर्पाक्रीतम्
संज्ञाप्रतिषेधानर्थक्यं च यतन्निमित्तात् लुक् यस्य।३। उक्तं संख्यातप्रयोजने तस्मादिहाध्यर्द्धग्रहणमनर्थकम्।४। २९।। विभाषा
कार्षापणसहस्राभ्याम्। कौ। सा। त। आ। कार्षापण। सहस्र। इत्येतदन्तादध्यर्द्धपूर्वात् द्विगोश्च परस्यार्हीयस्य प्रत्ययस्य लु
ग्वा स्यात्। अध्यर्द्धकार्षापणम्। अध्यर्द्धकार्षापणिकम्। पक्षे प्रतिरादेशो विकल्पितः। अध्यर्द्धप्रतिकम्। सहस्रान्ता
त्। अध्यर्द्धसहस्रम्। अध्यर्द्धसाहस्रम्। द्विगोः। द्विकार्षापणिकम्। द्विप्रतिकम्। द्विसहस्रम्। द्विसाहस्रम्। कार्षापण
सहस्राभ्यां सुवर्णशतमानयोरुपसंख्यानम्।।१।। सुवर्णशतमानयोरुपसंख्यानम्।।१।। इति काशिका। अध्यर्द्धसुवर्णम्। अध्य
र्द्धसौवर्णिकम्। अध्यर्द्धशतमानम्। अध्यर्द्धशातमानम्। द्विगोः। द्विसुवर्णम्। द्विसौवर्णिकम्। द्विशतमानम्। द्विशातमानम्। ३०
द्वित्रिपूर्वान्निष्कात्। कौ। सा। त। आ। द्वि। त्रि। इत्येवंपूर्वान्निष्क इत्येतदन्तात् द्विगोः परस्यार्हीयस्य लुग्वा स्यात्। द्विनिष्कं
द्विनैष्किकम्। त्रिनिष्कम्। त्रिनैष्किकम्। द्वित्रिभ्यां हेयोगम्।।१।। द्वित्रिभ्यां यदुच्यते तत्स्त्वबहुपूर्वस्यापि विज्ञेयम्। तत्र च बहु
ग्रहणम्।२। बहुपूर्वाच्चेति वक्तव्यम्।।१।। कौ। सा। त। आ। बहुनिष्कम्। बहुनैष्किकम्। परिमाणान्तस्येत्युत्तरपदवृद्धिः।। ३१।।
बिस्ताच्च। कौ। सा। त। आ। द्वि। त्रि। इत्येवंपूर्वाद्बिस्त इत्येतदन्तात् द्विगोः परस्यार्हीयस्य लुग्वा स्यात्। द्विबिस्तम्। द्विबैस्तिकम्
त्रिबिस्तम्। त्रिबैस्तिकम्। बहुपूर्वाच्च।१। इति काशिका। बहुबिस्तम्। बहुबैस्तिकम्।। ३२।। विंशतिकात्खः। कौ। सा। त। आ
विंशतिक। इत्येतदन्तादध्यर्द्धपूर्वात् द्विगोश्चार्हीयेष्वर्थेषु खः स्यात्। अध्यर्द्धविंशतिकीनम्। द्विगोः। द्विविंशतिकीनम्। १५८

विधानसामर्थ्यान्न लुक्। भाष्ये तु नेदं व्याख्यातम्। ३३। खार्या ईकन्। कौ। सू। त। अ। खारी। इत्येतदन्तादर्हे पूर्वाद्विगोश्चार्हीयेष्व
र्थेषु ईकन् स्यात्। अध्यर्द्धखारीकम्। द्विखारीकम्। केवलायाश्चेति वक्तव्यम्। १। कौ। सू। त। अ। खारीकम्। काकिण्याश्चोपसंख्या
नम्। २। इति काशिका। अध्यर्द्धकाकिणीकम्। द्विकाकिणीकम्। केवलायाश्चेति वक्तव्यम्। २। इति काशिका। काकिणी-
कम्। ३४। पणपादमाषशताद्यत्। कौ। सू। त। अ। पण। पाद। माष। शत। इत्येतदन्तादर्हे पूर्वाद्विगोश्चार्हीयेष्वर्थेषु यत् स्यात्।
अध्यर्द्धपण्यम्। अध्यर्द्धपाद्यम्। अध्यर्द्धमाष्यम्। अध्यर्द्धशत्यम्। द्विगोः द्विपण्यम्। द्विपाद्यम्। द्विमाष्यम्। द्विशत्यम्।
भाष्ये तु नेदं व्याख्यातम्। ३५। शाणाद्वा। कौ। सू। त। अ। शाण। इत्येतदन्तादर्हे पूर्वाद्विगोश्चार्हीयेष्वर्थेषु वा यत् स्यात्। अध्यर्द्ध-
शाण्यम्। द्विशाण्यम्। पक्षे ठञ् तस्य लुक्। अध्यर्द्धशाणम्। द्विशाणम्। शतशाणाभ्यां वा। १। शताच्चेति वक्तव्यम्। १। इति का-
शिका। अध्यर्द्धशत्यम्। अध्यर्द्धशतम्। द्विशत्यम्। द्विशतम्। द्वित्रिपूर्वादण् च। २। कौ। सू। त। अ। द्वित्रिपूर्वादण् चेति सूत्रेषु
नार्षः पाठ इति वार्तिकारम्भः। इति कैयटः। ३६। द्वित्रिपूर्वादण् च। कौ। सू। त। अ। द्वि। त्रि। इत्येवंपूर्वात् शाणान्ताद्विगोरार्हीये
ष्वर्थेष्वण् वा स्यात्। चकाराद्यच्च। द्वैशाणम्। द्विशाण्यम्। द्विशाणम्। त्रैशाणम्। त्रिशाण्यम्। त्रिशाणम्। ३७। तेन क्रीत
म्। कौ। सू। त। अ। तृतीयान्तात्क्रीतमित्येतस्मिन्नर्थे ठञादयः प्रत्यया भवन्ति। गोपुच्छिकम्। नैष्किकम्। शत्यम्। शतिकम्। ते
न क्रीतमिति करणात्। १। इह माभूत्। देवदत्तेन क्रीतम्। अकर्त्तृकारकात्। २। इह माभूत्। देवदत्तेन पाणिना क्रीतम्। संख्यै
कवचनाद्विगोश्चोपसंख्यानम्। ३। संख्या। पञ्चभिः क्रीतम्। पञ्चकम्। एकवचनग्रहणं नियमार्थम्। इह माभूत्। सूर्पा
भ्यां क्रीतम्। सूर्पैः क्रीतम्। द्विगोः। द्वाभ्यां सूर्पाभ्यां क्रीतम्। द्विसूर्प्यम्। एकवचनग्रहणकृतनियमबाधनार्थं संख्याग्र
हणं द्विगुग्रहणं च कृतम्। परिमाणस्य संख्यायाः पदैकवचनेनैतदन्तादिति वक्तव्यम्। ४। परिमाणसंख्याभ्यां तत्के पदैकवचनमि
त्यर्थः। इहापि यथा स्यात्। मुद्गैः क्रीतम्। मौद्गिकम्। माषैः क्रीतम्। माषिकम्। ३८। तस्य निमित्तं संयोगोत्पातौ। कौ। सू। त।

श्च। षष्ठ्यन्तान्निमित्तमित्येतस्मिन्नर्थे ठञादयः प्रत्यया भवन्ति। यन्निमित्तः संयोग उत्पातो वा भवति। शतस्य निमित्तम्। शत्यः। शा-
तिकः संयोग उत्पातो वा। प्राणिनां शुभाशुभसूचको भूतविकार उत्पातः। शत्यम्। शात्यम्। शतिकं दक्षिणाक्षिस्पन्दनम्। तस्य
निमित्तप्रकरणे वातपित्तश्लेष्मभ्यः शमनकोपनयोरुपसंख्यानम्॥ ठक्। वातस्य शमने कोपने वा। वातिकम्। पित्त। पैत्ति-
कम्। श्लेष्म। श्लैष्मिकम्। वातपित्तश्लेष्मभ्यः शमनकोपनयोरुपसंख्यानम्॥ कौ। सू। त। श्र। सन्निपाताच्च। २। कौ। सू। त। श्र-
ठक्। सान्निपातिकम्। ३९। गोद्व्यचः संख्यापरिमाणाश्वादेर्यत्। कौ। सू। त। श्र। गो। इत्येतस्मात् द्व्यचश्च संख्यापरिमाणाश्वादिव-
र्जिताद्यत् स्यात्। गोर्निमित्तं संयोग उत्पातो वा। गव्यः। द्व्यचः। धन्यम्। यशस्यम्। स्वर्ग्यम्। गोद्व्यचः किम्। वैजयिकः। असंख्या-
परिमाणाश्वादेः किम्। पञ्चकम्। सप्तकम्। परिमाण। प्रास्थिकम्। अश्वादेः। आश्विकं। आश्मिकम्। अश्व। अश्मन्। गण।
ऊर्णा। उमा। गङ्गा। वर्षा। वसु। अश्वादिः। यत्प्रकरणे ब्रह्मवर्चसाच्च॥ ब्रह्मवर्चसादुपसंख्यानम्॥ इति काशिका। कौ।
सू। त। श्र। ब्रह्मवर्चस्यः। ४०। पुत्राच्छ च। कौ। सू। त। श्र। पुत्र। इत्येतस्मात् छः स्यात्। चकाराद्यत्। पुत्रस्य निमित्तं संयोग उत्पातो
वा। पुत्रीयः। पुत्र्यः। इत्यादिसूत्रसप्तकं मध्ये मन्दव्याख्यातम्। ४१। सर्वभूमिपृथिवीभ्यामणञौ। कौ। सू। त। श्र। सर्वभूमि। पृथि-
वी। इत्येताभ्यां क्रमात् अञ्। इत्येतौ प्रत्ययौ भवतः। सर्वभूमेर्निमित्तं संयोग उत्पातो वा। सार्वभौमः। अत्र शतिकादित्वादुभयप-
दवृद्धिः। पार्थिवः। ४२। तस्येश्वरः। कौ। सू। त। श्र। सर्वभूमि। पृथिवी। इत्येताभ्यां षष्ठ्यन्ताभ्यामीश्वर इत्येतस्मिन्नर्थे क्रमात्
अण्। अञ्। इत्येतौ प्रत्ययौ भवतः। सर्वभूमेरीश्वरः। सार्वभौमः। पृथिव्या ईश्वरः पार्थिवः। प्रत्ययार्थानन्तरत्वार्थः पुनस्तस्ये-
ति समर्थविभक्तिनिर्देशः। अन्यथा ईश्वरः प्रत्ययार्थविशेषणं संभाव्येत। ४३। तत्र विदित इति च। कौ। सू। त। श्र। सर्वभूमि
पृथिवी। इत्येताभ्यां सप्तम्यन्ताभ्यां विदित इत्येतस्मिन्नर्थे क्रमात् अण्। अञ्। इत्येतौ प्रत्ययौ भवतः। सर्वभूमौ विदितः। सार्व-
भौमः। पार्थिवः। ४४। लोकसर्वलोकाट्ठञ्। कौ। सू। त। श्र। लोक। सर्वलोक। इत्येताभ्यां सप्तम्यन्ताभ्यां विदित इत्येतस्मिन्

र्थे ठञ्स्यात्। लोके विदितः। लौकिकः। सार्वलौकिकः। अनुशातिकादीनाम् उभयपदवृद्धिः। ४५। तस्य वापः। कौ। सू। त।
अ। षष्ठ्यन्ताद्वाप इत्येतस्मिन्नर्थे यथाविहितं ठञादयः प्रत्यया भवन्ति। उप्यतेऽस्मिन्निति वापः। प्रस्थस्य वापः। प्रास्थिकं
क्षेत्रम्। द्रौणिकम्। खारीकम्। ४६। पात्रात् ष्ठन्। कौ। सू। त। अ। पात्र इत्येतस्मात् ष्ठन् स्यात्। पात्रस्य वापः पात्रिकं क्षेत्रम्।
पात्रिकी क्षेत्रभक्तिः। ४७। तदस्मिन्वृद्ध्यायलाभशुल्कोपदा दीयते। कौ। सू। त। अ। प्रथमान्ताद् अस्मिन्निति सप्तम्यर्थे यथा
विहिते ठञादयः प्रत्यया भवन्ति। यः प्रथमान्तार्थो वृद्ध्यादिः स दीयते चेत्। यच्चास्मिन्वृद्धिः आयः लाभः शुल्कं उपदा वा
दीयते। पञ्चकः। शत्यः। शतिकः। उत्तमर्णेन यधनातिरिक्तं देयं वृद्धिः। ग्रामादिषु स्वामिग्राह्यो भागः आयः। पटादीनां मूल्याति
रिक्तं द्रव्यं लाभः। रक्षानिर्वेशो राजभागः शुल्कः। उत्कोचः उपदा। तदस्मिन्दीयते तदस्मा इति वा॥ चतुर्थ्यर्थे उपसंख्यानम् १
इति काशिका। कौ। सू। त। अ। पञ्चास्मै वृद्ध्यादिर्दीयते। पञ्चको देवदत्तः। तदस्मिन्दीयत इत्येव सिद्धम्। इति भाष्यम्। ४८।
पूरणार्द्धाट्ठन्। कौ। सू। त। अ। पूरणप्रत्ययान्तात्। अर्द्ध। इत्येतस्माच्च ठन् स्यात्। द्वितीयो वृद्ध्यादिरस्मिन्दीयते। द्वितीयिकः। तृ
तीयिकः। अर्द्धिकः। अर्द्धशब्दो रूपकार्द्धे रूढः। ठन्प्रकरणे अवन्तात् उपसंख्यानम्। २। ४९। भागाद्यच्च। कौ। सू। त। अ। भाग।
इत्येतस्माद्यत्स्यात्। चकाराट्ठन्। भागो वृद्ध्यादिरस्मिन्दीयते। भाग्यम्। भागिकं शतम्। भाग्या। भागिका विंशतिः। भागश
ब्दो रूपकार्द्धे रूढः। इत्यादिसूत्रत्रये भाष्येन व्याख्यातम्। ५०। तद्धरति वहत्यावहति भाराद्वंशादिभ्यः। कौ। सू। त। अ।
वंश। इत्येवमादिभ्यः परो यो भार इत्येष तत्प्रकृतिका। द्वितीयान्तात् हरति। वहति। आवहति। इत्येतेष्वर्थेषु यथाविहितं ठ
ञादयः प्रत्यया भवन्ति। वंशभारं हरति वहति आवहति वा। वांशभारिकः। कौटजभारिकः। भारादिति किम्। वंशं हरति। वंशा
दिभ्यः किम्। व्रीहिभारं हरति। भारभूतेभ्यो वंशादिभ्य इति व्याख्यानान्तरम्। भारभूतान्वंशान् हरति। वांशिकः। वंश। कुटज।
बल्वज। मूल। स्थूण। अक्ष। अश्मन्। अश्व। श्लक्ष्ण। इक्षु। खट्वा। वंशादिः। ५१। वस्नद्रव्याभ्यां ठन्कनौ। कौ। सू। त। अ। वस्न

इय। इत्येताभ्यां द्वितीयान्ताभ्यो हरत्यादिष्वर्थेषु यथाक्रमेठन्। कन्। इत्येतौ प्रत्ययौ भवतः। वस्नं हरति वहति आवहति वा। व
स्तृ॰प॰ स्निकः। इयकः। ५२। संभवत्यवहरतिपचति। कौ। सू। त। अ। द्वितीयान्तात्संभवति। अवहरति। पचति। इत्येतेष्वर्थेषु
१६० यथाविहितं ठञादयः प्रत्यया भवन्ति। प्रस्थं संभवति। प्रास्थिकः कटाहः। प्रस्थं स्वस्मिन्समावेशयतीत्यर्थः। कुडवमवह
रति। कौडविकः। उपसंहरतीत्यर्थः। प्रस्थं पचति। प्रास्थिकी ब्राह्मणी। तत्पचतीति द्रोणादण्वा। १। कौ। सू। त। अ। द्रोणं
पचति। द्रौणी। द्रौणिकी। ५३। आढकाचितपात्रात्खोऽन्यतरस्याम्। कौ। सू। त। अ। आढक। आचित। पात्र। इत्येतेभ्यो
द्वितीयान्तेभ्यः संभवत्यादिष्वर्थेषु वा खः। स्यात्। पक्षे ठञ्। आढकं संभवति अवहरति पचति वा। आढकीना। आ
ढकिकी। आचितीना। आचितिकी। पात्रीणा। पात्रिकी। इत्यादि स्वयमूह्यं भाष्येऽनन्याख्यानम्। ५४। द्विगोः ष्ठंश्च। कौ।
सू। त। अ। आढक। आचित। पात्र। इत्येतदन्ताद्द्विगोः संभवत्यादिष्वर्थेषु ष्ठन् स्यात्। चकारात्खश्च वा। पक्षे ठञोलुक्
द्व्याढकिकी। द्व्याढकीना। द्व्याढकी। द्व्याचितिकी। द्व्याचितीना। द्व्याचिता। द्विपात्रिकी। द्विपात्रीणा। द्विपात्री। ५५। कुलि
जाल्लुक्खौ च। कौ। सू। त। अ। कुलिज। इत्येतदन्ताद्द्विगोः संभवत्यादिष्वर्थेषु लुक्खौ वा भवतः। चकारात् ष्ठंश्च। द्विकुलि
जी। ठञो लुक्। लुकोऽभावे द्वैकुलिजिकी। खः। द्विकुलिजीना। ष्ठन्। द्विकुलिजिकी। कुलिजाच्चेति सिद्धे लुक्खग्र
हणमनर्थकं पूर्वं सिंहावलोकभावात्। १। चानुकृष्टेनोत्तरत्र। २। परिभाषेयम्। ५६। सोऽस्यांशवस्नभृतयः। कौ। सू। त
अ। प्रथमान्तादस्येति षष्ठ्यर्थे यथाविहितं ठञादयः प्रत्यया भवन्ति। प्रथमान्तोऽर्थोऽंशवस्नभृतयश्चेद्भवन्ति। प
ञ्च अंशो वस्नं भृतिर्वा अस्य। पञ्चकः। शत्यः। शतिकः। अंशो भागः। वस्नं मूल्यम्। भृतिर्वेतनम्। भाष्ये नेदं व्याख्या
तम्। ५७। तदस्य परिमाणम्। कौ। सू। त। अ। प्रथमान्तादस्येति षष्ठ्यर्थे यथाविहितं ठञादयः प्रत्यया भवन्ति। यः प्र
थमान्तार्थः स चेत्परिमाणं भवति। प्रस्थं परिमाणमस्य। प्रास्थिको राशिः। शत्यः। शतिकः। तदस्य ग्रहणं पुनर्विधा १६०

स्यादेशस्यपादेशप्रसङ्गऊतस्याऽसिद्धत्वात्।३।९०।दोषोणौ।कौ।ति।णि।दोषु।इत्येतस्याऽङ्गस्योपधायाणिप्रत्ययेपरेऊइत्येष
ऊइत्येषआदेशःस्यात्।दूषा।दूषयति।दूषयतः।दूषयन्ति।णौकिम्।दोषः।दोषिग्रहणंषा।२।अप्यादेशप्रतिषेधार्थंविकृतग्रह
णम्।२।९१।वाचित्तविरागे।कौ।ति।णि।दोषु।इत्येतस्याऽङ्गस्योपधायाणिचिपरेचित्तविरागेऽर्थेऊइत्येषआदेशोवास्यात्।
चित्तंदूषयति।दोषयतिवाकामः।चित्तविरागेकिम्।धनंदूषयति।इत्यादिसूत्रद्वयंभाष्येतनव्याख्यातम्।९२।मितांह्रस्वः।
कौ।ति।म्वा।मित्संज्ञकानांधातूनामुपधायाणौपरेह्रस्वःस्यात्।घटादयोमितः।घटयति।व्यथयति।जनयति।रजयति
शमयति।ज्ञपयति।९३।चिण्णमुलोर्दीऽन्यतरस्याम्।कौ।ति।भा।चिण्।णमुल्।इत्येतत्परकेणौपरेमित्संज्ञकानांधातूना
मुपधायादीर्घोवास्यात्।चिण्।अशमि।अशामि।अतमि।अतामि।णमुल्।शमंशमम्।शामंशामम्।तमंतमम्।तामंतामम्
दीर्घः।किम्।अशामि।अशामि।अत्राणिजन्तात्स्मिविह्रस्वविकल्पोनस्यात्।णिलोपस्यस्थानिवत्त्वात्।दीर्घविधानेनत्स्था-
निवत्त्वनिषेधोऽस्तीतिदीर्घविकल्पोभवति।चिण्णमुलोर्णौच्वेतेनानायङ्लोपेच।।णिजन्तात्णिचि।यङन्ताच्चणौचिणि
लोपाऽल्लोपयोःस्थानिवत्त्वाच्चिण्णमुल्परत्वेनास्तीतिवचनम्।प्रतिषिध्यतेऽत्रस्थानिवद्भावः।दीर्घविधिंप्रतिनस्थानिवा
दिति।इतिभाष्यम्।९४।खचिह्रस्वः।कौ।क्रा।खच्प्रत्ययपरकेणौपरेमितांधातूनामुपधायाह्रस्वःस्यात्।द्विषन्तपः।परन्त
पः।पुरन्दरः।इत्यादिसूत्रद्वयंभाष्येतनव्याख्यातम्।९५।ह्लादोनिष्ठायाम्।प्रह्लादयति।कौ।क्रा।ह्लादी।इत्येतस्यनिष्ठा
संज्ञकेपरेउपधायाह्रस्वःस्यात्।प्रह्लन्नः।प्रह्लन्नवान्।निष्ठायांकिम्।प्रह्लादयति।प्रह्लादइतियोगविभागःक्रियते
क्तिन्प्रह्लत्तिः।९६।छादेर्घेऽद्व्युपसर्गस्य।कौ।कृ।उ।छदा।इत्येतस्यण्यन्तस्याऽङ्गस्योपसर्गद्वयरहितस्यघप्रत्ययेपरेउपधा
याह्रस्वःस्यात्।छद।प्रच्छदः।तनुच्छदः।दन्तच्छदः।अद्व्युपसर्गस्यकिम्।समुपच्छादः।अद्विप्रभृत्युपसर्गस्येतिवक्तव्यम्
समुपाभिच्छदः।९७।इस्मन्त्रन्क्विषुच।कौ।क्रा।इस्।मन्।त्रन्।क्विप्।इत्येतेषुपरेषुछादेरङ्गस्योपधायाह्रस्वःस्यात्

दिषन्तपः परन्तपः पुरन्दरः इत्यादिसूत्रद्वयंभाष्येनव्याख्यातम् ९५ ह्लादोनिष्ठायाम् कौ क्त ह्लादीः इत्ये
भा॰ तस्यनिष्ठासंज्ञकेपरेउपधायाह्रस्वः स्यात् प्रह्लन्तः प्रह्लन्नवान् निष्ठायांकिम् प्रह्लादयति ह्लादइतियोगवि
२६३ भागः क्रियते क्तिन् प्रह्लूतिः ९६ छादेर्घेऽद्व्युपसर्गस्य कौ क्त उ छद इत्येतस्यण्यन्तस्याङ्घेऽद्व्युपसर्गेदपरेहि
268 तस्यघप्रत्ययेपरेउपधायाह्रस्वः स्यात् छद प्रच्छदः तनुच्छदः दन्तच्छदः अद्व्युपसर्गस्याकिम् समुपच्छादः
अद्विप्रभृत्युपसर्गस्येतिवक्तव्यम् ।। समुपाभिच्छदः ९७ ।। छद इस् छदिः ···· छद्म त्रन् छत्रम् । क्विप् धाम
छत् इत्यादिसूत्रत्रयंभाष्येनव्याख्यातम् ९८ गमहनजनखनघसांलोपः क्ङित्यनङि कौ ति स्वा गम्लृ । ह
न । जन । खन । घस्लृ । इत्येतेषां धातूनामङ्भिन्ने अजादौ क्ङिति तिङ्तिंव प्रत्ययेपरेउपधायालोपः स्यात् गम्लृ । जग्म
तुः जग्मुः हन । जघ्नतुः जघ्नुः । जन । जज्ञतुः । जज्ञुः । जज्ञे । जज्ञाते । जज्ञिरे । खन । चख्नतुः । चख्नुः घस । जक्षतुः ज
क्षुः क्ङितिकिम् । गमनम् अनङिकिम् अगमत् अघसत् अजादौकिम् । गम्यते ९९ तनिपत्योश्छन्दसि कौ
वे अ प तनु पत्लृ इत्येतयोर्वेदे ङ्भिन्ने अजादौ क्ङितिप्रत्ययेपरेउपधायालोपः स्यात् वितत्निरे कवयः शकुनी
इवपप्तिम वितेनिरे विपेतिम इतिलोकेभवति १०० घसिभसोर्हलिच कौ वे अ ष घस्लृ भस इत्येतयोर्वेदे ह
लादावजादौ च क्ङितिप्रत्ययेपरेउपधायालोपः स्यात् अद साग्धिश्चमे क्तिन् बहुलंछन्दसीतिघस्लादेशः उप
धालोपः झलोझलीतिसलोपः घतम् घकारस्यजश्त्वेनगकारः ग्धिः समावाग्धिः भस । बब्धाम् लोट् ।
ताम् । श्लावितिद्वित्वम् । उपधालोपः सलोपः धतम् भकारस्यजश्त्वेनबकारः अजादौ बप्सति क्ङितिकिं
बभस्ति हलग्रहणं अर्थवत्वम् अन्यत्रापिदर्शनात् १०१ हुझल्भ्योहेर्धिः कौ ति अ हु इत्येतस्मात् झलन्ता
च्चधातोः परस्यहलादेर्हेःस्थाने धि इत्येषआदेशः स्यात् हु जुहुधि झलन्तेभ्यः छिदिर । छिन्द्धि । भिदिर ।

वैयाकरनसरस्वत्व पत्रे ६

श्लो १२८